संस्कृत–त्रैमासिकी
अङ्कौः ३ – ४

यू.जी.सी. केयर–लिस्टेड

ISSN : २२७८–३७४१
जुलाई २०२५, अक्टूबर २०२५
वर्षः – ४६

# अजस्रा

(International Peer Reviewed Refereed Research Journal)

सम्पादकः
प्रो० प्रयागनारायणमिश्रः

## अखिल-भारतीय-संस्कृत-परिषद्
## लखनऊ

"This Journal/Magazine is published under the Scheme of financial assistance for Sanskrit Promotion, Govt. of India implemented by the Central Sanskrit University, Delhi"

# नियमाः

१— अजस्रानाम्नीयं त्रैमासिकी संस्कृतपत्रिका मकर—मेष—कर्क— तुला—सङ्क्रान्तिषु (जनवरी—अप्रैल—जुलाई—अक्तूबरमासेषु) प्रकाशिता भवति।

२— अस्याः पत्रिकाया उद्देश्यं संस्कृतसम्पदां संरक्षणम्, विभिन्नपद्धतिजुषां रचनानां संवर्धनम्, प्रातिभनूतनकृतीनां संसर्जनञ्च।

३— समालोचनाभिलाषुकैः प्रकाशकैर्लेखकैर्वा नवीनकृतीनां द्वयी प्रेषणीया।

४— पत्रिकायामस्यां कवितालेखकथानाटकादीनि शोधनिबन्धाश्च स्थानं प्राप्स्यन्ति।

५— प्रकाशनाय प्रेषिताः सर्वविधा रचना एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरै—र्लिखिताः टङ्किता वा स्युः।

६— कृतीनां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादके संरक्षितोऽस्ति।

७— अस्वीकृता लेखाः टिकटसहितपत्रपुटके लब्धे सति लेखकेभ्यः प्रत्यावर्तिष्यन्ते।

संस्कृत-त्रैमासिकी यू.जी.सी. केयर–लिस्टेड ISSN-२२७८–३७४१

# अजस्रा

**(International Peer Reviewed Refereed Research Journal)**

जुलाई २०२५, अक्टूबर २०२५ अङ्कौ ३–४ वर्षः –४६

सम्पादकः

प्रो० प्रयागनारायणमिश्रः


## अखिल–भारतीय–संस्कृत–परिषद्

देववाणी–भवनम्, अलीगञ्जम्,

लखनऊ–२२६०२४

*"This Journal/Magazine is published under the Scheme of financial assistance for Sanskrit Promotion, Govt. of India implemented by the Central Sanskrit University, Delhi"*

**शुल्कम्**

| | | |
|---|---|---|
| वार्षिकम् | ५००.०० | रूप्यकाणि |
| एकस्याऽङ्कस्य | १२५.०० | रूप्यकाणि |
| आजीवनम् | ५१००.०० | रूप्यकाणि |
| संयुक्ताङ्कस्याऽस्य | २५०.०० | रूप्यकाणि |


**प्राज्ञपरिषत्**

प्रो० राधावल्लभत्रिपाठी

प्रो० अभिराजराजेन्द्रमिश्रः

प्रो० आजादमिश्रः

प्रो० दीप्तित्रिपाठी

प्रो० श्रीनिवासवरखेडी

प्रो० रमेशकुमारपाण्डेयः

प्रो० मुरलीमनोहरपाठकः

प्रो० बिन्दाप्रसादमिश्रः

प्रो० राजारामशुक्लः

प्रो० बिहारीलालशर्मा

प्रो० शशितिवारी

प्रो० शिशिरकुमारपाण्डेयः

प्रो० रामसेवकदुबे

प्रो० रामसुमेरयादवः

**प्रधान–सम्पादकः**

**प्रो० रमाशङ्करमिश्रः**

**सम्पादक :**

**प्रो० प्रयागनारायणमिश्रः**


---


अखिल भारतीय संस्कृत–परिषद्, देववाणी–भवनम्, अलीगञ्ज, लखनऊ की ओर से मन्त्री, अखिल भारतीय संस्कृत परिषद् द्वारा प्रकाशित और प्रो० प्रयाग नारायण मिश्र द्वारा सम्पादित तथा श्री मनीष मेहता द्वारा प्नार आफसेट, 17 अशोक मार्ग, हजरतगञ्ज, लखनऊ से मुद्रित।

# अनुक्रमः


| | विषयाः | लेखकाः | पृ.सं. |
|---|---|---|---|
| | सम्पादकीयम् | – | v |
| १. | मनःशरीरयोः वायुतत्त्वप्रभावः | डॉ. बृजेशकुमारमिश्रः | ७ |
| २. | पूर्वोत्तर–वैदिककालयोः स्त्रीणां सामाजिकस्थितिः | श्रीमती रूपाली दत्ता | १८ |
| ३. | वेदेषु अध्यात्मतत्त्वम् | डॉ. जितेन्द्रकुमारः | ३० |
| ४. | करुणरसस्याऽऽस्वादमूलकचिन्तनम् | डॉ. शैलेशकुमारमिश्रः | ४३ |
| ५. | जितेन्द्रियो हि नृपतिः भूयसीं श्रियमश्नुते | डॉ. त्यागराजन् एस. | ५२ |
| ६. | शतपथब्राह्मणे समुपलब्धस्य प्रजापतिशब्दस्य अर्थसमीक्षणम् | डॉ. प्रतापचन्द्ररायः | ७३ |
| ७. | मनसः स्वरूपस्य विविधायामाः | डॉ० रञ्जनलता | ८६ |
| ८. | अलङ्कारशास्त्रे तुल्ययोगिता | डा. अनुपकुमाररानो | ६५ |
| ६. | आचार्यविश्वनाथदृष्ट्या संस्कृतसाहित्यस्य काव्यप्रकारविभागः | डॉ० देशराजः | १११ |
| १०. | इतिहासे नगरनिर्माणविमर्शः | डॉ. आर. शेषाद्रिः | १२८ |
| ११. | ऋकारलृकारयोः सवर्णविधिरिति वार्तिकविमर्शः | डॉ. उत्तम–माझिः | १४६ |
| १२. | काव्यस्यालौकिकत्वानुसन्धानम् | डॉ० शुभङ्करबसाकः | १५७ |
| १३. | श्रीमद्भागवतमहापुराणे तथा वैष्णवदर्शने गोपीतत्त्वम्–एकं पर्यालोचनम् | डॉ० विप्लवचक्रवर्ती | १६५ |
| १४. | तर्कसङ्ग्रहस्य मङ्गलाचरणनिरूपणे निरुक्ति–पदकृत्य–वाक्यवृत्तिटीकानां तुलनात्मकमध्ययनम् | नारुगोपालदासः | १७३ |

| | | | |
|---|---|---|---|
| १५. | काव्यानन्दविमर्शः | पीताम्बरनिराला | १८६ |
| १६. | योगोपनिषदनुसारं यमतत्त्वविश्लेषणम्, साम्प्रतं तत्प्रासङ्गिकता च | अलोकबेपारी | १९६ |
| १७. | यमुना कृष्णभक्तेः पर्यायः | डॉ. श्रुतिरायः | २०६ |
| १८. | विद्योत्तमाकालिदासीयं महाकाव्ये वर्णविन्यासवक्रता | पबित्रदासः | २१६ |
| १९. | शतपथब्राह्मणे वस्त्रालङ्करणविमर्शः | डॉ. रेनूकोछड़शर्मा | २२८ |
| २०. | शिवलीलामृतमहाकाव्यम्—एकमध्ययनम् | डॉ. देवाशीषशमिश्रः | २३६ |
| २१. | संस्कृतवाङ्मये आदर्शभूतं जीवनस्वरूपम् | डॉ० अभिमन्युसिंहः | २५३ |
| २२. | साङ्ख्यदर्शनानुसारं मनुष्यसृष्टेः क्रमो वैज्ञानिकता च | डॉ० सूरजरॉयः | २६२ |
| २३. | संस्कृते समानरूपाणि, विभक्तीनाञ्च विशिष्टमध्ययनम् | डॉ. उषाराणी सङ्का | २६६ |
| २४. | वृक्षायुर्वेदस्य वैज्ञानिकता—एका दृष्टिः | डॉ० प्रीतिरञ्जनमाझी | २८१ |
| २५. | संस्कृतसाहित्ये राष्ट्रचिन्तनम् | डॉ० सूर्यप्रकाशशुक्लः | २९१ |
| २६. | श्रीमद्भगवदगीतायां प्रबन्धसूत्राणि | डॉ० सरिता शर्मा | २९९ |
| २७. | संस्कृतवाङ्मये वर्णितानि शिक्षासूत्राणि | डॉ० नरेन्द्रकुमारपाण्डेयः | ३१० |
| २८. | अभिज्ञानशाकुन्तले प्रतिपादितं पर्यावरणसंरक्षणचैतन्यम् | डॉ० पवनकुमारपाण्डेयः | ३२५ |

# सम्पादकीयम्

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' इति वचनमाश्रित्य संस्कृत–संस्कृतिसमाराधनतत्परा लक्ष्मणपुरस्थैका संस्था उत्तरप्रदेश–सर्वकारस्य संस्कृतिविभागस्यार्थिकानुदानेन खलु विश्वविश्रुता चकास्ति अखिल–भारतीय–संस्कृत–परिषद् नाम्ना। प्रायः सप्तत्यधिकवर्षेभ्यः संस्कृतसाधनायामनन्यमनसाऽनुरक्तेयं संस्था नैकविधानि संस्कृत–प्रचार–प्रसारानुसन्धानकर्माणि सम्पादयति। मासिकविद्वत्सङ्गोष्ठी–विशिष्ट–व्याख्यानमाला राष्ट्रियाऽन्ताराष्ट्रियसंस्कृतसम्मेलनादिमाध्यमेन संस्कृतजगति प्रवर्तमानानामभिनवज्ञानविज्ञानविषयाणां जनसामान्येषु विद्वत्तल्लजेषु च अभिनवप्रसारोऽहर्निशं विधीयतेऽनया परिषदा सुष्ठुरूपेण।

एतस्मिन्नेवोपक्रमे संस्थेयं प्राय ऊनपञ्चाशद्वर्षेभ्यः अजस्रा–नाम्नीं त्रैमासिकपत्रिकां प्रतिवर्षं संयुक्ताङ्कद्वयरूपेण वारद्वयं प्रकाशयति। सम्प्रति ऊनपञ्चाशद्वर्षस्योत्तरार्द्धस्यास्मिन् अङ्के वेद–दर्शन–साहित्य–काव्यशास्त्रसम्बद्धानि अष्टाविंशति–शोधपत्राणि अनुसन्धातॄणां प्रमोदाय प्रकाश्यन्ते। संयुक्ताङ्केऽस्मिन् प्रकाशनार्थं यैः शोधचिकीर्षुभिः स्वकीयानि महार्हशोधपत्राणि प्रेषितानि तेभ्यः सर्वेभ्यो हार्दं साधुवादं व्यतीर्य सम्पादकोऽयं महान्तं प्रमोदमनुभवति। अखिलभारतीयसंस्कृतपरिषत्कार्यकारिणी–समितिसदस्यरूपेण येन विद्वद्द्वयेन दत्तचित्तेन प्रूफसंशोधनकर्मणि महत्साहाय्यं व्यधायि तस्मायपि कार्तज्ञनिवेदनमत्यावश्यकमिति मत्वा डॉ० रेनूकोछड़शर्ममहोदयाभ्योऽथ च डॉ० सन्दीपकुमारमिश्रवर्येभ्य आशीर्वचोभिस्सह सस्नेहं धन्यवादवचांसि विनिवेद्य परमतुष्टिरनुभूयते। संयुक्ताङ्केऽस्मिन् प्रकाशितैः शोधपत्रैः शोधच्छात्राणां संस्कृतानुरागिणां पत्रिकाऽध्येतॄणां च सर्वेषां महानुपकारो भविष्यतीति सम्पादक ईहति।

इतिशम्

**कार्तिक–पूर्णिमा**
**संवत् २०८२**

**(प्रो० प्रयागनारायणमिश्रः)**
**सम्पादकः**

# मनःशरीरयोः वायुतत्त्वप्रभावः

**डॉ. बृजेशकुमारमिश्रः**
*सहायक–अध्यापकः*
*श्रीसत्यसाई–मानवाभ्युदयः विश्वविद्यालयः, कलबुर्गी, कर्णाटकम्*

**शुभश्रीपटेलः, ऋग्वेददेशपाण्डेयश्च**
*संस्कृताध्ययन–विभागः*
*हैदराबाद–केन्द्रीय–विश्वविद्यालयः*

**शोधपत्रसारांशः**

शरीरेन्द्रियमनसस्संयोगमेव स्वास्थ्यमायुः वाऽस्ति। तस्य निर्धारणे विविधानां तत्त्वानां प्रभावः भवति परञ्च एतेषु तत्त्वेषु वायुतत्त्वप्रभावोऽधिकतया परिलक्ष्यते। पञ्चमहाभूतेष्वन्यतमं वर्ततेवायुतत्त्वम्। तेन न केवलं शरीरमपि तु मनस्तत्वमपि प्रभावितं भवति। आयुर्वेदादि–पारम्परिकचिकित्साविज्ञानेषु वायुतत्त्वं गतिशीलशक्तिरूपेण वर्णितम्। यत् मनसः पक्षेसंज्ञानात्मकप्रक्रियां शरीरपक्षे शरीरान्तर्गतप्राणापानादिवायुं च नियन्त्रयति। शरीरस्य मनसश्च गतिशीलत्वं वायुतत्त्वेनैव विधीयते। कीदृशः सः वायुः? कीदृशश्चतस्य प्रभावः? कथं सः मनश्शरीरञ्च प्रभावितं करोतीत्यस्येव विश्लेषणस्य कृतप्रयासः पत्रेऽस्मिन्। अथ चास्मिन् शोधलेखे प्रयुक्ताः गुणात्मिकाः पद्धतयः। अस्मादध्ययनात् अपेक्षितं यत् वायुतत्त्वस्य सन्तुलनेन मस्तिष्कस्य कार्यम्, भावनात्मकस्थिरता, समग्रशारीरिकस्वास्थ्यं च सम्पद्यते। तस्यासन्तुलनेन चिन्ता, चञ्चलता, शरीरस्य प्रक्रियासु विघटनं च भवितुमर्हति। निष्कर्षरूपेण पत्रमिदं स्वास्थ्यस्य सन्दर्भे पारम्पारिकचिकित्सायां वायुतत्त्वस्य महत्त्वं प्रस्तौति। तथा च समग्रस्वास्थ्यप्रबन्धने प्रभावी साधनरूपेण वायुतत्त्वस्य महत्त्वं विशदयति।

**मुख्यशब्दाः–** वायुः, आयुः, स्वास्थ्यम्, मनस्तत्त्वम्, आयुर्वेदः

**परिचयः–**"शतायुर्वैपुरुषः", "जीवेम शरदः शतम्" इत्यादिभिर्वैदिकवाक्यैः

आयुषः महत्त्वं ज्ञातुं शक्यते। यदायुर्नाम तत्त्वं वेदवाक्यैः समाराधनीयं तत् कीदृक् महत्त्वं विधत्ते इत्यस्माभिः चिन्तनीयम्। आयुर्नाम कश्चिदमूर्त्ततत्त्वं यस्य साक्षात्कारः कर्तुं न शक्यते परञ्च विविधेषु कार्येषु अस्योपलब्धीनां ज्ञानं भवति। निश्चितावधेः पश्चात् प्रत्येकद्रव्यं पाञ्चभौतिकेऽस्मिन् संसारे विलीयत इति लोके दृश्यते। तद्द्रव्यं सजीवं भवेत् यद्वा निर्जीवं सामान्येषु शब्देषु तस्याः निश्चितावधेः नामैव आयुरिति। तदनुगुणमेव लोकेषु कथ्यते– कस्यचित् पदार्थस्य जनस्य वा आयुरेतावता एवासीत्। एवं हि आयुषः कृते प्रयुज्यमाणैः शब्दैः– दीर्घायुरल्पायु इत्यादिभिः आयुरवधिरूपेण प्रमाणीक्रियते। अतः आयुषः पक्षैकं भवति– कस्यचित् पदार्थस्य जनस्य वा सत्तावधिः।

आयुषः द्वितीयं पक्षं स्वास्थ्यविषयं लक्ष्यीकरोति। तदनुगुणं सुखमय–मस्यायुः दुःखमयं तस्यायुः वेत्यादिभिः वाक्यैः निर्दिश्यते। अत्रायुर्नाम मनश्शरीरयोः स्वास्थ्यमेव। अस्यानुरूपमेव महर्षि चरकेण शारीरिकस्वास्थ्यस्य कृते सुखायुः, मानसिकस्वास्थ्यस्य कृते दुःखायुश्चेति प्रयुक्तः। यतोहि आयुर्वर्धनाय स्वास्थ्यमेकं महत्त्वपूर्णं कारकं भवति।

आयुषः तृतीयपक्षत्वेन, यया शरीरमिदं क्रियात्मकं भवति सा प्राणशक्तिः लक्ष्यीभवति। एवं हि आयुषः पक्षत्रयम्– जीवनम् (प्राणशक्तिः), जीवनावधिः, सुख–दुःखात्मकं जीवनस्वरूपञ्च।

महर्षिचरकेण आयुषः त्रयाः पक्षा उल्लिखिताः। दीर्घञ्जीविताध्यायं विरचय्य जीवनावधिर्निर्दिष्टा। हितायुरहितायुस्सुखायुर्दुःखायुः इत्यादिनां कथनेन स्वास्थ्यपक्षं निर्दिष्टम्। अथ चायुषः लक्षणे प्राणशक्तित्वेनायुः निरूपितम्। एतेषु त्रिषु प्राणशक्तिरेवप्रथमसोपानं यया विना जीवनं न सम्भवति। अतः महर्षिचरकेण आयुषः लक्षणे तस्यैव निरूपणं कृतम्–

**शरीरेन्द्रियसत्वात्मसंयोगो धारि जीवितम्।**
**नित्यगानुबन्धश्च पथ्यायैरायुरुच्यते।**[1]

१. चरकसंहिता, सूत्रस्थानम् १.४२

अस्य सूत्रानुसारं शरीरेन्द्रियसत्वात्मसंयोगः आयुर्भवति। प्रतिपलं गम्यमानत्वेन नित्यगा अथ च शरीरेन्द्रियसत्वात्मनामनुबन्धनाद् अनुबन्धमेते आयुषः पर्यायाः। प्रसङ्गेऽस्मिन् संयोगसंहृत्योः भेदस्य स्पष्टीकरण–मावश्यकम्। वस्तुपदार्थानामेकस्थाने एकत्रीकरणन्नाम संहृतिः। यथा–अग्निपेटिकाकाष्ठयोः एकत्रीकरणं परमेकत्रीकरणमात्रेण न स्यादग्नेरुत्पत्तिः यावत् वर्तिकयाप्रज्ज्वालनं न क्रियते। एवं हि शरीरेन्द्रियसत्वात्मसंहृतिमात्रेणैव आयुषरुत्पत्तिःयावत् चेतनावृत्त्या प्रज्ज्वालनं न क्रियते तावन्न सम्भवति।

अतैव प्रथमेऽध्याये आयुर्लक्षणं निरूप्य महर्षिः चरकः अग्रे–

**"आयुश्चेतनावृत्तिः"**[२]

इत्युक्त्वा आयुर्निरूपणमकरोत्। परञ्च विचारणीयोऽयं प्रश्नः यत् किं नाम चेतनावृत्तिः? किञ्च तस्याः स्वरूपम्?

## १. चेतनावृत्तिविचारः

महर्षिचरकोक्तसंयोगे सर्वचेतनाश्रयी सर्वकालव्यापी आत्मा बाह्यतत्त्वं न अपेक्षते परंच शरीरेन्द्रियसत्त्वं विविधकारकैः प्रभावितं भवति। तेषु कारकेषु पित्त–कफ–वाताश्च प्रमुखत्वेन गण्यन्ते। तत्रापि शार्ङ्धरसंहितानुसारं वातस्येव प्राधान्यं भवति।

तथाहि उक्तम्–

**पित्तं पङ्गु कफः पङ्गु पङ्गवो मल धातवः।**
**वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्।।**[३]

वातस्य प्राधान्यविषये शङ्कायां विचारेण प्राप्यते यत् त्रिगुणात्मिकेयं सृष्टिः पाञ्चभौतिकी च। शरीरस्थाः वातपित्तकफादयाः तेषामेव प्रतिनिधित्वं कुर्वन्ति (शास्त्री, एस.वी.वी. त्रिदोषसिद्धान्त, २०१६)।

---

२. चरकसंहिता, सूत्रस्थानम् ३०.२२

३. शार्ङ्गधरसंहिता, पूर्वखण्डम् ५.४१

विषयमिदम् अधोलिखिततालिकया स्पष्टीभवति।

| **पञ्चमहाभूतानि** | **त्रिगुणाः** | **त्रिदोषाः** | **पदार्थाः** |
|---|---|---|---|
| अग्निः | सत्वं | पित्तः | आत्मा |
| वायुः, आकाशः | रजस् | वातः | मनस् |
| जलं, पृथ्वी | तमस् | कफः | शरीरम् |

**सारणी १ः आयुर्वेदस्य मौलिकतत्त्वानां तुलनात्मकसारणी**

अनया तालिकया स्पष्टं यद् वातनाम दोषः शरीरे रजोगुणस्य वायुतत्त्वस्य, मनस्तत्त्वस्य च प्रतिनिधित्वं करोति।

### २. रजोगुणः

सांख्यदर्शनानुसारं रजश्चलं भवति तस्मात् चैतन्यतायाः हेतुः। अन्ये गुणाः ये स्वभावतः निष्क्रियाः ते रजोगुणप्रभावात् सक्रियाः भवन्ति। अथ च सृष्टिनिर्माणप्रक्रियायां सहाय्यकाः भवन्ति।

**सत्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलञ्च रज।**[४]

### ३. वायुतत्त्वम्ः

रजोगुणात् समुद्भूतं वायुर्नाम महाभूतमपि गतिशीलं प्रेरकं च भवति येन विना संसारेऽस्मिन् किञ्चनमपि स्पन्दनं न भवितुं शक्नोति। अस्य महत्त्वं निरूपयन् छान्दोग्योपनिषदि उक्तम्—

**वायुत्वीय संसर्गः... अध्यात्मं प्राणो वाव संसर्गः स यदा स्वपिति प्राणमेव वागप्येति।**[५]

वायोः स्पष्टीकरणार्थं वायुः शब्दस्य विचारः क्रियते—

वात शब्दे ✓वा धातुरस्ति। संस्कृते 'वा' धातोः चत्वारोऽर्थाः सम्भवन्ति—

---

४. सांख्यकारिका.१३

५. छान्दोग्योपनिषद् ४.३.३




**चित्र–१; "वा" इति धात्वर्थचक्रम्**

१. ✓वा गति गन्धनयोः अदादि गणे

२. ✓वा गति सुख–सेवनयोः चुरादि गणे

अत्र 'वा' धातोः चतुर्धा अर्थाः सम्भवन्ति–

**१. गति–** अनेन पदेन वायोः गतिशीलतायाः ज्ञानं भवति। एतत् गुणमेव वाय्वौ प्रधानत्वेन भवति। अमरकोशे आशुगः, सदागतिः इत्यादिभिः पर्यायैः वायोः गतिशीलतायाः गुणस्य प्रकाशनं क्रियते।

**२. गन्ध–** वायुः गन्धरहितद्रव्यमस्ति। तत्र गन्धं पृथिव्यादिनां संयोगेन भवति,[६] अतः वायोः पक्षे गन्धवहनकार्यस्येव ज्ञानं भवति। गन्धः पृथिव्याः गुणोऽस्ति[७] परं तस्य सञ्चारः वायुना एव भवति। तस्मादेव वायुं गन्धवहमपि कथ्यते।

**३. सुख–**

सुखपदम् अनुभूतिपदस्यार्थे निपतति। गीतायामुक्तम्–

**"मात्रा स्पर्शात्तु कौन्तेय शीतोष्णसुखदुःखदा।"**[८]

---

६. तर्कसङ्ग्रह

७. तर्कसङ्ग्रह

८. श्रीमद्भगवद्गीता २.१४

अर्थात् विषयेषु इन्द्रियाणां सम्पर्केणैव सुख–दुःखस्यानुभूतिः भवति। त्वगिन्द्रिय अस्य सम्पर्कस्य साधनं भवति। तर्कसङ्ग्रहानुसारं सर्वशरीरवर्तिः त्वक् वायवीयेन्द्रियमस्ति।

**इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति।**[९]

अतः सुख–दुःखयोरनुभूतेःकारणं वायुरेवास्ति।

**४. सेवन–**

सेवनस्य तात्पर्यं क्रियात्मकता। क्रियात्मकतया विना वयं कस्यापि पदार्थस्य सेवनेऽसमर्थाः। वायुना विना अल्पमात्रमपि क्रियात्मकता न सम्भवति, सा शारीरिकी भवेत् वाचिकी भवेत् यद्वा मानसिकी। एवं व्युत्पत्यनुसारं वायुरेव प्राणिनां क्रियात्मकतायाः चैतन्यतायाः हेतुरिति।

**५. वायुरेव प्राणाः**

न्याय–वैशेषिकदर्शनानुसारं शरीरान्ताः प्राणाः अपि वायुरूपाः सन्ति।

**शरीरान्तः सञ्चारीवायुप्राणाः स चैकोप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।**[१०]

**तस्य पञ्चभेदाः–**

**अपानः स्यात् समानश्च प्राणोदानौ तथैव च।**
**व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात्।।**[११]

**प्राणः**

"प्राणो नाम प्राग्गमनवान्नासाग्रवर्ति "इति वेदान्ते। सुश्रुतानुसारं प्राणवायुः वक्त्रसञ्चारी (मुख–उर–नासिका) अस्ति येन शरीरस्य धारणं पोषणं च भवति।[१२]

---

९. तर्कसङ्ग्रह

१०. तर्कसङ्ग्रह

११. शार्ङ्गधरसंहिता, पूर्वखण्डम् ५.४६

१२. सुश्रुतसंहिता, निदानस्थानम् १.१३

**अपानः**

"अपानोनामवाग्गमनवान्पाय्वादिस्थानवर्ती"। अधोगामी वायुरियं पायू स्थाने भवति। एषः समयानुसारं मल–मूत्र–वीर्यादीनां कृते सहाय्यकः भवति।[१३]

**व्यानः**

"व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ति"। वायुरियं सर्वशरीरवर्तिः। एषः रसादिन् प्रेरयित्वा स्वेदरक्तयोश्च विस्रवणं करोति। सुश्रुतानुसारं प्रसरणम्, आकुञ्चनम्, विन्नमनम्, उन्नमनं, तिर्यग्गमनमेतेषां क्रियाणां सम्पादनमपि अनेन वायुना भवति।[१४]

**उदानः**

"उदानोनाम कण्ठस्थानीयोर्ध्वगमनवानुत्क्रमणवायुः"। वेदान्तानुसारं कण्ठदेशगताउर्ध्वगमनशीलोऽयं वायुः। सुश्रुतेनापि वायुषु अस्य श्रेष्ठत्वं स्वीकृत्य भाषण–गीतोच्छवासादिक्रियाणां सम्पादनेस्वीकृतास्य भूमिका।[१५]

**समानः**

"समानो नाम सर्वशरीरगताशितपीतान्नादिसमीकरणकरः"। शरीरस्य मध्ये विचरन्नयं वायुः भुक्तान्नपानस्य पाचनं करोति।[१६] अथ च पचितान्नात् रस–दोष–मलादिनां पृथक्करणस्य कार्यमपि करोति।

वेदान्ते प्राणस्येतोऽपि पञ्च भेदा वर्णिताः–

**नागः–** वमनादिक्रियाणां कृते उत्तरदायी भवत्ययं वायुः।[१७]

**कूर्मः–** उन्मीलनाय पक्ष्मणनिमेषणाय वायुरयमुत्तरदायी।[१८]

---

१३. सुश्रुतसंहिता, निदानस्थानम् १.१६

१४. सुश्रुतसंहिता, निदानस्थानम् १.१८

१५. सुश्रुतसंहिता, निदानस्थानम् १.१४

१६. सुश्रुतसंहिता, निदानस्थानम् १.१६

१७. वेदान्तसारः, श्लोकः २३

१८. वेदान्तसारः, श्लोकः २३

**कृकलः—** बुभुक्षायाः कृते उत्तरदायी भवत्ययं वायुः।[१९]

**देवदत्तः—** अयं वायुः जृम्भणाय उत्तरदायी भवति।[२०]

**धनञ्जयः—** शरीरपोषणाय पाचनाय च उत्तरदायी अयं वायुः।[२१]

**मनस्तत्त्वोपरि वायोः प्रभावः—** सम्पूर्णे शरीरे वायुतत्त्वस्य महत्त्वपूर्णा भूमिका वर्तते। शरीरे मनस्तत्वं तथैव प्राधान्यं भजते यथा ग्रहनक्षत्रेषु राजते सूर्यः। मनस्तत्त्वेनैव शरीरमिदं क्रियात्मकं भवति। न केवलं क्रियात्मकमपितु शरीरस्य सत्ताऽपि मनसैव संभाव्यते।

देह एवेह नाऽस्त्येव स्वानुभूतोऽययं निजः। मनसः कल्पनात्मेदं वपुः स्वप्ने गिरिर्यथा।[२२]

मनसि वायुतत्त्वस्यापि महत्त्वपूर्णा भूमिका वर्तते। तां भूमिकामधोलिखितबिन्दुषु स्पष्टीकर्तुं शक्यते—

१. **मनश्चैतन्यदायी—** यथा शरीरमिदं पाञ्चभौतिकं वर्तते तथैव मनस्तत्त्वमपि पाञ्चभौतिकम्।

**पञ्चमहाभूतेभ्यः सात्विकांशेभ्यो मनः सम्पद्यते।**[२३]

तेषु पाञ्चभौतिकतत्त्वेषु वायुतत्त्वस्य प्रभावोऽधिकतया दृश्यते। अन्यानि तत्त्वानि केवलं स्वरूपविधायकानि परन्तु वायुतत्त्वं तु मनसः चैतन्यदायी तत्त्वम्। योगवाशिष्ठानुसारं मनस्तत्त्वं स्वरूपेण जडमस्ति।

**मनः प्रकृत्यैव जडं चित्तत्वमनुधावति।**
**मांसगर्धेन मार्जारो वने मृगपतिं यथा।**[२४]

---

१९. वेदान्तसारः, श्लोकः २३

२०. वेदान्तसारः, श्लोकः २३

२१. वेदान्तसारः, श्लोकः २३

२२. योगवासिष्ठम् निर्वाणप्रकरणम् १३८.२४

२३. वेदान्तसारः, श्लोकः २०

२४. योगवासिष्ठम् उपशम—प्रकरणम् १३.४७

तस्मिन् स्पन्दनानि क्रियात्मकता वा प्राणैरेवायान्ति।

**वायुतः स्पन्दशक्तिर्या सा चिता चेत्यते यदा।**

**सचेत्त्या चिदैत् तवाऽन्तः सङ्कल्पाद्याति चित्तताम्।**[२५]

अत एव योग वाशिष्ठे "प्राणरूपं हि मानसम्" इत्युक्त्वा मनस्सन्दर्भे प्राणशक्तेः महत्त्वं प्रतिपादितम्।

२. **मनस्तत्त्वस्य गतिशीलत्वम्–** मनस्तत्त्वमेव शरीरे सर्वत्र गत्वा संवेदनं स्वीकृत्य मस्तिष्कतन्त्रं सूचयति। मनस्तत्त्वस्य एतद् गतिशीलत्वं वायुनैव आयाति।

**मनोव्यानयोगेनत्वग्द्वारास्पर्शगुणः**

**पाण्यधिष्ठितोवायौतिष्ठतिवायुस्तिष्ठति।**[२६]

३. **मनोचिकित्सा–** मनसः नियन्त्रकः प्रेरकश्च वायुरेवाऽस्ति अतः मनोव्याधीनां समाधानमपि तेनैव वायुना सम्भवति। अत एवोक्तं प्राणशक्तेः संयमेन मनसोऽपि संयमनं भवति।

**प्राणशक्तौनिरुद्धायांमनोरामविलीयते।**[२७]

एवं न केवलं शरीरस्य बहिः परमन्तश्चापि वायोः महत्त्वपूर्णा भूमिका। अस्मादेव कारणात् शाङ्र्गधरसंहिताकारेण स्पष्टतया शरीरप्राणयोः संयोगमायुरिति स्वीकृतम्–

**शरीरप्राणयोरेवं संयोगादायुरुच्यते।**

**कालेन तद्वियोगाच्च पञ्चत्वं कथ्यते बुधैः।।**[२८]

महर्षि–चरकेण तु साक्षात् सर्वेषां क्रियाणां कर्त्ता मत्वा वायुरेव भगवानिति समुदिष्टम्

---

२५. योगवासिष्ठम् उपशम–प्रकरणम् १३ .६१

२६. त्रिशिखब्राह्मणोपनिषद्, १.६

२७. योगवासिष्ठम् उपशम–प्रकरणम् १३.८३

२८. शार्ङ्गधरसंहिता, पूर्वखण्डम् ५.६१

वायुस्तन्त्रयन्त्रधरः, प्राणोदानसमानव्यानापानात्मा, प्रवर्तकश्चेष्टाना–मुच्चावचानां, नियन्ता प्रणेता च मनसः, सर्वेन्द्रियाणामुद्योजकः, सर्वेन्द्रियार्थानामभिवोढा, सर्वशरीरधातुव्यूहकरः, सन्धानकरः शरीरस्य, प्रवर्तको वाचः, प्रकृतिः स्पर्शशब्दयोः, श्रोत्रस्पर्शनयोर्मूलं, हर्षोत्साहयोर्योनिः, समीरणोऽग्नेः, दोषसंशोषणः, क्षेप्ता बहिर्मलानां, स्थूलाणुस्रोतसां भेत्ता, कर्तागर्भाकृतीनाम्, आयुषोऽनुवृत्तिप्रत्ययभूतो भवत्यकुपितः।

कुपितस्तु खलु शरीरे शरीरं नानाविधैर्विकारैरुपतपति बलवर्णसुखायुषामुपघाता, मनो व्याहर्षयति, सर्वेन्द्रियाण्युपहन्ति, विनिहन्ति गर्भान् विकृतिमापादयत्यतिकालं वा धारयति, भयशोकमोहदैन्यातिप्रलापाञ्जनयति, प्राणांश्चोपरुणद्धि।

प्रकृतिभूतस्य खल्वस्य लोके चरतः कर्माणीमानि भवन्ति तद्यथा–धरणीधारणं, ज्वलनोज्ज्वालनम्, आदित्यचन्द्रनक्षत्रग्रहगणानां सन्तानगति–विधानं, सृष्टिश्च मेघानाम्, अपां विसर्गः, प्रवर्तनं स्रोतसां, पुष्पफलानां चाभिनिर्वर्तनम्, उद्भेदनं चौद्भिदानाम्, ऋतूनां प्रविभागः, विभागो धातूनां, धातुमानसंस्थानव्यक्तिः, बीजाभिसंस्कारः, शस्याभिवर्धनमविक्लेदोपशोषणे, अवैकारिकविकारश्चेति।

प्रकुपितस्य खल्वस्य लोकेषु चरतः कर्माणीमानि भवन्ति तद्यथा–शिखरिशिखरावमथनम्, उन्मथनमनोकहानाम्, उत्पीडनं सागराणाम्, उद्वर्तनं सरसां, प्रतिसरणमापगानाम्, आकम्पनं च भूमेः, आधमनमम्बुदानां, नीहारनिर्ह्रादपांशुसिकतामत्स्यभेकोरगक्षाररुधिराश्माशनिविसर्गः, व्यापादनं च षण्णामृतूनां, शस्यानामसङ्घातः, भूतानां चोपसर्गः, भावानां चाभावकरणं, चतुर्युगान्तकराणां मेघसूर्यानलानिलानां विसर्गः य स हि भगवान् प्रभवश्चाव्ययश्च, भूतानां भावाभावकरः, सुखासुखयोर्विधाता, मृत्युः, यमः, नियन्ता, प्रजापतिः, अदितिः, विश्वकर्मा, विश्वरूपः, सर्वगः, सर्वतन्त्राणां विधाता, भावानामणुः, विभुः, विष्णुः, क्रान्ता लोकानां, वायुरेव भगवानिति।[२६]

---

२६. चरकसंहिता, सूत्रस्थानम् १२.८

**उपसंहारः**

मनश्शरीरयोः स्वास्थ्यसन्दर्भे वायुतत्त्वस्य निरूपणमायुर्वेदस्य प्रमुखसिद्धान्तं वर्तते। एतत् तत्त्वं न केवलं बाह्यलोकस्य क्रियाकलापेभ्यः गतिं दिशां च प्रददाति, अपितु शरीरस्य अन्तस्थसर्वाः प्रक्रियाः सक्रियं करोति, नियन्त्रयति च। शारीरिकपक्षे तत्त्वमिदं गतिं, श्वसनं, रक्तसञ्चारं, पाचनं चेत्यादीनां सर्वेषां तंत्रिकाकार्याणां च सन्तुलनं करोति। मनसः पक्षे वायुतत्त्वं विचारान्, भावान् च नियन्त्र्य मनोवृत्तीनां सन्तुलनं करोति।

वायुतत्त्वस्य सन्तुलनं मानसिकस्पष्टताम्, एकाग्रतां, सृजनशीलताञ्च वर्धयितुं साहाय्यं करोति। तस्य असन्तुलनं चिन्ता, अवसादः चेत्यादीनां समस्यानां कारणं भवितुमर्हति। आयुर्वेदे वायुः प्राणाधारः इत्युच्यते। यश्शरीरं मनश्च कार्यकरणे प्रेरयति। प्राणायाम–ध्यानादिभिः वायुतत्त्वेन सम्बद्धैः उपचारैरस्य तत्त्वस्य सन्तुलनं संपाद्य मानसिक–शारीरिक–आरोग्यस्योन्नतिः सम्भवति।

अतः वायुतत्त्वं न केवलं शरीरस्य गतिशीलतायाः स्रोतः, अपितु तत् चैतन्येन सह गहनसम्बन्धं स्थापयति इति वक्तुं शक्यते। अस्य सन्तुलनं शरीरे मनसि च नूतनशक्तिमुत्पादयति। अतः वायुतत्त्वावबोधनं तदानुकूलाचरणञ्च दैनन्दिनजीवने स्वस्थजीवनस्य सोपानम्। आधुनिकजीवनस्य सन्दर्भे आयुर्वेदस्य एतासां प्राचीनशिक्षाणां प्रयोगः मानसिकशान्तिं, शारीरिकस्वास्थ्यं, समग्रजीवनगुणवत्तां च वर्धयितुं सहाय्यक इति सिद्धम्।

***

# पूर्वोत्तर–वैदिककालयोः स्त्रीणां सामाजिकस्थितिः

**श्रीमती रूपाली दत्ता**

*प्राध्यापिका*

*संस्कृतविभागः, बालुरघाटमहाविद्यालयः,*

*दक्षिण दिनाजपुरम्, पश्चिमबङ्गप्रदेशः*

वैदिककालः प्राचीन–भारतीय–इतिहासस्य महत्त्वपूर्णयुगेषु अन्यतमः इति बहुधा स्वीकृतः अस्ति, यः अद्यत्वेऽपि भारतीय–संस्कृतेः आकृतिं कुर्वतां अनेकानां धार्मिकानां, सांस्कृतिकानां, सामाजिकानां च संस्थानां आधारम् अस्थापयत्। उद्देश्यः–शोधपत्रस्य उद्देश्यः परिणामः अस्ति, तथा च वैदिककालस्य आरम्भे उत्तरकाले च महिलानां अधःपतनस्य कारणानां विषये चर्चा च क्रियते। पद्धतिः–द्वितीयकस्रोतानां दत्तांशः विभिन्नेषु पुस्तकेभ्यः, वेब्सैट् तथा वेब्–आधारित–जर्नल् इत्येतेभ्यः सङ्गृहीताः भवन्ति, ये विभिन्नेषु कालेषु प्रकाशिताः भवन्ति। परिणाम एवं परिचर्चाः पशुपालकात् कृषि–अर्थव्यवस्थां प्रति परिवर्तनं, पितृवंशीय–उत्तराधिकारस्य आविर्भावः, अनुष्ठानानि अधिकानि जटिलानि व्यावसायिकानि च अभवन्, वर्ण (जाति) व्यवस्था। उपसंहारः–यथा वैदिककालस्य विभिन्नेषु चरणेषु अवलोकितम् अस्ति, प्राचीनभारतीयसमुदायस्य, पश्चात् वैदिककालस्य च महिलानां स्थितिः भव्य आसीत्। वैदिकयुगः भारतीयसमाजस्य लैङ्गिकगतिशीलतायां, सापेक्षसमानतायाः अपेक्षया वर्धमान–पुरुष–आधिपत्यं प्रति, महत्त्वपूर्णं परिवर्तन–बिन्दुम् अङ्कयत्।

**मुख्यपदानि–** वैदिककालः, प्राचीनभारतम्, लैङ्गिकपात्राणि, प्रारम्भिकवैदिकं, उत्तरवैदिकं, पितृसत्ता, शिक्षा, धर्मः

## १. परिचयः

वैदिककालः प्राचीन–भारतीय–इतिहासस्य महत्त्वपूर्णयुगेषु अन्यतमः इति बहुधा स्वीकृतः अस्ति, यः अद्यत्वे अपि भारतीय–संस्कृतेः आकृतिं कुर्वतां अनेकानां धार्मिकानां, सांस्कृतिकानां, सामाजिकानां च संस्थानां आधारम्

अस्थापयत्। अयं कालः परम्परागतरूपेण द्वयोः चरणयोः विभक्तः अस्ति– प्रारम्भिक– वैदिक–कालः (सा. श. पू. १५००–१०००) उत्तर–वैदिक–कालः (सा. श. पू. १०००–५००)। प्रारम्भिक–वैदिक–युगः मुख्यतया चतुर्षु–वेदेषु प्राचीनतमेन ऋग्वेदेन सह सम्बद्धः अस्ति, यत् अर्ध–यायावर–पशुपालक–समाजं प्रतिबिम्बयति। अपरपक्षे, उत्तरकालीन–वैदिकयुगे, अवशिष्टानां वेदानां ब्राह्मणानां च रचना दृष्टा, येन स्थितेषु कृषि–समुदायेषु परिवर्तनस्य, वर्धमान–स्तरीकरणस्य, अनुष्ठान–सङ्कीर्णतायाः च सङ्केतः प्राप्तः। एते सामाजिकपरिवर्तनाः न केवलं आर्थिकं राजनैतिकं वा आसन् अपितु महिलानां भूमिकां स्थितिं च अन्तर्गते सामाजिकसंरचनायां विस्तारिताः आसन्।

एतेषु कालावधौ महिलानां सामाजिकस्थितिं अवगन्तुं द्वयोः प्रमुखयोः कारणयोः आवश्यकता वर्तते। प्रथमः, इदं प्रारम्भिक–भारतीय–समाजस्य लैङ्गिक–गतिशीलतायाः सांस्कृतिकमूल्यानां च पुनर्निर्माणाय साहाय्यं करोति। द्वितीयं, एतत् प्रकाशयति यत् कथं धार्मिकग्रन्थाः, विकसिताः सामाजिकनियमाः च महिलानां अधिकारेषु, कर्तव्येषु, संस्थासु च क्रमेण परिवर्तने योगदानं कृतवन्तः इति। कस्मिन् अपि ऐतिहासिककाले महिलानां स्थितिः सामाजिक–सङ्घटनस्य, शिक्षायाः, सम्पत्ति–अधिकारस्य, धार्मिक–विश्वासस्य, पारिवारिक–संरचनानां च विस्तृतविकासैः सह निकटतया सम्बद्धः अस्ति। वैदिकसमाजस्य सन्दर्भे, एतानि तत्त्वानि प्रचलितेन दार्शनिकदृष्टिकोणेन, अनुष्ठानप्रथाभिः च सह गभीरतया सम्बद्धानि आसन्।

वैदिककालस्य प्रारम्भे ऋग्वेदस्य स्तुतिगीतानां श्लोकानां च साक्ष्यं सूचयति यत् सार्वजनिकक्षेत्रेषु निजीक्षेत्रेषु च स्त्रियः अपेक्षाकृतं उच्चस्थानं प्राप्तवत्यः इति। ते बुद्धिजीविरूपेण सम्मानिताः आसन्, वैदिक–यज्ञेषु भागं ग्रहीतुं अनुमताः आसन्, केषुचित् सन्दर्भेषु ते स्वयमेव भजनानि रचयन्ति स्म। लोपमुद्रा, गार्गी, अपाला, मैत्रेयी इत्यादयः उल्लेखनीयाः महिला–साध्व्यः विद्वतापूर्णसाहित्ये धर्मशास्त्रीय–भाषणे दार्शनिक–अनुसन्धाने च संलग्नानां महिलानां उदाहरणरूपेण बहुधा उद्धृताः सन्ति। ब्रह्मवादिनी इति पदं ज्ञानस्य तपस्य च मार्गम् अगृहीतवतीनां स्त्रियाम् निर्दिशति स्म, यया स्त्रियाम् बौद्धिकस्थानानां अस्तित्वं सूचयति स्म, ये बहुधा आत्मानं समतुल्यं कुर्वन्ति स्म।

वैदिक–समाजे गृहम् प्रमुखः सामाजिकः घटक आसीत्, तथा च महिलाः, विशेषतः पत्नीरूपेण, मातारूपेण च, तत्र सम्मानीयस्थानानि धारयन्ति स्म। स्वयंवर–संस्था, यत्र स्त्रियः स्वपत्नीं स्यूटर्स्–समूहात् चितुं शक्नुवन्ति स्म, तत्र काश्चन स्त्रियः कियत् स्वायत्ततां अनुभवन्ति इति प्रतिबिम्बते। विवाहः न केवलं सामाजिक–अनुबन्धरूपेण अपितु धार्मिक–कर्तव्याणां (धर्मस्य) निर्वहणार्थं पवित्र–संयोगरूपेण अपि दृष्ट आसीत्। पतिपत्नी च उभयत्र गृहसंस्कारेषु संयुक्तरूपेण कार्यं कर्तव्यम् इति अपेक्षा आसीत्, येन महिलाः महत्त्वपूर्णां धार्मिकां भूमिकां निर्वहन्ति स्म।

परन्तु, एषा सापेक्षिकतया उन्नती स्थितिः स्थिरतया न आसीत्। यथा यथा उत्तर–वैदिक–काल उद्भूतः, तथा समाजस्य संरचना परिवर्तिता। कृषिः पशुपालनस्य स्थाने अभवत्, येन भूमिसम्पादनं जातम्, सम्पत्ति–आधारितानां सामाजिक–पदानुक्रमानां च वृद्धिः अभवत्। अनेन आर्थिकपरिवर्तनेन सह जातिभेदानां औपचारिकरणं, अधिकः कठोरः पितृसत्तात्मकः क्रमः च अभवत्। धार्मिकजीवने जटिलविधयः, पुरोहितप्राधिकारः च अधिकतया प्रबलः अभवत्, तथा च पुरुषाः ब्राह्मणाः पवित्रज्ञानस्य एकाधिकारं कर्तुम् आरभन्त। एतेषां विकासानां आध्यात्मिक–गृह–क्षेत्रेषु च महिलानां भूमिकासु प्रत्यक्षः प्रभावः आसीत्।

महिलानां अवस्थाया अस्य अधःपतनस्य दृश्यतमेषु लक्षणेषु अन्यतमम् आसीत् तेषां शिक्षायाः प्रतिबन्धः। यः उपनयन–समारोहः वैदिक–अध्ययनार्थं व्यक्तिं प्रारब्धवान्, सः क्रमेण पुरुषाणां कृते अनन्यः अभवत्। ब्रह्मवादिनी इत्यस्य परिकल्पना प्रायः लुप्तः अभवत्, तस्य स्थाने साद्योद्वाह इति महिला आसीत्, यस्य भूमिका बाल्यावस्थायाः एव गृहकार्याणि परिणेतुं च आसीत्। शिक्षातः सार्वजनिक–बौद्धिकजीवनात् च क्रमेण महिलानां निष्कासनं, उत्तरवैदिककाले लैङ्गिक–मानदण्डेषु स्पष्टपरिवर्तनं सूचयति।

तदतिरिच्य, महिलानां धार्मिक–सहभागित्वं बहु न्यूनीकृतम् आसीत्। यद्यपि प्रारम्भिक–वैदिक–ग्रन्थाः यज्ञेषु (यज्ञविधयः) भार्या–पत्योः संयुक्त–सहभागितां प्रोत्साहयन्ति स्म, पश्चात् ग्रन्थाः अधिकतया महिलानां कतिपय–कालखण्डे (यथा ऋतुस्रावं) अपवित्ररूपेण, पवित्र–संस्कारेभ्यः अनुपयुक्तरूपेण च चित्रयन्ति स्म। एष अपवर्जनः एका विस्तृतकथायाः भागः

आसीत्, यस्मिन् महिलाः निरन्तरं रक्षणम् अपेक्षन्ते इति चित्रयितुं आरब्धम्–प्रथमे स्वपितृभिः, ततः स्वपतिभिः, अन्ते च स्वपुत्रैः। एतादृशाः विचाराः पश्चात् मनुस्मृति इत्यादिषु ग्रन्थेषु संहिताबद्धानि अभवन्, ये यद्यपि वैदिकयुगस्य अनन्तरं सङ्कलितानि तथापि उत्तरवैदिककाले क्रमेण विकसिताः नियमाः प्रतिबिंबितानि प्रबलानि च अभवन्।

सामाजिकरूपेण, उत्तरकाले बालविवाहस्य आरम्भः अभवत्, महिलानां एकान्तता वर्धिता, विधवानां पुनर्विवाहस्य प्रतिबन्धः च अभवत्। एताः प्रथाः महिलानां लैंगिकतायाः चलनशीलतायाः च नियन्त्रणे वर्धमान–चिन्तां सूचयन्ति, सम्भवतः परिवारस्य सम्मानस्य, जातिशुद्धेः च विषये विकसितेभ्यः विचारानाम् प्रतिक्रियारूपेण। महिलानां पूर्वस्वतन्त्रतायाः सम्मानस्य च स्थाने क्रमेण आज्ञापालनस्य, पवित्रतायाः, गृहस्थतायाः च महत्त्वपूर्णाः नियमाः स्थापिताः।

एते सीमायाम् अपि, एतत् लक्षणीयं महत्त्वपूर्णं यत् संक्रमणं न निरपेक्षम् आसीत्, न एकरूपम् आसीत् इति। प्रादेशिकभेदाः, सामाजिकवर्गाः, भिन्नवर्णेषु (जातीषु) महिलानां विशिष्टाः भूमिकाः च विविधान् अनुभवान् जनयन्ति स्म। परन्तु, सामान्यप्रवृत्तिः कालान्तरे महिलानां संस्थायां व्यवस्थितरूपेण न्यूनीकरणं सूचयति।

अयं लेखः प्रारम्भिकवैदिककालस्य उत्तरवैदिककालस्य च महिलानां स्थित्याः तुलनां कृत्वा अस्य परिवर्तनस्य अन्वेषणं कर्तुं प्रयतते। इदं वेदान्, ब्राह्मणान् इत्यादीन् प्राथमिकग्रन्थाधारान्, तथा च महिलानां भूमिकानां विकासस्य विस्तृतदृष्टिं प्रदातुं द्वितीयक–विद्वतापूर्णव्याख्यानान् च आकर्षयति। तेषां शिक्षायाः प्रवेशस्य, अनुष्ठानानां सहभागित्वस्य, विवाहस्य परिवारस्य च अधिकारस्य, सामाजिक–बोधस्य च विश्लेषणं कृत्वा अस्य अध्ययनस्य उद्देश्यं प्राचीन–भारतीय–समाजः द्वयोः भिन्नयोः किन्तु सम्बद्धयोः युगयोः महिलानां विषये कथं विचारयति, व्यवहारति च इति गहनं अवबोधं प्रदातुं भवति।

**उद्देशः** शोधपत्रस्य उद्देश्यः अस्ति (१) वैदिककालस्य आरम्भे उत्तरकाले च महिलानां स्थितिं अन्वेष्टुं, (२) तेषां स्थित्याः अधःपतनस्य कारणानां परीक्षणं च।

## २. पद्धतिः

अध्ययने द्वितीयकसूचनानां संकलनस्य, समीक्षायाः, संश्लेषणस्य च आधारेण वर्णनात्मकं विश्लेषणात्मकं च शोधपद्धतिः उपयुज्यते।

**दत्तांशस्य स्रोतः—** प्रस्तावितः अध्ययनः मूलतः द्वितीयकस्रोतानां आधारेण अनुभवजन्यरूपेण भवति। अध्ययनस्य उद्देश्यं साधयितुं महिलानां विषये विविधानि प्रकाशितानि अप्रकाशितानि च शोधपत्राणि, पुस्तकानि इत्यादीनि परामर्श्यन्ते। साहित्यानां परामर्शानन्तरं वैदिककालस्य पूर्ववैदिककालस्य च महिलानां स्थितिं विषये भिन्नाः विषयाः तेषाम् स्थित्या अनुसृत्य अन्विष्य चर्चां च कुर्वन्ति।

**विश्लेषणस्य विधिः—** ततः विविधस्रोतेभ्यः सङ्गृहीताः विविधानि सामग्रयः, लेखनस्य लेखनार्थं आवश्यकं प्रस्तुतीकरणं निष्कर्षं च धारयितुं, प्रासङ्गिकानां शीर्षकाणां अन्तर्गतं प्रक्रियां, परीक्षणं, प्रमाणनम्, व्याख्यां, व्यवस्थां, विश्लेषणं च विधिपूर्वकं कुर्वन्ति।

## ३. परिणामाः प्रवचनञ्च

**प्रारम्भिकवैद्यकीयक्षेत्रे महिलाः** प्रायः सा. श. पू. १५०० तः सा. श. पू. १००० पर्यन्तं व्याप्तः प्रारम्भिक—वैदिक—कालः प्रायः प्राचीन—भारतीय—समाजे स्त्रीपुरुषयोः सापेक्षिक—समानतायाः कालः इति मन्यते। अस्मिन् चरणे कुटुम्बे तथा च विस्तृतसमुदाये च महिलानां महत्त्वपूर्णं स्थानम् आसीत्। अस्य कालस्य प्राथमिकस्रोतः ऋग्वेदः, न केवलं गृहजीवने अपितु बौद्धिकं, आध्यात्मिकं, सामाजिकं च क्षेत्रेषु महिलाः कियान् महत्त्वपूर्णां भूमिकां निर्वहन्ति इति विषये अनेकाः उल्लेखाः प्रददाति। तेषां योगदानानि स्वीकृतानि सम्मानितानि च आसन्, येन अधिक—उदार—समावेशी—सामाजिक—दृष्टिकोणः सूचितः।

### शिक्षाबौद्धिकभूमिका च

प्रारम्भिक—वैदिक—कालस्य एकम् उल्लेखनीयं वैशिष्ट्यम् आसीत् महिलानां शिक्षायाः प्राप्तिः। ते न केवलं अनुमताः, अपितु वेदानाम् अध्ययनार्थं प्रोत्साहिताः, ये तस्मिन् समये आध्यात्मिकस्य दार्शनिकस्य च ज्ञानस्य

सर्वोच्चस्रोताः आसन्। ये स्त्रियः शिक्षां अन्विष्य ज्ञानाय समर्पितं जीवनं यापयन्ति स्म, ते ब्रह्मवादिनी इति निर्दिश्यन्ते स्म। अयं उपाधिः ब्रह्मं–परमसत्यं–अवगन्तुं, विद्वतापूर्णप्रयासेषु च संलग्नं तेषां समर्पणं सूचयति।

लोपमुद्रा, गार्गी वाचक्नवी, मैत्रेयी इत्यादयः प्रसिद्धाः महिलाः अस्य कालस्य उल्लेखनीयाः सन्ति। ऋग्वेदे बृहदारण्यक–उपनिषदे च तेषां उल्लेखोऽस्ति, तेषां तीक्ष्णबुद्धेः, गहन–दार्शनिक–प्रश्नानां च कृते स्मर्यते। उदाहरणार्थं, गार्गी, याज्ञवल्क्य–ऋषिणा सह तत्त्वमीमांसा विषये वादविवादाय प्रसिद्धा आसीत्, मैत्रेयी च अमरत्वस्य स्वरूपं जीवनस्य वास्तविकं सारम् च प्रश्नीकृतवती। एतादृशाः उदाहरणाः प्रमाणं कुर्वन्ति यत् महिलाः न केवलं साक्षरः आसन् अपितु वैदिकसमाजस्य केन्द्रस्थानेषु उच्चस्तरीयेषु बौद्धिक–चर्चासु अपि संलग्नाः आसन् इति।

**विवाहः स्वायत्तता च**

वैदिककालस्य आरम्भे विवाहः बहुधा परस्परसम्मत्या आधारितः आसीत्। स्वयंवरव्यवस्थायाः माध्यमेन स्त्रियः स्वजीवनसङ्गीणां चयनं कर्तुं स्वातन्त्र्यं प्राप्तवत्यः, यत्र स्त्रियः प्रेमीणाम्ः–समूहात् पत्युः चयनं कर्तुं शक्नुयात्। एषा प्रथा महिलाः व्यक्तिगत–पारिवारिक–विषयेषु यत् स्वायत्ततां अनुभवन्ति तत् अधोरेखितवती। विवाहः पवित्र–सहभागित्वरूपेण दृष्टः यत्र धर्मस्य (कर्तव्यस्य) अर्थस्य (समृद्धेः) तथा कामस्य (इच्छायाः) अनुसरणे भार्या–वरौ समान– सहभागिनः इति मन्यन्ते स्म।

महत्त्वपूर्णतया, वैदिककालस्य आरम्भे विधवानां पुनर्विवाहः न निन्दितः आसीत्, एकविवाहः च सामान्यः नियमः आसीत्। बहुविवाहः आसीत्, परन्तु सामान्यः नासीत्, विशेषतः सामान्यजनेषु। पुनर्विवाहस्य स्वातन्त्र्यम्, एकलपत्न्याः उपरि महत्त्वं च महिलानां विकल्पानां, सामाजिक–भूमिकानां च सम्मानस्य स्तरं प्रदर्शयति यत् पश्चात् अवसरेषु क्षीणं भवितुम् आरब्धम्।

**धर्म–सहभागिता**

वैदिककालस्य आरम्भे धार्मिकजीवनं केवलं पुरुषाणां कृते न आरक्षितम् आसीत्। स्त्रियः यज्ञेषु (यज्ञसमारोहेषु) सहितासु विधासु सक्रियरूपेण भागं

गृहीतवत्यः, पुरुषैः सह वैदिकगीतानां कीर्तनार्थं च अनुमता आसन्। एषा सहभागिता न केवलं प्रतीकात्मिका आसीत्, अपि तु अनेकेषां अनुष्ठानानां सफलतायाः कृते महिलानां उपस्थितिः महत्त्वपूर्ण इति मन्यन्ते स्म। धार्मिककार्येषु पुरोहितपत्न्याः वा सह–निर्वाहिकायाः वा रूपेण तेषां पात्राणि दर्शयन्ति यत् पुरुषैः सह समानरूपेण आत्मिकजीवने तेषां प्रवेश आसीत् इति। धार्मिकजीवने महिलानां सहभागित्वेन समाजे तेषां स्थितिरपि सुदृढः अभवत्, यतः वैदिकसंस्कृते धार्मिकप्राधिकारोऽ अत्यन्तं मूल्यवान् आसीत्। कर्मणि आचरितुम्, मन्त्रान् मन्त्रयितुं, आध्यात्मिक–चर्चासु भागं ग्रहीतुं च महिलायाः क्षमता तस्याः शिक्षां नैतिक–स्थितिं च प्रतिबिम्बयति।

## सामाजिक–मान्यता

वैदिककालस्य आरम्भे सामाजिकरूपेण महिलाः उच्च–सम्मानेन परिगणिता आसन्। परिवारस्य निर्णये तेषां सक्रियं पात्रम् आसीत्, केवलं गृहकार्येषु एव सीमितं न आसीत्। कन्यारूपेण, पत्नीरूपेण, मातारूपेण च ते गृहस्य आदरणीयाः सदस्या आसन्। ते स्वेच्छया स्वमतं प्रकटितुम् अशक्नोत् तथा च कुलं वा जनजातेः वा विषयेषु संलग्ना आसन्।

वैदिकगीतेषु अपि स्त्रियः तेषां ज्ञानस्य, सौन्दर्यस्य, बलस्य च कृते प्रशंसिता आसन्। उत्सवेषु सार्वजनिकसभासु च तेषां उपस्थितिः आचर्यते स्म, अस्मिन् काले लिङ्ग–आधारितविवेचनस्य प्रमाणं न्यूनम् अस्ति। अयं आदरः, मान्यतां च तान् सम्मानेन, आत्म–मूल्येन च जीवितुं प्राददात्, सन्तुलित–समन्वयात्मक–सामाजिक–संरचनायां च योगदानं दत्तवन्तः।

## उत्तर वैदिककाले स्त्रियः

वैदिक–युगस्य आरम्भात् परं बहूनि परिवर्तनानि अभवन्, तथा च भारतीय–समाजे महिलानां स्थितिः अपि एतादृशेषु अन्यतम आसीत् (उत्तर–वैदिक–युगः, सा. श. पू. १०००–५००) अयं अधिवासानां, पदानुक्रमित–स्तरीकरणस्य, देवालयानां च युगः आसीत्, यस्य शिरसि केचन पुरोहिताः, अथवा पुरोहिताः–राजान आसन्। एतादृशानां व्यापकपरिवर्तनानां परिणामेन, वैदिककालस्य आरम्भे स्त्रियः यत् स्थितिं अनुभवन्ति स्म, तस्मिन् सापेक्षिक–समानतायां विच्छेदोऽभवत्। स्वतन्त्र–समाजात् अधिक–व्यवस्थित

–उच्च–मध्यमवर्ग–पर्यावरणं प्रति एतत् तीव्रपरिवर्तनम् निश्चिततया महिलानां शिक्षायां, धर्मस्य पालने तथा च स्वजीवने अधिकतया प्रतिबिम्बितम् आसीत्।

सम्भवतः सर्वाधिकं महत्त्वपूर्णं परिवर्तनम् आसीत् महिलानां शिक्षायाः प्रगतिः। महिलाः वेदस्य अध्ययनं कर्तुं शक्नुवन्ति तथा च बौद्धिक–वादविवादेषु भागं ग्रहीतुं शक्नुवन्ति इति प्रारम्भिक–वैदिक–ग्रन्थे उल्लेखः अस्ति। परन्तु, उत्तरवैदिककाले एषा प्राप्तिः अधिकाधिकं स्पष्टीकृता आसीत्। उपनयनम्–प्रारम्भिकः समारोहः यः शिक्षणस्य आरम्भं सूचयति स्म–इदानीं बालिकानां कृते न क्रियते स्म। यदा शिक्षायाः पुरुषक्षेत्रत्वेन मान्यतां प्राप्तवती तदा स्त्रियः आध्यात्मिक–अध्ययनात् बौद्धिक–क्रियाकलापेभ्यः च बहिष्क्रियन्त। ब्रह्मवादिन्याः–ज्ञानाभिलाषीनां महिलानां–एषा परम्परा वस्तुतः विलुप्तः अभवत्। गृहम् एव एकमात्रं स्थानम् अभवत् यत्र महिलाः निवसितुं अनुमताः आसन्, तथा च महिलायाः कृते पुस्तकानि पठितुं, विचारान् चर्चयितुं वा आध्यात्मिकप्रयासेषु प्रयासं कर्तुं वा स्थानम् नासीत्।

अस्याः शैक्षणिक–अधः पतनस्य अनुगुणं महिलानां विवाहस्य अधिकारः अपि न्यूनीकृतः आसीत्। राज्यं अधिकां पितृसत्तात्मकां व्यवस्थां स्वीकृत्य–शीघ्रविवाहस्य महत्त्वं अधोरेखितवान् तथा च पुरुषाः महिलानां विकल्पानां विषये नियन्त्रणं कुर्वन्ति इति–बालविवाहस्य वृद्धेः अर्थः आसीत् यत् बालिका शिक्षां प्रवेष्टुं शक्नुयात् अथवा तया सह विवाहं करिष्यति इति निर्णेतुं प्रक्रिया अपि न आसीत् इति। पूर्वं स्वयंवरव्यवस्थायाः अन्तर्गतं स्त्रीभ्यः स्वपत्नीं चितुं विकल्पः आसीत्, परन्तु एषा प्रथा अन्ततः केवलं पुरुष–सम्बन्धिनः एव विवाहस्य व्यवस्थां कुर्वन्ति स्म। वैदिककालस्य आरम्भे विधिरूपेण स्वीकृतं विधवायाः पुनर्विवाहं अस्वीकृत्या दृष्टम्। विधवानां कृते पवित्रतायाः धर्मनिष्ठायाः च जीवनं विहितम् आसीत्, परन्तु विरलतया पत्योः मृत्योः विषये शोकस्य अधिकारः अपि दत्तः, येन तु शोषितः दुर्दशापूर्णः च जीवनं प्राप्यते। एतादृशाः निर्बन्धनाः स्त्रियां, पितृभ्यः आरभ्य ततः पति–पुत्रयोः आरभ्य, शेषजीवनं यावत् पुरुष–संरक्षकाणां आश्रयं कर्तुं बाध्यवत्तः।

धर्मक्षेत्रे महिलाः इतोऽपि अधिका बहिष्करणम् अनुभवन्ति स्म।

वैदिककालस्य आरम्भे महिलाः संस्कारेषु सक्रियाः सहभागिनः आसन्, मन्त्राणां उच्चारणस्य अनुमतिः च प्राप्ताः आसन्। परन्तु, उत्तरवैदिककाले धार्मिकक्षेत्रे तेषां स्थानं बहु न्यूनम् अभवत्। आचारविधयः जटिलं जातानि इति कारणात् पुरुषाः ब्राह्मणाः अधिकारम् अगृह्णन्। कालान्तरे, महिलाः अधिकतया बहिष्कृताः अभवन्, यज्ञेषु इत्यादिषु भागं ग्रहीतुं वा भागं ग्रहीतुं वा अनुमताः न आसन्। ऋतुस्रावस्य प्रसवे च स्त्रियः अशुद्धाः इति सामान्यकल्पना अधिका प्रचलिता अभवत्, येन ते अधिकांशपवित्रस्थानेषु संस्कारेषु च प्रतिबन्धिताः अभवन्। धार्मिककार्यालयेषु सह–अभिनेतारः न भूत्वा, ते निष्क्रिय–श्रोतृणां वेशे दृष्टाः अभवन्।

मनुस्मृतिः इत्यादीनि सामाजिक–विधि–ग्रन्थाः निरन्तरं महिलानां विश्वदृष्टिं सुदृढं कुर्वन्ति स्म, तान् स्वाभाविकतया पुरुषानाम् अधीनाः इति चित्रयन्ति स्म, एवं स्थितौ एतं अधोगमनप्रवृत्तिं वर्धयन्ति स्म। अस्य अर्थः आसीत् यत् स्त्रियः जीवनपर्यन्तम् पुरुष–उपस्थित्या परिपालयिता आधिपत्यं च प्राप्नुयात् इति। स्त्री–पवित्रतायाः विचारः प्राचलत्, तथा च एषः परिवारस्य सम्मानेन, सामाजिक–स्थित्या च सम्बद्धः अभवत्। परिणामतः, स्त्रियः क्रमेण स्वगृहे एव तिष्ठन्ति स्म, अपि च स्वगृहस्य जालपुटान् अपारदर्शी–पर्दाः आच्छादयितुं आरभन्त। पुरदा (स्त्री–एकान्तता), सञ्लजारस्य प्रतिबन्धाः च क्रमेण प्रवर्तिताः। परम्परा निर्दिशति यत् महिलाः गृह–दृश्ये एव परिमिताः आसन् यत्र पारम्परिक–धार्मिक–अधिकारस्य पार्श्वे तेषां स्वरः निर्णयाः च बहुकालात् मौनाः आसन् इति।

## महिलानां स्थिति–ह्रासस्य कारणानि

उत्तरवैदिककाले महिलानां स्थितौ क्रमेण क्षीणं जातम् इति अनेकेषु परस्परं सम्बद्धैः सामाजिकैः, आर्थिकैः, धार्मिकैः च परिवर्तनैः सह सम्बद्धुं शक्यते। एतानि परिवर्तनानि समाजस्य संरचनां पुनर्निर्मयन् तथा च महिलानां भूमिकां पुनर्परिभाषितवन्तः, येन ते पूर्वं प्राप्तानां अधिकाराणां स्वतन्त्रतानां च क्षयः अभवत्।

## आर्थिकपरिवर्तनम्

अस्य अधःपतनस्य महत्त्वपूर्णेषु कारणेषु अन्यतमम् आसीत्

पशुपालकात् कृषि–अर्थव्यवस्थां प्रति परिवर्तनं। वैदिककालस्य आरम्भे समाजः बहुधा पशुपालकः आसीत्, सम्पत्तिः च साम्प्रदायिकरूपेण व्यवस्थापिता आसीत्। गृहजीवने आर्थिकजीवने च महिलाः महत्त्वपूर्णां भूमिकां निर्वहन्ति स्म, तथा च लैङ्गिकपात्राणि अधिकानि लवचीकानि आसन्। परन्तु, यथा यथा समाजः स्थायीकृषिं प्रति अगच्छत्, भूमिः बहुमूल्या उत्तराधिकारयोग्य–सम्पत्तिः च अभवत्। अस्य परिवर्तनस्य परिणामेन अधिकानि कठोरानि परिवारिकानि संरचनानि, लैङ्गिकानि पात्राणि च प्राप्तानि। पुरुषाः भूस्वामित्वस्य उत्पादनस्य च आधिपत्यं कर्तुम् आरभन्त, महिलाः अधिकतया गृहे एव सीमितवत्यः आसन्। एतत् आर्थिकपरिवर्तनं स्त्रीणां आर्थिकस्वातन्त्र्यं न्यूनीकृत्य, व्यक्तिगतं सार्वजनिकं च जीवनं पुरुषप्राधिकारम् अधोरेखितवान्।

सम्पत्ति–अधिकाराः पितृवंशीय–उत्तराधिकारस्य आविर्भावः कृषिप्रवर्तनेन सह निकटतया सम्बद्धः आसीत्। यथा यथा भूमिः सम्पत्तिः च अधिकारस्य मुख्यस्रोताः अभवन्, तथा च पुरुष–वंशद्वारा सम्पत्ति–सम्प्रेषणं सामान्यं जातम्। कन्याः क्रमेण उत्तराधिकारात् बहिष्कृताः अभवन्, तथा च कुटुम्बस्य धनस्य वंशस्य च अनुवर्तनं सुनिश्चितुं पुत्रस्य जन्म अत्यन्तं मूल्यवानः आसीत्। अनेन परिवर्तनेन महिलानां वैधानिकं आर्थिकं च अभिकरणम् अत्यन्तं परिमितम् अभवत्, येन ते पोषणार्थं सुरक्षायै च पुरुष–सम्बन्धिनः आश्रिताः अभवन्। विवाहानन्तरं स्त्रियः जन्मदातृ–कुटुम्बेभ्यः बहिःस्थाः इति मन्यन्ते स्म, येन तेषां सामाजिक–स्थितिः इतोऽपि दुर्बला जाता।

**धार्मिक–प्राधिकरण**

वैदिककालस्य आरम्भे प्रायः गृहे एव धार्मिकविधयः आचरिताः आसन्, स्त्रीपुरुषौ च भागं ग्रहीतुं शक्नुवन्ति स्म। परन्तु, उत्तरवैदिककाले, अनुष्ठानानि अधिकानि जटिलानि व्यावसायिकानि च अभवन्, यत्र प्रशिक्षितानां ब्राह्मणपुरुषाणां सहभागित्वम् आवश्यकम् आसीत्। धार्मिकज्ञानस्य आचरणस्य च अधिकारः परिवारात् दूरे पुरुषपुरोहितानां हस्ते न्यवर्तत। अनेन न केवलं महिलाः प्रमुखेषु आध्यात्मिककार्येषु भागं ग्रहीतवन्तः अपितु सामाजिक–नैतिक–अधिकारेषु पुरुष–आधिपत्यम् अपि प्रबलम्

अभवत्। पवित्रग्रन्थाः, अनुष्ठानानि च पितृसत्तात्मकमूल्यानि प्रतिबिम्बितुम् आरभन्त, येन महिलानां व्यवस्थात्मक–सीमान्तीकरणे योगदानं जातम्।

यथा वर्णव्यवस्था (जातिः) अधिकं कठोरं जातम्, तथैव महिलानां व्यवहारस्य नियन्त्रणम् अपि जातम्। स्त्रीशुद्धेः परिकल्पना, विशेषतः जाति–सीमायां रक्षणे, केन्द्रीय–महत्त्वम् अवाप्नोत्। महिलानां लैंगिकता, गतिशीलता, सार्वजनिक–दृश्यता च दृढतया नियन्त्रिताः आसन्, येन परिवारस्य अथवा जात्याः सम्मानाय किमपि प्रतीयमानं संकटं न भवेत्। बालविवाहः, विधवा–एकान्तवासः, स्त्रीशिक्षायाः सञ्चारस्य च प्रतिबन्धाः इत्यादयः अभ्यासाः अधिकतया प्रचलिताः अभवन्। एते नियमावलयः सामाजिक–अनुष्ठान–पवित्रतायाः संरक्षणार्थं, जाति–आधारित–पदानुक्रमे तेषां अधीनतां सुदृढीकर्तुं च महिलानां नियन्त्रणं आवश्यकम् इति विचारे निहितानि आसन्।

## ४. निष्कर्षः

यथा वैदिककालस्य विभिन्नेषु चरणेषु अवलोकितम् अस्ति, प्राचीनभारतीयसमाजस्य महिलानां स्थितिः द्वे अत्यन्तं भिन्न–चरणे स्तः। वैदिककालस्य आरम्भे, महिलाः समाजस्य अत्यन्तं सम्मानिताः सदस्याः आसन्, ते शिक्षिताः भवितुम् अर्हन्ति स्म, यज्ञेषु भागं ग्रहीतुं शक्नुवन्ति स्म, पर्याप्तं स्वातन्त्र्यं वा प्राप्नुयुः स्म। ते तत्वशास्त्रे निमग्नाः आसन्, स्वपत्नीं चितवन्तः, कुटुम्बे समुदाये च सम्मानस्य स्थानं प्राप्तवन्तः। तथापि समाजस्य उत्तरकालीन–वैदिक–चरणे क्रमेण क्रमबद्धरूपेण च परिवर्तनं जातम्, येन अयं वर्गः स्वस्य महत्त्वं नष्टवान्। कथं? आर्थिक–संरचनायां परिवर्तनेन, मातृवंशीयात् पितृवंशीय–उत्तराधिकार–व्यवस्थां प्रति परिवर्तनेन, पुरुष–प्रधान–लिपिकीय–लिङ्ग–व्यवस्थायाः उदयेन, जाति–पवित्रतायाः सीमायां वृद्ध्या च महिलानां अधिकाराः स्वातन्त्र्याः च क्षीयन्ते स्म। तेषां शिक्षायाः, धार्मिकजीवनस्य सहभागित्वस्य च क्षीणं जातं, तेषां भूमिकाः गृहं प्रति, गृहानन्तरं च न्यस्तानि अभवन्, तेषां स्वातन्त्र्यम् अपि न्यूनीकृतम्। अस्य अर्थः अस्ति यत् महिलानां स्थितौ एषा ह्रासः तत्क्षणात् नासीत्, परन्तु पितृसत्ता प्रवर्धमानानां दीर्घकालीनविकासानाम् शृङ्खलां प्रतिबिम्बयति। यथा वयं जानीमः, अस्य परिवर्तनस्य पृष्ठतः ज्ञानं भवति चेत्, यत् उचितं तत् कर्तुं

लिङ्गस्य उपरि आरोपितानां सामाजिक–मानदण्डाणां अथवा धार्मिकग्रन्थाणां गभीरतया स्थापितां स्थितिं बोधयितुं साहाय्यं करोति, एवं समकालीने जगति तेषां पुनरवलोकनस्य कारणम् अस्ति, यदा वयं लैङ्गिक–समानतायाः कृते प्रयतामः।

***

# वेदेषु अध्यात्मतत्त्वम्

**डॉ. जितेन्द्रकुमारः**

*सह–आचार्यः, संस्कृतविभागाध्यक्षः*

*राजकीयमहाविद्यालयः, बयाना, भरतपुरम्, (राजस्थानम्)*

**शोधसारः**

अस्मिन् मन्त्रे[1] आचार्यः सायणो द्वैतं त्रैतञ्च वीक्ष्य तदा तदानीन्तनकालेन समाजेन राजाज्ञयाऽथवाऽऽचार्यशङ्करस्य प्रभावात् अद्वैतवादं साधयितुं प्रयेते। मन्त्रार्थवीक्षणेन सुस्पष्टं भवति यत्सायणः स्वात्मन्येव सन्दिह्यात्र द्वैतमद्वैतं वेति दोलायमानचेता प्रबलप्रयत्नपुरस्सरमेवाद्वैतवादं साधयितुं प्रयासञ्चक्रे। मन्त्रेऽस्मिन् एतादृशानां सन्देहास्पदां पदानां प्रयोगो नास्ति न चाऽनेन द्वैतमद्वैतं विशिष्टाद्वैतं वाऽभिव्यज्यते। अत्र तु सरलगिरा रूपकमाध्यमेन जीवेश्वर– प्रकृतीनां वर्णनं कृतमास्ते।

ईश्वरो जीवानां भोगापवर्गार्थं मूलप्रकृतेर्विकृतिपरं जगन्निर्मिमीते। एतानि त्रीणि तत्त्वानि (ईश्वरः, जीवाः, प्रकृतिश्च) अनादीनि, अनन्तानि च सन्ति। आचार्यस्सायणो निरुक्तपरिशिष्टे व्याख्यातमिमं मन्त्रं विलोक्य निरुक्ते भाषायाः सन्दिग्धत्वात् द्वैतं त्रैतं वेति बभ्राम। अथ च स्वभाष्ये 'अनुसन्धेयम्' इति लिलेख। अनेन सायणस्य निरुक्तकारं प्रति समादरः प्रकटीभवति। सायणेन अपि द्वैताद्वैत त्रित्वानां किमत्र सत्यमिति निर्णयमदत्वा निरुक्तेन सममेव न्याय्यमाचरितम्।

आत्मशब्दः ऋग्वेदे पञ्चविंशतिधा, यजुर्वेदे– एकत्रिंशद्धाऽथर्ववेदे च नवतिधा प्रयुक्तो दृश्यते। वेदेष्वात्मपदं परमात्मने, जीवात्मने, मनसे, शरीराय, पुरुषाय चैतेभ्यः पञ्चभ्यः सुतरां प्रयुज्यते। ऋग्वेदे कस्यचिदपि मन्त्रस्य

---

१. द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यश्नन्नन्योऽअभिचाकशीति।।
अथर्ववेदः– १.६.२०, ऋग्वेदः– १.१६४.२०

सूक्तस्य च देवताऽऽत्मा अध्यात्मं वा नाऽस्ति। परं सप्तसूक्तेषु 'ऋषिरात्मानं तुष्टाव' इत्येतदुदीरितम्। निरुक्तकारो यास्को बभाषे– "अथाध्यात्मिक्य उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना"।[२] श्रीपादद्दामोदरसातवलेकरः सर्वेषामेषां सूक्तानां देवताम् आत्मानं विकल्पेन अङ्गीचकार। स्वामीदयानन्दसरस्वती महाभागोऽपि केषाञ्चिन्मन्त्राणां विकल्पेन आत्मानं देवतात्वेनोररीचकार। सामवेदे केवलमेक एव मन्त्रश्चतुरविंशत्युत्तरषट्शततमो वत्तर्ते यस्य देवता 'आत्मन आशीः' वर्त्तते। अथर्ववेदे षोडशसूक्तेषु त्रयोदशसूक्तानां देवताऽऽत्माऽस्ति। अवशिष्टेषु त्रिषु सूक्तेषु केषाञ्चिदेव मन्त्राणां देवताऽऽत्मा वरीवर्ति। सप्तसूक्तानान्तु देवताऽध्यात्ममस्ति।

अनुसर्वानुक्रमणीं यजुर्वेदस्य द्वात्रिंशत्तमस्य चत्वारिंशत्तमस्य चाऽध्यायस्य देवताऽऽत्माऽस्ति। अष्टमाध्यायस्य नवममन्त्रस्य देवता प्रजापतिः (आत्मा) वर्त्तते अथ च चत्वारिंशत्तमस्याध्यायस्य पञ्चदशस्य मन्त्रस्य 'ओम्' इति पदस्य देवता परमात्मा विद्यते। परन्तु स्वामी दयानन्दो यजुर्वेदे एकषष्टिमन्त्राणां देवतात्वेन ईश्वरं, परमेश्वरं, परमात्मानं वोल्लिलेख। षोडशमन्त्राणां देवतां पुरुषम्, ईशानां स्रष्टारं, स्रष्टेश्वरं वा तथा चत्वारिंशत्तमाध्यायस्य चतुर्थमन्त्रस्य देवतां ब्रह्म इति निर्दिदेश।

## कूटपदानि

अध्यात्मम्, आत्मा, परमात्मा, ब्रह्म, अक्षरम्, परावरम्, ओ३म्, जीवात्मा, मनः, शरीरः, चिरयुवानम्, अजरम्, धीरः, सर्ववेत्ता, भूतानि, विचिकित्सा, विद्या, अविद्या, परा, अपरा, ऋतम्।

## प्रस्तावना

वेदाः सकलविद्यानिधानत्वात्, अध्यात्मत्वेनाऽपि समलङ्कृताः समन्विताश्च। सर्वा विद्या वेदादेव विनिस्सृताः प्रसृताश्चेति प्रसिद्धिः सुतरां वेदज्ञेषु विद्वत्सु वरीवर्ति। एके पौराणिकमतावलम्बिनो विद्वत्तल्लजास्तु वेदानध्यात्मयुतानेवाङ्गीकुर्वते। तन्मते वेदेऽध्यात्मविद्यां विहायान्याः सर्वा

---

२. निरुक्त– १.१.२

३. वैदिक साहित्य का इतिहास। (पं. बलदेव उपाध्याय)

भौतिकविद्या न सन्ति।[३] परं वार्तेयं न सुसङ्गता दरीदृश्यते यतोहि, उपनिषदि वर्णितमस्ति यत्– **द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवाऽपरा च। तत्रापरा ऋग्वेदो, यजुर्वेदः, सामवेदोऽथर्ववेदः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।**[४]

अनेनोपनिषदुद्धरणेन सुव्यक्तं वर्त्तते यदुभे विद्ये वेदेषु वर्त्तते। यत्र–यत्र प्रत्यक्षत्वेनेश्वरस्य महिमान्विता मन्त्राः सन्ति तत्र–तत्र परा विद्याऽध्यात्मविद्या वा विज्ञेया। ततो व्यतिरिक्ता या विद्याऽवशिष्टा सा विविधरूपा पदार्थविद्या अपरेति विश्वविश्रुता वर्त्तते। अत एव परा–अपरा चेति द्वे विद्ये विज्ञातव्ये। वाजसनेयिसंहितायामपि चत्वारिंशत्तमेऽध्याये प्रकारान्तरेणेयं वार्त्ता निगदिता– "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते"।[५]

अत्राऽविद्यापदेन सकलाः पदार्थविद्या भौतिकविद्या वा प्रतिपादिताः। आभिर्विद्याभिः सांसारिकं भौतिकं वा जीवनं यापयितुं निजमत्या मनुजः सकलं ज्ञानमुपैति। अथ चाऽवशिष्टयाऽन्यया विद्यया परयाऽमृतां मोक्षलक्ष्मीमवाप्नोति। पदार्थविद्यां विना भौतिकजीवनस्ययापनमसम्भवम्। तज्ज्ञानानन्तरमेव विद्यायाः परिणामं मोक्षं भजते मुमुक्षुः। तस्मिन्नक्षरे विज्ञाते सर्वं विज्ञातं भवतीति भावं निगृह्याभिव्यनक्तीयमुपनिषद्– भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।

क्षीयन्ते चाऽस्य कर्माणि तस्मिन् दृष्टे परावरे।।[६] अर्थात् तस्मिन् परावरे परमेश्वरे विज्ञाते सर्वसंशयाश्छिद्यन्ते हृदिस्था ग्रन्थयो भिद्यन्ते कर्माणि च सर्वाणि क्षीयन्ते कुशलाकुशलानि।

**मुख्यविषयः**

अध्यात्मपदमपि भावमिमं स्वगर्भे धत्ते। आत्मानं परमात्मानं वा (आत्मशब्देनोभौ विवक्षितौ)[७] अधिकृत्य यदध्ययनम्, अर्थान्वेषणं, तत्त्वानुशीलनं,

---

४. मुण्डकोपनिषद् १.१.४–५

५. यजुर्वेदः ४०.११

६. मुण्डकोपनिषद् २.८

७. नैयायिकवैशेषिकमते आत्मा द्विविधो जीवात्मा परमात्मा च।

याथातथ्येन परिशीलनं वा प्रवर्त्तते तदध्यात्मपदेनोच्यते। प्रकृतिरास्माकीन–मैहिकञ्जीवनं सञ्चालयति। यद्यपि प्रकृतिं विना जीवनस्य गतिर्न सम्पद्यते तथापि प्रकृतेरुपरिष्टादध्यात्मतत्त्वं विराजते। यतो हि प्रकृतिः जीवान् बध्नाति, अथ चाऽध्यात्मं जीवान् दुःखेभ्यो निवारयति मोचयति च। एका प्रकृतिर्बन्धनकरी द्वितीयन्तु मोक्षप्रदम् अध्यात्मम्। अयमेवोभयोर्भेदः। वार्त्तामिमां चारु अवगमयितुं कथामेकां लोकविश्रुतामिह संक्षिपामि।

एकस्मिन् ग्रामे द्वावन्धखञ्जौ जनौ निवसतः स्म। तत्र सुखेन जीवनं यापयतोस्तयोरेकदा ग्रामेऽग्निकाण्डं सञ्जातम्। सर्वे जना इतस्ततः धावन्तः पलायाञ्चक्रिरे परं खञ्जः पादेन विना गमनेऽसमर्थः, द्वितीयोऽन्धः नेत्रविहीनतया गन्तुं नाऽशक्नोत्। उभयोः सदृशा स्थितिः। सहसा खञ्जपुरुषस्य मस्तिष्के कश्चिद् विचारः पुस्फोट। असौ येन–केन प्रकारेण अन्धं समया जगाम, जगाद च, भोः! अस्मादग्नेः स्वात्मानं रक्षितुमेक एव उपायः। अन्ध उवाच, कथय–कथय, क उपायः, इतः पलायनस्य? सोऽवदत्, अहं तव स्कन्धयोरुपविशामि मार्गञ्च विज्ञापयामि भवांस्तु पादाभ्यां धावित्वा ग्रामात् बहिर्निर्गच्छतु। अन्धजनेनैष विचारो झटित्यङ्गीकृतः। किञ्च तेन खञ्जपुरुषं स्कन्धयोर्निधाय तन्निर्देशानुसारं पलायनं प्रारब्धम्। ग्रामाद्बहिश्चौभौ समायातौ। अयं संस्कृतसाहित्येऽन्धपङ्गुन्यायो निगद्यते।

एवमत्रैका पदार्थविद्या, भौतिकीविद्या प्रकृतिः, अपरा च अध्यात्मविद्या, पराविद्या प्रकृतेर्भिन्ना काचिदपरिमितसर्जनशीलादैवी शक्तिः। एका अन्धा द्वितीया तु खञ्जा। प्रकृतिरन्धाऽध्यात्मविद्या च खञ्जा। अध्यात्मं विना प्रकृतिरन्धा, निरंकुशा, विनाशकरी च। द्वितीया चाऽध्यात्मविद्या प्रकृतिं विना खञ्जा साधनविहीना गन्तुमक्षमाऽसमर्था च। अत एव प्रकृतेरुपरि प्रतिष्ठापयितव्यमध्यात्मतत्त्वं प्रशस्तश्च कर्तव्यः पन्थाः। अद्यत्वे तु सर्वमितो विपरीतमेव दरीदृश्यते। अध्यात्ममधि प्रकृतिः उपविष्टा "अन्धेनैव नीयमाना यथान्धाः"[८] इति दृश्यमेव सर्वत्र प्रत्यक्षीभवति। इयमेव सकला भ्रान्तिः उपपन्ना। तस्मान्महर्षि दयानन्द एवमाह– "यया चाऽदृश्यादिविशेषगुणयुक्तं सर्वशक्तिमद् ब्रह्म विज्ञायते सा पराविद्या अर्थादपरायाः सकाशादत्युत्कृष्टा–

---

८. मुण्डकोपनिषद् २.८

स्तीति वेद्यम्"।[९] अस्मिन् वाक्ये सुस्पष्टं ब्रूते स्वामी दयानन्दो यदपराविद्यायाः पराविद्या अतीवोत्कृष्टा वर्त्तते, सैव सर्वैः कल्याणेप्सुभिर्जनैर्ज्ञातव्या। एनमेवाभिप्रायं चेतसि निधायोपनिषदि जगादर्षिः– इह चेदवेदीदथ सत्यमस्ति नो चेदिहावेदीन्महती विनष्टिः। भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।।[१०]

अर्थात् जीवनेऽस्मिन् यदि मनुष्यः परमात्मानमवगच्छेत् तदा तु शोभना स्थितिः अन्यथा खलु महान् विनाशः। नात्र लवलेशोऽपि सन्देहावसरः। स्वामी दयानन्दो विशदमुद्घोषयति ऋग्वेदादिभाष्यभूमिकायाम्– "अत्र चत्वारो वेदविषयाः सन्ति विज्ञानकर्मोपासना–ज्ञानकाण्डभेदात्। तत्रादिमो विज्ञानविषयो हि सर्वेभ्यो मुख्योऽस्ति। तस्य परमेश्वरादारभ्य तृणपर्यन्तपदार्थेषु साक्षाद् बोधान्वयत्वात्। तत्रापीश्वरानुभवो मुख्योऽस्ति। कुतः? अत्रैव सर्वेषां वेदानां तात्पर्यमस्तीश्वरस्य खलु सर्वेभ्यः पदार्थेभ्यः प्रधानत्वात्"।[११] इमामेव भावनां महर्षिव्यासोऽपि वेदान्तसूत्रे सम्यग्रूपेणाभिव्यनक्ति– 'तत्तु समन्वयात्'[१२] अस्य सूत्रस्यार्थं स्वामी दयानन्द एवं प्राह– "तदेव ब्रह्म सर्वत्र वेदवाक्येषु समन्वितं प्रतिपादितमस्ति। क्वचित् साक्षात् क्वचित् परम्परया च। अतः परमोऽर्थो वेदानां ब्रह्मैवाऽस्ति"। वाजसनेयिसंहितायामपि एको मन्त्र इममेव भावं पुष्णाति "यस्मान्न जातः परो अन्यो अस्ति"[१३] अर्थात् यस्मात् परमेश्वरात् पर उत्कृष्ट उत्तमः समुद्भूतः सुव्यक्तः पदार्थोऽन्यो भिन्नः कश्चिदपि नाऽस्ति। अन्यस्मिन् स्थलेऽपि मन्त्रो ब्रूते– "प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव"[१४] अर्थात् हे परमात्मन्! त्वदन्योऽस्मिँल्लोके नास्ति द्वितीयो मनुष्यैर्ज्ञेयः। माण्डूक्योपनिषद्यपि धारणेयं सुप्रकटीकृता महर्षिणा–

---

९. ऋग्वेदादिभाष्यभूमिका– वेदविषयविचार– स्वामी दयानन्द सरस्वती

१०. केनोपनिषद्– २.५

११. ऋग्वेदादिभाष्यभूमिका– वेदविषयविचार– स्वामी दयानन्द सरस्वती

१२. वेदान्त सूत्र १.१.४ महर्षि व्यास– ऋग्वेदादिभाष्यभूमिका– वेदविषयविचार– स्वामी दयानन्द सरस्वती

१३. यजुर्वेदः– ३२.५

१४. ऋग्वेदः १०.१२१.१०

'ओमित्येतदक्षरमिदँ सर्वं तस्योपव्याख्यानम्'[१५] स्वामी दयानन्दकृतोऽस्या– र्थोऽवश्यं दर्शनीयः– "ओमित्येतद्यस्य नामाऽस्ति तदक्षरम्"। 'यन्न क्षीयते कदाचिद्यश्चराचरं जगदश्नुते व्याप्नोति तद् ब्रह्मैवास्ति' इति विज्ञेयम्। अस्यैव सर्वैः वेदादिभिः शास्त्रैः सकलेन जगता वोपगतं व्याख्यानं मुख्यतया क्रियतेऽतोऽयं प्रधानविषयोऽस्ति इत्यवधार्यम्। किञ्च प्रधानस्याऽग्रेऽप्रधानस्य ग्रहणं भवितुमर्हति? "प्रधानाऽप्रधानयोः प्रधाने कार्यसम्प्रत्ययः" इति व्याकरणमहाभाष्यवचनप्रामाण्यात्। एवमेव सर्वेषां वेदानामीश्वरो मुख्योऽर्थो मुख्यतात्पर्यमस्ति। तत्प्राप्तिप्रयोजना एव सर्व उपदेशाः सन्ति। अतस्तदुपदेशपुरस्सरमेव त्रयाणां कर्मोपासनाज्ञानकाण्डानां पारमार्थिकव्यावहारिकफल सिद्धये यथायोग्योपकारायानुष्ठानं सर्वैर्मनुष्यैर्यथावत् कर्त्तव्यमिति"।

उपर्युक्तानि सर्वाणि वेदोपनिषद्वाक्यानि व्याख्यानानि च समुद्घोषयन्ति यत् सकलवेदादिशास्त्राणां प्रयोजनमीश्वरप्राप्तिरेवास्तीति सुनिश्चितम्। ईश्वरानुभूतिविद्यैव अध्यात्मविद्या पराविद्या वा। मनुष्यैरिहैव सकलः प्रयत्नो विधातव्यः। यो जनोऽस्यां विद्यायां प्रयासं न कुरुते नाऽसौ कदापि मानवजीवनेऽस्मिन् सुखं शान्तिञ्च लभते। उपनिषदि भावमिमं बहुसम्यग्रूपेण प्रत्यपादयदृषिः– यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति।।[१६] अत्रोपमामुखेन ऋषिर्जगाद– यथा मानवा व्यापकं विस्तृतं व्योममण्डलं चर्मणा न कदाप्याच्छादयितुं समर्था भविष्यन्ति, अशक्यत्वादसम्भवाच्च। तथैवाऽस्मिन् लोके तस्य विभोर्ज्ञानं विना तमविदित्वा वा दुःखानां कष्टानां अवसानं न सम्पत्स्यते। अनेन सुस्पष्टं प्रतिभाति यदीश्वरो ज्ञेयः। एनं विहायान्यः कश्चित् पदार्थः सर्वदा सर्वथा सर्वभावेन च मयस्करो नास्ति। इति निश्चप्रचम्।

ऋगथर्ववेदयोरुभयोरपि मन्त्र एकः सुप्रसिद्धो वरीवर्ति। यत्र त्रैतवादः सुस्पष्टतया वर्णितोऽस्ति। इह मन्त्रे रूपकमाध्यमेन त्रित्वं वर्णयति वेदः। एकस्मिन् वृक्षे द्वौ पक्षिणौ तिष्ठतः। हंसावेतौ सहितौ वसतः, मित्रे च स्तः।

---

१५. माण्डूक्योपनिषद्– १.१

१६. श्वेताश्वतरोपनिषद्– ६.२०

तयोरेकः पक्षी मधुराणि फलानि भुङ्क्ते, अपरञ्च फलान्यभुञ्जानः साक्षी सन् निवसति।[१७]

मन्त्रेऽस्मिन् प्रकृतिं वृक्षाभिधानमवोचत् यतो ह्यचेतनेयं वृश्च्यते छिद्यते च। अत्र तिष्ठन्तावुभौ पक्षिणौ जीवेश्वरौ स्तः। अनयोर्जीवात्मा जगति पूर्वंतकर्मफलान्यश्नुवन् नूतनानि खलु सृजति कर्माणि। तयोरपर ईश्वरः कर्मफलानि नाऽश्नुते। अयं केवलः सन् साक्षित्वेन संस्थितः प्रकाशस्वरूपात्मकत्वाद् द्योतयति। संक्षेपेणैनमेवं सहजया सरलया च गिरा वक्तुं शक्नुमो यदसौ परमेश्वरः जीवानां कृते कर्माणि कर्तुं कर्मफलानि च भोक्तुमस्य कृत्स्नस्य दृश्याऽदृश्यजगतो निर्मितिञ्चकार। अस्मादपि परतः तद्ब्रह्म निजे द्योतनात्मकस्वरूपेऽवस्थितोऽस्ति। मन्त्रोऽयमृगथर्ववेदयो–रतिरिक्तं (मुण्डकोपनिषद् ३.१.१) श्वेताश्वतरोपनिषदि च (४.६) अनेनैव स्वरूपेणाऽऽग–तोऽस्ति। प्रायशस्सर्वे आचार्या अस्मिन् मन्त्रे स्व–स्व व्याख्यानं चक्रुः। श्रीभगवद्रामानुजाचार्यः शारीरकमीमांसाभाष्यस्य "अथातो ब्रह्म जिज्ञासा" इति प्रथम एव सूत्रे मन्त्रमेनमुद्धरन् विवेचयामास। साक्षादियं श्रुतिः द्वैत, विशिष्टाद्वैत, त्रैतवादानां च प्रवर्तिकेति स्वीक्रियत आचार्यैः। परं श्रीशङ्कराचार्योऽस्य व्याख्यानम् अद्वैतपरकं विदधौ।

स 'द्वा सुपर्णा' इत्यस्यार्थं विज्ञानात्मा परमात्मा च विधायैकस्यैवाऽऽत्मनः सोपाधिकं द्वैतं काल्पनिकं रूपं जगाद। आचार्यः सायणोऽथर्ववेदेऽस्य मन्त्रस्य तु भाष्यं न चकार परमृग्वेदेऽस्य मन्त्रस्यार्थं विदधौ। असावत्र सायणकृतोऽर्थः प्रसंगोपात्तो द्रष्टव्यः– अत्र लौकिकपक्षिणोः दृष्टान्तेन जीवपरमात्मनोः स्तुतिः प्राप्यते। यथा लोके द्वौ सुन्दरौ गमनशीलौ, समयोगौ, समाख्यौ एकमेव वृक्षं भजेते। अर्थादेकस्यैव वृक्षस्याश्रयं गृह्णीतः। तयोरेकः पक्वानि स्वादिष्टानि पिप्पलानि फलान्यत्ति। द्वितीयोऽनश्नन् केवलं विलोकयति। तथोभौ शोभनौ गमनस्थानीयौ आत्मा (क्षेत्रज्ञः) परमात्मा च समानयोगौ (योगः सम्बन्धः तच्च तादात्म्यलक्षणम्। स जीवात्मा एव यस्य

---

१७. द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्यश्नन्नन्योऽभिचाकशीति।।

अथर्ववेदः– १.६.२०, ऋग्वेदः– १.१६४.२०

परमात्मनो निजरूपो वर्त्ततेऽसौ तदात्मा) एवं प्रकारेणैकस्वरूपिणौ। अस्मात् सुस्पष्टमिदं यद् भास्करमतानुसारं अतिरेकी नाम जीवात्मा न विद्यते परमात्मनो भिन्नः। जीवस्याश्रयभूतत्वेन परमात्मा जीवात्मनो भिन्नः। मतमिदमपास्तम्। निश्चयेन किल सम्बन्धो द्विविधः। असौ च पक्षिसदृशः पृथक्त्वमपेक्षते। अत ऐकात्मत्वं कथम्? अयं ननु नैतादृशः। औपाधिकोऽयं भेदो वस्तुतस्तु अभेदापेक्षया प्रवृत्तः। अतस्तौ समानख्यानौ स्तः नान्याभिधानौ। एकस्य यथाख्यानं द्वितीयस्य खलु तथा। अनेन निर्वचनेनैव भेदः सुस्पष्टः प्रतिभाति। तदा तादात्म्यं कथं ब्रूते? न वक्तव्यम्। नाऽत्र दृष्टान्तदार्ष्टान्तिर्भावः, अपितु यादृशं ख्यानमर्थात् स्फुरणं परमात्मनस्तादृशं द्वितीयस्य जीवात्मनोऽपि। अत एव 'सखायौ' एवमुक्तम्। अर्थात्– एकरूपौ प्रकाशयुतौ जीवात्मपरमात्मानौ द्वौ स्तः। अत ऐकात्म्यं स्पष्टम्। अनेन यथार्थभेदोऽपि निरस्तः। **'समानं वृक्षं परिषस्वजाते'**[१९] अत्र 'यथाश्रयान्तराभावादुभयोः' एकाश्रयत्वं विज्ञातव्यम्। तथैव 'सयुजौ सखायौ' अत्रापि एको योग एकमेव ख्यानञ्चेत्ययमर्थो वेदितव्यः। वृश्चयते छिद्यते अतः शरीरमेव वृक्षः। स च देव एव द्वयोः समानयोः एक एवाश्रयभूतः। जीवात्मनो भोगार्थं परमात्मना महाभूतैर्निर्मिता संसृष्टिः। तस्य चोपलब्धेः समानत्वाद् द्वयोः समानाश्रयोऽयं देह एव। इत्थं प्रकारकस्य समानवृक्षरूपदेहस्याश्रयमुभौ गृह्णीतः। वस्तुतो जीवश्चेदीश्वरो नाऽस्ति तर्ह्युभयोर्मोहत्वात् जीवबुद्ध्या संसारशोकौ कथं कथ्येते? अर्थात् द्वयोरैक्यं वर्त्तते। इमामेव वार्ताम् आथर्वणिकाम्नाय मन्त्रानुकूलसन्देहं निवारयितुम् उत्तररूपोऽयं मन्त्र एवं वक्ति–

**समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।**

---

१८. मुण्डकोपनिषद्– ३.२

१९. अत्र लौकिक पक्षिद्वयदृष्टान्तेन जीवपरमात्मानौ स्तूयेते। यथा लोके द्वौ सुपर्णो सुपतनौ शोभनगमनौ सयुजाः समानयोगौ सखाया समानख्यानौ समानं वृक्षं परिषस्वजाते। एकमेव वृक्षं परिषस्वजाते आश्रयतः। तयोरन्यः पिप्पलं स्वादुतरमत्ति, अपरोऽनश्नन् अभिचाकशीति अभिपश्यति। तद्वत् द्वौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ सयुजा समानयोगौ (योगो नाम सम्बन्धः स च तादात्म्यलक्षणः) स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मनः स तदात्मा। एवमन्यस्यापि स एवात्मा परमात्मनः स्वरूपं यस्य जीवात्मनः। एक एव स्वरूपावित्यर्थः। अनेन भास्करमतानुसारिणोऽतिरेकिनाम्नो जीवात्मा परमात्मनो नान्यः। स च परमात्मा

**जुष्टं यदा पश्यत्यन्धमीशमस्य महिमानमिति वीतशोकः।।**[१६]

अस्यायमर्थः–एकस्मिन्नेव शरीरे पूर्णः पुरुषः परमात्मा तिरोहितः

---

जीवादन्यो जीवाश्रयणादिति मतं निरस्तं भवति। ननु सम्बन्धो द्विष्ठः। स च पक्षिणोरेव भेदमपेक्षते। अतः कथं ऐकात्म्यमिति? न। औपाधिकभेदं वास्तवाभेदं चापेक्ष्य प्रवृत्तः। अत एव सखायौ समानख्यानौ नान्यख्यानौ। ननु एकस्य यादृशं ख्यानं तादृशमेव अन्यस्येति व्युत्पत्त्या भेदः स्फुटः प्रतिभाति। कथं तादात्म्यमुच्यत इति न व्यक्तव्यम्। नाऽत्र परस्परं दृष्टान्तदार्ष्टान्तिर्भावः। अपितु यस्य यादृशं ख्यानं स्फुरणं परमात्मनः तदेव ख्यानमितरस्य जीवात्मन इति सखायावित्युच्यते। एकरूपप्रकाशावित्यर्थः। अत उपपन्नमैकात्म्यम्। अनेन वास्तवभेदोऽपि निरस्तः। "समानं वृक्षं परिषस्वजाते" इत्यत्र यथाश्रयान्तराभावादुभयोरेकाश्र–यत्वमभ्युपगन्तव्यम् तद्वत्सयुजा सखायावित्युभयत्राप्येक योगख्याने आश्रयणीये। वृश्चयते इति वृक्षो देहः। स चोभयोः समान एक एव। जीवस्य भोगार्थत्वात् परमात्मनासृष्टैर्महाभूतैः आरब्धत्वात् तस्योपलब्धिस्थानत्वाच्चोभयोरपि समानः। तादृशं समानं वृक्षं परिषस्वजाते परिष्वजतः। आश्रयतः। न च जीवस्य वस्तुत ईश्वरत्वे कथं जीवबुद्ध्या संसारशोकाविति वाच्यं तयोर्मोहकृतत्वात्। तथा चाथर्वणिका अनुमन्त्रम् आम्नायस्य सन्देहनिवर्त्तकमुत्तरं मन्त्रमेवमामनन्ति। "समाने वृक्षे पुरुषो निमग्नोऽनीशय शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्धमीशमस्यमहिमानमिति–वीतशोकः"। अस्यायमर्थः– एक एव शरीरे पूर्णः पुरुषः परमात्मा निमग्नो निगूढः सन् स्वयमपीश्वरोऽप्यनीशत्वबुद्ध्या मुह्यमानो मूढः सन् शोचति। संसारेऽहं कर्ता, सुखी, दुःखीति जननमरणे अनुभवति। यदा तु जुष्टं नित्यतृप्तमन्यं संसारशोकातीतमीशं परमेश्वरं पश्यति। स्वानन्यतया साक्षात्करोति। तदा वीतशोको देहाद्व्यतिरिक्तः स्वस्वरूपसाक्षात्कारेण गततापत्रयः सन्, अस्य महिमानमिति निरस्तसमस्तोपाधिकस्य परमेश्वरस्य महिमानं सार्वात्म्यसर्वज्ञत्वादि–महिमानमित्येति प्राप्नोति। न च तद्भावान्यत्र तन्महिमा प्राप्यते। अतस्तद्रूपो भवतीत्यर्थः। तस्मादाह स्तुत एक एव। भेदात्तु मोहकृत इति प्रसिद्धम्। अनुभवदशायां लौकिकबुद्ध्या भेदमभ्युपेत्योच्यते। तयोः अन्यो जीवात्मा पिप्पलं कर्मफलं स्वादुभूतमत्ति भुङ्क्ते। यस्य यदुपार्जितं तत्तस्य स्वादु भवति। अन्यः परमात्माऽनश्नन् आप्तकामत्वेन अभुञ्जानः स्पृहाया अभावात् आप्तकामस्य का स्पृहेति स्मृतेः। तस्मादवास्तवभेदमुपजीव्य तयोरन्य इत्युक्तम्। वस्तुतस्त्वनीशया शोचति मुह्यमान इत्युक्तत्वाद् अभेद एव। तादृशः परमात्मा स्वात्मन्यध्यस्तं जगत् साक्षित्वेनेक्षते। अत्र द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्त्तारौ इत्यादि निरुक्ते गतमस्य मन्त्रस्य व्याख्यानमनुसन्धेयम्। (अथर्ववेद–१.१.२०, ऋग्वेद–१.१६४.२०, सायण भाष्य, निरुक्त–१४.३०)

स्वयमीश्वरो भूत्वाऽपि अनीशमत्या विमूढयन् दुःखमवाप्नोति। अथ यदा निजात्मनोऽभिन्नमनन्यं वा मत्वा साक्षात्करोति तदा वीतशोको देहातिरिक्तो निजरूपस्य साक्षात्कारेण त्रितापरहितः स्वमहिमानं वीक्षते। सकलैरुपाधिभिर्विना परमात्मनो महिमानं सार्वात्म्यं सर्वज्ञत्वादिकञ्च लभते जीवात्मा। निजरूपात् पृथगन्यत्रान्यस्य कस्यचिन्महिमानं नाऽवलोकयति। अर्थात् तद्रूपो भवति। अत एक एव देवः स्तुतिं लभते। मोह एव च भेदप्रतीतेः कारणम्। अनुभवावस्थायां लौकिकबुद्ध्या विभेद्याभिधीयते तयोरेको जीवात्मा कर्मफलरूपाणि स्वादयुक्तानि फलानि भक्षयति। निजार्जितम् आत्मने स्वादु प्रतीयते। अपरः परमात्माऽनश्नन् (आप्तकामत्वात्, इच्छाया अभावत्वात्–अभक्षयन्) असंगस्तिष्ठति। अस्मात् कारणात् यथार्थमभेदे सति तयोरन्य एवमभिधीयते। वस्तुतस्तु 'अनीशया शोचति मुह्यमानः' एवं भाषणेनाभेदमेव प्रकटीकरोति। एवंविधं ब्रह्म स्वस्मिन् स्थितं जगत् साक्षिभावेन पश्यति। अत्र "द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्त्तारौ" इत्यादि निरुक्ते यास्केन यदुक्तं मन्त्रव्याख्यानमन्वेषणीयम्।

नैकेष्वृग्वेदीयमन्त्रेषु प्रयुक्तमात्मपदं स्वस्मै निजायाऽथवा अहम् इत्येतस्मिन्नर्थे वेदयन्ते विद्वांसः। साम्प्रतमिह परमात्मने प्रयुक्तमात्मपदयुजं वेदमन्त्रमेकं प्रस्तोतुमीहे। "तमेव विद्वान्न बिभाय मृत्योरात्मानं धीरमजरं युवानम्"।[२०] तं चिरयुवानमजरं धीरं सर्ववेत्तारं परमात्मानं यो वेत्ति स जनः चिरानन्दे निमज्य मृत्योर्न बिभेति। अत्र स्तोतेश्वरं विज्ञाय मृत्युभयमपाकरोति। मन्त्रागतेनात्मपदेन परमात्मैव विज्ञापित इति सुस्पष्टम्। यानि च विशेषणानि प्रयुक्तानि तानि सर्वाणि परमेश्वरवाचीन्येवेति।

अधोलिखितमन्त्रे आत्मपदेन जीवात्मा निर्दिष्टः– यस्तु सर्वाणि भूतान्यात्मन्नेव अनुपश्यति। सर्वभूतेषु चात्मानं ततो न विचिकित्सति।।[२१] यो मनुष्यः सर्वप्राणिषु स्वात्मसदृशं व्यवहारमाचरति स न मुह्यति, न शोकमवाप्नोति, न कष्टं भुङ्क्ते। न च काऽपि विचिकित्सा तस्य बोभवीति।

---

२०. अथर्ववेदः – १०.८.४४

२१. यजुर्वेदः – ४०.६

निम्नाङ्किते मन्त्रे आत्मपदेन मनः सङ्केतितम्– "उपस्थाय प्रथमजामृतस्यात्मनात्मानम् अभिसंविवेश"[२२] ऋतस्यार्थात् प्राकृतिक–नियमाभिव्यक्तेराश्रयं नीत्वाऽऽत्मा निजमनसा परमात्मनि संनिविशतेऽथवा तमनुगच्छति, अनुवदत्यनुभवत्यनुतिष्ठति वा। स्वामीदयानन्दसरस्वती महाभागोऽस्यार्थमेवमाह– "तं परमानन्दस्वरूपंमोक्षाख्यं परमेश्वरं यो जीवात्मना स्वसामर्थ्येनार्थान्मनसाऽन्तः करणेन यथावज्जानाति स एवाभिमुख्येन सम्यक् प्राप्य मोक्षाख्यं सुखमनुभवति"।।[२३]

पश्यन्तु सुधियोऽथर्ववेदीयेऽस्मिन् मन्त्रे आत्मशब्दः शरीरवाचकः– "अथास्येतरमात्मानं देवाः प्रायच्छन्नग्नये"।[२४] अस्य मन्त्रस्यार्थं सायणविश्वनाथ– विद्या मार्तण्डौ कुर्वन्तौ 'आत्मानं' पदस्यार्थं स्थूलशरीरं चक्रतुः। तच्च युक्तियुक्तमेव प्रतीयते। एकमन्यमपि मन्त्रं[२५] प्रस्तौमि येनायमर्थः सुव्यक्तो भवेत्– अनेकत्र मन्त्रेष्वात्मपदेन मानवस्य पुरुषस्य ग्रहणं विद्यते। तद्यथा[२६] एषु त्रिषु मन्त्रेषु आत्मा इति पदेन मनुष्यस्य पुरुषस्य वा ग्रहणं सर्वथोचितम्। न केवलं मनसः, आत्मनः, शरीरस्य वा।

उपर्युक्तैः प्रमाणैः सुतरां सुव्यक्तं प्रतिभाति यदात्मशब्दः पञ्चभ्यः पदार्थेभ्य आत्मपरमात्ममनशरीरपुरुषेभ्यः प्रयुक्तो वरीवर्त्ति। नाऽत्र कश्चित्सन्देहलेशोऽपि। अतोऽध्यात्मविद्यायामेषां पञ्चानां तत्त्वानां ग्रहणमिष्यते। यज्ज्ञानं आत्माभिमुखं परमात्मसम्मुखं च न कुरुते तज्ज्ञानं पुरुषमाध्यमेन शरीरविवेचनपद्धत्या, मनसो वर्णनेन विश्लेषणेन वा प्राप्नुयात्

---

२२. यजुर्वेदः – ३२.११

२३. ऋग्वेदादिभाष्यभूमिका– ब्रह्मविद्याविषयः– स्वामीदयानन्दसरस्वती

२४. अथर्ववेदः – ११.८.३१

२५. अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते।। (ऋग्वेदः – १०.१६३.६)

२६. यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम्।
चकार भद्रमस्मभ्यमात्मने तपनं तु सः।। (अथर्ववेदः – ४.१८.६)

I. आत्मानं पितरं पुत्रं पौत्रं पितामहम्।
जायां जनित्रीं मातरं ये प्रियास्तानुपह्वये।। (अथर्ववेदः–६.५.३०)

II. यं वयं द्विष्मः स आत्मानं द्वेष्टु। (अथर्ववेदः –१६.७.०५)

साऽध्यात्मविद्यैव। एकस्मिन् मन्त्रव्याख्याने ऋषिरुवाच– मन्त्रागताः शरीरस्थाः सप्तर्षयो ये विज्ञापिताः किन्ते शरीरधारिणः ऋषयो भवितुमर्हन्ति? वस्तुतोऽत्रर्षिभ्यः सप्तप्राणा उत ज्ञानेन्द्रियाण्येव अभिमतानि सन्ति। ये प्रमादरहिताः, निरता, अनवरता इमं गेहं रक्षन्ति। इहैव येषां सप्तजलानां नदीनां वा स्वपन् मनुष्यस्य स्वप्नजगत्यामागमनं सङ्केतितं तान्यपि सप्तेन्द्रियाण्येव सन्ति। यतो हि मनसा साकं तानि स्वप्ने स्व–स्व विषयाणामनुभवं कुर्वन्ति। तत्रैव सर्वासु स्थितिषु जागृतौ द्वौ देवावात्मपरमात्मानौ स्तः। शरीरस्थावेतौ देवौ खलु देहधारिणौ देवौ न भवितुं शक्नुतः। अत्र मन्त्रस्याध्यात्मिकोऽभिप्रायः सुव्यक्तो वर्त्तते।[२७]

## उपसंहारः

वेदस्य सर्वप्रकाशकः सर्वेश्वरः परमात्मा कस्यचिदेकस्य सम्प्रदायस्य, जातेः, देशस्य वा सीमायां परिसीमितो नाऽस्ति। अपितु सर्वे जना याचकाः सन्तः तमाह्वयन्ति।[२८] असौ सर्वेभ्यः समानः साधारणश्च।[२९] अनेनैव समभावेन स विश्वबन्धुत्वस्यैकं सूत्रं वर्त्तते। स परमेश्वरो वेदमन्त्रमाध्यमेन वदति– अहमस्याः कल्याण– स्वरूपाया वेदवाण्याः प्रवचनं सर्वेभ्यो मनुष्येभ्यः करोमि स किल ब्राह्मणः स्यात् क्षत्रियो वा, वैश्यो वा स्यात् शूद्रो वा, अस्य देशस्य स्यात्, परस्य वा, स्वस्य स्यात् परस्य वा।[३०] तस्य दृष्टौ नास्ति कश्चिद् भेदः स्वपुत्रेषु स्वप्रजासु च। एवं वेदवाग् लोकलोकान्तरस्य मानवस्य कृते शिवदा वरीवर्त्ति। वेदाः सार्वदेशिकाः सार्वजनीनाः सार्वभौमिकाश्च। वेदानुसारं पृथिवी नानाऽऽचारविचाराणामनेकविधकृत्यपालानां, विविधभाषाभूषासाराणाम् एकं महदायतनमस्ति। मातृसदृशा सेयं मही सर्वांस्तान् धत्ते।[३१] पृथिवी माता

---

२७. सप्तऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम्।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽस्वप्नजौ सत्रसदौ च देवौ।।
(यजुर्वेदः – ३४.५५)

२८. समानमिन्द्रमवसे हवामहे।। (ऋग्वेदः ८.६६.८)

२९. इन्द्र साधारणस्त्वम्। (ऋग्वेदः ८.६५.७)

३०. यथेमां वाचं कल्याणीमावदानि जनेभ्यः।
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च। (यजुवेदः २६.२)

३१. जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्। (अथर्ववेदः १२.१.४५)

वर्त्तते, सा किं सम्प्रदायभेदेन स्वपुत्रेषु भेदं विदध्यात्? लौकिकी माता किमुत जननी यथा स्वपुत्रेषु भेदं न विदधाति वेदमाताऽपि स्वपुत्रेषु ज्ञानपयःपायने नैव भेदं कुरुते। स्वामी दयानन्दो वेदमन्त्राणामीश्वरपरकार्थानाम्।

आध्यात्मिकार्थानां च प्राधान्यमङ्गीचकार। कर्मकाण्डेऽपि पृथक्–पृथक् देवता भिन्नगुणत्वात् पृथक्शक्तीनां प्रतिनिधयो भवितुमर्हन्ति परमुपासनाया, ज्ञानकाण्डस्य, निष्कामकर्मकाण्डस्य च परमेश्वर एवेष्टदेवोऽस्तीति नाऽत्रशंकापंककलंकलेशोऽपि। यतोहि तत्र तस्यैव प्राप्तेः प्रार्थना विधीयते। कर्मकाण्डस्य च यः सकामभागः तत्राभीष्टभोग्यप्राप्त्यर्थं परमेश्वर एव भज्यते, स्तूयते, प्रार्थ्यते च कामिभिः सुतरां नितरां प्रतरां च सततम्। यद्यप्युभयोः सकामनिष्कामकर्मकाण्डयोः भेदो विद्यते परं द्वयोरपीश्वरस्य त्यागः कुत्राऽपि नास्ति, इत्यभिप्रायो वेदस्य।[३२] एवं वेदस्य मुख्यो विषय एवाध्यात्मम्। कर्मणां निष्कामत्वे सर्वमध्यात्ममेवावतिष्ठते। वेदे सिद्धान्ततः परमात्मा सर्वशक्तिमान् चर्कर्त्ति, बर्भर्त्ति, जर्हर्त्ति च सर्वं जगत्। द्वितीय आत्मा चेतनोऽल्पशक्तिमान् सच्चिदानन्दस्वरूपेश्वरप्राप्त्यर्थमनिशं यतते। तृतीया प्रकृतिः सद्गुणा भोगापवर्गार्थं जीवात्मनः सदैव सेविकेव संयतते। इत्येव वैदिको राद्धान्तः।।

***

३२. परन्त्वयं नियमो यस्य पदार्थस्य यादृशा दोषा गुणा वा सन्ति तादृशानामेवोपदेशः स्तुतिर्विज्ञायते इति कर्मकाण्डं प्रत्यस्ति। उपासनाज्ञानकाण्डयोः कर्मकाण्डस्य च निष्कामभागे परमेश्वर एवेष्टदेवोऽस्ति। कस्मात्? तत्र तस्यैव प्राप्तिः प्रार्थ्यते। यश्च तस्य सकामभागोऽस्ति तत्रेष्टभोगप्राप्तये परमेश्वरः प्रार्थ्यते। अतः कारणाद् भेदो भवति। किन्तु नैवेश्वरार्थत्यागः क्वापि भवतीति वेदाभिप्रायोऽस्ति। (ऋग्वेदादिभाष्यभूमिका–वेदविषयविचारप्रकरणम्–स्वामी दयानन्द सरस्वती।।

# करुणरसस्याऽऽस्वादमूलकचिन्तनम्

**डॉ. शैलेशकुमारमिश्रः**
*असिस्टेंट प्रोफेसर*
*राजकीयसंस्कृतकॉलेज, राँची*

करुणरसस्यऽऽस्वादमूलकं पक्षमाश्रित्य साहित्यशास्त्रीयाऽऽचार्याणां मध्ये नैकमत्यं वर्तते। करुणरसस्य आस्वादमधिकृत्य विरोधमूलकं मतद्वयं वर्तते– दुःखानुभूतिपरं प्रथमम् आनन्दानुभूतिमयं च अन्यत्। आनन्दवादिनामाचार्येषु आनन्दवर्धनभट्टनायकाभिनवगुप्तमम्मटविश्वनाथ–जगन्नाथप्रभृतयः आचार्याः सन्ति दुःखात्मकाऽऽस्वादसमर्थने नाट्यदर्पणकारस्य आचार्यरामचन्द्रगुणचन्द्रस्य नाम उल्लेखनीयं वर्तते। हिन्द्याः स्वनामधन्य आचार्यो रामचन्द्रशुक्लश्चापि दुःखात्मकतामेव समर्थयते।

करुणरसस्य दुःखात्मकाऽऽस्वादसमर्थने रामचन्द्रगुणचन्द्रस्यैव अभिमतं प्रधानतया उल्लेख्यं वर्तते। नाट्यदर्पणकारस्य मतमिदं वर्तते यत् इष्ट विभावादिभिरुपचिताः शृंगारहास्यवीराद्भुतशांतादयो रसाः सुखप्रदाः सन्ति अथ च अनिष्टविभावादिभिः परिपुष्टाः करुणरौद्रवीभत्सभयानकादयो रसाः दुःखप्रदाः वर्तन्ते–

**तत्रेष्टविभावादिग्रथितस्वरूपसम्पत्तयः शृंगारहास्यवीराद्भुतशान्ताः सुखात्मानः। अपरे पुनरनिष्ट विभावाद्युपनीतात्मानः करुणरौद्रवी–भत्सभयानकश्चत्वारो दुःखात्मानः।**[१]

स्वीयां मान्यतां परिपोषयन् नाट्यदर्पणकारो वदति यत् शोकादिभावाः कथमपि सुखरूपाः न भवितुमर्हन्ति। सीताहरणं द्रौपद्याः कचाम्बराकर्षणं दशरथमरणं लक्ष्मणस्य शक्तिभेदनं मालत्याः व्यापादनमित्यादिषु दृश्येषु सुखास्वादो अकल्पनीयः खलु। वस्तुतः अनुकार्यगता एते करुणभावाः

---

१) हिन्दीनाट्यदर्पणे– स्वोपज्ञविवरणटीकायाम्, पृ. २९०

दुःखात्मकाः आसन् अतः अभिनये तान् सुखात्मकान् मन्येत चेदभिनयो अयथार्थो भविष्यति। तस्य वचनमिदं वर्तते–

**अपि च सीतायाः हरणं, द्रौपद्याः कचाम्बराकर्षणं, हरिश्चन्द्रस्य चाण्डालदास्यं, रोहिताश्वस्य मरणं, लक्ष्मणस्य शक्तिभेदनं मालत्या व्यापादनारम्भणमित्याद्यभिनीयमानं पश्यतां सहृदयानां को नाम सुखास्वादः।**[२]

आचार्यवर्यस्य रामचंद्रगुणचंद्रस्याभिमतमिदं विद्यते यत् करुणस्याऽऽनन्दात्मकतापि वस्तुतः दुःखास्वाद एव। आह्लादव्याजेन विवेचकास्तस्य आनन्दरूपतां प्रतिपादयन्ति। तेनेदं मन्यते यत् यथा कदाचित् इष्टजनविनाशात् शोकसन्तप्तं कञ्चिज्जनं सान्त्वयन्तः जनाः अन्येषां दुःखं वर्णयन्ति यदाकर्ण्य दुःखी जनः किंचिद् आश्वस्तो भवति शोकसहनस्य शक्तिमधिगच्छति च किन्तु नैतत्सुखमस्ति दुःखास्वाद एवायं खलु। अन्येषां दुःखवृत्तान्तश्रवणेन दुःखिनो समाश्वस्ताः भवन्ति किन्तु तस्य दुःखकाले यदि तत्र गीतनृत्याद्यानन्दजनकः प्रसंग उपस्थाप्यते चेत् स दुःखमेवानुभविष्यति। अतः करुणादिरसाः दुःखात्मकाः एव सन्ति। तस्य कथनमिदमस्ति–

**योऽपीष्टविनाश दुःखवतां करुणे वर्ण्यमानेऽभिनीयमाने वा सुखास्वादः सोऽपि परमार्थतो दुःखास्वाद एव। दुःखी हि दुःखितवार्तया सुखमभिमन्यते। प्रमोदवार्तया तु ताम्यतीति करुणादयो दुःखात्मान एवेति।**[३]

पूर्वपक्षिभिरेकोऽन्यः प्रश्नः उपस्थापितः यत् करुणरसोऽयं यदि आनंदमयः वर्तते चेत्तत्र अश्रुपातस्य को हेतुः? अश्रुपातादिदं सिध्यमति यदियं करुणरसस्यानुभूतिः दुःखप्रदा इति–

**ननु च युक्तं शृंगारवीरहास्यादिषु प्रमोदात्मकेषु वाक्यार्थसम्भेदाद् आनंदोद्भव इति करुणादौ तु दुःखात्मके कथामिवासौ प्रादुःष्यात्? तथा हि**

---

२) तत्रैव– स्वोपज्ञविवरणटीकायाम्, पृ. २६१–६२

३) तत्रैव– स्वोपज्ञविवरणटीकायाम्, पृ. २६१–६२

**तत्र करुणात्मककाव्यश्रवणाद् दुःखाविर्भावोऽश्रुपातादयश्च रसिकानामपि प्रादुर्भवन्ति न चैतदानन्दात्मकत्वे सति युज्यते।**[४]

तर्कमिमं निराकुर्वन् धनिको वदति यद् अश्रुपातस्य प्रधानं कारणं चित्तविगलितत्वं वर्तते–

**अश्रुपातादयश्चेति वृत्तवर्णनाकर्णनेन विनिपातितेषु लौकिकवैक्लव्य–दर्शनादिवत् प्रेक्षकाणां प्रादुर्भवन्तो न विरुध्यन्ते तस्माद्रसान्त–रवत्करुणस्याप्यानन्दात्मकत्वमेव।**[५]

करुणस्य दुःखात्मकास्वादं निराकुर्वन्तः आनन्दात्मकास्वादस्य समर्थकाः नैके आचार्याः वर्तन्ते। ध्वनिकार आनन्दवर्धनः अभिनवगुप्तपादः मम्मटाचार्यः विश्वनाथकविराज इत्यादयः करुणस्य आनन्दात्मकत्वं प्रतिपादयन्ति। विश्वनाथः करुणस्य सुखात्मकतां प्रतिपादयन् साहित्यदर्पणे वदति–

**करुणादावपि रसे जायते यत्परं सुखम्**
**सचेतसामनुभवः प्रमाणं तत्र केवलम्।**
**किं च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः**
**यथा रामायणादीनां भविता दुःखहेतुता।।**[६]

विश्वनाथस्याभिमतं वर्तते यद्रसः आनन्दरूपो भवती शोकस्थायिभा–वान्निष्पन्नः करुण अपि तथाविधैव आनन्दरूपः इति सहृदयानामनुभूतिरेव प्रमाणमस्ति। करुणस्य आनन्दात्मकतायाः अपरं प्रमाणमिदमस्ति यद् यदि करुणो नाम रसः दुःखानुभूतिजनकः स्यात् तर्हि नैको जनः तस्याऽऽस्वादने प्रवृत्तः स्यात्। वस्तुतः चमत्कारमयं तथ्यमिदं वर्तते यद् ये हि भावाः लोके शोकप्रदाः उद्वेगकराः वा प्रतीयन्ते ते सर्वे काव्ये आनन्दं जनयन्ति।

अभिनवगुप्तस्य मतमिदं वर्तते यत् स्वसंविच्चचर्वणा एव

---

४) दशरूपके– ४/४४ अवलोकटीकायाम्

५) तत्रैव– ४/४४ अवलोकटीकायाम्

६) साहित्यदर्पणे– ३/४–५

रसानुभूतिर्वर्तते सा च आनन्दमयी भवति। अतएव सर्वे रसाः सुखात्मानःवर्तन्ते। अभिनवगुप्तपादाचार्यदृशा रसचर्वणा मूलतः एकविधा प्रकाशमयी च भवति। अतएव आनन्द एव तस्य सारतत्त्वमस्ति। आस्वादयिता स्वीयसंवेदनामास्वदते या खलु स्वतः आनन्दस्वरूपा वर्तते। अतः संवेदनायां तत्र कथं दुःखाऽऽशंका स्यात्?

**अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्यते।**

**तत्र का दुःखाशंका।।**[७]

दशरूपककारो आचार्यधनञ्जयः तस्य टीकाकारश्च धनिकः पूर्वपक्षिणां तर्कान् निरस्य रसस्य सुखात्मकतां प्रतिपादयति–

**तादृश एवासावानन्दः सुखदुःखात्मको यथाप्रहरणादिषु संभोगावस्थायां कुट्टमिते स्त्रीणाम्। अन्यश्च लौकिकात्करुणात्काव्य करुणः तथा ह्यत्रोत्तरोत्तरा रसिकानां प्रवृत्तयः।**[८]

अभिप्रायोऽयमस्ति यत् यथा सम्भोगकालीनानां प्रहारदन्तक्षतनखक्षता–दीनामनुभवो दुःखानुविद्धः सन्नपि आनन्दमयो भवति तथैव करुणरसानुभूतिरियं शोकसंभृता सती अपि आनंदमयी भवति।

पण्डितराजजगन्नाथः पूर्वपक्षिणां तर्कान्निराकृत्य स्वमतं स्थापितवान्। पूर्वपक्षिणां मतमिदमस्ति यत् वास्तविकशकुन्तलायाः रतिः वास्तविकदुष्यन्तस्य कृते सुखात्मको भवति अतः कविकल्पनाप्रसूतशकुन्तलायाः प्रेम कल्पितदुष्यन्तस्वरूपसहृदयेषु अपि सुखमनुभावयिष्यतीति। अनेन दृशा वास्तविकशोकभयाऽऽदयो भावाः ये दुःखात्मकाः मन्यन्ते रसरूपे परिणताः सन्तः कथं सहृदयहृदयेषु सुखमनुभावयिष्यन्ति? अत्र एतद्वक्तव्यं स्यात् यद्यथा अनुकार्यस्य हृदये दुःखानुभूतिः समुत्पन्ना तथैव सहृदयहृदयेष्वपि दुःखानुभूतिः स्यात्। यथा भ्रमवशात् रज्जौ कल्पनाप्रसूतसर्पस्य भयः समुपजायते तथैव शोकोऽपि। पण्डितराजजगन्नाथः शंकामिमां समादधत् कथयति यद्यथा शृंगाररसप्रधानकाव्येभ्यः सुखं समुत्पद्यते तथैव करुणरसप्रधानकाव्येभ्योऽपि

७) हिन्दीअभिनवभारत्याम्– पृ. ५०७

८) दशरूपके– ४/४४ अवलोकटीकायाम्

केवलं सुखमेव समुपजायते। यदि च तथ्यमिदं सहृदयहृदयैः प्रमाणीकृतमस्ति चेत् कार्यानुरोधवशात् कारणमपि परिकल्प्यते।

पूर्वपक्षिभिः अपरा शंकेयमुपस्थापिता यत् करुणरसप्रधानकाव्येभ्यः यदि दुःखोत्पत्तिर्जायते तर्हि कवयः एतादृक्काव्यरचनासु किमर्थं प्रवृत्ताः भवन्ति वा सहृदयाः तादृक्काव्यानां रसास्वादने तेषां श्रवणार्थं दर्शनार्थं वा किमर्थं प्रवर्तन्ते? अस्मिन्विषये स्वीयाभिमतं प्रकटयता जगन्नाथेन प्रोक्तं यत् करुणरसास्वादाने दुःखानुभूतिः अत्यल्पत्वेन आनंदानुभूतिश्चाधिक्येन भवति। यथा चन्दनघर्षणे आंशिकदुःखमनुभूयते किन्तु चन्दनस्य सुगन्धशैत्यानुभवेन सुखाधिक्यात् चन्दनलेपप्रवृत्तिरस्ति लोकानाम्–

**इष्टस्याधिक्यादनिष्टस्य च न्यूनत्वाच्चन्दनद्रवलेपनादाविव प्रवृत्तेरुपपत्तेः।**[९]

पूर्वपक्षिणां तृतीयस्तर्कः अस्ति यत् करुणरसप्रधानकाव्येभ्यः यदि केवलं आनंदः समुत्पद्यते चेत्तस्यानुभावे अश्रुपातः कथं भवति? पंडितराजस्तर्कमिमं निराकुर्वन् अश्रुपातस्य कारणमुल्लिखन् कथयति–

**अश्रुपातादयोऽपि तत्तदानन्दानुभवस्वाभाव्यात् न तु दुःखात्।**[१०]

अर्थात् अश्रुपातस्य कारणं न केवलं दुःखम्। आनन्दानुभवादपि अश्रु समुत्पद्यते करुणरसानुभूतिजन्योऽश्रुपातः आनन्दातिरेकात् समुद्भवति, न तु दुःखानुभूतिकारणात्। अस्य दृष्टान्तं समुपस्थापयता तेन प्रोक्तम्–

**अतएव भगवद्भक्तानां भगवद्वर्णनाकर्णनादश्रुपातादय उपपद्यन्ते न हि तत्र जात्वपि दुःखानुभवोऽस्ति।**[११]

तस्याभिप्रायोऽयं वर्तते यद् भगवत्कथाश्रवणे जायमानोऽश्रुपातः दुःखकारणान्न भवति अपितु आनन्दातिशयादश्रु समुपजायते। वस्तुतः 'रसो वै सः रस ह्येवायं लब्ध्वाऽऽनन्दीभवति' इति तैत्तिरीयोपनिषत्प्रोक्तं श्रुतिवाक्यं प्रमाणं मन्यमानः पंडितराजजगन्नाथः रसस्यानन्दमयतां प्रत्यपादयत्। करुण–

---

९) रसगङ्गाधरे– प्रथमानने

१०) तत्रैव–प्रथमानने

११) तत्रैव–प्रथमानने

रस्याऽऽस्वादमूलकं द्विविधं पक्षं चिन्तयन् मनसि प्रश्नोऽयं समुदेति यद्यदि करुणस्याऽऽस्वादः दुःखप्रदो भवति चेत् प्रेक्षकः बारम्बारं तस्यावलोकने किमर्थं प्रवृत्तो भवति?

अश्रुपातस्य कारणाऽनुशीलनादिदं ज्ञायते यदश्रुपातः केवलं दुःखावस्थाजन्यो न भवति अपितु हर्षातिरेकेऽपि अश्रुपातः भवति। भगवत्कथाश्रवणे भक्तानामश्रुपातः दरीदृश्यते यत्र खलु दुःखस्य लेशोऽपि नास्ति। अभिप्रायोऽयं वर्तते यदश्रुपातस्य कारणं चित्तविगलितत्वं वर्तते। भावातिरेके चित्तं द्रवीभूतं भवति अश्रु च समुत्पद्यते। आचार्यो विश्वनाथो वदति यच्चित्तद्रुतिरेव अश्रुपातहेतुः–

**अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसो मताः।**[१२]

तस्याभिमतमिदं वर्तते यत् क्रोधे दुःखे हर्षे च तिसृष्वपि अवस्थासु अश्रु समुद्भवति–

**अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम्।**[१३]

वस्तुतः करुणदृश्यावलोकनजन्यः अश्रुपातो दुःखात्मकतायाः परिचायको नास्ति। अश्रूत्पत्तिहेतुस्तु आनन्दस्य विषादस्य वा अतिरेको विद्यते। चित्तद्रुतिकारणादेव अश्रुपातो भवति। कदाचिज्जाहस्यमानः लोचने सजले भवतः। वस्तुतः आनन्दस्य दुःखस्य वा यावान् अंशः अस्माभिः आत्मसात् कर्तुं शक्यते तावान् अंशः हृदये एव तिष्ठति न च तस्मात् अश्रुविकारः समुत्पद्यते किन्तु हर्षातिशयाद् अश्रूत्पत्तिर्जायते। तथैव दुःखातिशये असह्यविषादो हृदयं विमथ्नन् अश्रु समुत्पादयति। अत्र एतत् प्रतिपादनीयमस्ति यद्यदा खलु सुखं दुःखं वा आतिशय्यमवाप्नोति तदा वाणी मौनमाचरति नेत्रे एव वाण्याः भूमिकां निर्वहतः।

मानवहृदये विद्यमाना करुणावृत्तिरियं परोक्षतः स्वीयदुःखनिवारणस्यैव भावो वर्तते। इदं किंचिदसंगतं प्रतीयते किंतु सत्यं इदमेवास्ति यत् परदुःखदुःखितानां हृदयं यदा दुःखप्रहारं सहते तदा तस्य दुःखप्रहारस्य

---

१२) साहित्यदर्पणे–३/७

१३) तत्रैव–३/१३६

दंशमपाकर्तुं स उपकारकरणे प्रवृत्तो भवति। अनेन स आत्मतोषं लभते। एषैव करुणावृत्तिरस्ति। यदि दुःखी जनस्तस्योपकारं न स्वीकुर्याच्चेत् सः क्रुद्धः स्यात्। अतएव एतद्वक्तुं शक्यते मनुष्यः स्वीयदुःखमपाकर्तुं करुणादयाकृपाक्षमादयो भावान् समाचरति। अशेषजागतिकव्यापारेषु हृदयस्य एषा एव संवेदना वर्तते। नाटके करुणदृश्यमवलोकमानस्य उपकारप्रवृत्तिर्बलवती जायते। तस्याः प्रवृत्तेः प्रकटनार्थं तत्र एक एव साधनमस्ति यत् तस्य दुःखे सम्मिल्य अश्रु प्रवाहयेत्। अनेन हृदये तोषो भवति। वस्तुतः रसानुभूतिरियं दुःखसुखसीमाऽऽबद्धा न वर्तते अपितु आनंदप्रदानुभूतिर्वर्तते। सुखदुःखे तु द्वन्द्वचरपदार्थौ वर्तेते। एकं विना नापरस्यास्तित्वं भवितुमर्हति किन्तु आनन्दो नाम तत्त्वमिदं एताभ्यां द्वाभ्यां भिन्न एव। सुख–दुःखे लौकिकधरातलस्य लौकिकानुभूती वर्तेते किन्तु आनन्दस्तु लोकविलक्षणाऽनुभूतिरस्ति। वस्तुतः आनन्दो नाम चित्तस्य निर्द्वन्द्व– स्थितिरस्ति। मनुष्यस्य अहंभाव एव सुखं दुःखं वा अनुभावयति। विनष्टेऽहंभावे किं वा सत्त्वोद्रेके आनन्दानुभूतिः भवति। एष एव सत्त्वोद्रेकः रसास्वादस्य कृते परमावश्यकं तत्त्वम्।

साधारणीकरणानन्तरं प्रेक्षकः आत्मविस्मृतिदशामवाप्नोति। तन्मयतायामस्यां तस्य स्वीयव्यक्तित्वं नायकस्य व्यक्तित्वे विलीयते। स च नायकस्य हृदयगतभावान् अनुभवति। यथा कश्चिद् योगी आत्मविस्मृति–दशायां परमात्मतत्त्वे लीनो भवति अखण्डानन्दमनुभवति च तथैव रसदशायां प्रेक्षको नायकस्य व्यक्तित्वे आत्मानं विलाययति आनन्दं चानुभवति। परन्तु योगिनां नाटकप्रेक्षकाणां चानन्दानुभूतौ मूलभूतभेदोऽयं वर्तते यद् योगिजनाः चिरमद्वैतदशामवाप्नुवन्ति किन्तु प्रेक्षकः आत्मविस्मृतिदशायां द्वैतभावे सन्नपि अद्वैतदशां लभते किन्तु अद्वैतभावोऽयं नात्र स्थायित्वं भजते यतो हि समाप्तौ रसानुभूतौ आत्मविस्मृतिरपि समाप्तिं गच्छति सहैव अद्वैतभावोऽपि समाप्तो भवति। एतादृश्यां लोकविलक्षणावस्थायां लोकगतशोकदुःखादिभावाः प्रेक्षकान् न स्पृशन्तीति निश्चप्रचम्। आत्मसाक्षात्कारस्य रागद्वेषमुक्ता सत्वोद्रेकमयीयमवस्था वर्तते। एतत्खलु आत्मसंवेदनायाः आस्वादनमस्ति।

रसस्य लोकविलक्षणताम् अश्रुपातं च चिन्तयेच्चेत् एष प्रसङ्गः स्पष्टतरो भवति। अश्रूत्पत्तिः भावविकासानुसारं भवति अतएव एकान्ते

अश्रुपातः अल्पत्वेन भवति वा न भवति। यथा कश्चित् शिशुः यदा पतति तदा एकान्ते स न तथा क्रन्दति किन्तु अपरं कञ्चिज्जनं दृष्ट्वैव स रोरुद्यते। अत्र स शिशुः अपरेन जनेन सह समात्मभावं प्राप्नोति। न केवलं शिशूनां अपितु प्रौढानां प्रसंगेऽपि एतदवधारितं स्याद् यत् शोकस्यावसरे एकान्ते अश्रुपातो न भवति किन्तु कस्यचिदपि साहचर्यं प्राप्य समात्मभावे प्राप्ते सति अश्रुप्रवाहो भवति। काव्ये साधारणीकरणस्य या प्रक्रिया वर्तते तथैव लोकजीवनस्य इयं प्रक्रिया मन्या।

करुणदृश्येषु यदा साधारणीकरणप्रक्रियया दर्शकस्य तादात्म्यं भवति तदा लोकव्यवहारवत् सः समात्मभावं लभते, आत्मानमेकाकिनं नानुभवति तदा अश्रुपातो जायते। यद्यपि अत्र दुःखस्य अल्पदंशः वर्तते किन्तु सोऽपि मनस्तोषप्रद एव। एतादृशी पीडा न त्याज्या अपि तु स्वीकार्या एव भवति।

करुणरसाऽऽस्वादप्रसङ्गे आनन्दशब्दोऽयं यथायथं पारिभाषितः स्याच्चेत् करुणारसाऽऽस्वादस्य निर्णयः सुकरो भविता। मनस्तोषो नाम आनन्द इत्यभिधातुं शक्यते। अस्मद्धृदयानुकूला अनुभूतिरियं दार्शनिकैः सुखमिति अभिहितम्—

**अनुकूलतया वेदनीयं सुखम्।**[१४]

समीक्षाजगति सुविख्यातः डॉ. नगेन्द्रः आनन्दशब्दं परिभाषमाणः कथयति— "आनंद की परिकल्पना हमारे यहाँ बड़े गंभीर रूप में की गई है— वह मनोरंजन, लज्जत या प्लेजर का पर्याय नहीं है। भारतीय दर्शन में उसकी उपमा समुद्र से दी गई है— जीवन के सुख—दुःख जिसकी लहरों के समान हैं। जिस प्रकार असंख्य लहरों को अपने वक्ष पर खिलाती हुई समुद्र की धारा आत्मस्थ बहती रहती है। इसी प्रकार अनेक करुण मधुर अनुभूतियों से खेलती हुई आत्मा या चेतना की अन्तर्धारा अपने सुख में निरन्तर प्रवाहित रहती है।[१५]

निष्कर्षतः एतद्वक्तुं शक्यते यल्लौकिकः कार्यकारणसिद्धांतः काव्यरसे न प्रतिफलति अतः दुःखाद्दुःखोत्पत्तेर्लौकिको नियमो नात्र दृश्यते। अत्र

---

१४) तर्कसङ्ग्रहे

१५) अरस्तू का काव्यशास्त्र— डॉ. नगेन्द्र, पृ. १०३

अलौकिकप्रतिभाजन्यकाव्यात् लोकविलक्षणः आनन्दः समुत्पद्यते। एतदवधारणीयं स्यात् यद्यावत् स्थायिभावोऽपरिपक्वतां भजते तावत् प्रेक्षकः लौकिक सुखदुःखमर्यादाऽऽबद्धो भवति, किन्तु यावदेव हि सः निजत्वभावनां त्यजति, अर्थात् स्थायिभावो परिपक्वतां याति तदा सः रसदशामवाप्नोति यत्र लौकिकसुखदुःखानि अवशिष्यन्ते आनंदानुभूतिश्च भवति। काव्ये करुणरसजन्यस्य आनन्दस्यास्य कारणं सत्त्वगुणस्य पूर्णोद्रेकोऽस्ति यत्र रजस्तमसोश्च क्षीणतया शोकस्य कटुता विनश्यति। कवेः रचनाकौशलं नटस्य चाभिनयकौशलं द्वेऽपि चमत्कारं जनयतः। कलानैपुण्यस्यास्य साक्षात्कारात् आनंदोऽभिव्यज्यते। वस्तुतः काव्यस्य आनंदशब्दोऽयं लौकिकसुख दुःखयोर्मर्यादामतिक्रामति। मनुष्याणां काश्चन विचित्रमनोवृत्तयः सन्ति यत्र पीडास्वपि आनन्दोऽनुभूयते। आत्मपीडनस्य प्रवृत्तिः एतादृशी एव प्रवृत्तिरस्ति। उपवासतपः प्रायश्चित्तादयः स्वपरिमार्जनार्थम् आत्मपीडनस्य प्रवृत्तयः सन्ति। आत्मपीडनेऽस्मिन्नपि परितृप्तिः वर्तते। आत्मपीडनमेतदानन्दमयं प्रतीयते अतएव आनंदो नास्ति सुखस्य पर्यायः अपितु एष आनन्दः मनस्तुष्टिमभिव्यनक्ति। अतः करुणदृश्यावलोकनजन्या अनुभूतिरेतादृशी आनन्दमयी अनुभूतिर्वर्तते यया मनस्तोषो लभ्यते, भवतु नाम तस्यां मनस्तुष्टौ पीडायाः दंशः इति।

***

# जितेन्द्रियो हि नृपतिः भूयसीं श्रियमश्नुते

**डॉ. त्यागराजन् एस.**

*असि. प्रोफेसर, प्राच्य–अध्ययन एवं अनुसंधान–विभागः,*

*सस्त्रविश्वविद्यालय, तंजावुरम्*

**डॉ. विनोद–एम.**

*शोधकर्ता, इंडोलॉजी विभाग,*

*फ्रेंच इंस्टीट्यूट ऑफ पांडिचेरी*

**निबन्धसारः**

विष्णुगुप्तापरनामा आचार्यः कौटल्यः स्वीये अर्थशास्त्रे प्रथमे विनयाधिकरणे तृतीये अध्याये राज्ञा इन्द्रियजयः अवश्यं विधेय इति निरदिशत्। इन्द्रियजयस्तु अरिषड्वर्गस्य त्यागेन सुसाध्यो भवति इत्येनं महान्तम् उपदेशम् अस्मभ्यं यच्छन्, तदजये नष्टानां राज्ञां नामनिर्देशमुखेन तस्य राज्ञः चरित्रम्, इन्द्रियजयाभावेन तेषां नाशश्च कथमभवदित्यादिकं सङ्केतरूपेण प्रत्यपादयत्। निबन्धे अस्मिन् अस्माभिः स च विषयः सप्रमाणं निरूपितः। निबन्धे आदौ कश्चन लघूपक्रमः विषयप्रवेशाय प्रदत्तोऽस्ति। ततश्च अरिषड्वर्गस्य त्यागः कथं कर्तव्यः इत्ययं प्रधानः विषयः विस्तृतरूपेण वर्णितः। मध्ये मध्ये अर्थशास्त्रसारप्रतिपादन– रूपेण कामन्दकीयनीतिसारेण सह एतद्विचारस्य तुलना कृता वर्तते। अन्ते उपसंहारे आधुनिके अस्य प्रयोजनं वा प्रयोगः कथं भवेदिति कथनपुरस्सरम् आधुनिके अर्थशास्त्रापेक्षा कथं कर्तव्या इति अस्मद्बुद्धिगतः कश्चन अभिप्रायः विद्वत्सुंखे उपस्थापितः। तदत्र विमर्शः विचारश्च विद्वज्जनाश्रित इति सप्रश्रयं निवेद्यते। किञ्च प्रसङ्गेऽस्मिन् आचार्येण कौटल्येन निर्दिष्टानां राज्ञां चरित्रविषये, इन्द्रियजयाभावेन तेषां गतिविषये च न केवलं व्याख्यानानि समाश्रितानि, किन्तु साक्षात् तदितिवृत्तमूलम् (श्रीमन्महाभारातादि–पुराणान्तग्रन्थान्) अन्विष्य सप्रमाणं ससन्दर्भं तदितिवृत्तविषयाः सुष्ठु निरूपिताः इत्येनमंशं निबन्धस्य वैशिष्ट्यं मन्येरन्।।

**उपक्रमः**

विश्ववाङ्मये संस्कृतवाङ्मयस्य वरिष्ठं गरिष्ठं मुख्यं च स्थानं वरीवर्ति इति सुविदितमेव। तादृशे विशिष्टे वाङ्मये राजधर्मप्रतिपादकाः नैके ग्रन्थाः आसन्नित्यत्रप्रमाणं तावत् तत्परवर्तिषु तथा आधुनिकेषु ग्रन्थेषु निर्दिष्टानि (उद्धृतानि) तेषां राजधर्मग्रन्थानांवा तद्ग्रन्थकर्तृणां नामानि। प्रधानरूपेण इतिहासद्वये नैके राजतन्त्रविषयाः तत्र तत्र प्रतिपादिताः इत्ययं विषयः विद्वज्जनैः ज्ञातपूर्व एव। प्रमुखेषु तेषु राजधर्मविषयप्रतिपादकेषु अद्यावधि गरिमां वहति कौटल्याचार्यप्रणीतम्[१] अर्थशास्त्रम्। अस्य ग्रन्थस्य ग्रन्थकर्तुश्च विषये नैकेषु संस्कृतसाहित्येतिहासग्रन्थेषु बहुधा विवृतमस्ति इत्यस्मात् कारणात् बहु किमपि नोच्यते अस्मिन् प्रबन्धे। विष्णुगुप्तापरनामधेयः कौटल्यः राजतन्त्रज्ञसार्वभौमः अस्य प्रणेता। अस्य कालः सामान्ययुगाब्देः प्राक्चतुर्थशताब्दी (4 BCE) इति सुप्रसिद्धः प्रायः सर्वसम्मतश्च इति गणपतिशास्त्रिणः अलिखन्।[२] अयं कौटल्यः पूर्वाचार्याणां राजतन्त्रविदां मतानि सम्यक् पर्यालोच्य स्वीयमर्थशास्त्रं न्यबन्धयदिति स्वयमेव निरदिशद् ग्रन्थादौ। तद्यथा–**पृथिव्याः लाभे पालने च यावन्ति अर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशः तानि संहृत्य एकम् इदम् अर्थशास्त्रम् कृतम्**[३] इति। अनेन आचार्यः कौटल्यः पूर्वचार्यैः कृतेभ्यः अर्थशास्त्रेभ्यः स्वीयार्थशास्त्रस्य किं वैशिष्ट्यम् इत्यपिसूचयतिसंहृत्य कृतम् इत्युक्त्या। किमर्थं सङ्ग्रहोऽपेक्षितः इति संशये जयमङ्गलाव्याख्यायां निर्दिष्टानि पद्यानि तेषां पूर्वाचार्यैः कृतानाम् अर्थशास्त्राणां सम्पूर्णाध्ययने मनुष्याणाम् असमर्थत्वं प्रतिपादयति। तानि च–

---

१. कौटिल्य इति क्वचिन्नामनिर्देशः क्रियते। परमयमपपाठ इति गणपतिशास्त्रिणः स्वीये विस्तृते उपोद्घाते अलिखन्। ते इत्थम् अकथयन् – कुटलो नाम गोत्रप्रवर्तकर्षिः, तस्यापत्यं कौटल्यः इति संज्ञा गोत्रनिबन्धनेति। (गणपतिशास्त्री, उपोद्घातः, पुटसंख्या ४)

२. गणपतिशास्त्री, उपोद्घातः – पुटसङ्ख्या ५

३. कौटिलीयम् अर्थशास्त्रम् – अधिकरणम् १, प्रकरणम् १, अध्यायः १

**ब्रह्माऽध्यायसहस्राणां शतञ्चक्रे स्वबुद्धिजम्।**

**तच्छङ्करेण शक्रेण गुरुणा भार्गवेण च।।**

**सङ्क्षिप्तं मनुना चैव बहुभिश्च तपोधनैः।**

**प्रजानामायुषो ह्रासं विज्ञाय च महात्मना।।**

**संक्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये।।[४] इति**

अतश्च पूर्वाचार्यैः कृतानि अर्थशास्त्राणि विस्तृतरूपाणि इत्यस्मात् तत्राध्ययने न केवलं तात्कालिकानाम् अपि च आधुनिकानाम् रुचिः न जायेत इत्यस्माद् आचार्यः कौटिल्यः तेषु अर्थशास्त्रेषु प्रतिपादितान् विषयान् संगृह्य स्वकृतौ व्यवृणोदिति ज्ञायते। किञ्च आदावेव प्रकरणस्थानाम् अधिकरणस्थानाञ्च विषयोल्लेखं संक्षेपेण प्रादत्त। तत्र कारणमिदं— सामान्यतः शास्त्रस्य निर्माणं द्विधा क्रियते। समुद्देशतः, निर्देशतश्च। तत्र समुद्देशो नाम संक्षेपेण कीर्तनम् इति निर्देशतः नाम विस्तरादित्यर्थः। तथा च विस्तृतविषयप्रतिपादनात् पूर्वमेव अस्मिन् ग्रन्थे कस्मिन् अधिकरणे प्रकरणेवा कः विषयः प्रतिपादितः इति निर्देष्टुं संक्षेपतः सूत्रमुखेन विषयनिर्देशमकरोत्। अनेन जिज्ञासोः यस्मिन् विषये अभिरुचिः अध्ययनावश्यकता वा वर्तते स च विषयः कुत्र (अधिकरणे प्रकरणेवा) वर्तते इति सरलरूपेण ज्ञात्वा तदध्ययनं कुर्यादिति सारल्यमधिकरणसमुद्देशस्य प्रयोजनम्।

**विषयविस्तारः**

साशीतिप्रकरणशतेन (१८०) निर्मिते अस्मिन् अर्थशास्त्रे प्रथमे विनयाधिकारे (आहत्य च) तृतीये प्रकरणे इन्द्रियजयविषये प्रतिपादयति। प्रकरणेऽस्मिन् एकमेव सूत्रम् इन्द्रियजयः[५] इति। प्रथमे प्रकरणे विद्यासमुद्देशः परिकीर्तितः। ततः द्वितीये वृद्धसंयोगः प्रतिपादितः। कोऽयं वृद्धसंयोग इति पृष्टे —वृद्धैः सह संयोग इति। वृद्धशब्देन च आन्वीक्षिक्यादिविद्याकोविदाः निर्दिष्टाः। तैः सह सम्बन्ध इति शिष्याचार्यसम्बन्धः प्रतिपादितः। इत्थञ्च

४. विश्वनाथशास्त्रि – पुटसंख्या ३२

५. कौटिलीयम् अर्थशास्त्रम् – अधिकरणम् १, प्रकरणम् ३, अध्यायः ६, सूत्रम् १

गुरुसंयोगः इत्यपि वक्तुं शक्यम्। तस्मात् प्रथमे प्रकरणे प्रतिपादितानां विद्यानां गुरुभक्त्या गुरुसेवया च गुरुमुखाद् अध्ययनं कृत्वा तच्छास्त्रज्ञानेन कृतकः विनयः संपादनीयः इति आचार्यः प्रकरणद्वयेन प्रत्यपादयत्। ततः किं भवति इत्यस्य प्रश्नस्यैव समाधानरूपेण इदं तृतीयं प्रकरणमारब्धम्। तथा च प्रकरणस्यास्य हेतुहेतुमद्भावसङ्गतिः। विद्यया संपादितः विनयः हेतुः, विनयेन कार्यः इन्द्रियजयः हेतुमत्। आचार्यः प्रकरणमिदम् अध्यायद्वयेन व्यवृणोत्। प्रकरणस्य अस्य प्रथमे (निखिलेन षष्ठे) अध्याये अरिषड्वर्गस्य त्यागः कर्तव्यः इति प्रतिपाद्य द्वितीये (निखिलेन सप्तमे) अध्याये राज्ञा अभ्यसनीयाः अंशाः के इति राजर्षिवृत्तं प्रत्यपादयत्।

### अवधेयांशः कश्चन

अर्थशास्त्रस्य सारप्रतिपादनपरे कामन्दकीयनीतिसारे (षष्ठशताब्दी[६]) प्रथमे सर्गे विनयो हीन्द्रियजयः तद्युक्तः शास्त्रमृच्छति[७] इति प्रतिपाद्य, तदनन्तरमेव शास्त्राय गुरुसंयोगः शास्त्रं विनयवृद्धये[८] इति, विनयसत्वे गुरुसंयोगः, ततश्च शास्त्रज्ञानसंपादनम् इति क्रमः प्रतिपादितोऽस्ति। परम् आचार्येणकौटिल्येन आदौ गुरुसंयोगात् शास्त्राध्ययनं, ततः विनयः इति क्रमः प्रतिपादितः। तथा च उभयोः क्रमयोः व्यत्यासः वर्तते इति विनयगुरुसंयोगयोः पौर्वापर्यविरोधः इव कश्चिद् आभासते इति चेत्– तत्रोत्तरम् आचार्येणैव प्रदत्तम् अस्ति–कृतकः स्वाभाविकश्च विनयः[९] इत्यादिना। अयमभिप्रायः– विनयः द्विविधः। स्वाभाविकः, कृतकश्च। तयोः पूर्वतशुभकर्मणा सिद्धः स्वाभाविकः। शास्त्रज्ञानात् प्रसूतः कृतकः विनयः। इत्थञ्चाधुना स्वाभाविकविनये सति गुरुसंयोगः, ततः शास्त्रज्ञानप्राप्तिः, ततः शास्त्रज्ञानेन कृतकः विनयः इति विनयवृद्धसंयोगयोः न कश्चित् पौर्वापर्यविरोधः।

---

६. गणपतिशास्त्री, कामन्दकीयनीतिसारः, आमुखम् (Preface)

७. तन्निष्ठस्य हि शास्त्रार्थाः प्रसीदन्ति ततः श्रियः।। इति उत्तरार्धम् –१.२२

८. विद्याविनीतो नृपतिः न कृच्छ्रेष्ववसीदति।। इति उत्तरार्धम् –१.६२

९. कौटिलीयम् अर्थशास्त्रम् – अधिकरणम् १, प्रकरणम् २, अध्यायः ५

## अरिषड्वर्गस्य त्यागः इन्द्रियजये कारणम्

इन्द्रियजयप्रकरणस्य अस्य प्रथमे अध्यायेराज्ञा के रिपवः आदावेव जेतव्याः इति न्यरूपयत। परमिमे रिपवः प्रत्यक्षीकर्तुं न शक्याः। तर्हि के इमे इति चेत्– अरिषड्वर्गः इति। कश्च स वर्गः इति पुनः प्रश्ने– **कामक्रोधलोभमानमदहर्षत्यागात् कार्यः**[१०] इति आचार्यः स्वयमेव निरदिशत्। द्वन्द्वगर्भवाक्यमिदम्। तथा च 'द्वन्द्वान्ते श्रूयमाणः शब्दः प्रत्येकम् अभिसंबध्यते' इति न्यायेन त्यागशब्दस्य कामादिहर्षपर्यन्तैः शब्दैः संबन्धः कर्तव्यः। कामस्य त्यागः, क्रोधस्य त्याग इत्येवंरीत्या। अस्य वाक्यस्य अर्थविवचेनात् पूर्वं किमर्थम् इमे रिपवः राज्ञा आदौ जेतव्याः इति कश्चन संदेहः जायेत। तस्योत्तरम् इदमेव– इमे कामादयः मानसिकधर्माः भवन्ति। एते मानसिकधर्मा एव कस्यचित् (प्रकृते राज्ञः) इन्द्रियवृत्तिहेतवः भवन्ति। किञ्च इमे सर्वेऽपि नीतिपरिपालने कर्तव्यस्य विरोधिनः भवन्ति। अतश्च इमे मनोदोषाः इत्यपि निर्दिश्यन्ते। यदि इमे परित्यक्ताः भवन्ति तर्हि श्रमं विना कर्णादीनां बाह्येन्द्रियाणां जयः सुसाध्यो भवति। अपि च एतेषु मनोदोषेषु सत्सु राजा नयशून्यः भवति। तेन जनाः न रञ्जिताः भवन्ति। तस्मात् कारणात् धर्मस्य अर्थस्य च विनाशः भवति। तथा च धर्मार्थविरोधिनः इमे कामादयः मनोदोषाः त्याज्याः।अत्र कामन्दकीयस्य इदं पद्यं स्मर्तव्यम् –

**एकस्यापि न यः शक्तो मनसः सन्निबर्हणे।**
**महीं सागरपर्यन्तां कथन्नु स विजेष्यते।।**[११]

राजा यदि एकं मनः, तदपि स्वस्यैव, न नियन्त्रयितुं शक्नोति तर्हि सः कथं वा सागरपर्यन्ताम् इमां पृथिवीं जेतुं शक्नुयात्? इत्यर्थः। एवञ्च इन्द्रियजयः राज्ञः अवश्यकर्तव्येषु आदावेव समुपतिष्ठते। तदमुष्मिन् सन्दर्भे मनुनापि प्रोक्तं यथा–

---

१०. कौटलीयम् अर्थशास्त्रम् – अधिकरणम् १, प्रकरणम् ३, अध्यायः ६

११. कामन्दकीयनीतिसारः सर्गः १, श्लोकः ३६

**इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्।**
**जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः।।**[१२]

तर्हि कामादीनां त्यागेनैव इन्द्रियजयः संभवति वा इति पृष्टे, न केवलम् कामादीनां त्यागेन अपि च तानि इन्द्रियाणि तेष्वेव अर्थेषु प्रवर्तयितव्यानि इति एनमर्थं स्पष्टं व्यशदयदाचार्यः कौटल्यः कर्णत्वगित्यादिना। कर्ण–त्वक्–अक्षि–जिह्वा–घ्राणेन्द्रियाणां शब्द–स्पर्श–रूप–रस–गन्धेषु अविप्रतिपत्तिः इन्द्रियजयः, शास्त्रानुष्ठानं वा[१३] इति आचार्यस्य वचनानि। कर्णादीनाम् इन्द्रियाणाम् उचितेषु तत्तद्विषयेषु प्रवृत्तिः कर्तव्या इति तदर्थः। मिथ्यायोगारहिता अतियोगरहिता अयोगरहिता च या इन्द्रियाणां प्रवृत्तिः सा अविप्रतिपत्तिशब्देन निर्दिष्टा। तथा च इन्द्रियाणां स्वतः एव अविरुद्धा प्रवृत्तिः कार्या। श्रोत्रस्य या उचिता शब्दविषयिणी प्रवृत्तिः तत्रैव तस्य श्रोत्रेन्द्रियस्य प्रवृत्तिः कार्या। इत्थमेव त्वगादीनाम् अपि इन्द्रियाणाम् उचितेष्वेव तेषाम् इन्द्रियविषयेषु प्रवृत्तिः कार्या इत्यर्थः ज्ञेयः। तस्मादेव खलु भगवता श्रीकृष्णेनापितस्मात्त्वमिन्द्रिण्यादौ नियम्य भरतर्षभ[१४] इति इन्द्रियनिग्रहाभावे कामः देहिनं मोहयति इति प्रतिपादितम्। न केवलमयम् उपदेशः तत्त्वजिज्ञासोः अपि च सामान्यानां सर्वेषाम्।

## शास्त्रार्थानुष्ठानम् इन्द्रियजये कारणम्–

अयञ्च इन्द्रियजयः द्विधा साधयितुं शक्यते। प्रथमः उपायः पूर्वोक्तः कामाद्यरिषड्वर्गत्यागः। द्वितीयश्च उपायः शास्त्रार्थनुष्ठानमिति। शास्त्रेण प्रतिपाद्यमानः सर्वोऽपि अर्थः इन्द्रियजयस्य कारणं भवति इत्यभिप्रायः। नीतिशास्त्रे अवगते सति इन्द्रियाणां विरुद्धप्रतिपत्तिविनाशकं ज्ञानं नूनं भवत्येव इत्यस्मादेव शास्त्रानुष्ठानम् इन्द्रियजये कारणत्वेन प्रतिपादितम् आचार्येण। इन्द्रियाणां विप्रतिपत्तयः का इति पृष्टे– शास्त्रविहिताद् विपरीता या इन्द्रियाणां प्रवृत्तिः सा इन्द्रियविप्रतिपत्तिः इति ज्ञेया। शास्त्रे हि सर्वेषाम् अपि इन्द्रियाणां

---

१२. मनुस्मृतिः ७.४४

१३. कौटलीयम् अर्थशास्त्रम् – अधिकरणम् १, प्रकरणम् ३, अध्यायः ६

१४. श्रीमद्भगवद्गीता ३.४६

तत्तदिन्द्रियविषयेषु सर्वरूपा विप्रतिपत्तयः काश्चन विहिताः। ताः सर्वदा निषिद्धाः। यथा काश्चन– कर्णस्य गुरुपरिवादश्रवणं निषिद्धम्। तदेवोक्तं मनुनापि–

**गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्तते।**
**कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः।।**[१५]

त्वगिन्द्रियस्य च परस्त्रीस्पर्शनं निषिद्धम्। नेत्रयोः स्त्रीगुह्यदर्शनम्, जिह्वायाः अभक्ष्याणाम् आस्वादनम्, घ्राणस्य च सुराघ्राणम् इत्येवंप्रकारेण बाह्येन्द्रियाणां निषिद्धाचाराः प्रतिपादिताः। इमाः कर्मेन्द्रियविप्रतिपत्तयः। अनसूयाक्षमादयः मनसः विप्रतिपत्तयः इत्यपि शास्त्रे प्रतिपादितम् इत्यस्मादेव कारणाद् आचार्यः शास्त्रार्थानुष्ठानम् इन्द्रियजये कारणं भवति इति निरदिशत्। न केवलम् एतावता, अपि च तदेव ज्यायान् इति सूचयितुमेव कृत्स्नम् हि शास्त्रम् इन्द्रियजयः इति शास्त्राभिनिवेशे मनसः स्थैर्यत्वम् इन्द्रियाणां च जयः सुष्ठु संपादयितुं शक्यते इति आचार्योपदेशः।।

**अजितेन्द्रियस्य का गतिः**

यदि इन्द्रिजयः न साधितो भवति तर्हि तस्य राज्ञः का गतिः जायेत इत्येनं विषयं ग्रन्थे अग्रिमे वाक्ये व्यवृणोत्। शास्त्रविरुद्धानुष्ठाने सति इन्द्रियाणां वशे तिष्ठन् स च राजा नूनं विनश्यति इति प्रत्यपादयत्। तत्र चातुरन्तोऽपि राजा अजितेन्द्रियश्चेत् नष्टो भवति इति कथनस्यार्थः कैमुतिकन्यायेन ग्राह्यः। तदभिप्रायः– अवश्येन्द्रियः चतुःसमुद्राधिपतिश्चेदपि सद्यः विनश्यति इति चेत्, किमुत अन्ये (राजानः) इति। किञ्च समस्तस्यापि अरिषड्वर्गस्य त्यागः कर्तव्यः। तद्विहाय यदि एकः त्यक्तः अन्यः वर्तते इति चेत्तदपि नाशाय कल्पते इति आचार्याभिप्रायः। अत्र किञ्चित् स्वारस्यं निहितमाचार्येण। कामाद्यरिषड्वर्गे– एकैकस्यापि अजये कथं राजा नष्टो भवति इति निर्देष्टुम् एकैकस्यापि उदाहरणद्वयम् अयच्छत्। तदर्थः कामस्य अजये किं भविष्यति इति कस्यचिद् राज्ञः नामनिर्देशमुखेन तच्चरितं स्मारितमाचार्येण। तच्चरितेन इन्द्रियविप्रतिपत्त्या तस्य राज्ञः कथं नाशः सञ्जात

१५. मनुस्मृतिः २.२००

इति स्मारयन् सर्वथा तस्य त्यागः कर्तव्य इत्येनं महान्तम् अर्थम् अस्मभ्यं विशिष्य राजभ्यः बोधयति आचार्यः।

तद्विवरणात्पूर्वं प्रसङ्गात् कामादीनां सामान्यलक्षणं प्रतिपाद्यते। (i) कामः न केवलम् इच्छा, अपि तु यो यो व्यसनस्य हेतुः स सर्वोऽपि कामपदेन ज्ञेयः। (ii) यस्मिन् उत्पद्यमाने आत्मानं ज्वलितम् इव अभिमन्यते स द्वेषः क्रोध इत्युच्यते। अक्षमा इत्यपि केचित्। (iii) या परद्रव्ये अतिश्रद्धा तस्याः लोभ इति संज्ञा। (iv) अवनतिसाध्ये अपि उन्नतमनस्कता मानः इति जयमङ्गलायाम् उक्तमस्ति। अयमेव मानः श्रीमूलायां गणपतिशास्त्रिभिः इत्थं व्याख्यातः– बालिश्याद् आत्मनि अनुपमत्वबुद्धिः मानः इति। (v) विद्यया, सौन्दर्येण, शौर्येण, धनेन वा जनितः दर्पः मदः इत्युच्यते। (vi) अतिक्रीडनात् या तृप्तिः सञ्जायते सा हर्षपदेन व्यपदिश्यते। क्रीडासुखम् इत्यपि व्यवह्रियते। सूक्ष्मेक्षिकया पश्यामश्चेदिमे न केवलं दोषाः अपि च व्यसनहेतवः भवन्ति। तस्मादेतेषां त्यागमुखेन जयः प्रतिपादितः। अमुमेवाभिप्रायं प्राकटयत् कामन्दकीयोऽपि स्वीये नीतिसारे। यथा –

**कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा।**
**षड्वर्गम् उत्सृजेदेनं तस्मिंस्त्यक्ते सुखी नृपः।।**[१६]

प्रकृतमनुसरामः– कामादिषु एकस्यापि अजयेन किं भवति इति एकैकस्य वृत्तान्तमार्गेण जानीमः।

### अ. कामस्याजये

कामस्य अजये दाण्डक्यवत्, करालवच्च सबन्धुराष्ट्रं विनाशम् आप्नुयात् राजा इत्यभिप्रायं वक्तुम् आचार्यः उभयोः नाम निरदिशत्। शास्त्रोक्तविधिमुत्सृज्य प्रवर्तनेन कामः समुद्भूते सति नूनं नाश एव। तद्यथा– भोजवंश्यः कश्चन दाण्डक्यनामा राजा स्वस्य कामस्य अजयेन ब्राह्मणकन्याम् एकाम् अपहृतवान्। तज्ज्ञात्वा तस्याः पिता तं राजानं शप्तवान् इति इतिवृत्तम्। कदाचित् मृगयायै राजा वनं प्रविष्टः। तदानीं वनस्थाश्रमे अन्येन हीनां रूपयौवनवतीं भार्गवकन्यां दृष्ट्वा तस्यां जातरागस्सन्, ताम् अपहृत्य स्वपुरं

१६. कामन्दकीयनीतिसारः सर्गः १, श्लोकः ८७

समागतः। कुशानांसंग्रहाय अन्यत्र गतः कन्यायाः पिता भार्गवश्च समागत्य कन्यया विहीनम् आश्रमं दृष्ट्वा, जातं वृत्तान्तं योगदृष्ट्या अवगच्छन्, सकृत्सञ्जातकोपः तं राजानं शशाप। भृगुवचनमिदम्– सप्तभिः अहोभिः पांसुवृष्ट्या सबन्धुराष्ट्रो विपद्यताम्[१७] इति। तस्य भार्गवस्य शापात् तस्माद्दिनादारभ्य सप्तदिनेभ्यः यावत् सः राजा, तस्य बान्धवाः, तस्य राष्ट्रम् इत्येतत्सर्वं पांसुवर्षणाद् आक्रान्तं सत् विनाशम् आप्नोत्। तदेव स्थलम् अद्यत्वे दण्डकारण्यम् इति व्यपदिश्यते। अत्र वात्स्यायनाचार्यः स्वीये कामसूत्रे न कामांश्चरेत्[१८] इत्यस्मिन् सूत्रे एतदुदाहरणं निरदिशत्। तद्यथा– यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्याम् अभिमन्यमानः सबन्धुराष्ट्रो विननाश[१९] इति।

अपरः राजा करालः। अयं कश्चन वैदेहः। अयं करालनामा योगेश्वरयात्रावेलायां जनान् पश्यन्, तेषु स्थितां काञ्चित् सुन्दरीं यौवनां च ब्राह्मणस्य पत्नीं दृष्ट्वा कामेन पीडितः सन् ताम् अपहृत्य स्वपुरं समागतः। भार्याम् अन्वेष्टुं स च ब्राह्मणः तत्पुरं समागतवान्। आगमनकाले एव इत्थं कथयन् समागतः– तत्पुरं कथं न दीर्यते यत्र एष दुरात्मा तिष्ठति इति। तद्वचनसमनन्तरकालमेव स च करालः सबन्धुराष्ट्रं विदीर्णायां पृथिव्यां समुद्भूतेन द्वारेण रसातलं प्राप्य नाशम् आप्नोद् इति इतिवृत्तम्। अस्य विषये श्रूयमाणम् एकं पद्यं जयमङ्गलाव्याख्यायां निर्दिष्टं वर्तते। तद्यथा–

**ब्राह्मणीं संस्पृशन्नेव सगणः मिथिलेश्वरः।**

**व्यक्तः सघृणयैव ऊर्व्या विवेशाशु रसातलम्।।**[२०]

एतयोः राज्ञोः वृत्तान्तेन किं बोध्यते इति चेत् – कामः सर्वनाशकः इति। अतः एव खलु आचार्यः वात्स्यायनोऽपि स्वीये कामसूत्रे साक्षादेनमेव अर्थं दृढतया अबोधयत्– **बहवश्च कामवशगाः सगणाः एव विनष्टाः श्रूयन्ते**[२१] इति।

---

१७. कामन्दकीयनीतिसारः प्रथमः सर्गः श्लोकः ५८, जयमङ्गलाव्याख्या

१८. वात्स्यायनकामसूत्रम् अधिकरणम् १, अध्यायः २, सूत्रं ४०

१९. तत्रैव सूत्रं ४४

२०. विश्वनाथशास्त्रि पुटसंख्या ३५

२१. वात्स्यायनकामसूत्रम् अधिकरणम् १, अध्यायः २, सूत्रं ४३

अत्रावधेयांशः कश्चन वर्तते। न केवलं यः कामेन पीडितः स एव विनाशम् आप्नुयात् परं तत्परिवाराः अपि। अत एव सगणाः इति आचार्यः वात्स्यायनः निरदिशत्। तदेव च वृत्तान्तद्वयेनापि बोधितम्।

### आ. क्रोधस्याजये

कोपस्य अजये यथा जनमेजयः नष्टः, यथा च तालजङ्घः नष्टः तथैव क्रोधवशो भूत्वा दुष्टमाचरन् राजा विनाशम् आप्नुयादिति बोधयितुं तयोः नामोल्लेखेन तद्वृत्तान्तद्वारा क्रोधस्य अवश्यजेतव्यं प्रत्यपादयत्। अस्य जनमेजयस्य वृत्तान्तविषये हरिवंशे भविष्यपर्वणि पञ्चमे अध्याये केचन सङ्केताः समुपलभ्यन्ते।[२१] तत्र हि हरिवंशे– अयं जनमेजयः अश्वमेधाय दीक्षितस्सन् यागमनुष्ठितवान्। जनमेजयस्य पत्नी काशीराजकन्या वपुष्टमा पूर्वम् अप्सरोत्तमा रम्भा आसीत्। यागकाले संज्ञप्ते अश्वे आविष्टः इन्द्रः जनमेजयं वञ्चयितुं तया सह संयुक्तो बभूव। तस्मिन् सन्दर्भे संज्ञप्ते अश्वे विकारं दृष्ट्वा सञ्जातक्रोधः जनमेजयः आदौ ऋत्विजः निन्दितवान्। परम् ऋत्विग्भिः वास्तविके वृत्तान्ते श्राविते सति जनमेजयः पुनः कोपादिन्द्रं शशाप। तत्पश्चात् पुनः क्रुद्धस्सन् ऋत्विजः अब्रवीत्– भवतामेव दौर्बल्यम् इदम् इति, गच्छध्वं बान्धवैः सह बहिः इति। तेऽपि गताः। तत्पश्चात् वपुष्टमामपि भर्त्सितवान्। तदनन्तरमेव विश्वासुः तं वास्तवं वृत्तान्तं सर्वं बोधयामास इत्येवं वर्णना समुपलभ्यते[२२]। किन्तु श्रीमूलादिविविधेषु व्याख्यानेषु अश्वमेधे ब्राह्मणेषु विक्रान्तः जनमेजयः तेषां शापान्नष्टः इति सङ्केतः समुपलभ्यते। तस्य नाशविषये जयमङ्गलायां– स नश्यत्विति तैरुक्तो राज्ञः मूर्धा व्यशीर्यत[२३] इति साक्षादेव निर्देशः समुपलभ्यते। परं पद्यस्य अस्य स्रोतः न लभ्यते। भवतु तत्तथा। अथापि हरिवंशे प्रोक्ते अध्याये निर्दिष्टानि वचनानि क्रोध एव सर्वस्य कारणम् इति बोधयति। तानि च वचनानि– ऋत्विजश्चाब्रवीत् क्रुद्धः स राजा जनमेजयः इति, अमर्षादन्वशासच्च पत्नीशालागताः स्त्रियः इति, एवमुच्चौः प्रभाषन्तं क्रुद्धं

---

२२. हरिवंशम्, भविष्यपर्व, अध्यायः ५

२३. विश्वनाथशास्त्रि पुटसंख्या ३५

पारीक्षितं नृपम् इति, ऐश्वर्येणाश्रमाविश्य देवेन्द्रेणासि रोषितः इति च[२४]। इत्थञ्च कोपादेव नष्टः जनमेजयः इति ज्ञायते।

द्वितीयः तालजङ्घः। अस्य विषये वृत्तान्तान्तरं समुपलभ्यते ब्रह्माण्डपुराणे।[२५] परं तत्रैव अयं हैहयाधिपतित्वविषये सङ्केतः समुपलभ्यते। तथाऽपि व्याख्यानादिषु निर्दिष्टं वृत्तान्तं न समुपलभ्यते। भवतु तत्तथा। किमकरोदयम्, कथं नष्ट इत्यत्र व्याख्यानमेव शरणम्। तत्र निर्दिष्टं वृत्तान्तमिदम्– हैहयाधिपतिः तालजङ्घो नाम राजा। केनापि पुरुषेण कदाचित् भृगुमहर्षेः आश्रमे किञ्चित् सुवर्णभाण्डम् निक्षिप्तम् आसीत्। तदजानन् अयं तत्र निहितं सुवर्णभाण्डं स्वबलाद् आदातुं गते, तदा भृगुमहर्षिणा कारणं ज्ञातुं निवारिते, तेन कार्येण रुष्टस्सन् कः त्वम् अस्य सुवर्णभाण्डस्य ग्रहीता इति तेन सह विवादं कुर्वन्, रोषात् तं महर्षिं हन्तुम् उद्युक्तः। तदा सञ्जातकोपः भृगुमहर्षिः तं शशाप। ततश्च सः तालजङ्घः सगोत्रः नाशम् आप्नोत्। इत्थञ्च स्वकोपं नियन्त्रितुम् अशक्तस्सन् नष्ट इति प्रथा। तत्रैव पद्यमिदं श्रूयते –

**तत्कृतं तालजङ्घेन भृगून् रोषाज्जिघांसता।**
**तं हत्वाऽद्यापि येनाग्निः समुद्रे न विशीर्यति।।**[२६]

## इ. लोभस्याजये

परद्रव्येषु सुतराम् अतिश्रद्धा न कर्तव्या। अन्यथा लोभवशगस्सन् स राजा नष्टो भवति इति निर्देष्टुम् ऐलस्य अजबिन्दोश्च वृत्तान्तं स्मारयितुं तयोर्नाम निरदिशत्। आदौ ऐलः– इलायाः अपत्यम् ऐलः, राजा पुरूरवाः। अर्थशास्त्रव्याख्यानेषु व्याख्यातारः इत्थं निरदिशन्– एकदा पुरूरवाः इन्द्रं द्रष्टुं स्वर्गं गतवान्। तत्र मूर्तिमतः धर्मार्थकामान् दृष्ट्वा तेषु अर्थकामौ उपेक्ष्य धर्मस्यैव प्रदक्षिणं कृतवान्। तेन कर्मणा क्रुद्धौ अर्थकामौ तं राजानम् अशपताम्। कामस्य शापवशाद् ऊर्वश्याः विरहेण उन्मादः, अर्थस्य शापवशात्

---

२४. हरिवंशम्, भविष्यपर्व, अध्यायः ५, श्लोकाः – १८, २०, २४ तथा ३६

२५. ब्रह्माण्डपुराणम्, मध्यमभागः, अध्यायः ६६

२६. विश्वनाथशास्त्रि पुटसंखाय ३६

लोभेन पीडितस्सन् नाशम् आप्नोत्। सः एकदा नैमिषारण्यवासिभिः यज्ञसंरक्षणार्थं नियोजितः। तत्र यज्ञे स्थापितान् सर्वान् सुवर्णमयान् भाजनविशेषान् दृष्ट्वा लोभेन तत्सर्वम् आहर्तुम् उद्युक्तः। तदा तैः अयं कुशैः अभिहतः। ततश्च नाशमाप इति प्रथा। एतद्विषये मत्स्यपुराणे चतुर्विंशतितमे अध्याये पद्यरूपैः प्रतिपादितम् अस्य इतिवृत्तं स्मर्तव्यं भवति। लोभेन अस्य नाश इत्यत्र तत्पुराणान्तर्गते इमे पद्ये प्रमाणम् –

**जग्मुस्तेन कामार्थौ अतिकोपं नृपं प्रति।**
**अर्थ शापमदात् तस्मै लोभात् त्वं नाशमेष्यसि।।**
**कामोऽप्याह तवोन्मादो भविता गन्दमादने।**
**कुमारवनमाश्रित्य वियोगादुर्वशीभवात्।।**[२७]

द्वितीयः राजा सौवीराधिपतिः अजबिन्दुः। एतद्दृष्टान्तविषये न किञ्चिल्लभ्यते। किन्तु व्याख्तार एव शरणम्। तेषाम् अभिप्रायः– सौवीराणां राजक्रमे अजबिन्दुः अन्यतमः। सः लोभवशगस्सन् राष्ट्रियं सर्वं द्रव्यराशिम् (जनानां स्वस्य च) एकत्रैव द्रष्टुम् इष्टः। अतश्च सर्वान् जनान् संपीड्य एकत्र संग्रहीतुम् आदिष्टस्सन् कुपिताः प्रजाः तं जघान इति। तेन नाशमाप अयम् इति। इत्थञ्च इमौ राजानौ लोभं जेतुम् अशक्तौ सन्तौ नाशम् आप्नुताम्।

### ई. मानस्याजये

मानस्याजयेन नाशम् आप्तवतोः प्रसिद्धयोः द्वयोः विषये स्मारयितुं रावणदुर्योधनयोः नामनिर्देशम् अकरोदाचार्यः कौटल्यः। तत्र द्वयोः विषये इतिहासौ प्रमाणम्। परम् अवधेयांशः कश्चित् वर्तते। तदुच्यते– रावणस्य विषये हनुमतः वचनानि स्मर्तव्यानि। तानि यथा–

**अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः।**
**अहो राक्षसराजस्य सर्वलक्षणयुक्तता।।**

---

२७. मत्स्यपुराणम् अध्यायः २४, श्लोकौ – १८–१६

**यदि अधर्मो न बलवान् स्यादयं राक्षसेश्वरः।**

**स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता।।**[२८]

इत्थञ्च रावणः राक्षसस्सन्नपिसर्वलक्षणयुक्तोऽसीद्, येन अयम् अधर्मस्य अनाचारेण कदाचित् सुरलोकस्यापि रक्षिता स्यादिति हनुमतः वचनान्येव अस्य महत्त्वं बोधयन्ति। परम् अयं मानी आसीत्। अतः एव खलु सीतापहरणानन्तरं, परदारापराधेन युक्तस्सन्नपि, सीतया मां चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि[२९] इतिबोधिते, हनुमता चमन्यस्व नरदेवाय जानकी प्रतिदीयताम् इति बोधिते सत्यपि मानवशात् न दातुम् उद्युक्तः। तस्य मानिनः नाशस्तु सर्वैः ज्ञात एव।

द्वितीयः दुर्योधनः। अस्यापि इतिवृत्तं चरितं सर्वैः ज्ञातपूर्वमेव। परमत्रापि वक्तव्यं किञ्चिद्वर्तते। दुर्योधनः बहुभिः प्रोक्ते सत्यपि पाण्डवेभ्यः राज्यं दातुं नोद्युक्तः। तत्र कारणं स्वाभिमानमेव। तदमुष्मिन् सन्दर्भे उद्योगपर्वणि त्रिसप्ततितमे अध्याये भीमसेनन श्रीकृष्णं प्रति दुर्योधनविषये प्रोक्तानि इमानि पद्यानि स्मर्तव्यानि। यथा –

**अमर्षी जातसंरम्भः श्रेयोद्वेषी महामनाः।**
**नोग्रं दुर्योधनो वाच्यः साम्नैवं समाचरेः।।**

**प्रकृत्या पापसत्वश्च तुल्यचेतासु दस्युभिः।**
**ऐश्वर्यमदमत्तश्च कृतवैरश्च पाण्डवैः।।**

**मियेतापि न भज्येत नैव जह्यात् स्वकं मतम्।**
**तादृशेन शमः कृष्ण मन्ये परमदुष्करः।।**[३०]

पद्यार्थस्तु स्पष्टमेव। एभि पद्यैः भीमसेनः दुर्योधनस्य दुर्गुणान् अकथयत्। न केवलमेतावता, अपि च पाण्डवगीतायाः प्रसिद्धमिदं पद्यमपि अत्र दुर्योधनस्य मानोन्नतौ प्रमाणम्। तद्यथा –

---

२८. श्रीमद्वाल्मीकिरामायणम्, सुन्दरकाण्डम्, सर्गः ४६, श्लोकौ १७–१८

२९. श्रीमद्वाल्मीकिरामायणम्, सुन्दरकाण्डम्, सर्गः २१, श्लोकः २२

३०. श्रीमन्महाभारतम्, उद्योगपर्व, अध्यायः ७३, श्लोकाः २, ३, तथा ५

**जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः।**
**केनापि देवेन हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि।।**[३१]

अत एव अयमपि मानस्य अजयेन नष्ट इति आचार्याणाम् अभिप्रायः।

## उ. मदस्याजये

मदस्य अजयेन दम्भोद्भवः[३२] कार्तवीर्यश्च नष्टौ इति स्मारयितुं तयोर्नाम उद्धृतम् आचार्येण। तत्र दम्भोद्भवस्य वृत्तान्तं श्रीमन्महाभारते उद्योगपर्वणि षण्णवतितमे अध्याये सुष्ठु उपलभ्यते। अयं दम्भोद्भवः सार्वभौमः आसीत्। स च प्रतिदिनं प्रातः उत्थाय ब्राह्मणान्, क्षत्रियान्, वैश्यान् च इत्थं पृच्छति स्म–

**अस्ति कश्चिद्विशिष्टो वा मद्विधो वा भवेद्युधि।**
**शूद्रो वैश्यः क्षत्रियो वा ब्राह्मणो वाऽपि शास्त्रभृत्।।**[३३]

अतिमानेन मदेन च मत्तं तं दृष्ट्वा क्रुद्धाः ब्राह्मणाः– नरनारायणौ तापसौ उभौ वर्तेते इति अस्माभिः श्रुतम्, तयोः त्वं न समः, ताभ्यां युद्धयस्व पार्थिव इत्यूचुः। ततश्च मदेन पीडितस्सन् तयोः सह युद्धं कृत्वा तयोः नरेण इषीकाभिः छादिते सन् सबलः नाशम् आप्नोत्। तस्मिन् प्रसङ्गे श्रूयमाणे दर्पेण महता मत्तः कञ्चिदन्यमचिन्तयन् इति, **मा च दर्पसमाविष्टः**[३४] इति च इमे द्वे वचने तस्य मदातिशयं निरूपयतः।

अपरश्च राजा कार्तवीर्यः। अयमपि हैहयाधिपतिषु अन्यतमः। एतद्वृत्तान्तविषये श्रीमन्महाभारते, हरिवंशे तथा ब्रह्माण्डपुराणे च सङ्केताः समुपलभ्यन्ते। अयं महापराक्रमशाली आसीत्। वस्तुतः अस्य सहस्रबाहुरित्यपरं नाम। अस्य प्रभावस्य पराकाष्ठा हरिवंशे निर्दिष्टैः पद्यैः ज्ञातुं शक्या। तद्यथा–

---

३१. पाण्डवगीता (दुर्योधनवचनम्) श्लोकः ५८

३२. केचन एनं 'डम्भोह्लद्भवः' इत्यपि निरदशिन्। प्रसङ्गेऽस्मिन् प्रदत्तानां महाभारतश्लोकानाम् आधारेण अस्माभिः 'दम्भोद्भवः' इति निर्दिष्टमस्ति।

३३. श्रीमन्महाभारतम्, उद्योगपर्व, अध्यायः ९६, श्लोकः ७

३४. श्रीमन्महाभारतम्, उद्योगपर्व, अध्यायः ९६, श्लोकौ ६ तथा ३६

**स वै बद्ध्वा धनुर्ज्याभिरुत्सिक्तं पञ्चभिः शरैः।**

**लङ्केशं मोहयित्वा तु सबलं रावणं बलात्।**

**निर्जित्यैव समानीय माहिष्मत्यां बबन्ध तम्।।**[३५]

इत्थञ्च अयं रावणमेव रणे जितवान् इति निर्देशः। परं स्वस्य पराक्रमस्य मदेन अयं पीडित आसीत्। अतश्च स्वं जेतुं न कोऽपि इति चिन्तयन् नारदमुखात् परशुरामस्य (जामदग्नेः) वृत्तान्तं श्रुत्वा, तं जेतुकामः, तस्य आश्रमं प्रविश्य तत्रत्यान् वत्सान् ग्रहीतुम् उद्युक्तः। तदा परशुरामेण अयं हतः इति एकम् इतिवृत्तम्। ब्रह्माण्डपुराणे तु– परशुरामः माहिष्मतीं गतः। तत्र नर्मदानदीतीरे दूतम् एकं संस्थाप्य तद्द्वारा राजा कार्तवीर्यार्जुनः वाचितः यद् जमदग्निपुत्रः राज्ञा सह युद्धं कर्तुं समागतः इति। तच्छ्रुत्वा कार्तवीर्यः आदौ स्वाश्रितान् राज्ञः प्रेषितवान्। ततश्च सर्वे हते सति अयमेव अन्तिमे गत्वा परशुरामेण सह युद्धं विधाय जामदग्निना हतः इति इतिवृत्तम्[३६]। उभाभ्यामपि वृत्तान्ताभ्यां मदादेव अस्य नाशः सञ्जात इति सुष्ठु ज्ञायते। इत्थञ्च राज्ञा मदः जेयः। अन्यथा मदाजये स्वस्यैव नाश भवेत् कार्तवीर्यार्जुनवदिति निरदिशद् आचार्यः कौटल्यः।

अत्र अन्यदपि एकं स्वारस्यं वर्तते यत् श्रीमन्महाभारते सभापर्वणि जरासन्धवधपर्वणः प्रसङ्गे भगवान् श्रीकृष्णः स्वयमेव अनयोः नामनिर्देशं कुर्वन्, एतौ मदेन पीडितौ भूत्वा श्रेयसः अवनत्या नष्टौ इति जरासन्धं बुबोध। तद्यथा –

**जहि त्वं सदृशेष्वे मानं दर्पं च मागध।**

**मा गमः ससुतामात्यः सबलश्च यमक्षयम्।।**

**दम्भोद्भवः कार्तवीर्यः उत्तरश्च बृहद्रथः।**

**श्रेयोसो ह्यवमत्येह विनेशुः सबलाः नृपाः।।**[३७]

---

३५. हरिवंशम्, हरिवंशपर्व, अध्याः ३३, श्लोकः ३४

३६. ब्रह्माण्डपुराणम्, मध्यभागः अध्यायाः ३८ – ४०

३७. श्रीमन्महाभारतम्, सभापर्व, (जरासन्धवधपर्व), अध्यायः २२, श्लोकौ २३–२४

## ऊ. हर्षस्याजये

क्रीडासुखेन तृप्तिं न पश्येत् राजा। यदि क्रीडासुखवशगः स्यात्तर्हि सोऽपि नूनं नष्टो भवति इति निर्देष्टुं वातापिवृष्णिसङ्घयोः नाम निरदिशत्। तयोर्वृत्तान्तं जानीमः। वातापिः इल्वलश्च भ्रातरौ। एतौ नानाशस्त्रास्त्रज्ञौ आस्ताम् इति वामनपुराणे निर्दिष्टं दृश्यते।[३८] परमिमौ अतिक्रीडासक्तौ आस्ताम्। तयोः वातापिः स्वभ्रातरम् इलं छागीकृत्य, तन्मांसेन मुनीन् भोजयति स्म। तैः सम्यक् भुक्ते सति अतिक्रीडापरो भूत्वा अयं वातापिः, इल्वल, आगच्छ बहिः इति स्वभ्रातरम् आह्वयति स्म। तच्छ्रुत्वा तस्य भ्राता इल्वलोऽपि मुनीनां कुक्षीन् विदीर्य ततः आगच्छति स्म। इत्थं क्रीडासक्तौ आस्ताम्।[३९] एकदा अगस्त्यमहर्षिम् आहूय इत्थम् कर्तुम् उद्युक्तौ। परमनयोः व्यवहारः ज्ञातः महर्षिणा। अतश्च भुक्तमात्रेणैव जठरानलेन इलः जीर्णोऽभवत्। तज्ज्ञात्वा वातापिः सूक्ष्मरूपं स्वीकृत्य ऋषेः कुक्षौ प्रविश्य इलं रक्षितुम् उद्युक्तस्सन् सोऽपि वातापिः जीर्णो भूत्वा नाशम् आप्नोत्। इत्थञ्च क्रीडासक्तौ उभावपि नष्टौ इति इतिवृत्तम्। अत्र चम्पूभारतेऽपि एकस्मिन् पद्ये अगस्त्यमहर्षेः प्रभाववर्णनसमये वातापि यो जठरदहने कल्पयामास हव्यम्[४०] इति वातापिसङ्केतः समुपलभ्यते। कादम्बर्यां श्रूयमाणं जठरानलजीर्णवा– तापिदानवस्य[४१] इति अगस्त्यमुनिप्रभावकथनपूर्वकं वचनमपि एतद्वृत्तान्तविषये अपरं प्रमाणम्। तथा च अतिक्रीडासक्तश्चेत् स राजा नूनं नाशम् आप्नुयादिति ज्ञेयम्।

अतिक्रीडया नष्टेषु वृष्णिसङ्घमपि निरदिशदाचार्यः। एतद्वृत्तान्तविषये व्याख्यातार एव शरणम्। तत्र जयमङ्गलाव्याख्याकारः कामन्दकीयनीतिसारे एतद्वृत्तान्तं सुष्ठु प्रत्यपादयत्। तस्यायं संग्रहः– वृष्णिपुत्राः क्रीडासक्ताः आसन्। एकदा ते कृष्णस्य दायादं साम्बं स्त्रीवेषं कारयित्वा तस्य उदरे

---

३८. वातापि चेल्वलश्चैव नानाशस्त्रास्त्रयोधिनः–वामनपुराणम्, अध्यायः ६९, श्लोकः ५६

३९. वातापील्वलयोः एतादृशव्यवहारविषये महाभारते आरण्यकपर्वणि चतुर्नवतितमे अध्याये निर्देशः समुपलभ्यते। (श्लोकाः ४–१३)

४०. चम्पूभारतम्, तृतीयस्तबकम्, श्लोकः ३५

४१. कादम्बरी, पूर्वभागः

लोहपिण्डं बद्ध्वा तत्स्थाने समागतं द्वैपायनमुनिं[४२] दृष्ट्वा क्रीडालवः इत्थं प्रश्नम् अकुर्वन्— भगवन्, इयं साम्बवधूः, किमियं विजनयिष्यति इति। तत्क्रीडया अतिक्रुद्धः द्वैपायनमुनिः तान् शशाप—

**वंशक्षयकरं घोरम् आयसं मुसलं महत्।**

**वासुदेवस्य दायादः साम्बो विजनयिष्यति।।**[४३]

ततः जातं वृत्तान्तं ज्ञात्वा श्रीकृष्णः तान् आदिशत् यद् साम्बोदरप्रसूयमानं लोहमुसलं शिलासु निघृष्य तद्रजः समुद्रतटे क्षेप्यम् इति। ततः तेभ्यः रजोभ्यः केचन एरकाः (तृणविशेषाः) समभवन्। घृष्टशेषं समुद्रजले चिक्षिपुः। स च शेषः मत्स्येन भुक्तः। स च मत्स्यः व्याधेन कथञ्चिद् गृहीतः। ततश्च बाणरूपं प्राप्तः स घृष्टशेषः। कालान्तरेपिबन्मत्तेवृष्णिसङ्घे परस्परकोलाहलः सञ्जातः। तदा तत्कोलाहलं दृष्ट्वा चिन्ताम् आपन्नः श्रीकृष्णः शिलातले उपविशन् पादाङ्गुष्ठचलनात्, मृगोऽयम् इति बुद्ध्या तदङ्गुष्ठे व्याधेन अनेनैव बाणेन ताडितस्सन् परमात्मा स्वशरीरं त्यक्त्वा विष्णुलोकं प्राप इति विस्तृतं वृत्तान्तम्। अत्र अवधेयांशस्तु इयानेव यद् अतिक्रीडासक्ताः वृष्णिपुत्राः स्वक्रीडाचापल्येनैव नष्टाः इति। इत्थञ्च आचार्यः कौटल्यः अतिक्रीडनात् न केवलं राजा स्वयम् अपि तु सबन्धुः विनश्येदित्यस्मात् कारणात् हर्षस्यापि त्यागः कर्तव्यः इति उपादिशत्।

अर्थशास्त्रसंग्रहप्रतिपादपरे कामन्दकीयनीतिसारे इमान्येव वृत्तान्तानि, अधोनिर्दिष्टैः पद्यैः संक्षेपेण सूचितानि वर्तन्ते।

**दृष्टाः तेभ्योऽपि विपदः पाण्डुनैषधवृष्णिषु। इति,**

**दाण्डक्यो नृपतिः कामात् क्रोधाच्च जनमेजयः।**

**लोभादैलस्तु राजर्षिः वातापिर्हर्षतोऽसुरः।।**

**पौलस्त्यो राक्षसो मानन्मदाद् दम्भोद्भवो नृपः।**

---

४२. व्यासमुनिः इति गणपतिशास्त्रिणः स्वीयश्रीमूलायां व्याख्यायां निरदशिन्। परं व्याख्यानान्तरेषु दुर्वासमुनिरिति विस्तृतवृत्तान्तवर्णने सङ्केतः समुपलभ्यते।

४३. विश्वनाथशास्त्रि—पुटसंख्या ३७

**प्रयता निधनं ह्येते शत्रुषड्वर्गमाश्रिताः।।**[४४]

अन्येऽपि राजानः अस्य अरिषड्वर्गस्य अजयेन नष्टा इति निर्देष्टुम् आचार्यः अस्य इन्द्रियजयाख्यप्रकरणस्य प्रथमाध्यायान्ते –

**एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः।**

**सबन्धुराष्ट्राः राजानो विनेशुरजितेन्द्रियाः।।**[४५]

इति निरदिशत्। प्रत्येकस्यापि मनोदोषस्य अजयेन नष्टाः इति निर्दिष्टेभ्यः दाण्डक्यादिभ्यः अन्येऽपि नैके राजानः इन्द्रियजयाभावेन नाशम् आपुरितित्याचार्यः अकथयत्। तदमुष्मिन् सन्दर्भे श्रीमन्महाभारते उद्योगपर्वणि दृश्यमानं श्रीकृष्णं प्रति भीमसेनवचनं स्मर्तव्यम्। तद्यथा–

**अष्टादश इमे राजानः प्रख्यात मधुसूदन।**

**ये समुच्चिच्छिदुः ज्ञातीन् सुहृदश्च सबान्धवान्।।**

**इत्यारभ्य शमश्च नन्दिवेगानाम् इत्येते कुलपांसनाः।**

**युगान्ते कृष्ण संभूताः कुलेषु पुरुषाधमाः।।**[४६]

इत्येतदन्तम् अष्टदश नृपतीनां नामनिर्देशं कुर्वन् ते मदेन, लोभेन, क्रोधेन वा इति केनचिदेकेन मनोदोषेण पीडिताः सन्तः न केवलं राज्याद् भ्रष्टाः अपि तु सबन्धुराष्ट्राः नष्टाः इति भीमसेनः श्रीकृष्णम् अकथयत्। अतश्च चिरकालं महीं भोक्तुम् इष्टश्चेत् तेन राज्ञा नूनम् इन्द्रियजयः कर्तव्यः इति आचार्यस्योपदेशः।।

## जितेन्द्रियः कथं वर्तेत

एवं पूर्वस्मिन् अध्याये अरिषड्वर्गस्य अजयेन नष्टान् राज्ञः (नामानि) निर्दिश्य, तद्व्यतिरेकेणइन्द्रियजयेन निरवच्छिन्नफलं भुक्तवतामपि नामोल्लेखनम् अकरोत्। ते च जामदग्न्यः, अम्बरीषः, नाभाग इति। एतेषां विषये श्रीमन्महाभारते विस्तृतम् इतिवृत्तं समुपलभ्यते। विस्तरभिया नेह

---

४४. कामन्दकीयनीतिसारः सर्गः १, श्लोकाः ५६, ५८ तता ५६

४५. श्रीमन्महाभारतम्, उद्योगपर्व, अध्यायः ७३, श्लोकः ११

४६. तत्रैव श्लोकः १७

विव्रियते ।भवतु तत्तथा। प्रकरणस्य प्रथमे अध्याये अरिषड्वर्गस्य त्यागं प्रतिपाद्य अग्रिमे द्वितीये अध्याये राज्ञा अभ्यसनीयाः विषयाः के इति प्रत्यपादयदाचार्यः। जितेन्द्रियः शास्त्रोक्तानां सदाचाराणाम् अनुष्ठानं कुर्यात्। तदेव वृद्धसंयोगेन प्रज्ञाम्[४७] इत्यादिना प्रत्यपादयत्। तदर्थसारः— वृद्धशब्देन मन्त्रिणः, पुरोहितादयः संसूचिताः। तथा च तैः सह संबन्धं विधाय प्रज्ञां विकासयेदित्यर्थः। गूढपुरुषं (चारमेव) चक्षुरूपं भावयेत्। उद्योगवर्धनेन न केवलं स्वस्य अपि च राष्ट्रस्य योगक्षेमं संपादयेत्। शास्त्रोक्तप्रकारं कार्यानुष्ठानेन धर्मस्य व्यवस्थापनं कुर्यात्। धर्मार्थशास्त्रविहितेन विद्योपदेशेन विनयं कुर्यात्। अत्र विनयशब्दस्य अनुशासनमित्यर्थः। अर्थसंयोगेन लोकसुखं कुर्यात्। हितेन च स्वस्य राज्यस्य च वर्तनं वर्धेत। पूर्वं यदुक्तम् अरिषड्वर्गस्य त्याग इति स च निवृत्तिरूपः इन्द्रियजयः। इमे च उपेदेशाः प्रवृत्तिरूपम् इन्द्रियजयं बोधयन्ति इति ज्ञेयम्।

इत्थं राज्ञा अभ्यसनीयान् विषयान् उक्त्वा, वर्जनीयान् अपि विषयान् उपादिशदाचार्यः कौटल्यः। ते च— परस्त्रीं वर्जयेत्, परद्रव्येषु दृष्टिमेव न विदद्यात्। तदमुष्मिन् सन्दर्भे सुभाषितमिदं स्मर्तव्यम्—

**मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।**[४८]

अपि च स्वप्ने वर्जयेदित्यपि निरदशित्। तस्यायमर्थः— निर्दिष्टकालम् अतिरिच्य अन्यकालेषु निद्रां न कुर्यादिति। चापल्यं त्याज्यम्। मिथ्योक्तिः सुतरां त्याज्या। अविनीतवेषत्वं नूनं त्यजेत्। अनर्थसंयोगं त्यजेत्। तदर्थः व्यसनकारकाणि द्यूतमृगयास्त्रीपानादीनि त्याज्यानि इति। धर्मविरुद्धं व्यवहारं सर्वथा न कुर्यात्। धर्मादीनां त्रयाणामपि समानोपचारता देया। तत्र धर्मस्य अर्थस्य च अविरोधेन कामं सेवेत राजा। त्रयोऽपि धर्मार्थकामाः समानाः। अतः एकम् अति एकं न्यूनं वा न समाचरेत्। तथा सति न्यूनसेवितेन नूनं पीडितो भवति राजा। तत्प्रसङ्गे पूर्वोक्तेषु पुरूरवसः इतिवृत्तं स्मर्तव्यम्। अतश्च समानरूपेण धर्मार्थकामाः सेवनीयाः इति कथयन् स्वाभिप्रायमपि प्राकटयत् —

---

४७. कौटलीयम् अर्थशास्त्रम् — अधिकरणम् १, प्रकरणम् ३, अध्यायः ७

४८. हितोपदेशः मित्रलाभः श्लोकः १४

अर्थ एव प्रधानः[४९] इति कौटल्य इति। तत्र कारणमपि प्रत्यपादयत् अर्थसाध्यौ इति धर्मकामौ इति। एवम् इन्द्रियजयमुखेन कर्तव्यानि अकर्तव्यानि च उपादिशदाचार्यः कौटल्यः।

## उपसंहारे आधुनिके अस्य आवश्यकता

इत्थम् आचार्यः कौटल्यः स्वीये अर्थशास्त्रे आदावेव राज्ञः कर्तव्याकर्तव्योपदेशमुखेनराष्ट्रनीतिनिर्माणविषये (Policy & Making) अस्मान् उद्बोधयति। किमयम् इन्द्रियजयः कथम् आधुनिके काले नीतिनिर्माणे सह कुर्यादिति संशये –

**तदात्वे नूतनं सर्वम् आयत्याञ्च पुरातनम्।**

**न दोषायैतदुभयं न गुणाय च कल्पते।।**[५०]

इति आचार्यस्य वेदान्तदेशिकस्य पद्यमुखेन किञ्चिदुच्यते। इदञ्च अर्थशास्त्रं तत्कालसमाजस्थित्यनुगुणम् आचार्येण प्रणीतम् इति केचन नव्याः। सर्वेषु कालेषु उपयोगाय कल्पते इति नीतिशास्त्राभिमानिनः। परं नव्यानुसारं न दोषाय, शास्त्राभिमान्यनुसारं न गुणाय च कल्प्यते। अत्र नूनमपेक्षितानि कानिचन परिवर्तनानि। परम् अयं ग्रन्थः नूनम् आधारः भवितुमर्हति इत्यत्र नास्ति कस्यापि विमतिः। अत एव खलु अद्यापि ग्रन्थेऽस्मिन् न केवलं भारतीयाः अपि च पाश्चात्या अनुसन्धानं कुर्वाणाः वर्तन्ते। इत्थञ्च इतःपरं भारतीयाः वयं ग्रन्थेऽस्मिन् न केवलं सूक्ष्मेक्षिकाध्ययनमुखेन अपि तु भाविनीतिनिर्माणे यत् सहकुर्यात् तत्फलावाप्तये अनुसन्धानं करवामहै। भवतु, अधुना अयम् इन्द्रियजयः कथं नीतिनिर्माणे सह कुर्यादित्यत्र अस्मदभिप्रायः– राज्यमन्त्रिणः, राष्ट्रमन्त्रिणः, मुख्यमन्त्रिणः, प्रधानमन्त्रिणः वा भवन्तु तेषां कर्तव्याकर्तव्यनियमेषु न केवलम् इमे विषयाः, अपि च अनेन समं भजमानाः नैके विषयाः अर्थशास्त्रग्रन्थे आचार्येण निहिताः वर्तन्ते। तेषां चयनाय काचित्परिषन्निर्मेया। सा च परिषद् द्वाभ्यां विद्वन्मण्डलाभ्यां निर्मिता स्यात्। एकं नीतिशास्त्रविद्वन्मण्डलम्, अपरञ्च (आधुनिक) प्रशासनविज्ञान (Political

---

४९. कौटलीयम् अर्थशास्त्रम् – अधिकरणम् १, प्रकरणम् ७, अध्यायः ७

५०. यादवाभ्युदयम् सर्गः १, श्लोकः ६

Science) विद्वन्मण्डलम्। अनर्थं न व्यवहरेदिति कथनेनैव आचार्यैरपि नैकोऽपि विषयः वृथा प्रोक्त स्यादिति अवबुध्य, तद्विद्वन्मण्डले इमे विषयाः चर्चितव्याः। ततः परम् एते आधुनिकराजनीत्याम् अपेक्षानुगुणंसाक्षात् परिवर्त्य वा योजनीयाः। न वयम् अर्थशास्त्रनिपुणाः, नापि प्रशासनविज्ञाननिपुणाः, परं राष्ट्रस्य प्रगतिं उन्नतिं च सदा काङ्क्षमाणाः सामान्या इति स्थालीपुलाकन्यायेन एक एव विषयः सप्रमाणं निरूपितं सप्रयोजनं स्यादिति धिया।।

***

# शतपथब्राह्मणे समुपलब्धस्य प्रजापतिशब्दस्य अर्थसमीक्षणम्

**डॉ. प्रतापचन्द्ररायः**

*सहायकाध्यापकः, संस्कृतविभागः*

*सिधो–कानहो–वीरसा–विश्वविद्यालयः*

*पुरुलिया, राँची रोड, पश्चिमबङ्गः*

## शोधसारांशः

वैदिकवाङ्मयस्य मुख्यरूपेण संहिताभागरूपेण ब्राह्मणभागरूपेण च भागद्वयं वर्तते। 'ब्रह्म वै मन्त्रः' (श.ब्रा. ७.१.१.५) इति वचनानुसारेण मन्त्रस्य ब्रह्मेति नामधेयम्। एवं ब्रह्मणः यद्वा मन्त्रस्य व्याख्यापरकग्रन्थानां नाम खलु ब्राह्मणम्। ब्राह्मणग्रन्थास्तु मन्त्राणां निगूढमर्थमुद्घाटयन्ति। ते खलु यज्ञानां यागानां चाध्यात्मिकमाधिदैविकं च स्वरूपं प्रस्तुवन्ति। तेषु ब्राह्मणग्रन्थेषु बहवः पारिभाषिकशब्दाः समुल्लिखिताः सन्ति। तेषु पारिभाषिकशब्देषु प्रजापतिशब्दस्य प्रयोगोऽपि इतस्ततः समुपलभ्यते। यद्यपि शब्दोऽयम् अतीव परिचितः प्रसिद्धश्च तथापि शब्दोऽयं ब्राह्मणग्रन्थेषु स्वकीयेन माहात्म्येन अर्थवैचित्र्येण च प्रगाढं तात्पर्यमावहति। तत्र तस्य बहुविधा अर्थाः संलक्ष्यन्ते। यथा कुत्रचित्तेन प्रजापतिशब्देन प्रजापालकोऽवबुध्यते। कदाचित् प्रजापतिशब्दोऽन्नरूपेण पठ्यते। क्वचित् प्राणरूपेण कुत्रचिद्वा अग्निरूपेण शब्दस्यास्यार्थः संलक्ष्यते। कुत्रचित्तस्य शब्दस्य 'मनः' कुत्रचिद्वा 'वाग्' इत्यर्थः दरीदृश्यते। कदाचिच्छब्दोऽयं यज्ञार्थं पुरुषार्थं च बोधयति। ततः शब्दोऽयं हिरण्यगर्भरूपेण संवत्सररूपेण वाचस्पतिरूपेण अन्तरूपेण अपरिमितरूपेण हृदयरूपेण उद्गीथरूपेण अथर्वारूपेण अश्वरूपेण च तत्र वर्णितः। एवं विस्तारभिया स्वल्पाः एव शब्दा अत्र शोधसारांशे समुल्लिखिताः। तस्य शब्दस्य इतोऽपि बहुविधा अर्थाः सन्ति, येषां शब्दानाम् अर्थसमीक्षणं प्रबन्धेऽस्मिन् सविशदं क्रियते।

## उपोद्घातः

वैदिकवाङ्मये खलु मन्त्राणामर्थज्ञानाय सर्वादौ श्रद्धापूर्वकं

ब्राह्मणग्रन्थानां नामानि स्मर्यन्ते। तान्येव शतपथादीनि ब्राह्मणानि पुराणेतिहासकल्पगाथानाराशंस्यादीनि संज्ञकानि भवन्ति।[१] तत्र शुक्ल–यजुर्वेदस्य माध्यन्दिन– काण्वशाखयोर्ब्राह्मणग्रन्थत्वेन शतपथब्राह्मणस्य नाम प्रसिद्धम्। ग्रन्थस्यास्य प्रवक्ता खलु वाजसनिपुत्रो महर्षिः याज्ञवल्क्यः। अतः स्मर्यते– **"आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते"।**[२] चतुर्दशकाण्डात्मके ब्राह्मणेऽस्मिन् १०० इति संख्यका अध्यायाः विलसन्ति। तस्मादस्य 'शतपथम्' इति नामधेयम्। **"शतं पन्थानो मार्गा नामाध्याया यस्य तच्छतपथम्"** इत्येवं गणरत्नमहोदधिपादैः शतपथनाम्नो व्याख्या प्रदत्ता।[३] तत्र दर्शपूर्णमास– अग्निहोत्र– सोमयाग–वाजपेयादिविविधविषयैः समं प्रजापतिशब्दस्य अपि माहात्म्यं प्रतीकात्मक–रूपेण इतस्ततो बहुधा वैशद्येन च वर्णितम्, यत्तु शोधपत्रस्यास्य मुख्यतया विवेच्यं वर्तते। शोधपत्रेऽस्मिन् शतपथब्राह्मणे उपलब्धस्य प्रजापतिशब्दस्य अर्थसमीक्षणं सविशदं क्रियते यदत्यन्तं रोचकमभिनवत्वं च प्रतिभाति।

तत्र प्रजा च पतिश्चेति पदद्वयेन सम्पृक्तं सामासिकपदं तु प्रजापतिः। यास्काचार्यानुसारं प्रजापतिरयं खलु मध्यमस्थानीयो देवः। **"तद् अब्रवीत् प्रजापतेः प्रजाः सृष्ट्वा पालयस्वेति, तस्मात् प्रजापतिरभवत्, तत्प्रजापतेः प्रजापतित्वम्"** इति गोपथब्राह्मणकृद्भिः प्रजापतिपदस्य निर्वचनं प्रदत्तम्।[४] गोपथब्राह्मणवद् यास्काचार्येणापि **"प्रजापतिः प्रजानां पाता वा पालयित्वा वा"** इति कृत्वा प्रजापतिपदस्य निरुक्तिः प्रस्तुता।[५] एवम्भूतेन निर्वचनद्वयेन प्रजायाः रक्षकः पालकश्च प्रजापतिरेव इति सिद्ध्यति। तत्र 'प्रजा' उपपदपूर्वकं ✓पा–रक्षणे तथा च ✓पा–पालने धातुपूर्वकं 'पाता' च 'पालयिता' चेति पदेन

---

1. Rgvedādibhāṣyabhūmikā of Maharshi Dayananda Saraswati, (2014)- Ed- by Vedic Pustakalay- Dayanandashram Ajamer : Vedic Pustakalay] (14th ed.), वेद संज्ञाविचारः, च– १००
२. शतपथब्राह्मणे–१४/६/४/३३
3. Dwivedi, K- (2018). Vaidika *Sāhitya* evam *Saṁskṛti*- Varanasi : Vishvavidyalay Prakashan- (7th Ed.) p,-131
४. गोपथब्राह्मणे पू.–१/४
५. निरुक्ते–१०/४१

निर्वचनं प्रस्तुतम्, किन्तु अन्यत्र ✓ जनि–प्रादुर्भावे इति धातुमाश्रित्यापि निर्वचनं संलक्ष्यते। यथा **"प्रजापतिः प्रजानां प्रजनयिता"** इति जैमिनीयब्राह्मणे[६], **"प्रजननं प्रजापतिः"** इति शतपथब्राह्मणे[७] तथा च **"तपो वै तप्त्वा प्रजापतिर्विधायात्मानं मिथुनं कृत्वा प्रजया च पशुभिश्च प्राजायत"** इति मैत्रायणीसंहितायां[८] निर्वचनमपि दरीदृश्यते। तत्र यथाक्रमं 'प्रजनयिता' 'प्रजननं' 'प्राजायत' चेति पदत्रयेण निर्वचनं प्रस्तुतम्। अमरकोशग्रन्थे प्रजापतेः पर्यायेषु ब्रह्मन्–आत्मभू–सुरज्येष्ठ–परमेष्ठिन्–पितामहादिपदानि उल्लिखितानि सन्ति।[९]

ऋग्वेदानुसारेण तु प्रजापतिरेव विश्वस्य जगतः पालकः संरक्षकोऽध्यक्षश्च।[१०] यजुर्वेदस्य मन्त्रानुसारं प्रजापतिपरमात्मनः उत्तमो भिन्नश्च कोऽपि नास्ति खलु प्रसिद्धः, यस्मिन् सर्वाणि भुवनानि प्रतिष्ठितानि सन्ति। स प्रजापालकः सर्वेण संसारेण सम्यग्दातृशीलस्तथा स सूर्य्यविद्युदग्न्याख्यानि त्रीणि ज्योतींषि स्वगर्भे दधाति। प्रशस्ताः षोडश कला विद्यन्ते यस्मिन् स प्रजापतिरिति। एवम्भूते मन्त्रेऽस्मिन् प्रजापतेः सर्वशक्तिसम्पन्नं स्वरूपं वर्णितमस्ति।[११] अथर्ववेदस्य एकस्मिन् सम्पूर्णे सूक्ते प्रजापतेः सिसृक्षायाः सर्वदेवात्मकतायाश्च वर्णनं समस्ति।[१२] तैत्तिरीयब्राह्मणानुसारं शङ्खपद्मादीनां

---

६. जैमिनीयब्राह्मणे–२/३८८

७. शतपथब्राह्मणे–५/१/३/१०

८. मैत्रायणीसंहितायाम्–१/६/६

९. ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः। हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः। धाताब्जयोनिर्द्रहिणो विरिञ्चिः कमलासनः। स्रष्टाप्रजापतिर्वेधा विधाता विश्वसृड्विधिः।। अमरकोशे–१/१६, १७ स्वर्गवर्गे

१०. ऋग्वेदसंहितायाम्–१०/१२१ (सम्पूर्णसूक्तम्)

११. यस्मान्न जातः परोऽन्योऽस्ति य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतीकृषि सचते स षोडशी।। यजुर्वेदसंहितायाम्–८/३६

१२. अथर्ववेदसंहितायाम्–११/८ (सम्पूर्णसूक्तम्)

निधीनां पालकत्वात् प्रजापतेः 'निधिपाः' इति संज्ञा। सम्पूर्णस्य संसारस्य स्रष्टृत्वादनादिः पुराणश्च। अग्न्यादिदेवानां पालकत्वात् तस्य पितृत्वं निरूपितम्। मनुष्यादीनां प्रजानां जनितोत्पादकत्वात् तथा सर्वस्य जगतः पतित्वादेव सोऽध्यक्षः। अतस्तत्राम्नातम् – **"प्रजापते त्वं निधिपाः पुराणः। देवानां पिता जनिता प्रजानाम्। पतिर्विश्वस्य जगतः परस्पाः"।**[१३] शतपथब्राह्मणेऽस्मिन् प्रजापतिशब्दस्य अन्नरूपेण वर्णनं संलक्ष्यते। यथा उच्यते– **"अन्नं वै प्रजापतिः"**[१४] तथा **"अन्नं वा अयं प्रजापतिः"**[१५] इति। तेन अन्नस्वरूपेण प्रजापतिना इमाः सर्वाः मनुष्यादिप्रजाः जायन्ते। अन्नस्य पालन– पोषणशक्तित्वात् तस्य प्रजापतिरिति नामकरणम्। **"अन्नं हि प्राणः"** इत्यनेन अन्नं प्राणरूपेणापि कथितम्।[१६] अतोऽन्ने प्राणशक्तिर्विद्यत एव। तेन प्राणभूतेन अन्नेन जीवाः प्रजायन्ते जीवन्ति च। प्रजापतिरपि प्राणत्वेन विवेचितः। अतः प्रजापतिरेव इदं सर्वम् अनुप्रजायते। तथा हि उच्यते– **"प्राणो हि प्रजापतिः प्रजापतिं ह्येवेदं सर्वमनु"**[१७] तथा **"प्राणा उ वै प्रजापतिः"**[१८]। इत्थम् अंगाङ्गिनोरभेदात् प्राण एव प्रजापतिः, अन्नमेव प्रजापतिश्चेति। ततो ब्राह्मणेऽस्मिन् **"प्रजापतिरेषोऽग्निः"**[१९] तथा **"प्रजापतिर्वा अग्निः"**[२०] इत्येवं प्रजापतिः बहुधा अग्निरूपेण वर्णितः। यथाग्निः प्रकाशादिगुणविशेषेण मनुष्यादिप्रजानां जीवनं निर्वहति तथैव प्रजापतिरपि पालनपोषणादिगुणेन प्रजानां जीवनं पालयति। तस्मादग्निप्रजापत्योर्गुणसाम्यात् प्रजापतेरग्निरिति

---

१३. तैत्तिरीयब्राह्मणे–२/८/१/३

१४. शतपथब्राह्मणे–५/१/३/७

१५. तदेव–७/१/२/४

१६. तदेव–२/२/१/६; ४/३/४/२५; ३/८/४/८; तै.ब्रा.–३/२/३/४; कौ.ब्रा..– २४/१३

१७. तदेव–४/५/५/१३

१८. तदेव–८/४/१/४; ६/३/१/१; ७/५/१/२१

१९. तदेव–६/५/६/७; ६/८/१/४; ६/२/१/२३; ६/५/३/६; ७/२/२/१७

२०. तदेव–२/३/३/१८

नामधेयम्। अग्नेर्देवतानां मुखरूपेण वर्णनं प्रसिद्धमेव। तेन सह तस्याग्नेः प्रजनयितृरूपत्वेनापि वर्णनं संदृश्यते– **"अग्निर्वै देवतानां मुखं प्रजनयिता स प्रजापतिः"**[२१] इति। तत्र "अग्निः प्रजनयिता उत्पादयिता मातापितृभ्यां भुक्तस्य अन्नस्य जाठराग्निपरिपाकवशेन शुक्रशोणितात्मना परिणामादग्नेः प्रजनयितृत्वम्। अत एव सोऽग्निः प्रजापतिरित्यर्थः" इति सायणाचार्यपादैर्भणितम्।[२२] ब्राह्मणेऽस्मिन् प्रजापतिः आध्यात्मिकदृष्ट्या मनोरूपेण वर्णितः। तत्र उक्तं च **"प्रजापतिर्वै मनः"** इति।[२३] यथा अस्मदीयं मनः संकल्पमात्रेण मनोराज्यगतान् गिरिनद्यादीन् सृजति तादृशं प्रजापतिरपि संकल्पमात्रेण सृजति इति तत्साम्यात् प्रजापतेर्मनोनामधेयम्। तदनु प्रजापतिः मनो भूत्वा सृष्ट्युत्पत्तिदृष्ट्या समग्रं चिन्तनं मननं च कृतवान्। एवं सृष्ट्युत्पत्तिविषयकचिन्तनेन प्रजापतेः मनोरूपत्वम्। अतः **"मनो भूत्वा प्रजापतिः सर्वम् अमनुत"** इत्येवं वचनं तत्रसमुपलभ्यते।[२४] मनो व्यतिरिच्य तत्र प्रजापतिशब्दस्य हृदयरूपत्वेनापि वर्णनं संलक्ष्यते।

अत एव याज्ञवल्क्येन तत्र **"एष प्रजापतिर्यद् हृदयम्"** इत्येवमुद्घोषितम्।[२५] ततः तत्र वाग्रूपेणापि प्रजापतेः सातिशयमितस्ततो माहात्म्यवर्णनं संदृश्यते। वस्तुतः व्याकरणानुसारन्तु अभिव्यक्ति–प्रदातृ–तत्त्वरूपेण √वच–परिभाषणे धातुना 'क्विप्' प्रत्ययाच्च खलु वाक्पदं निष्पन्नम्। अत आचार्यदेवराजयज्वापादैः निघण्टुवृत्तिमध्ये वाक्तत्वं वागिन्द्रियं मत्वा तदधिष्ठातृदेवतारूपेण तदेव स्वीकृतम्। अतस्तैर्लिख्यते– **"वाक्। उच्यते इति वाक् इन्द्रियम्, तत्कार्यः शब्दोऽप्युच्यते इति वाक्, तदधिष्ठार्त्यपि देवता वागिष्यते" इति।**[२६] महर्षिदयानन्दपादैरपि तथैव प्रोक्तम्

---

२१. तदेव–२/५/१/८; ३/६/१/६

२२. शतपथब्राह्मणस्य सायणभाष्ये–२/५/१/८

२३. शतपथब्राह्मणे–४/१/१/२२; ८/५/२/२; तैत्तिरीयब्राह्मणे–३/७/१/२; कौषीतकिब्राह्मणे–१०/१; २६/३

२४. जैमिनीयब्राह्मणे–१/३१४

२५. शतपथब्राह्मणे–१४/८/४/१

२६. निघण्टुवृत्तिमध्ये–१/११/५०

– **"वचन्ति वाचयन्ति सर्वा विद्या यया तां सत्यलक्षणां वेदचतुष्टयीम्"**[२७] तथा **"वक्ति यया सा वाणी"**[२८] इति। शास्त्रान्तरेऽपि वाचः धेनु–सरस्वती–समुद्र–सिनीवाली–ब्रह्म–शस्त्र– वज्रादिरूपेण बहुविधाः अर्थाः परिलक्ष्यन्ते।[२९] किन्तु शतपथब्राह्मणानुसारं वाक्शब्दस्यार्थः 'प्रजापतिः' इति। अत एव **"वाग्वै प्रजापतिः"**[३०] तथा **"वाग्घि प्रजापतिः"**[३१] इत्येवं रूपेण तत्र प्रजापतिशब्दस्य वाग्रूपत्वम् उद्घोषितम्। वागिन्द्रियस्याधिष्ठात्री देवता प्रजापतिरित्यर्थः। अत एव ब्राह्मणकृद्भिः स्पष्टतया **"प्रजापतिर्वै वाक्पतिः"** इत्येवं विजृम्भितम्।[३२] वाचः पालकत्वाद् रक्षकत्वाच्च **"प्रजापतिर्वै वाचस्पतिः"**[३३] इत्यनेन प्रजापतेः वाचस्पतिरूपत्वम्। अतो यास्काचार्यपादैरपि तथैव निगदितं **"वाचस्पतिर्वाचः पाता वा पालयिता वा"** इति।[३४] प्रजापतिः संवत्सरकालात्मकोऽपि भवति।

अत एव संवत्सरकालात्मकत्वात् शतपथब्राह्मणेऽस्मिन् **"संवत्सरो वै प्रजापतिः"** इत्येवं वचनं प्राप्यते।[३५] तदनन्तरं प्रजापतिः खलु यज्ञरूपत्वेन सातिशयं सर्वेषु शास्त्रेषु वर्णितः। अग्निहोत्रादियज्ञानां प्रजापतिदेवतात्मकत्वेन तत्र तस्य प्रजापतिरूपत्वम्। तस्मात् **"प्रजापतिर्वै यज्ञः"** इत्येवमाम्नातम्।[३६]

---

२७. यजुर्वेदस्य दयानन्दभाष्ये–२/१८

२८. तदेव–१८/२६

२९. वाग्वै धेनुः। तांड्यब्राह्मणे–१८/६/२६; वाग्वै सरस्वती। ऐतरेयब्राह्मणे–३/१; २/२४; वाग्वै समुद्रः। तांड्यब्राह्मणे–७/७/६; यजुर्वेदे–११/५५; वाग्घि ब्रह्म। ऐतरेयब्राह्मणे–२/१५; जैमिनीयोपनिषद्ब्राह्मणे–२/१३/२; वाग्घि शस्त्रम्। ऐतरेयब्राह्मणे–३/४४ वाग्घि वज्रम्। ऐतरेयब्राह्मणे–४/१

३०. शतपथब्राह्मणे– ५/१/५/६; १३/४/१/१५

३१. तदेव–१/६/३/२७; तैत्तिरीयब्राह्मणे–१/३/४/५

३२. शतपथब्राह्मणे–३/१/३/२२; यजुर्वेदे–४/४

३३. शतपथब्राह्मणे–५/१/१/१६

३४. निरुक्ते–१०/१७

३५. शतपथब्राह्मणे–२/३/३/१८; ३/२/२/४; ५/१/२/६; २/२/२/४; ऐतरेयब्राह्मणे–२/१७; ४/२५;तांड्यब्राह्मणे–१६/४/१२;गोपथब्राह्मणेउ.–३/८

३६. ऐतरेयब्राह्मणे–४/२६

ततः **"प्रजापतिर्यज्ञमसृजत"**[३७] इति यज्ञस्रष्टृत्वश्रुतेः कार्यस्य कारणाद् अभेदात्। प्रजापतेः यज्ञस्रष्टृत्वेन यज्ञरूपत्वाद् ब्राह्मणग्रन्थेऽस्मिन् **"एष वै प्रत्यक्षं यज्ञो यत्प्रजापतिः"** तथा **"स वै यज्ञ एव प्रजापतिः"** इत्युच्यते।[३८] साक्षात् प्रजापतिरेव सविता सर्वस्य प्रेरकत्वात्।[३९] अयं प्रजापतिरेव खलु सविता भूत्वा प्रजानां निर्माता भवति। अत एव प्रजानिर्मातृत्वात् **"प्रजापतिः सविता भूत्वा प्रजा असृजत"** इत्येवं तैत्तिरीयब्राह्मणेन निगदितम्।[४०] वायुप्रजापत्योः कार्यकारणाभावेनैकत्वे सति प्रजापतेः वायुरूपत्वम्। ततो वायोः यत्पवमानरूपं विद्यते तत्प्रजापतिरिति तादात्म्यं समानाधिकरण्येन वर्णितम्। तदिदमुच्यते– **"वायुर्हि एव प्रजापतिः तद् उक्तमृषिणा पवमानः प्रजापतिरिति"।**[४१] किन्तु शतपथब्राह्मणे वायुप्रजापत्योरर्द्धभागत्वेन अपि वर्णनं संलक्ष्यते।[४२] तत्र सूत्रात्मरूपत्वाद् वायुः हि प्रजापतेः अर्द्धभागः तथा प्रजापतिरयमपि स्वयमेव वायोः अर्द्धभागो विद्यत इत्यर्थः। अन्यत्र प्रजापतिः वैशद्येन हिरण्यगर्भरूपेणापि वर्णितः– **"प्रजापतिर्वै हिरण्यगर्भः"** इति।[४३] यास्काचार्यपादैर्हिरण्यगर्भशब्दस्यार्थ एवं निर्धारितः– **"हिरण्यगर्भो हिरण्यमयो गर्भोऽस्येति वा"**[४४], किन्तु सायणाचार्यपादैर्हिरण्यगर्भ– शब्दस्यार्थः प्रजापतिरिति निर्देशितः। **अतस्तैर्लिख्यते– "हिरण्यगर्भो हिरण्मयस्याण्डस्य गर्भभूतः प्रजापतिर्हिरण्यगर्भः"** इति।[४५] तत्र देवतासामान्यात् प्रजापतेर्हिरण्यरूपत्वम्। यतो हि हिरण्यगर्भमन्त्रस्य अपि देवता खलु

---

३७. तैत्तिरीयब्राह्मणे–१/७/१/४

३८. शतपथब्राह्मणे–४/३/४/३०; १/७४/४

३९. यो ह्येव सविता स प्रजापतिः। तदेव–१२/३/५/१। प्रजापतिर्वै सविता। ताण्ड्यब्राह्मणे–१६/५/१७

४०. तैत्तिरीयब्राह्मणे–१/६/४/१

४१. ऐतरेयब्राह्मणे–४/२६

४२. अर्धं ह प्रजापतेर्वायुरर्धं प्रजापतिः। शतपथब्राह्मणे–६/२/२/११

४३. तदेव–६/२/२/५; १०/१/४/६; तैत्तिरीयसंहितायाम्–५/५/१/२;

४४. निरुक्ते– १०/२३

४५. ऋग्वेदसायणभाष्ये–१०/१२१/१

प्रजापतिरेव। तत्पश्चाद् ब्राह्मणग्रन्थानुसारं 'क'–शब्देन अपि प्रजापतिरभिधीयते।[४६] तत्र सुखात्मकत्वात् प्रजापतेः 'क'– पदवाचकत्वम्। अतः सुखात्मको हि प्रजापतिरि वक्तुं शक्यते। परवर्तीभाष्यकृद्भिः 'क'– शब्दस्य सुखमित्यर्थः सम्पादितः। अत एव यास्काचार्यपादैः 'क'–पदस्यैवं निर्वचनं प्रतिपादितम्– **"कः कमनो वा क्रमणो वा सुखो वा"।**[४७] "किंशब्दोऽनिर्ज्ञातस्वरूपत्वात् प्रजापतिः वर्तते। यद्वा सृष्ट्यर्थं कामयत इति कः। यद्वा कं सुखम्। तद्रूपत्वात् क इत्युच्यते" इति सायणाचार्यपादैर्भणितम्।[४८] ततो ब्रह्माण्डादेः सर्वस्य जगतः स्रष्टृत्वगुणसाम्यात् प्रजापतेः ब्रह्मरूपत्वं कल्पितम्।[४९] तत्पश्चात् प्रजापतिशब्दः चन्द्रमारूपत्वेनापि शतपथब्राह्मणस्य स्थानद्वये निगदितः।[५०] तत्र चन्द्रमा मनसो जातः, मनसः प्रजापतिदेवत्वम्, ततः कार्यकारणयोरभेदोपचाराद्देवत्वमुक्तमिति सायणाचार्यवर्यैः कथितम्।[५१] तदनन्तरं प्रजापतेः सोमदेवत्वेनापि माहात्म्यं चर्चितम्।[५२] प्रजापतेः सोमवाच्यत्वं सर्वलोकाह्लादकत्वात्। एवमेव प्रजापतेर्महादेववाच्यत्वमपि सर्वलोकस्रष्टृत्वात् श्रुतम्। अत एव "प्रजापतिर्वै महान्देवः" इत्येवं ब्राह्मणेऽस्मिन् विघोषितम्।[५३] तद् व्यतिरिच्य प्रजापतेः सर्वस्य जगतः पतिरूपेणापि वर्णनं परिलक्ष्यते।[५४] देवानां विविधरक्षकत्वेन पालयतीति पतिरिति

---

४६. को हि प्रजापतिः। शतपथब्राह्मणे–६/२/२/५; ४/५/६/४; प्रजापतिर्वै कः। ऐतरेयब्राह्मणे–२/३८; ६/२१

४७. निरुक्ते–१०/२२

४८. ऋग्वेदसायणभाष्ये–१०/१२१/१

४९. ब्रह्म वै प्रजापतिः। शतपथब्राह्मणे–१३/६/२/८; गोपथब्राह्मणेउ.–३/१८; ५/८; तैत्तिरीयब्राह्मणे– ३/३/८/६

५०. प्रजापतिर्वै चन्द्रमाः। शतपथब्राह्मणे–६/१/३/१६; असौ वै चन्द्रः प्रजापतिः। शतपथब्राह्मणे–६/२/२/१६

५१. शतपथब्राह्मणसायणभाष्ये–६/१/३/१६

५२. सोमो वै प्रजापतिः। शतपथब्राह्मणे–५/१/३/७; ५/१/५/२६

५३. तदेव–६/१/३/१६

५४. सोऽस्याः (पृथिव्याः) पतिः प्रजापतिः। तदेव–१४/१/२/११; १४/१/३/२५

तैत्तिरीयारण्यकमतम्।[५५] एवमेव पतिः पाता वा पालयिता वा इति यास्काचार्यैर्निर्वचनं प्रस्तुतम्।[५६] महर्षिदयानन्दपादैरपि निगदितं **"पाति रक्षति चराचरं जगत्तमीश्वरम्, यः पाति रक्षति सज्जनांस्तमिति"।**[५७] इत्थं पतिस्वरूपः प्रजापतिः सर्वस्य जगतः संरक्षकत्वेन पालकत्वेन च पतिरिति भावः। ततो मानवशरीरस्य ब्रह्माण्डदेहस्य च आत्मरूपेण प्रजापतेर्वर्णनं लभ्यते।[५८] एष आत्मैवेत्यध्यात्मात्मा हि अयं प्रजापतिरिति यत् प्रजापतिः लिंगं तत्सर्वेषामेव प्राणिनामन्यो लिंगात्मको यदपि प्रजापतेः शरीरं वैराजं तदपि साधारणं शरीरिणाम् आत्मा सर्वप्राणिनामित्यभिप्रायः इति सायणाचार्यमतम्।[५९] तत्पश्चात् प्रजापतिः पुरुषरूपेण अपि कल्पितः **"पुरुषो हि प्रजापतिः"** इति।[६०] स पुरुषभूतः प्रजापतिः स्थूलप्रपंचाभिमानी विराडात्मकः। सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं प्रजापतिः इत्यर्थः। यद् अतीतं वर्तमानं यच्च भविष्यज्जगत् तदपि पुरुष एव।

**अत ऋषिभिरुक्तम्– "पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्" इति।**[६१] यास्काचार्यानुसारं **"पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा। पूरयत्यन्तमिति"।**[६२] तदनुसारं 'पू' अर्थात् शरीरं बुद्धिर्वा। तयोः स पुरुषभूतः प्रजापतिः सीदति इत्यनेन स पुरिषादः उच्यते। अतः पुरि शरीरे सीदति विशतीति पुरुषः। तदनन्तरं सर्वत्र सर्वव्यापकत्वात् प्रजापतिरेव पुरुषः। तस्माद्

---

५५. तैत्तिरीयारण्यके–०१/१०/०१

५६. निरुक्ते–१०/११, १२

५७. ऋग्वेददयानन्दभाष्ये–१/११/१

५८. सर्वं हि अयमात्मा। शतपथब्राह्मणे–४/२/२/१; आत्मा वै प्रजापतिः। शतपथब्राह्मणे–४/५/६/२; ४/६/१/१;

५९. शतपथब्राह्मणसायणभाष्ये–४/६/१/१

६०. शतपथब्राह्मणे–७/४/१/१५; ६/२/१/२३; ७/१/१/३७; ४/३/४/३; ४/३/५/१

६१ ऋग्वेदसंहितायाम्–१०/९०/०२

६२. निरुक्ते–२/३

यास्काचार्यपादैरुल्लिखितं **"तेनेदं पूर्णं पुरुषेण सर्वम्" इति।**[६३] प्रजापतिबलेनैव जगत्यां सर्वे मनुष्यादिजीवाः जीवन्ति। प्रजापतेः सत्तया एव सत्तावन्तो भवन्ति सर्वे जीवाः। ततः सर्वे प्राणिनः स्वमहिमानं प्रजापतिना एव ख्यापयन्ति। जीवनशक्त्याः धारकत्वात् प्रजापतिरेव धाता इति।[६४] इमे पृथिव्यादयः सर्वे लोकाः खलु प्रजापतिभूताः।[६५] यो भूतभविष्यद्वर्तमानान् कालान् सर्वं जगच्चाधितिष्ठति, सर्वाधिष्ठाता सन् कालादूर्ध्वं विराजमानोऽस्ति स एव प्रजापतिः।[६६] ऋग्वेदानुसारं प्रजापतिं विना अन्यः कश्चन अपि सम्पूर्णं भुवनं न धारयति। तथा चोक्तम्– **"प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव"** इति।[६७] ब्राह्मणग्रन्थानुसारमपि सर्वस्य स्थावरजंगमात्मकस्य जगतः प्रजापतिरेव एकः पतिः।[६८] स एव प्रजापतिः अन्तर्यामिरूपेण सर्वत्र विचरति। अतः ऋषिभिः प्रोक्तम्– **"प्रजापतिश्चरति गर्भेऽन्तरजायमानो बहुधा विजायते"** इति।[६९] मन्त्रस्यास्य व्याख्यानावसरे महर्षिदयानन्दपादैर्लिखितं यत् स एव प्रजापतिः सर्वस्य स्वामी जीवस्यान्यस्य च जडस्य जगतोऽन्तर्गर्भे मध्येऽन्तर्यामिरूपेणाजायमानोऽनुत्पन्नोऽजः सन् नित्यं चरतीति।[७०] तस्य

---

६३. तदेव–२/३

६४. प्रजापतिर्धाता। शतपथब्राह्मणे–६/५/१/३८

६५. इमे लोकाः प्रजापतिः। तदेव–७/५/१/२७; द्यावापृथिवी हि प्रजापतिः। तदेव–५/१/५/२६; प्रजापत्यो वा अयं (भू–) लोकः। तैत्तिरीयब्राह्मणे–६/३/७/५

६६. प्रजापतिर्वा अतीमान् (त्रीन्) लोकांश्चतुर्थः। शतपथब्राह्मणे–४/६/१/४

६७. ऋग्वेदसंहितायाम्–१०/१२१/१०

६८. एक उ वै प्रजापतिः। कौषीतकिब्राह्मणे–२६/७; शतपथब्राह्मणे–२/२/४/१; ७/५/२/६; तैत्तिरीयब्राह्मणे–३/८/१६/१; तांड्यब्राह्मणे–१६/१६/४१

८६. यजुर्वेदसंहितायाम्–३१/१६

70. Ṛgvedādibhāṣyabhūmikā of Maharshi Dayananda Saraswati, (2014)- Ed. by Vedic Pustakalay. Dayanandashram Ajamer:Vedic Pustakalay-(14th ed.), सृष्टिविद्याविषयः। P– १६०

प्रजापतेः सर्वे देवाः पुत्राः सन्ति।[७१] यतो हि प्रजापतिरेव सर्वा देवता विद्यते।[७२] अतोऽन्ये सर्वे देवाः प्रजापतिमनुचरन्ति।[७३] स प्रजापतिः मातृ–पितृरूपेण स्नेहेन वा सर्वान् जीवान् परिपालयति। अत एव **"मातेव च पितेव च प्रजापतिः"** इत्येवम् उदीरितम्।[७४] प्रजापतिं विना किमपि नास्ति संसारेऽस्मिन्। स प्रजापतिः एव जगत्सारः। अतः स एव सर्वरूपेण कथितः **"सर्वं वै प्रजापतिः"** तथा **"सर्वमु हीदं प्रजापतिः"** इति।[७५] एवं सम्पूर्णे ब्रह्माण्डात्मके शरीरेऽस्मिन् प्रजापतिरेव राजते। ततः प्रजापतेः विराट्स्वरूपत्वात् तस्य **'अपरिमितः'** इत्यपि संज्ञा। अतः **"अपरिमितो वै प्रजापतिः"** इत्येवं ब्राह्मणग्रन्थे संदृश्यते।[७६] ततः प्रजापतिः अनिरुक्तरूपेण अपि कल्पितः– **"अनिरुक्तो वै प्रजापतिः"** इति।[७७] तत्र वाचकमन्त्रोच्चारणमन्तरेण मनसैव प्रजापतेर्होमादपि प्रजापतिरनिरुक्तः इति सायणाचार्यैः निगदितम्।[७८] स प्रजापतिः खलु शरीरेन्द्रियप्राणात्ममनसां पुष्ट्युत्साहपराक्रमदृढत्वप्रदः। तस्य प्रजापतेः शक्त्या एव अन्ये सर्वे देवाः शक्तिमन्तो भवन्ति। सर्वेषां देवानां वीर्यप्रदायकत्वात् प्रजापतिरेव वीर्यवत्तमः।[७९] स समेषां जीवानाम् अमृतप्रदायकत्वाद् अमृतस्वरूपः।[८०] तस्य प्रजापतेः आश्रय एव मोक्षो विद्यते। अर्थात् मरणं नास्ति यस्मिन् इति स मोक्षः। एवमेव तस्य प्रजापतेः अच्छाया अकृपा अनाश्रय एव

---

७१. शतपथब्राह्मणे–६/३/१/१७

७२. तैत्तिरीयब्राह्मणे–३/३/७/३

७३. प्रजापतिमु वा अनु सर्वे देवाः। शतपथब्राह्मणे–१३/५/३/३

७४. तदेव–५/१/५/२६

७५. तदेव–१/३/५/१०; ४/५/७/२; ५/१/१/४; १०/२/३/१८; १३/६/१/६;

७६. ऐतरेयब्राह्मणे–२/१७; ६/२; गोपथब्राह्मणेउ.–१/७; कौषीतकिब्राह्मणे–११/७

७७. शतपथब्राह्मणे–१/१/१/१३; ६/२/२/२१; ऐतरेयब्राह्मणे–६/२०; तैत्तिरीयब्राह्मणे–१/३/८/५

७८. शतपथब्राह्मणसायणभाष्ये–१/१/१/१३

७९. प्रजापतिर्वै देवानां वीर्यवत्तमः। शतपथब्राह्मणे–१३/१/२/५

८०. प्रजापतिर्वा अमृतः। तदेव–६/३/१/१/७

मृत्युः। इत्थं स जन्ममरणकारको विद्यते। अत ऋषय आमनन्ति **"यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम"**।[८१] सर्वे प्राणिनः प्रजापतेरेव जायन्ते, जीवन्ति च प्रजापतिना एव। मरणादनन्तरं सर्वे जीवाः प्रजापतौ एव विलिनाः जायन्ते। अतः सोऽन्तरूपेणापि कथितः "अन्तो वै प्रजापतिः" इति।[८२] एवं प्रजापतिशब्दोऽयमितोऽपि यज्ञोद्गातृरूपेण उद्गीथरूपेण अथर्वारूपेण अश्वरूपेण हिङ्काररूपेण वामदेवरूपेण ओदनरूपेण विश्वकर्मारूपेण वसिष्ठरूपेण च ब्राह्मणेऽस्मिन् सविशदं वर्णितः[८३], विस्तारभिया तेषां पदानां वर्णनमत्र न कृतम्।

निष्कर्षरूपेण व्यक्तव्यं यच्छतपथब्राह्मणेऽस्मिन् वर्णितस्य प्रजापतिशब्दस्य विविधार्थकत्वेन विचारो नूतनत्वम् उद्घाटयति। प्रजापतिविषयको विषयोऽयं विषयान्तराद् उत्कृष्ट इति वक्तुं पार्य्यते। तत्र प्रजापतिशब्देन यद्यपि मुख्यतया पाता वा पालयिता वा एव बोधितः तथापि तत्र अग्निरूपेण मनोरूपेण वाग्रूपेण संवत्सररूपेण यज्ञरूपेण सवितृरूपेण प्राणरूपेण वायुरूपेण हिरण्यगर्भरूपेण सोमादिविभिन्नरूपेण तस्य समुल्लेखः समस्ति। प्रजापतेः इच्छाशक्तेः आश्रितोऽयं सम्पूर्णः संसारः। ततो ब्राह्मणेऽस्मिन् समष्टि–व्यष्टिभेदेन प्रजापतेः रूपद्वयं सम्प्राप्यते। समष्टिदृष्ट्या प्रजापतेः खलु ब्रह्माण्डस्य सर्वत्र साम्राज्यम्, व्यष्टिदृष्ट्या च प्राणिनां प्रतिशरीरं तस्य आधिपत्यं विराजते। एवं स्थावरजंगमात्मकस्य सर्वस्य जगतः ईश्वरभूतं प्रजापतिं विना कस्यापि जीवस्य स्थितिर्न अस्ति। एतेन प्रजापतेः माहात्म्यं

---

८१. ऋग्वेदसंहितायाम्–१०/१२१/२

८२. शतपथब्राह्मणे–५/१/३/१३

८३. प्रजापतिर्वा उद्गाता। शतपथब्राह्मणे–४/३/२/३। प्रजापतिरुद्गीथः। तैत्तिरीयब्राह्मणे–३/८/२२/३। अथर्वा वै प्रजापतिः। गोपथब्राह्मणेपू.–१/४। प्राजापत्यो वा अश्वः। शतपथब्राह्मणे–६/५/३/६। प्रजापतिर्वै हिङ्कारः। तांड्यब्राह्मणे–६/८/५। प्रजापतिर्वै वामदेव्यम्। शतपथब्राह्मणे–१३/३/३/४। प्रजापतिर्वा ओदनः। १३/३/६/७। प्रजापतिर्वै विश्वकर्मा। शतपथब्राह्मणे– ७/४/२/५। प्रजापतिर्वै वसिष्ठः। कौषीतकिब्राह्मणे–२५/२; २६/१५.

सर्वापेक्षामिति चिन्तनीयम्। एवं प्रजापतिः अतीव गुरुत्वावह इत्यत्र नास्ति कापि संशितिः। अतः प्रजापतिरेव ज्ञातव्यः श्रोतव्यो मन्तव्योऽध्येतव्यो ध्यातव्यश्चेति दिक्।

***

# मनसः स्वरूपस्य विविधायामाः

**डॉ० रञ्जनलता**

*संस्कृत–प्राकृत भाषाविभागः*

*दीनदयालउपाध्यायगोरखपुर वि. वि. गोरखपुरम्*

भारतीयजीवनं अस्य संस्कृतिश्च चिन्तनशीला वर्तते। अनेनैव भारतीयाः आदिकाल त् चिन्तनपरायणाः भवन्तिस्म। परन्तु भारतीयाः बाह्यचिन्तनापेक्षया अन्तः चिन्तनस्योपरि अधिकं बलं दत्तवन्तः। अद्य वयं एकं अन्तः करणस्य तत्त्वं मनसः स्वरूपविषयेविविधायामेन व्याख्यास्यामः।

**'मन्यते अनेनेति मनः'** निर्वचनानुसारेण मनः **'दिवादिगणीय मन्ज्ञाने'**[१] धातुना असुन् प्रत्यये कृते निष्पद्यते। मनः हदयं अनुभूतिः प्रत्यक्ष ज्ञानं प्रज्ञा सञ्ज्ञानं आदयः मनसः विविधपर्यायानि सन्ति अर्थात् प्रत्यक्षज्ञानस्य आन्तरिकाङ्गं अथवा तत् आन्तरिकोपकरणम् येनज्ञेय पदार्था आत्मानं प्रभावितुं करोति तत्तुमनसः रूपेणकथ्यते।

साङ्ख्ययोगदर्शने तु मनः सङ्कल्प–विकल्पकात्मिका अन्तःकरणवृत्तिः वर्तते या त्रिगुणात्मिका। अयं मन एव मनबुद्धिचित्ताहङ्कारादि नाम्ना तत्र व्यवह्रियते।

**उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्।**
**गुणपरिणामविशेषात् नानात्वं बाह्यभेदश्च।।**[२]

योगदर्शने तु मनःएव चित्तं। इदं कथ्यते– यत् **योगश्चित्तवृत्तिर्निरोधः।**[३]

न्यायदर्शने आत्मना सर्वथा भिन्नं एकं पदार्थं द्रव्यं वा मनसः रूपेण स्वीक्रियते–

---

१. धातुपाठः, दिवादिगणः, पृ. ३२/१

२. साङ्ख्यकारिका, २७

३. योगसूत्र, १

**'तदेवसुखदुःखाद्युपलब्धिसाधनमिन्द्रियं प्रतिजीवं भिन्नमणु नित्यं च'**[४]

ज्ञानं आत्मनः रूपम्। इन्द्रियाणि तस्य साधनानि। अत्रमनः एव मुख्यं कर्मकारकम्।

**सुखद्युपलब्धिसाधनमिन्द्रियं मनः**[५] **अर्थात् उपलब्धिर्नाम साक्षात्कारः तथा च सुखदुःखादि साक्षात्कारे कारणत्वे सति इन्द्रियत्वां मनसो लक्षणम्। आत्मनः संयोगादिवयवनयनेन्द्रियमिति। चक्षुरादिवारणाय सुखेति।**[६]

न्यायसूत्रे कथितं –**'युगपज्ज्ञानानुत्पत्तिः मनसोलिङ्गम्'**[७]

मनः आत्मनः पृथक् भवति। तत् एकस्मिन्समये एकाधिकेषु विषयेषु सक्रियः भवितुं न शक्नोति। यथा वयं पश्यामः अस्माकं मनः बहूनि कार्येषु संलग्नं परन्तु तत् तु किमपि कार्यं सम्यक् न करोति।

**प्राणापाननिमेषोन्मेष जीवनमनोगतिन्द्रियन्तरविकारः सुखदुखच्चा द्वेषा प्रयत्ननश्चात्मनोलिङ्गनि।**[८] मनः तु आत्मया सह आन्तरिकमंगानां कृते मध्यस्थस्य भूमिका निर्वहनं करोति।

वैशेषिकेन मनः आन्तरिकं इन्द्रियं मन्यते। मनसः अनुमानसाहाय्येन अदृश्यं ज्ञानं भवति। वैशेषिकदर्शने मनःसिद्ध्यर्थं द्वे तर्के दत्तौ ।

(१) यथा बाह्यवस्तूनाम् ज्ञानाय इन्द्रियाणां सामर्थ्यं स्वीकर्तव्यं भवति, तथैव आत्मा, सुख–दुःख इत्यादीनि आन्तरिकविषयान् ज्ञातुं आन्तरिकं इन्द्रियस्य आवश्यकता वर्तते। तद् अन्तः इन्द्रियं मनः वर्तते।

---

४. तत्त्वकौमुदी, वाचस्पति मिश्र, बाम्बे थियोसोफिकल सोसायटी पब्लिक फण्ड, तुकाराम तैती एफ. टी. एस., पृ. ६८

५. तर्कसङ्ग्रह,केदारनाथ त्रिपाठी, पृ. ११

६. तर्कसङ्ग्रह की न्यायबोधिनी व्याख्या, पृ. ११

७. न्यायसूत्र, १/१/१६

८. न्यायभाष्य, २/५८

(२) मनसः संयोगेन बिना पञ्च बाह्यज्ञानेन्द्रियाणां विषयैः सह संयोगे अपि रूपरसगन्धशब्दस्पर्शसंवेदना न भवति इति दृश्यते। अतः एतेन बाह्यज्ञानेन्द्रियाणि व्यतितिरिक्तं ज्ञानाय आन्तरिकेन्द्रियस्य साहाय्यमपि आवश्यकम्। एतत् इन्द्रियं मनः।

वैशेषिकदर्शने मनः सम्बद्धचिन्तनस्य केचन विशिष्टताः सन्ति, ये ध्यानं आह्वयन्ति। मनः परमाणुः इति मन्यते। मनः निराकारम्। अतः एकस्मिन् समये एकप्रकारस्य अनुभवस्य अनुभवः सम्भवति, यतः तत् अनुभवं स्वीकृत्य मनः अविभाज्यम् अस्ति।

वैशेषिकेन मनः नित्यं मन्यते। निराकारत्वात् नित्यत्वम्। अस्य विनाशस्य निर्माणस्य अर्थः क्रमशः विविधघटकानाम् पृथक्करणं संयोजनं च।

**'पृथिव्यऽप्तेजोवाय्वकाशकालऽदिगात्मऽमनांसिनवैवद्रव्यानि'**[९] मनः दिक्काल–अन्तरिक्ष–आदिभ्यः भिन्नम् अस्ति। अस्य भेदस्य कारणं मनः सक्रियं अस्ति। दिक्काल–अन्तरिक्ष इत्यादयः तु निष्क्रियाः भवन्ति।

**वेदान्ते मनः त्रिगुणं पंचतत्वैर्निर्मितं परिभाषते।**

**'मनो नाम संकल्पविकल्पत्मिकान्तःकरणवृत्तिः'**[१०]

कार्यरूपेण अयं मनः एव मनबुद्धिचित्ताहंकारादि नाम्ना व्यवह्रियते।

**भाट्टमीमासायां** अयं मनः सार्वभौमिकं मन्यते। आत्मया सह तस्य संपर्कोऽपि शाश्वतं।

अन्यत्र **शब्दस्तोममहानिधौ** अपि मनसः व्यापार चर्चा वर्तते।

**'अभीष्टसिद्धये इदमित्थेव कार्यमित्येवरूपे मनसो व्यापारभेदे' 'कर्मसाधनायाभिलाषवाक्ये'।**[११]

अस्य मनसोपरि शब्दकोशग्रन्थेषु अपि कथितं यत् मानससंकल्पो अपि

---

९. तर्कसङ्ग्रह २

१०. वेदान्तसार, पृ. ६६

११. शब्दस्तोममहानिधिः, तारानाथ भट्टाचार्य, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १६६७, पृ. २७२

द्विविधः– भावाभावविष यभेदात्।

**'तत्राद्य मयैतत्त्कर्तव्यमित्येवंरूपः। द्वितीयः मयैततन्न कर्तव्यमित्येवं रूपः'।**[१२]

अष्टाध्यायीपदानुक्रमकोषे अपि मनसः सम्बन्धे कथितं–

मनः– III. II. ८२ मन् धातुना (सुबन्त उपपदे 'णिनि' प्रत्यये कृते भवति।[१३]

मनसः उपरि पद्मपुराणे अपि कथ्यते यत् बिना मनसः सिद्धिर्भवितुं न शक्नोति–

**'संकल्पेन बिना राजन्! यत्किंचित् कुरुते नरः।**
**फलस्याल्पाल्पकं तस्य धर्मस्यार्धक्षयो भवेत्'।।**[१४]

'लिंगार्चनतन्त्रे अपि संकल्पशक्तिः उपरि व्याख्या प्रदत्तो वर्तते।

**संकल्पं मानसं देवि! चतुर्वर्गदायकम्।'**[१५]

आध्यात्मवादिनः मन्यन्ते यत् मुख्यं तु आत्मा अस्ति परन्तु अयं निराकारी मनः अपि आत्मायाः प्रकाशनार्थं अनन्य साधनरूपेण अपेक्षते–

**'नायं चक्षुषा दृश्यो न च सर्वैरपीन्द्रयैः।**
**मनसा तु प्रदीपेन महानात्मा प्रकाशते।।**
**अशब्दस्पर्शरूपं तदरसागन्धमव्ययम्।**
**अशरीरं शरीरेषु निरीक्षेत् निरिन्द्रयम्।।'**[१६]

मनसि उपरि प्रश्नोपनिषदि व्याख्या दत्तवन्तः –

---

१२. शब्दस्तोमकोश, पृ. २७२

१३. अष्टाध्यायीपदानुक्रमकोश, पृ. ४११

१४. पद्मपुराण,गीताप्रेस गोरखपुर, पृ. १०

१५. लिङ्गार्चनतन्त्रम्, सङ्कलितं मदनमोहनगुप्ता

१६. महाभारत, शान्तिपर्व, २३६/१६–१७

**मनश्च मन्तव्यं बुद्धिश्च बोद्धव्यं अहंकारश्च अहकर्तव्यं चित्तं च चेतयितव्यम्।**[१७] इदं तु अभवत् मनसः भारतीयदृष्टिकोणं। इदानीं अपरं पक्षमपि द्रष्टव्यम् —

भौतिकवादी विचारधारानुसारम् विचारभावइच्छासंवेगमूलप्रवृत्ति एतानि सर्वाणि उत्तेजक— अनुक्रिया सिद्धान्ताधारेण व्याख्यातुं शक्यन्ते, एतानि अवगन्तुं आत्मा, चेतना इत्यादीनां अभौतिक सत्त्वस्य आवश्यकता नास्ति— इदं अस्ति भौतिकवादी दृष्टिकोणः।

अत्र वयं मनोविज्ञानस्य द्वौ रूपसन्दर्भे विचारयामः—

एकं शरीरक्रियात्मकं मनोविज्ञानम्

अपरं आध्यात्मिकमनोविज्ञानम्

ये मनोवैज्ञानिकाः मनः शरीरात्पृथक् सत्तारूपं न मन्यन्ते, ते स्थूलरूपेण 'मनोविज्ञानम्' शरीरक्रियाविज्ञानस्य रूपं मन्यन्ते। अपरं ये शरीरात्पृथक् मनसः सत्तां स्वीकरोति ते सन्तु आध्यात्मिकमनोवैज्ञानिकाः।

भौतिकवादिनः वदन्ति यत् शरीरं स्वचालितयन्त्रवत् अस्ति। एतेषां कथनं उदाहरणेन व्याख्यास्यामः। यथा वयं स्टेशनेषु स्थापिते तौलनपरिमाणयन्त्रे एकं रूप्यकं स्थापयामः, स्वभारं च ज्ञातुं शक्नुमः, यथा ए.टी.एम. माध्यमेन रुप्यकाणि स्वयमेव यन्त्रात् बहिः आगच्छन्ति तथैव अस्माकं शरीरे कोऽपि मनसरूपेण स्थित्वा न करोति किंचित् विशेषपरिस्थिति जन्यं वर्तते सर्वं। भौतिकवादिनः कथयन्ति इयं प्रतिक्रिया स्वचालित शरीरस्य आत्मक्रिया अस्ति, एतत् कर्तुं 'मनः' इत्यादि तत्त्वोपरि किमपि विश्वासस्य कर्तुं आवश्यकता न वर्तते।

पाश्चात्यदर्शने मनः एकः जटिलशक्तिसमूहः अस्ति यः अस्मान् बोधयितुं, चिन्तयितुं, निर्णयं कर्तुं च समर्थयति। प्रायः चैतन्येन सह समीकरणं भवति, मानवीय—अनुभवस्य परिभाषा—विशेषणं च मन्यते।

द्वैतवादः— मनः अभौतिकं पदार्थः यः मस्तिष्कात् विशिष्टः भवति।

---

१७. प्रश्नोपनिषद्, कण्डिका ८। सौर्यायणी गाग्यस्य का प्रश्न; ३

तर्कसंगतबोधः तस्य लक्ष्यं मनः चैतन्यं च तर्कसंगतरूपेण अवगन्तुम् अस्ति।

मनः–शरीर–सम्बन्धः मनः शरीरं च पृथक् स्तः, अस्माकं मूल्यानि विश्वासाः च साहाय्यं कुर्वन्ति।

अमेरिकनदार्शनिकः जेम्स .एल. महोदयेन कथितम् उद्धरणार्थम् "अनन्तमनसा यत् प्राप्तं तत् परिमितचित्तैः न अवगन्तुं शक्यते– "What has received by the infinite mind cannot be comprehended by finite minds; the mysteries of faith will remain beyond our grasp for we see through a glass darkly our purpose in life should not be to analyse the infinite or synthesize life's engagements- Rather our goal should be to get into right relationship with God- To do his will through faith and to look forward to an eternity which will transcend this mortal existence".[18]

सुकराततः ह्यूमपर्यन्तं पाश्चात्त्यदार्शनिकाः एतस्याः दुविधायाः द्रव्यस्यमनसः, ईश्वरस्य च समस्यायाः सम्मुखीभूय स्वकीयानि दार्शनिक व्याख्यानानि दत्तवन्तः।

प्लेटो विचाराणां रूपाणां वा प्रतिमानस्य सिद्धान्तेन सह आगतः यस्य अनन्तरं वस्तूनि निर्मिताः भवन्ति। अस्य सिद्धान्तानुसारं द्रव्यं नित्यं परिवर्तमानं भवति तथा च एतत् केवलं स्वरूपं यत् मनसा एव क्रमेण वस्तूनि कल्पितवान् तथा अयं ब्रह्माण्डः पात्रे जगतः आत्मानः वास्तविकता अभवत्। जगतः आत्मा मनुष्यस्य शरीरे आत्मा इव शाश्वतः आसीत्।[१९]

इमैनुएल कान्ट इत्यस्य मते मनः नियमितरूपेण अनुभवितानां विषयाणां कृते किमपि आनयति। मनः अतीव सक्रियः कारकः इति सः कल्पितवान् यत् सः अनुभवतुल्यं वस्तुभिः सह किमपि करोति। कान्ट महोदयस्य चिन्तने न केवलं अस्माकं इन्द्रियाणां माध्यमेन आभाः प्राप्तुं शक्नोति अपितु अस्माभिः यत् अनुभवितं तस्य विषये निर्णयः अपि भवति।[२०]

---

१८. Lee, १९६०

१९. आनलाइनस्रोतेन प्राप्तसूचनानुसारेण

२०. आनलाइनस्रोतेन प्राप्तसूचनानुसारेण

रेने डेकार्टस्य कृते मनः शरीरं च पृथक् पृथक् पदार्थौ आस्ताम् यथा विचारः विस्तारश्च पृथक् सत्ताः आसन्, यदा तु तस्य दृष्ट्या आत्मा मस्तिष्कस्य पिनियलग्रन्थिषु उपस्थितः आसीत् यः प्राणजीवानां सम्पर्कं प्राप्नोति तथा च यस्य माध्यमेन सः शरीरेण सह अन्तरक्रियां करोति।[२१]

यदा तु हॉब्समहोदयेन कथितं यत् मनः गतिस्थशरीरेषु न्यूनीकृत्य मानवस्य एकतां प्राप्तवान्। डेकार्ट्स्य स्वस्य प्रसिद्धे ''कोगिटो एर्गो सम'' (अहं मन्ये अतः अहम् अस्मि) इति वचने भावना इत्यादीनां इन्द्रियबोधानाम् समावेशः कृतः। सः मनः– शरीरस्य अन्तरक्रियायाः अथवा एकतायाः समस्यायाः समाधानं कर्तुं असफलः अभवत्।[२२]

स्पिनोजा इत्यस्य कृते मानवः ईश्वरस्य सहजं संस्करणं भवति। सः ईश्वरस्य विचारविस्तारगुणानां गुणः अस्ति।[२३]

सिग्मण्ड फ्रायड इत्यस्य मतं आसीत् यत् मानवस्य व्यक्तित्वं त्रयाणां गतिशीलप्रणालीनां अन्तरक्रियाद्वारा प्रदर्शितं भवति, यथा इद अहङ्कारः, सुपरइगो च। इद अस्माकं शारीरिक–मानसिक–आवश्यकतानां सम्पूर्णं परिसरम् आसीत्। भावेन चालितः सुखसिद्धान्तेन कार्यं करोति। सुखार्थी दुःखपरिहारः। सुपरइगो अस्माकं नैतिकमूल्यानां व्यवस्था अस्ति यत् जगति सह अन्तरक्रियाद्वारा प्राप्तम्। अहङ्कारः एकं मानसिकव्यवस्था अस्ति या वास्तविकतासिद्धान्ते कार्यं करोति, अहङ्कारस्य अति अहङ्कारस्य च मध्यस्थतां करोति। सः अवदत् यत् यदा इद आज्ञां प्राप्नोति तदा व्यक्तिः समग्रतायाः, प्रभावशीलतायाः, कल्याणस्य च भावः प्राप्स्यति। फ्रायड् इत्यनेन अपि आविष्कृतं यत् चेतनचित्तात् विहाय अचेतनचित्तम् अस्ति इति।[२४]

व्यावहारिक रूपेण कल्पयतु यत् अङ्गुल्यामेकस्मिन् कण्टकः चोदितः तदा वयं व्याकुलः भवामः। अङ्गुलीभागः यस्मिन् कण्टकः चोदितः, तंत्रिकाः

---

२१. तदेव

२२. तदेव

२३. तदेव

२४. Online स्रोतेन प्राप्तसूचनानुसारेण

तत्र सर्वत्र शरीरे च सन्ति। ये तंत्रिकाः बाह्यज्ञानं मस्तिष्कं प्रति वहन्ति ते संवेदन तन्त्रिकाः इति उच्यन्ते। एताः तंत्रिकाः संवेदनतंत्रिकाभिः मस्तिष्ककेन्द्रं प्रति सन्देशं प्रेषयन्ति यत् अगुल्यां कण्टकस्य कारणेन वेदना भवति। ततः स्वयमेव एषः सन्देशः हस्ते भवति। संदेशं गृहीत्वा कण्टकपसारणस्य संदेशः हस्तेन गृह्यते। ये तंत्रिकाः एतत् सन्देशं हस्तं प्रति वहन्ति ते प्रेरकतंत्रिकाः नाम्ना उच्यते। अस्माकं हस्त पर्यन्तं एषः सन्देशः प्राप्यमात्रेण वयं अङ्गुलीतः कण्टकं निष्कासयामः।

इदं सम्पूर्णं प्रक्रिया मस्तिष्क माध्यमेन स्वयमेव भवति। शरीरं भौतिकं अस्ति, तस्य परिमाणं वर्तते, तत्स्थानेनपरिवृतम्, चक्षुश्रोत्रस्पर्शस्य विषयो वर्तते। परन्तु यदि मनः विद्यते तर्हि प्रथमंतु तत् अभौतिकम्, तस्य परिमाणंना स्ति, अन्तरिक्षं न गृह्णाति, तस्य किमपि दर्शनं नास्ति, न स्पर्शयितुं शक्यते। एतत् प्रकारकं अस्तित्वहीनं तत्त्वं भौतिक तत्त्वं अस्माकं कथं प्रभावितं कर्तुं शक्नोति? एतादृशी मान्यता अथवा प्रश्नः अस्ति भौतिक वादिनां पक्षतः।

अस्य प्रश्नस्य उत्तर सन्दर्भे अध्यात्मवादिनः कथयन्ति, किं वयं न पश्यामः यत् द्वेष–प्रेमःइच्छा–आकांक्षा भाव–विचारः, आशा–निराशा, उत्साहः– अनुत्साहादयः अदृश्यानि अभौतिकानि तत्त्वानि सन्ति, येषां मापनं कर्तुं न शक्यते, येन दृश्यन्ते स्पर्श्यन्ते, तेषां परिमाणं न भवति, परन्तु एतेषां अभौतिक तत्त्वानां मानव शरीरे तस्य विविध क्रियासु च अमिटः प्रभावः भवति।

'मनः' एकं तत्त्वं वर्तते यत् भौतिकं नास्ति, यत् अभौतिकत्वात् शरीरस्य अङ्गं नास्ति, यतोहि शरीरः भौतिकः अस्ति, यस्मिन् भौतिकी–रसायनशास्त्रस्य च नियमाः प्रवर्तन्ते।

सांख्येकथितं–'**उभयात्मकमत्र मनः संकल्पकमिन्द्रियं च साधर्म्यात्।**'[२५]

अर्थात् मनः तु ज्ञानेन्द्रियकर्मेन्द्रियैः सह उभयात्मकं भवति।

श्रीमद्भगवदगीतायां कथितं

---

२५. साङ्ख्यकारिका, ईश्वरकृष्ण, २७

**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।**

**अहंकार विमूढात्मा कर्ताहमिति मन्यते।**[२६]

अर्थात् गीता अपि भौतिकवादिनस्य कथनस्य समर्थनं करोति यत् मनसः प्रतिक्रिया स्वचालितयन्त्रवत् भवति। परन्तु एकं अन्तरं विद्यते यत् भौतिक वादिनः मनं न स्वीक्रियन्ते ते तु आत्मैव 'माइंड' इति रूपेण इदानीं स्वीकरोति। सांख्यगीताशास्त्रं तु मनः स्वीकरोति। ते कथयन्ति यत् मनः तु–

**'एको देवः सर्वभूतेषु गूढः, सर्वव्यापी सर्वभूतान्तरात्मा।**

**कर्माध्यक्षः सर्वभूताधिवासः, साक्षी चेता केवलो**

**निर्गुणश्च'।।**[२७]

अतः साररूपेण इदं कथयितुं शक्नुमः यत् सांख्यगीता दार्शनिकाः च भौतिकवादिनः आध्यात्मवादिनश्च उभौ वर्तेते। पाश्चात्यवादिनः तु मन्यन्ते शुद्ध भौतिकवादिनः। यतोहि **मन एव कारणयोः बन्धमोक्षयोः।** अतः आवश्यकी आसीत् अस्य तत्त्वस्य चर्चा परिचर्चा।

***

---

२६. भगवद्गीता, ३/२७

२७. श्वेताश्वतरोपनिषद्, ६/११

# अलङ्कारशास्त्रे तुल्ययोगिता

**डॉ. अनुपकुमाररानो**

*सहकारी–आचार्यः, चण्डीदास–महाविद्यालयः*

*खुजुटिपाडा, बीरभूमः, पश्चिमबङ्गः*

**भूमिकाः** तुल्ययोगिता सादृश्यमूलकः अर्थालङ्कारः। भरतीये नाट्यशास्त्रे तथा अग्निपुराणे अयमलङ्कारः न स्वीकृतः। प्रथन्तावत् भामहेन काव्यालङ्कारे तुल्ययोगिता आलोचिता। तदनु सर्वैरेव प्रसिद्धैः आलङ्कारिकैः अस्य चमत्कारित्वं स्वीकृतम्। अयमर्थालङ्कारः अलङ्कारशास्त्रे अतीव सुप्रसिद्धः। महाकवयश्च काव्येषु तुल्ययोगितासन्निवेशेन सहृदयानां चेतसि चमत्कारित्वं जनयन्ति। केषाञ्चन आचार्याणां मतेन अल्पगुणयुक्तस्य विशिष्टगुणयुक्तेन सह तुल्यत्वप्रतिपादनाय एकया क्रियया सह योगः एव तुल्ययोगिता। केषाञ्चन मतेन प्रस्तुतानाम् अथवा अप्रस्तुतानाम् एकधर्मयोगः एव तुल्ययोगिता। 'धर्म' शब्दस्य अर्थविषये मतवैभिन्नं दृश्यते। धर्मशब्देन कुत्रापि क्रियायाः, कुत्रापि गुणक्रिययोः, कुत्रापि गुणक्रियाजातिद्रव्यानाम्, कुत्रापि एतदतिरिक्तस्य अभावस्य च ग्रहणं भवति। अस्यालङ्कारस्य भेदविषयेऽपि मतभेदः परिलक्ष्यते। तुल्ययोगितायाः स्वरूपवैशिष्ट्यभेदानां काव्यतात्त्विकं विश्लेषणमत्र अस्माभिः करणीयम्। प्रमुखान् काव्यशास्त्रान् अवलम्ब्य विषयोऽयं विचार्यः। प्रबन्धे अर्वाचीनाचार्यैः पूर्वाचार्याणां यत् मतखण्डनं समालोचञ्च कृतं तदपि अत्र विचार्यम्। तुल्ययोगितायाः विवर्तनविषये काव्यतात्त्विकं विश्लेषणं प्रबन्धस्यास्य विषयः।

## भामहकृते काव्यालङ्कारे तुल्ययोगिता

आचार्यभामहकृतं तुल्ययोगितायाः लक्षणम्–

**"न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया।**

**तुल्यकार्यक्रियायोगादित्युक्ता तुल्ययोगिता।।"**[१]

---

१. भामहकृतः काव्यालङ्कारः, सम्पादकः सि. शङ्कर–राम–शास्त्री, श्री–वालमनोरमा–प्रेस्, माद्रास्, १९५६। तत्र ३/२७।

अर्थात् स्तोकगुणयुक्तानां पदार्थानां विशिष्टगुणयुक्तेन पदार्थेन सह साम्यप्रतिपादनाय एकया क्रियया सह सम्बन्धप्रतिपादनमेव तुल्ययोगिता। एकक्रियाभिसम्बन्धत्वात् अल्पगुणयुक्तस्य विशिष्टत्वं प्रतिपाद्यते।

अलंकारस्यास्य उदाहरणम्–

**"शेषो हिमगिरिस्त्वं च महान्तो गुरवः स्थिताः।**
**यदलङ्घितमर्यादां चलन्तीम्बिमृतक्षितिम्" ।।**[२]

श्लोकस्य अर्थः शेषनागः, हिमालयः भवान् च अतीव महान्तः गौरवशालिनः स्थिराश्च। यतः मर्यादाम् अनुल्लङ्घ्य भवन्तः घूर्णायमानां पृथिवीं धारयन्ति। शेषनागहिमालयौ महत्वगौरवस्थिरतासु राजनपेक्षया विशिष्टौ। परन्तु अल्पगुणयुक्तस्य राज्ञः शेषनागहिमालयाभ्यां सह साम्यप्रतिपादनाय पृथ्वीधारणरूपया एकया क्रियया सह सम्बन्धं प्रतिपादितम्। अतोऽत्र तुल्ययोगिता।

## काव्यादर्शे तुल्ययोगिता

दण्डिना तुल्ययोगितायाः लक्षणं कृतम्

**"विवक्षितगुणोत्कृष्टैर्यत् समीकृत्य कस्यचित्।**
**कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता।।"**[३]

स्तुत्यर्थं निन्दार्थं वा विवक्षितगुणयुक्तैः उत्कृष्टैः उपमानैः सह कस्यचित् प्रस्तुतस्य साम्यप्रतिपादनाय यत् कथनं सा तुल्ययोगिता। प्रस्तुतयोरेव अप्रस्तुतयोरेव वा एकधर्माभिसम्बन्धे तुल्ययोगिता, प्रस्तुताप्रस्तुतयोः एकधर्माभिसम्बन्धे दीपकमिति अर्वाचीनमतं न दण्डिनोऽभिमतम्। धर्माभिसम्बन्धरूपवैचित्रस्य सर्वत्र तुल्यत्वात्।

स्तुतितुल्ययोगिता यथा–

---

२. तत्रैव, ३/२७।

३. काव्यादर्शः, सम्पादकः रङ्गाचार्य–रड्डी–शास्त्री, भाण्डारकर–प्राच्यविद्या – संशोधनमन्दिरम्, पुणे, १९३८। तत्र २.३३०।

**"यमः कुबेरो वरुणः सहस्राक्षः भवानपि।**

**बिभ्रत्यनन्यविषयां लोकपाल इति श्रुतिम्।।"[४]**

श्लोकस्य अर्थः यमः कुबेरः वरुणः इन्द्रः भवान् च लोकपालः इति अनन्यगामिनीं ख्यातिं धारयन्ति। अत्र लोकपालत्वरूपः गुणः प्रस्तुतनृपे विवक्षितः। तस्मात् उत्कृष्टैः यमादिभिः उपमानैः सह साम्यप्रतिपादनाय प्रस्तुतस्य राज्ञः स्तुतिः कृता। अतोऽत्र स्तुतिरूपा तुल्ययोगिता।

निन्दारूपा यथा—

**"सङ्गतानि मृगाक्षीणां तडिद्विलसितानि च।**

**क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम्।।"[५]**

अस्यार्थः निविडरूपेण अनुष्ठितानि अपि मृगाक्षीणां रमणीनां समागमाः, तथा मेघैः स्वयम् आरब्धानि अपि विद्युदुन्मेषितानि च दीर्घकालं न तिष्ठन्ति। अत्र प्रसिद्धचपलस्वभावया उपमानेन विद्युता सह समीकरणाय प्रस्तुतस्य स्त्रीणां संगमस्य निन्दा कृता। चापल्यप्रतिपादनात् निन्दावगमः सुस्पष्टः एव। तस्मादत्र निन्दातुल्ययोगिता।

### अलङ्कारसारसङ्ग्रहे तुल्ययोगिता

उद्भटाचार्येण तुल्ययोगितायाः लक्षणं कृतम्—

**"उपमानोपमेयोक्तिशूण्यैरप्रस्तुतैर्वचः।**

**साम्याभिधायि प्रस्तावभाग्भिर्वा तुल्ययोगिता।।"[६]**

यत्र उपमानोपमेयभावः न कथितः, तत्र केवलानां अप्रस्तुतानाम् अथवा केवलानां प्रस्तुतानां साम्यप्रत्यायकं कथनमेव तुल्ययोगिता। प्रस्तुताप्रस्तुतयोः एकत्र अनवस्थानादत्र उपमानोपमेयभावशूण्यत्वम्। अलङ्कारेऽस्मिन् अप्रस्तुतानां प्रस्तुतानां वा साम्यं प्रतिपाद्यते।

---

४. तत्रैव, २.३३१।

५. तत्रैव, २.३३२।

६. काव्यालङ्कारसारसङ्ग्रहः, सम्पादकः नारायण—दास—बनहट्टी, भाण्डारकर—प्राच्यविद्या—संशोधमन्दिरम्, पुणे, १९२५। तत्र ५.७।

**पूर्वभेदस्य उदाहरणम्—**

**"त्वदङ्गमार्दवं द्रष्टुः कस्य चित्ते न भासते।**
**मालती शशभृल्लेखा कदलीनां च कठोरता।।"[७]**

श्लोकस्य अर्थः— नायिकायाः अङ्गस्य सौकुमार्यम् अवलोक्य कस्य चेतसि मालत्यादीनां कठिनता न भासते, सर्वस्य चित्ते भासते इत्यर्थः। नायिकायाः शरीरम् ईदृशं पेलवं यत् मालतीपुष्पादयः अपि कठोररूपेण प्रतिभान्ति। अत्र अप्राकरणिकानां मालत्यादीनां कठोरतारूपं साम्यं प्रतिपादितम्। तर्हि अत्र तुल्ययोगिता।

**द्वितीयभेदस्य उदाहरणम्—**

**"योगपट्टो जटाजालं तारवी त्वङ्मृगाजिनम्।**
**उचितानि तवाङ्गस्य यद्यमूनि तदुच्यताम्।।"[८]**

देव्याः पार्वत्याः वर्णनमिदम्। तपस्याकाले पार्वती योगपट्टे उपविष्टा, मस्तकं तस्याः जाटाजालेन सुशोभितम्, शरीरञ्च वल्कलमृगचर्माभ्यां भूषितम्। परन्तु भगवत्याः पार्वत्याः शरीरे योगपट्टः, जाटाजालं, वल्कलं, मृगचर्मञ्च एतानि अनूचितानि। अत्र प्राकरणिकानां योगपट्टादीनां भगवतीशरीरे स्पर्शानौचित्यरूपः समानो धर्मः प्रदर्शितः। तस्मादत्र तुल्ययोगिता।

अत्र द्रष्टव्यं यत् उद्भटस्य लक्षणे साम्यस्य उपरि गुरुत्वं दीयते, न तु साधारणधर्मस्य।

**काव्यालङ्कारसूत्रवृत्तौ तुल्ययोगिता**

आचार्यो वामनः तुल्ययोगितायाः लक्षणमाह—

**"विशिष्टेन साम्यार्थमेककालक्रियायोगस्तुल्ययोगिता"[९]**

---

७. तत्रैव, उदाहरणम् ५.५।

८. तत्रैव, उदाहरणम् ५.६।

९. काव्यालङ्कारसूत्रवृत्तिः, सम्पादकः श्रीकृष्णमूरिः, श्री–वाणी–विलास–प्रेस्, श्रीरङ्गम् १९०९। तत्र ४,३,२६।

अर्थात् गुणाधिकेन उपमानेन सह अल्पगुणयुतस्य उपमेयस्य साम्यप्रतिपादनाय यदि एककालिकया क्रियया सह सम्बन्धं प्रतिपाद्यते तर्हि तत्र भवति तुल्ययोगिता।

**अस्य उदाहरणम्–**

**"जलनिधिरशनामिमां धरित्रीं वहति भुजङ्गविभुर्भवद्भुजश्च"**

श्लोकस्य अर्थः समुद्रमेखलां पृथिवीमिमां शेषनागः भवतः भुजदण्डश्च धारयतः। अत्र उपमेयः राज्ञः भुजदण्डः, उपमानं शेषनागः। उपमेयापेक्षया उपमानस्य गुणाधिक्यं सर्वजनविदितम्। गुणाधिकेन उपमानेन सह अल्पगुणयुतस्य उपमेयस्य साम्यप्रतिपादनाय धरित्रीधारणरूपया क्रियया सह उपमानोपमेययोः सम्बन्धः प्रतिपादितः। तस्मादत्र तुल्ययोगिता।

**काव्यप्रकाशे तुल्ययोगिता**

मम्मटाचार्यकृतं लक्षणम्–

**"नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता"**[१०]

अर्थात् नियतानां प्राकरणिकानाम् अप्राकरणिकानां वा एकधर्माभिसम्बन्धः एव तुल्ययोगिता। धर्मः इति क्रियागुणजातिद्रव्यरूपः।

प्राकरणिकानाम् एकधर्माभिसम्बन्धः यथा–

**"पाण्डुक्षामं वदनं हृदयं सरसं तवालसं च वपुः।**
**आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः।।"**[११]

श्लोकस्य अर्थः– हे सखि! तव पाण्डुवर्णं शीर्णं मुखं, सरसं हृदयम्, अलसं च वपुः तव हृदयस्थं दुरारोग्यव्याधिं प्रकाशयति। अत्र नायिकायाः प्राकरणिकत्वे तस्याः अङ्गानि अपि प्राकरणिकानि। एतेषां प्राकरणिकानाम् 'आवेदयति' इति एकक्रियान्वये तुल्ययोगिता।

---

१०. काव्यप्रकाशः (नवमो दशमः उल्लासः), सम्पादकः विजया गोस्वामी, सदेश–प्रदकाशनम्, कलिकाता, २०११। तत्र १०.१०४।

११. तत्रैव, उदाहरणम् ५६१।

अप्राकरणिकानाम् एकधर्माभिसम्बन्धरूपा तुल्ययोगिता यथा–

**"कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का।**

**अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य।।"**[१२]

श्लोकस्य अर्थः– तव ललितविलासयुक्तयोः नयनयोः सम्मुखे कुमुदस्य कमलस्य नीलोत्पलस्य च कापि शोभा नास्ति। तवाननसौन्दर्येण अमृतस्य चन्द्रस्य पद्मस्य च शोभा प्रतिहता। अत्र नयनमुखयोरेव प्रकृततया कुमुदादीनाम् अमृतादीनां च अप्रकृतत्वम्। श्लोकस्य पूर्वार्द्धे 'का' इति पदेन आक्षेपक्रिया गम्या। अत्र अप्राकरणिकानाम् आक्षेपक्रियया तथा प्रतिहतक्रियया सह सम्बन्धे तुल्ययोगिता।

## अलंकारसर्वस्वे तुल्ययोगिता

रुय्यककृतं तुल्ययोगितालक्षणं यथा–

**"औपम्यस्य गम्यत्वे पदार्थगतत्वेन प्रस्तुतानामप्रस्तुतानां वा समानधर्माभिसम्बन्धे तुल्ययोगिता"**[१३]

अर्थात् सादृश्ये गम्यमाने सति प्रस्तुतानाम् अथवा अप्रस्तुतानां यत्र एकधर्माभिसम्बन्धः स्यात् तत्र भवति तुल्ययोगिता। इवादिशब्दाप्रयोगात् अत्र औपम्यं गम्यम्। धर्मशब्देन गुणस्य क्रियायाश्च ग्रहणम्। अर्थात् एकगुणाभिसम्बन्धे अथवा एकक्रियाभिसम्बन्धे तुल्ययोगिता भवति।

प्राकरणिकानां क्रियासम्बन्धे तुल्ययोगिता यथा–

**"सज्जातपत्रप्रकाराञ्चितानि**

**समुद्वहन्ति स्फुटपाटलत्वम्।**

**विकस्वराण्यर्ककरप्रभावाद्दिनानि**

**पद्मानि च वृद्धिमीयुः।।"**[१४]

---

१२. तत्रैव, उदाहरणम् ५६२।

१३ अलङ्कारसर्वस्वम्, सम्पादकः रेवाप्रसाद–द्विवेदी, चौखम्बा–संस्कृत–सीरीज्–अफिस्, वाराणसी, १९७१तत्र पृष्ठम् २३६।

१४. तत्रैव, पृष्ठम् २३६।

निदाघकाले दिनानि पद्मानि च वृद्धित्वं प्राप्यते। ग्रीष्मे सन्नद्धातपत्रसमुदायेन सुसज्जिताः रक्तवर्णाः विकाशशीलाः दिवसाः वृद्धिं लभन्ते। तथैव सज्जातपत्रसमुदायेन सुशोभितानि पाटलवर्णानि विकाशशीलानि पद्मानि वृद्धिं प्राप्यन्ते। अत्र ऋतुवर्णनं प्राकरणिकम्, तस्मात् दिनानि पद्मानि च प्राकरणिकानि। एतेषां प्राकरणिकानां वृद्धिगमनरुपया एकया क्रियया सह सम्बन्धहेतोः तुल्ययोगितालंकारः।

प्राकरणिकानां गुणसम्बन्धे तुल्ययोगिता यथा—

**"योगपट्टो जटाजालं................"**[१५]

व्याख्या पूर्ववत्।

अप्राकरणिकानां क्रियासम्बन्धे तुल्ययोगिता यथा—

**"धावत्त्वदश्वपृतनापतितं मुखेऽस्य**
**निर्निद्रनीलनलिनच्छदकोमलाङ्गया।**
**भग्नस्य गूर्जरनृपस्य रजः कयापि**
**तन्व्या तवासिलतया च यशः प्रमृष्टम्।।"**[१६]

श्लोकस्य अर्थः— हे राजन्! भवतः धावत्तुरगखुरोत्थितं रजः नष्टस्य गूर्जरनृपस्य मुखे पतितम्। एतत् रजः तस्य नीलोत्पलतुल्यया कोमलाङ्गिप्रियया प्रमृष्टम्। तथा तस्य यशश्च भवतः असिलतया प्रमृष्टम्। भवता गूर्जरनृपः पराभूतः इत्यर्थः। अत्र गूर्जरनरेशः वर्णनीयः विषयः अर्थात् प्राकरणिकम्। तस्य प्रिया असिलता च अप्राकरणिकम्। एतयोः अप्राकरणिकयोः मार्जनरुपया एकया क्रियया सह अन्वये तुल्ययोगिता।

अप्राकरणिकानां गुणान्वयः यथा—

**"त्वदङ्गमार्दवं द्रष्टुः..............................."**[१७]

---

१५. तत्रैव, पृष्ठम् २३६।

१६. तत्रैव, पृष्ठम् २३६।

१७. तत्रैव, पृष्ठम् २३६।

पूर्वमेव व्याख्यातम्।

**साहित्यदर्पणे तुल्ययोगिता**

आचार्येण विश्वनाथेन तुल्ययोगितायाः लक्षणं कृतम्–

**"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्।**
**एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता।।"**[१८]

अर्थात् यदि प्रस्तुतैरेव पदार्थैः सह प्रस्तुतानामेव पदार्थानाम् एकेन धर्मेण गुणरूपेण क्रियारूपेण वा अभिसम्बन्धः, अथवा यदि अप्रस्तुतैरेव पदार्थैः सह अप्रस्तुतानामेव पदार्थानां तथैव एकधर्माभिसम्बन्धः भवेत्, तदा तुल्ययोगिता नाम अलंकारः स्यात्।

प्रस्तुतानाम् उदाहरणम्–

**"अनुलेपनानि कुसुमान्यवलाः कृतमन्यवः पतिषु दीपदशाः।**
**समयेन तेन सुचिरं शयितप्रतिबोधितस्मरमबोधिषत।।"**[१९]

श्लोकस्य अर्थः– सन्ध्याकालेन अनुलेपनानि कुङ्कुमचन्दनादीनि, पुष्पानि, विहितप्रणयकोपाः अवलाः स्त्रियः, तथा वर्त्तिकाश्च अनेन प्रकारेण प्रतिबोधिताः, यत् दीर्घकालं यावत् शयितः कामोऽपि जागरितः। अत्र सन्ध्यावर्णना प्रस्तुतविषयः। तस्याः अङ्गत्वेन अनुलेपन–कुसुम–रमणी–दीपशिखादीनामपि प्रस्तुतत्वं सिद्ध्यते। एतेषां प्राकरणिकानाम् एकबोधनक्रियाभिसम्बन्धत्वात् तुल्ययोगिता। अनुलेपन–कुसुम–रमणी–दीपशिखादिषु बोधशब्दस्य अर्थाः भिन्नाः। अनुलेपनस्य बोधः तस्य प्रकाशः, कुसुमस्य बोधः तस्य विकाशः, अवलायाः बोधः तस्याः मानपरित्यागः, दीपशिखायाः बोधः तस्याः औज्ज्वल्यम्। तथापि धातोः एकरूपतावशात् प्रस्तुतानाम् एकक्रियाभिसम्बन्धः सुस्पष्टः एव।

---

१८. साहित्यदर्पणम् (दशमो परिच्छेदः), सम्पादकः उदयचन्द्रः बन्दोपाध्यायः, संस्कृत–बुक्–डिपो, कलिकाता, २०११ तत्र पृ. १५२।

१९. तत्रैव, पृ. १५३।

अप्राकरणिकानाम् एकगुणान्वयः यथा–

**"त्वदङ्गमार्दवं द्रष्टुः..............................."**[२०]

**पूर्वमेव व्याख्यातम्।**

गुणक्रियायुगपदभिसम्बन्धे उदाहरणं यथा–

**"दानं वित्तादृतं वाचः कीर्त्तिधर्मौ तथायुषः।**
**परोपकरणं कायादसारात् सारमाहरेत्।।"**[२१]

श्लोकस्य अर्थः असारात् धनात् सारं दानम्, असारात् वाक्यात् सारं सत्यम्, असारात् जीवनात् सारौ कीर्तिधर्मौ, तथा असारात् शरीरात् सारं परोपकरणं ग्रहणीयम्। बुद्धिमतां जनानाम् एतत् कर्तव्यम्। अत्र दानादीनाम् एकेन सारतारूपेण गुणेन सह सम्बन्धः, तथा एकया आहरणक्रियया सह सम्बन्धः प्रतिपादितः। युगपत् गुणक्रियाभिसम्बन्धे अत्र तुल्ययोगिता।

**कुवलयानन्दे तुल्ययोगिता**

आचार्यः अप्पयदीक्षितः कुवलयानन्दे तुल्ययोगितालक्षणमाह–

**"वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता"**[२२]

अर्थात् प्रकृतानाम् अप्रकृतानां वा एकधर्मान्वयः तुल्ययोगिता।

अस्य उदाहरणम्–

**"संकुचन्ति सरोजानि स्वैरिणीवदनानि च"**[२३]

अत्र सरोजं स्वैरिणीवदनञ्च प्रकृतम्। प्रकृतानां सङ्कोचक्रियारूपः एकधर्मान्वयः।

---

२०. तत्रैव, पृ. १५३।

२१. तत्रैव, पृ. १५४।

२२. कुवलयानन्दः, सम्पादकः वासुदेव–शर्मा, तत्र ४२।

२३. तत्रैव, ४२।

अपरमुदाहरणम्—

**"त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते।**

**मालती शशभृल्लेखा कदलीनां च कठोरता।।"**[२४]

अत्र अप्रस्तुतानामुपमानभूतानां काठिन्यरूपैकधर्मान्वयः। तस्मादत्रापि तुल्ययोगिता।

तुल्ययोगितायाः अपरे द्वयः भेदाः अप्पयदीक्षितेन प्रदर्शिताः। तत्राद्या—

**"हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता"**[२५]

अर्थात् हिते अहिते च व्यवहारस्य तुल्यत्वमपि तुल्ययोगिता। यथा—

**"प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया"**[२६]

अस्यार्थः हे राजन्, भवान् शत्रुमित्राणि प्रति पराभूतिं प्रददाति। शत्रुमित्रयोः राज्ञः तुल्यव्यवहारत्वात् तुल्ययोगिता। अत्र तुल्यव्यवहारः आपेक्षिकः। अत्र 'पराभूतिः' इति पदं श्लिष्टम्। शत्रुपक्षे अस्यार्थः पराभवः, मित्रपक्षे उत्कृष्टसमृद्धिः। पराभूतिशब्दे अर्थद्वयस्यैक्यारोपात् तुल्ययोगिता।

अपरा एका तुल्ययोगिता—

**"गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता"**[२७]

प्रसिद्धगुणयुक्तेन अप्रस्तुतेन सह अल्पगुणयुक्तस्य प्रस्तुतस्य समीकरणकरं वाक्यमपि तुल्ययोगिता। यथा—

**"लोकपालो यमः पाशी श्रीदः शक्रो भवानपि"**[२८]

अस्यार्थः धर्मराजः वरुणः कुवेरः इन्द्रः भवांश्च लोकपालः। लोकपालशब्दस्य प्रत्येकमन्वयः। अत्र उपमेयः राजा। उपमानं यमराजः,

---

२४. तत्रैव, ४३।

२५. तत्रैव, ४४।

२६. तत्रैव, ४४।

२७. तत्रैव, ४५।

२८. तत्रैव, ४५।

वरुणः, कुवेरः, इन्द्रश्च। प्रस्तुतापेक्षया अप्रस्तुताः प्रसिद्धगुणयुक्ताः। अत्र लोकपालशब्देन प्रसिद्धगुणयुक्तैः यमादिभिः अप्रस्तुतैः सह अल्पगुणयुक्तस्य राज्ञः समीकरणं कृतम्। तस्मादत्रापि तुल्ययोगिता।

## रसगङ्गाधरे तुल्ययोगिता

पण्डितराजः जगन्नाथः तुल्ययोगितायाः लक्षणं ददाति–

**"प्रकृतानामेवाप्रकृतानामेव वा गुणक्रियादिरूपैकधर्मान्वय स्तुल्ययोगिता"**[२९]

अर्थात् केवलं प्रकृतानाम् अथवा केवलं अप्रकृतानां यदा गुणक्रियादिरूपेण एकेन धर्मेण सह सम्बन्धः भवति, तदा तुल्ययोगितालंकारः स्यात्। आदिपदेन अभावादितत्त्वं अनेकान्वयिविषयरूपेण स्वीकृतम्। समानधर्मस्य उपादानात् वाचकशब्दाभावाच्च औपम्यमत्र गम्यम्।

प्रकृतानां क्रियाभिसम्बन्धरूपा तुल्ययोगिता यथा–

**"प्रिये विषादं जहिहीति वाचं प्रिये सरागं वदति प्रियायाः।**

**वारामुदारा विजगाल धारा विलोचनाभ्यां मनसश्च मानः।।"**[३०]

सानुरागं प्रियः यदा मानिन्याः प्रियायाः समीपे विषादं त्यक्तुम् अनुरोधयामास, तदा नायिकायाः लोचनाभ्याम् अश्रुधारा विगलिता, मनसः मानोऽपि विगलितः। अत्र मानिन्याः वर्ण्यत्वात् तस्याः अश्रुमानयोः प्रकृतत्वम्। एतयोः प्रकृतयोः 'विजगाल' इति एकक्रियान्वयत्वात् तुल्ययोगिता।

प्रकृतानां गुणान्वयरूपा तुल्ययोगिता यथा–

**"न्यञ्चति वयसि प्रथमे समुदञ्चति किं च तरुणिमनि सुदृशः।**

**उल्लसति कापि शोभा वचसां च दृशां च विभ्रमाणां च।।"**[३१]

कस्यापि नायिकायाः वर्णनमिदम्। तस्मात् तस्याः गतीनां वचसां दृशां

---

२९. रसगङ्गाधरः, सम्पादकः पण्डित–दुर्गाप्रसादः, वासुदेव–लक्ष्मण–शास्त्री–पणशिकरः च, निर्णयसागर–प्रेस्, बोम्बे, १९१२ तत्र पृ. ३१७।

३०. तत्रैव, पृ. ३१७।

३१. तत्रैव, पृ. ३१८।

विभ्रमाणां च प्रकृतत्त्वम्। एतेषां प्रकृतानां 'शोभा' इति गुणरूपैकधर्मान्वयत्वात् तुल्ययोगिता। पुनश्च 'गतयः वाचः दृशः विभ्रमाः विलसन्ति' इत्युक्ते सति 'विलसन्ति' इति एकक्रियान्वयत्वात् क्रियातुल्ययोगिता अपि। पुनरपि 'दधति स्म मधुरिमाणं वाचः गतयश्च विभ्रमाश्च भृशम्' यदि इति क्रियते तर्हि गुणविशिष्टा तुल्ययोगिता अपि स्यात्।

एवमप्रकृतानामपि एकगुणक्रियाभिसम्बन्धे तुल्ययोगिता भवति। प्रबन्धगौरवभयात् अत्र नालोचिता।

अलंकारसर्वस्वकारेण, तदनुगामिना अप्पयदीक्षितेन च केवलं एकगुणक्रियाभिसम्बन्धे तुल्ययोगिता स्वीकृता। जगन्नाथस्य मतेन एतदतिरिक्ते अभावरूपधर्मान्वयेऽपि तुल्ययोगिता भवितुमर्हति। यथा–

**"शासति त्वयि हे राजन्नखण्डावनिमण्डलम्।**

**न मनागपि निश्चिन्ते मण्डले शत्रुमित्रयोः।।"**[३२]

श्लोकस्य अर्थः– हे राजन्! भवान् अखिलं भुवनमण्डलं शासति, तस्मात् शत्रुमित्रयोः चेतसि शान्तिर्नास्ति। अत्र शान्त्यभावरूपधर्मान्वयत्वात् तुल्ययोगिता।

**"हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता।**

**प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया।।"**[३३]

इति तुल्ययोगितायाः प्रकारान्तरम् अप्पयदीक्षितेन स्वीकृतम्। परन्तु जगन्नाथस्य मतेन अयं भेदः पृथग्रूपेण न स्वीकर्तव्यः, यतः "वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता" इति पूर्वलक्षणेन अस्यापि ग्रहणं भवति। अत्र प्रकृतयोः शत्रुमित्रयोः 'पराभुतिः' इति एकधर्मान्वयत्वात् तुल्ययोगिता।

---

३२. तत्रैव, पृ. ३१६।

३३. कुवलयानन्दः ४४।

पण्डितराजेन कारकतुल्ययोगितापि स्वीकृता। तस्याः लक्षणम्–

**"यत्र च प्रकृतानामेवाप्रकृतानामेव वा क्रियाणामेककारकान्वयः सा कारकतुल्ययोगिता"**[३४]

अर्थात् प्रकृतानाम् अथवा अप्रकृतानां क्रियाणाम् एकेन कर्त्रादिकारकेन सह सम्बन्धे भवति कारकतुल्ययोगिता। यथा–

**"वसु दातुं यशो धातुं विधातुमरिमर्दनम्।**
**त्रातुं च सकलां पृथ्वीमतीव निपुणो भवान्।।"**[३५]

श्लोकस्य अर्थः– हे राजन्! धनदाने, यशोधारणे, शत्रुविनाशे, पृथिव्याः त्राणे च भवान् अतीव निपुणः। अत्र राज्ञः स्तावकवाक्ये प्रकृतानां दान–धारण–विधान–त्राण–क्रियाणाम् एकमेव कर्ता राजा। प्रकृतानां क्रियाणाम् एककारकान्वयात् कारकतुल्ययोगिता।

## समालोचना

आचार्यस्य भामहस्य मतेन– अल्पगुणयुक्तानां पदार्थानां विशिष्टगुणयुक्तेन पदार्थेन सह साम्यप्रतिपादनाय एकया क्रियया सह सम्बन्धप्रतिपादनमेव तुल्ययोगिता। अस्मिन् अलंकारे अल्पगुणयुक्तस्य उपमानस्य विशिष्टत्वं प्रतिपाद्यते।

आचार्यस्य दण्डिनः मतेन स्तुत्यर्थं निन्दार्थं वा विवक्षितगुणयुक्तैः उत्कृष्टैः उपमानैः सह कस्यचित् प्रस्तुतस्य साम्यप्रतिपादनाय यत् कथनं सा तुल्ययोगिता। प्रस्तुतयोरेव अप्रस्तुतयोरेव वा एकधर्माभिसम्बन्धे तुल्ययोगिता, प्रस्तुताप्रस्तुतयोः एकधर्माभिसम्बन्धे दीपकमिति अर्वाचीनमतं न दण्डिनोऽभिमतम्, धर्माभिसम्बन्धरूपवैचित्रस्य सर्वत्र तुल्यत्वात्। जातिक्रियागुणद्रव्यवाचिना एकेन पदेन सह अनेकेषां वाक्यानामन्वये दीपकालंकारः भवति। तस्य मतेन तुल्ययोगिता द्विविधा–स्तुतिरूपा निन्दारूपा च।

---

३४. रसगङ्गाधरः पृ. ३२१।

३५. तत्रैव, पृ. ३२१।

उद्भटाचार्यस्य मतेन– केवलानां अप्रस्तुतानाम् अथवा केवलानां प्रस्तुतानां साम्यप्रत्यायकं कथनमेव तुल्ययोगिता। प्रस्तुताप्रस्तुतयोः एकत्र अनवस्थानादत्र उपमानोपमेयभावशून्यत्वम्। अलंकारेऽस्मिन् अप्रस्तुतानां प्रस्तुतानां वा साम्यं प्रतिपाद्यते। प्रस्तुतयोरेव अप्रस्तुतयोरेव वा साम्यरूपा तुल्ययोगिता उद्भटेन प्रथमन्तावत् स्वीकृता। अत्र द्रष्टव्यं यत् उद्भटस्य लक्षणे साम्यस्य उपरि गुरुत्वं दीयते, न तु साधारणधर्मस्य। तुल्ययोगिता द्विविधा– प्रस्तुतानाम् एकधर्माभिसम्बन्धरूपा, अप्रस्तुतानाम् एकधर्माभिसम्बन्धरूपा च।

भामहवत् वामनेन तुल्ययोगितायाम् उपमानोपमेयभावे हीनाधिकगुणत्वस्य उपरि गुरुत्वं प्रदीयते। दीपकवदत्रापि प्रस्तुताप्रस्तुतयोः एकक्रियाभिसम्बन्धः परिलक्ष्यते, केवलम् उपमानस्य अधिकगुणत्वमेव विशेषः। वामनस्य तुल्ययोगिता न उपमायाः पृथक्, यतः उपमालंकारेऽपि उपमानस्य गुणाधिक्यं दृश्यते।

मम्मटाचार्येण अतीव स्पष्टरूपेण प्राकरणिकानाम् अप्राकरणिकानां वा एकधर्माभिसम्बन्धरूपा तुल्ययोगिता स्वीकृता। अत्र धर्मशब्दस्य अर्थः क्रिया, गुणः, जातिः, द्रव्यश्च। तस्य मतेन तुल्ययोगिता द्विविधा–प्राकरणिकानाम् एकधर्माभिसम्बन्धरूपा, अप्राकरणिकानाम् एकधर्माभिसम्बन्धरूपा च।

रुय्यकस्य मतेन सादृश्ये गम्यमाने सति प्रस्तुतानाम् अथवा अप्रस्तुतानाम्

एकगुणाभिसम्बन्धे अथवा एकक्रियाभिसम्बन्धे तुल्ययोगिता भवति। इवादिशब्दाप्रयोगात् अत्र औपम्यं गम्यम्। लक्षणे धर्मशब्देन गुणस्य क्रियायाः च ग्रहणम्। ग्रन्थकारस्य मतेन तुल्ययोगिता चतुर्विधा– प्रस्तुतानां गुणाभिसम्बन्धरूपा, प्रस्तुतानां क्रियान्वयरूपा, अप्रस्तुतानां गुणान्वयरूपा, अप्रस्तुतानां क्रियाभिसम्बन्धरूपा च।

रुय्यकवत् विश्वनाथस्य मतेनापि प्रस्तुतानाम् अथवा अप्रस्तुतानाम् एकगुणाभिसम्बन्धे अथवा एकक्रियाभिसम्बन्धे तुल्ययोगिता भवति। गुणक्रियायुगपदभिसम्बन्धेऽपि तुल्ययोगिता भवतीति दर्पणकारस्य अभिमतम्।

अप्पयदीक्षितस्य मतेन– प्रकृतानाम् अप्रकृतानां वा एकक्रियान्वयः अथवा एकगुणान्वयः तुल्ययोगिता। तुल्ययोगितायाः अपरे द्वयः भेदाः

अप्पयदीक्षितेन प्रदर्शिताः। हिते अहिते च व्यवहारस्य तुल्यत्वमपि तुल्ययोगिता। तथा प्रसिद्धगुणयुक्तेन अप्रस्तुतेन सह अल्पगुणयुक्तस्य प्रस्तुतस्य समीकरणकरं वाक्यमपि तुल्ययोगिता। अत्र लक्षणीयं यत् अप्पयदीक्षितेन यद्यपि उद्भट–मम्मट–रुय्यकादिशास्त्रकारदृशा तुल्ययोगिता परिभाषिता, तथापि भामह–दण्डि–वामनानदीनां पूर्वाचार्याणां तुल्ययोगितास्वरूपं न परित्यक्तम्। दीक्षितेन हिताहिते व्यवहारतुल्यत्वरूपा तुल्ययोगिता उद्भाविता। वस्तुतः इयमपि एकधर्मान्वयरूपा तुल्ययोगिता एव।

पण्डितराजस्य जगन्नाथस्य मतेन– प्रकृतानाम् अप्रकृतानां वा गुणक्रियादिरूपेण एकेन धर्मेण सह अन्वये भवति तुल्ययोगितालंकारः। आदिपदेन अभावादितत्त्वं अनेकान् वयिविषयरूपेण स्वीकृतम्। अलङ्कारसर्वस्वकारेण, तदनुगामिना अप्पयदीक्षितेन च केवलं एकगुणक्रियाभिसम्बन्धे तुल्ययोगिता स्वीकृता। जगन्नाथस्य मतेन एतदतिरिक्ते अभावरूपधर्मान्वयेऽपि तुल्ययोगिता भवितुमर्हति। समानधर्मस्य उपादानात् वाचकशब्दाभावाच्च औपम्यमत्र गम्यम्। हिताहिते वृत्तितुल्यत्वरूपा तुल्ययोगिता अप्पयदीक्षितेन स्वीकृता। परन्तु जगन्नाथस्य मतेन अयं भेदः पृथग्रूपेण न स्वीकर्तव्यः, यतः "वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता" इति पूर्वलक्षणेन अस्यापि ग्रहणं भवति। पण्डितराजेन कारकतुल्ययोगितापि स्वीकृता। प्रकृतानाम् अथवा अप्रकृतानां क्रियाणां एकेन कर्त्रादिकारकेन सह सम्बन्धे भवति कारकतुल्ययोगिता। कारकतुल्ययोगिता जगन्नाथेन एव उद्भाविता।

उद्भट–वामन–मम्मटादिभिः आचार्यैः दीपकालंकारात् पश्चात् तुल्ययोगिता आलोचिता, परन्तु रुय्यक–अप्पयदीक्षित–जगन्नाथादिभिः दीपकालंकारात् प्राक् तुल्ययोगिता समाविष्टा। पण्डितराजस्य मतेन तुल्ययोगितायाः दीपकस्य पृथकीकरणं न सङ्गतम्। यतः एकधर्मान्वयरूपाः चमत्काराः उभयत्र समानाः। चमत्कारभेदादेव अलंकारभेदः क्रियते। अतः तुल्ययोगितायाः एव त्रयः भेदाः स्वीकर्तव्याः– प्रकृतानाम् एकधर्मान्वयः, अप्रकृतानाम् एकधर्मान्वयः, प्रकृताप्रकृतयोः एकधर्मान्वयश्च। अलंकारसर्वस्वस्य विमर्शिनीटीकायामपि उक्तम्– "न चैतावतैवानयोः पृथग्लक्षणं युक्तम्। औपम्यगर्भत्वाख्यस्य सामान्यस्य द्वयोरप्यनुगमात्। ग्रन्थकृता

पुनश्चिरन्तनानुरोधात्कृतम्।"[३६] वस्तुतः ईदृशम् अभिमतं नवीनानां दुराग्रहमात्रम्। मुनिभरतात् जगन्नाथपर्यन्तं सर्वैः आचार्यैः दीपकं स्वीकृतम्। अतः दीपकस्य तुल्ययोगितायाः प्राक् समावेशः करणीयः। भरतमुनिना दीपकलक्षणे एकधर्मान्वस्य उपरि गुरुत्वं प्रदीयते, न तु प्रकृताप्रकृतयोः उपरि। परवर्तिकाले दीपकस्य सूक्ष्मं रूपं तुल्ययोगितारूपेण कल्पितम्। अतः दीपके तुल्ययोगितायाः अन्तर्भावः करणीयः, न तु तुल्ययोगितायां दीपकस्य। यदि उभौ स्वतन्त्रौ अलंकारौ इति गणनीयौ तर्हि आदौ दीपकस्य समावेशः कर्तव्यः।

***

३६. अलङ्कारसर्वस्वम्, पृष्ठम् २४४।

# आचार्यविश्वनाथदृष्ट्या संस्कृतसाहित्यस्य काव्यप्रकारविभागः

**डॉ० देशराजः**
*सहायकआचार्यः, संस्कृत विभागः,*
*कालिन्दीमहाविद्यालयः, दिल्लीविश्वविद्यालयः, दिल्ली*

**शोधसारः–**

संस्कृतसाहित्यस्य लौकिकालौकिकभेदेन द्वौ मुख्यौ विभागौ दृश्यते। लौकिकसंस्कृतसाहित्ये आचार्यविश्वनाथेन साहित्यदर्पणनामग्रन्थे काव्यं द्विधा विभक्तम्– दृश्यकाव्यं च श्रव्यकाव्यं च। रसास्वादनस्य दृष्टया उभयमपि प्रकारौ परमं महत्त्वपूर्णं स्थानं वहतः।

दृश्यकाव्यं तु तादृशं काव्यं भवति, यत् रङ्गमञ्चे अभिनयेन प्रेक्षकानां दृष्टिगोचरं भवति। एतत् रूपकत्वेन दशरूपकैः (नाटक, प्रकरण, भाण, व्यायोग, समवकार, डिम, ईहामृग, अङ्क, वीथी, प्रहसन) तथा अष्टादश उपरूपकैः (नाटिका, त्रोटक, गोष्ठी इत्यादि) वर्गीकृतं दृश्यते। रूपकस्य स्वरूपं नाट्यकाव्यरूपं स्यात्, यत्र नायकनायिकयोः संवादेन, भावाभिनयेन, दृश्यविधानं च प्रमुखं भवति। एतानन्तरं आचार्यविश्वनाथः साहित्यदर्पणस्य षष्ठे परिच्छेदे श्रव्यकाव्यं विशदतया विवेचयति। "श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यगयं द्विधा" इति वाक्येन सः श्रव्यकाव्यस्य मूलस्वरूपं निर्देशयति। यत् काव्यं केवलं पठनेन वा श्रवणेन च रसानुभवं दत्ते, तत्तद्विधं श्रव्यकाव्यम्। श्रव्यकाव्यं द्विधा भवति–पद्यकाव्यम् एवं गद्यकाव्यम्। पद्यकाव्ये पुनः मुक्तक–युग्मक–सान्दानितक–कलापक–कुलक इत्यादो भेदा वर्णिताः। गद्यकाव्यं च चतुर्धामुक्तकं, वृत्तगन्धि, उत्कलिकाप्रायं, चूर्णिका इति। एवं, आचार्यविश्वनाथेन दृश्यश्रोतृविषयकद्वैविध्येन संस्कृतकाव्यस्य परिष्कृत विभाजनं प्रदत्तं, यत् रसपरिपाकं, अलङ्कारवैचित्र्यं, काव्यशैलीं च सम्यग्व्यवस्थितं करोति।

## भूमिका–

भारतीयकाव्यपरम्परा अनादिकालपर्यन्तं समृद्धा दृश्यते। अत्र काव्यं केवलं मनोरञ्जनस्य साधनं न, अपि तु लोकशिक्षायाः, मूल्यबोधनस्य च एकं प्रभावशालीं माध्यममस्ति। आचार्यविश्वनाथेन "साहित्यदर्पणे" काव्यलक्षणं निरूप्य तस्य प्रकारानपि निरूपितानि। तेन काव्यं द्विविधं निरूपितम– दृश्यकाव्यम्, श्रव्यकाव्यम् च। दृश्यकाव्यं तु तादृशं काव्यमस्ति यत् नाट्यरूपेण रंगमञ्चे प्रस्तूयते। अत्र रसाभिव्यक्तिः, अभिनयः, वेशभूषा, संगीतम्, नर्तनञ्च महत्त्वं वहन्ति। नाट्यशास्त्रपरम्परायाः प्रभावः अत्र स्पष्टं दृश्यते। श्रव्यकाव्यं तु पठ्यरूपेण श्रोतृजनं प्रति प्रस्तुतं भवति। अत्र श्लोकबद्धं वा गद्यरूपं वा काव्यं स्यात्, यत् केवलं श्रवणेनैव रसास्वादं जनयति। काव्येषु महाकाव्यं, खण्डकाव्यं, कथा, आख्यायिका, उपन्यासादीनां गणना अत्र भवति। एवं दृश्यश्रव्यविभागेन आचार्येण साहित्यस्य द्विविधस्वरूपं प्रतिपादितम्। अस्य वर्गीकरणस्य अधारेण न केवलं रसबोधः, अपि तु साहित्यगवेषणायाः एकः सुदृढः आधारोऽपि प्राप्यते। अत एव अत्र प्रस्तुते शोधप्रबन्धे 'आचार्यविश्वनाथस्य दृष्ट्या संस्कृतकाव्यप्रकाराः– दृश्यकाव्यं श्रव्यकाव्यं च' इति विषयं सुस्पष्टं विश्लेष्य विवेच्य च समर्प्यते।

## दृश्यकाव्यस्य स्वरूपम् एवं वर्गीकरणम्–

संस्कृतसाहित्यस्य लौकिकालौकिकभेदेन द्वौ मुख्यौ विभागौ स्तः। तत्र लौकिकसंस्कृतसाहित्ये द्वौ भेदौ दृष्टौ–दृश्यकाव्यं च श्रव्यकाव्यं च। रसास्वादनस्य रमणीयतायाश्च दृष्ट्या एते उभय विभागौ अपि अत्यन्तं महत्वपूर्णौ स्तः। तथापि, दृश्यरूपकत्वेन अभिनेयत्वात् दृश्यकाव्यमेव सर्वाधिकं लोकप्रियं दृश्यते। एतत् दृश्यकाव्यं नाम नाटकम्, प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथिः, प्रहसनम् इति दशरूपकैः तथा नाटकादिभिः अष्टादश उपरूपकैः विभक्तं भवति।

## रूपकस्य स्वरूपम्–

रूपकं नाम साहित्ये प्रमुखा एका विधा या अस्ति। तस्य दश मुख्याः भेदाः परिगणिताः सन्ति–

**''नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।**
**ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।।''**

तेषां नामानि नाटकं, प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथिः, प्रहसनं च। एतेषां दश रूपकानां अतिरिक्तं अष्टादश उपरूपकानि अपि मनीषिभिः स्वीक्रियन्ते–

**''नाटिका त्रोटकं गोष्ठी, सट्टकं नाट्यरासकम्।**
**प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा।।**

**संलापकं श्रीगदितं शिल्पकं च विलासिका।**
**दुर्मल्लिका प्रकरणी हल्लीसो भाणिकेति च।।**

**अष्टादश प्राहुरुप रूपकाणि मनीषिणः।**
**विना विशेषं सर्वेषां लक्ष्म् नाटकवन्मतम्।।''**

अत्र नाटिका, त्रोटकं, गोष्ठी, सट्टकम्, नाट्यरासकम्, प्रस्थानम्, उल्लाप्यम्, काव्यम्, प्रेङ्खणम्, रासकम्, संलापकः, श्रीगदितम्, शिल्पकम्, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका च भवन्ति। एतेषां सर्वेषां स्वरूपं सामान्यतः नाटकसदृशं भवति।

**१. नाटकस्य स्वरूपम्–**

**''नाटकं ख्यातवृत्तं स्यात्पञ्च संधिसमन्वितम्।**
**विलासद्धर्यादिगुणवद्युक्तं नानाविभूतिभिः।।**

**सुखदुःखसमुत्थानं नानारसनिरन्तरम् ।**
**पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः।।''**

नाटकस्य कथा इतिहासे वा पुराणे च प्रसिद्धा भवेत्। यथा रामायणे, महाभारते च। तत्र पञ्च संधयः– मुख, प्रतिमुख, गर्भ, विमर्श, निष्कृतिः– आवश्यकाः सन्ति। कथायाः विकासे विलास, ऐश्वर्य इत्यादयः गुणाः भवन्ति, सुखदुःखयोः समुत्पत्तिः च निरन्तरं दृश्यते। अत्र पञ्चादिकानि अङ्कानि, अर्थात् पञ्च ते दश पर्यन्तानि अङ्काः भवन्ति। नायकः– प्रख्यातवंशजः,

धीरोदात्तः, प्रतापवान्, दिव्यः वा दिव्यादिव्यः च गुणवान् भवेत्।

**''एक एव भवेदङ्गी शृङ्गारो वीर एव वा।**
**अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः''**

रसयोजनायाम् एकः अङ्गीरसः भवति– शृङ्गारः वा वीरः। अन्ये सर्वे रसाः तस्य अङ्गरूपेण स्थापनीयाः।

**गोपुच्छाग्र–सिद्धान्तः–**

नाटकस्य रचनायाः विषये विशेषः 'गोपुच्छाग्रसमाग्रम्' इति सिद्धान्तः स्वीकार्यः। विश्वनाथः लिखति–''गोपुच्छाग्रसमाग्रमिति क्रमेणाङ्काः सूक्ष्माः कर्तव्या इति केचित्। अन्ये त्वाहुः–गोपुच्छे केचिद्वाला ह्रत्वाः केचिद्दीर्घाः, तथैव कानिचित्कार्याणि मुखसन्धौ समाप्तानि, कानिचित्प्रतिमुखे, एवमन्येष्वपि।'' अर्थात्, गोः पुच्छस्य अग्रभागे इव, नाटके अपि आरम्भे कथानकं तीव्रगत्याक्रान्तं भवेत्, उत्तरं कथाविस्तारः सम्यगुपसंहारे समाहितः भवेत्। भरतमुनिः अपि लिखति–

**''कार्यं गोपुच्छाग्रं कर्तव्यं काव्यबन्धमासाद्य।**
**ये चोदात्ताः भावास्ते सर्वे पृष्ठतः कार्याः।।''**

**एवम् नाट्यदर्पणकारः लिखति–**

**''गोपुच्छकेशकल्याणि नाट्यवस्तूनि कल्पयेत्।**
**उदात्ता रञ्जका भावाः स्थापनीया पुरः पुरः।।''**

**धनञ्जयस्य 'दशरूपक' नामक काव्ये अपि अयं मतः–**

**''अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्।**
**कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः।**
**प्रख्यातवंशो राजर्षिदिव्यो वा यत्र नायकः''**

**तथा–**

**''आद्यन्तमेवं निश्चित्य पञ्चधा तद्विभज्य च।**
**खण्डशः सन्धिसञ्ज्ञांश्च विभागानपि खण्डयेत्।।''**

**रसयोजनाया–**

**''एको रसोऽङ्गी कर्त्तव्यो वीरः शृङ्गार एव वा।**
**अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम्।।''**

नाटकाश्रितं नामकरणम् अपि **''कार्यं नाटकस्मर्याभितार्थप्रकाशकम्। यथा रामाभ्युदयादिः।''**

नाटकरूपकस्य सम्यक् रचनायाः निमित्तं प्रसिद्धकथावस्तु, संधियोजना, रससन्तुलनम्, पात्रनिरूपणम्, गोपुच्छाग्ररचना इत्येतानि सर्वाणि तत्त्वानि सम्यगनुपालनीयानि। विश्वनाथस्य दृष्ट्या, एतानि सर्वे गुणाः पूर्वाचार्याणां मान्यतानामनुसारं संगतिः कुर्वन्ति, यैः नाटकं साहित्ये परिपूर्णं, प्रभावकरं च रूपं सिद्ध्यति।

**२. प्रकरणरूपकस्य लक्षणम्–**

आचार्यधनञ्जयेन 'दशरूपक' नामक ग्रन्थे प्रकरणस्य लक्षणं निम्नरूपेण निर्दिष्टम्–

**''अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्।**
**अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्।**
**धीरप्रशान्तं सापायं धर्मकामार्थतत्परम्।**
**शेषं नाटकवत्सन्धिप्रवेशकरसादिकम्''**

अत्र प्रकरणे या कथावस्तु भवति सा कविना स्वयमेव कल्पिता, समाजे प्रसिद्धं लौकिकं जीवनमाधारितं च भवति। न तु एषा कथा इतिहासपुराणादिषु दृष्टा। अत्र नायकः अमात्यः (मन्त्री), विप्रः (ब्राह्मणः) अथवा वणिजः (वैश्यः) जात्युपपन्नः एक एव पात्रं भवति। एष नायकः धैर्ययुक्तः, शान्तस्वभावः, धर्म–अर्थ–कामत्रयविषये प्रवृत्तः च भवति, यद्यपि स आपत्तिकालस्य प्रभावात् न मुक्तो भवति। प्रकरणस्य अन्याः रचनात्मकाः विशेषताः– सन्धिविन्यासः, प्रवेशः, रसयोजना च– सर्वा अपि नाटकवत्समानाः एव।

**नायिकालक्षणम् अपि आचार्येण स्पष्टीकृतम्–**

**''नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा।**

**क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित्।**
**कृतवाभ्यन्तरा, बाह्या वेश्या नातिकमीजयोः।।**

नायिका द्विविधा भवति– (१) कुलस्त्री (कुलजा) या कुलीनकुटुम्बे उत्पन्ना, (२) गणिका (वेश्या) या समाजस्य बहिर्मुखी स्त्री। कस्मिंश्चित् प्रकरणे केवलं कुलजा नायिका भवति, अन्यस्मिन केवलं गणिका, पुनश्च कत्रिचित् उभे अपि सहैव दृश्येते। यत्र गणिका अभ्यन्तरा (अन्तरङ्गाध्परिचिता) अस्ति, तत्र सा "कृतवा" इति कथ्यते। यदा सा बाह्या (बाह्यागताध्नवागतस्त्री) अस्ति, तर्हि "बाह्या" इति संज्ञां लभते। एवंविधानां वेश्याभिः नातिक तथा मीजय इत्युपरूपकेषु सामान्यतः प्रयोजनं दृश्यते।

३. **भाणरूपकस्य स्वरूपम्–**

आचार्यविश्वनाथेन भाणरूपकस्य लक्षणं स्पष्टं निरूपितम्–

**''भाणः स्याद् धूर्तीचरितो मामावस्यान्तरात्मकः।**
**एकाङ्क एक एवात्र निपुणः पण्डितो विटः।**
**प्रकाशयेद्वेनानुभूतमितरेण वा,**
**संबोधनोक्तिप्रत्युक्ती कुर्यात् आकाशभाषितः।**
**सूभवेत् वीर–शृंगारी शौर्यसौभाग्यवर्णनैः।**
**तत्र तिवृत्तमुत्पार्थवृत्तिः प्रायेण भारती।**
**मुख–निर्वहणे सन्धी लास्याङ्गानि दशापि च।।''**

भाणः एकं विशिष्टं रूपकमस्ति यः एकाङ्कः भवति। अस्य कथावस्तु कविना कल्पिता भवति, न तु प्रख्यात इतिहासपुराणनिबद्धा। अस्य प्रमुखः पात्रं विटः भवति– रसिकः, धूर्तः, चतुरः, पण्डितश्च। एष विटः एकाकी नाटकमखिलं वहति, स्वानुभूतं वा परानुभूतं च रंगभूमौ प्रहसनपूर्वकं प्रकाशयति। भाणस्य प्रमुखं लक्षणं यत्– अत्र केवलं एकः पात्रः (विटः) एव दृश्यते, किन्तु सः संवादप्रयोगेणान्येषां पात्राणामपि सन्निधेः आभासं दर्शकाणां मनसि जनयति। एषः सम्भाषणं, उक्ति–प्रत्युक्तिं च आकाशभाषितरूपेण प्रयुज्य स्वाभाविकतया प्रवर्तते। अनेन दर्शकाः कल्पितपात्राणामपि साक्षात्सन्निधिं अनुभवन्ति।

अस्मिन् रूपके प्रायः वीरः श्रृंगारश्च रसौ मुख्यतया व्यक्तौ भवतः। शौर्यस्य सौभाग्यस्य च वर्णनात् एते रसाः सम्पद्यन्ते। रचनात्मकदृष्ट्या अत्र प्रायः भारतीवृत्तिः प्रबलता प्राप्ता दृश्यते, यद्यपि कतिपय स्थलेषु कैशिकीवृत्तेः अपि प्रयोगः भवति। भाणस्य कथासंरचना मुख तथा निर्वहण इत्येताभ्यां द्वाभ्यां सन्धिभ्यां युक्ता भवति। भाणरूपके दश लास्याङ्गानि अपि प्रयुज्यन्ते– यैः हास्यप्रधानत्वं च रसिकता च रूपकस्य विशेषता भवति। लीलामधुकरभाणः अस्य रूपकस्य आदर्शं दृष्टान्तं भवति, यस्मिन सर्वाणि उपर्युक्तलक्षणानि दृश्यन्ते। विश्वनाथस्य भाणविषयकं विवेचनं पूर्णतः दशरूपककारधनञ्जयस्य मतानुगुणं दृश्यते। एषा भाणशैली एकाङ्की–अभिनय–प्रधानं कल्पनाशील संवादयुक्तं चत्वरालापयुक्तं च भवति, यत् दर्शकाणां मनसि हास्यं सौन्दर्यबोधं च समुत्पादयति।

**४. व्यायोगरूपकस्य स्वरूपम्–**

**आचार्यविश्वनाथेन व्यायोगस्य लक्षणं स्पष्टं प्रदत्तम्–**

**"ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुक्तः।**
**हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराथितः।**
**एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः।**
**कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः।**
**राजविरच दिव्यो वा भवेद्धीरोद्धतश्च सः।**
**हास्य–शृंगार–शान्तेभ्य इतरेऽङ्गिनो रसाः।।**

व्यायोगरूपकं नाट्यविधायाः एकः प्रमुखभेदः अस्ति। एषः एकाङ्कात्मकं भवति, यत्र कथावस्तु इतिहासपुराणप्रसिद्धा दृश्यते– यथा रामायण, महाभारतम् इत्यादिषु वर्णिता। अत्र संग्रामवर्णनं भवति, किन्तु सः समरः स्त्रीकारणनिमित्तं न भवति। अतः व्यायोगे युद्धं कर्तव्यम्, किन्तु तत् नारीसंबद्धं न स्यात्। एतस्य प्रमुखं लक्षणं यत्– अत्र स्त्रीपात्राणां संख्या अल्पा, पुरुषपात्राणां च बहुलता भवति। अतः एषः रूपकः वीरभावप्रदर्शनाय, पुरुषचरित्रवर्णनाय च उपयुक्तः इति मन्यते। कैशिकीवृत्तेः अत्र अभावः दृश्यते, कारणं यत् अत्र श्रृंगाररसः गौणो वा नास्त्येव। अस्य प्रमुखो रसः वीरः एव।

गर्भसन्धेः विमर्शसन्धेः च अत्र अभावः अस्ति, अतः व्यायोगस्य कथासंरचना सरलरूपेण युद्धकथायामेव स्थिता भवति। केवलं मुखसन्धिः निर्वहणसन्धिश्च एव अत्र सन्ति। अस्य रूपकस्य नायकः प्रसिद्धवीरः भवति— राजपुत्रः, दिव्यः वा, धीरोदात्तः च। सः नायकः वीरता, धैर्यं, उदात्तत्वं च प्रतीकत्वेन दर्श्यते। अत्र हास्य, शृंगार, शान्त इत्येतान् रसान् विहाय अन्यः कोऽपि एकः रसः अंगिरसत्वेन स्वीक्रियते, यः प्रायः वीरः एव भवति। अस्य उद्देश्यं वीरभावस्य उत्कर्षेण प्रस्तुतिरेव।

**उदाहरणम्—**

भासस्य ''सौगन्धिकाहरण'' इत्येतत् व्यायोगरूपकस्य उत्कृष्टं उदाहरणं यत्र भीमसेनस्य सौगन्धिकपुष्पार्जनकृत्येन युद्धवर्णनं वीररसप्रधानं च रम्यतया दर्शितम्। दशरूपककारमतम् दशरूपककारधनञ्जयः अपि (३/६०–६१) श्लोकयोः द्वारा अनेतानि एव लक्षणानि स्वीक्रियते। तेन उक्तं यत्— व्यायोगः एकाङ्कः, ख्यातवृत्तयुक्तः, पुरुषप्रधानः, कैशिकीवृत्तिवर्जितः, वीररसप्रधानः च भवति।

५. समवकाररूपकस्य स्वरूपम्—

आचार्यविश्वनाथेन समवकाररूपकस्य लक्षणं निम्नरूपेण प्रदत्तम्—

**वृत्तं समवकारे तु ख्यातं देवसुराश्रयम्।**
**संध्यो निविमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे।।**

**संधी द्वावन्त्ययोस्तद्वदेक एको भवेत्पुनः।**
**नायका द्वादशादात्ताः प्रख्याता देवमानवाः।।**

**फलं पृथक् पृथक्तेषां वीरमुख्योऽखिलो रसः।**
**वृत्तयो मन्दकैशिकयो नात्र बिन्दुप्रवेशकौ।।**

**वीथ्यङ्गानि च तत्र स्युस्तथालाभं त्रयोदश।**
**गायर्त्युष्णिङ्मुखान्यत्र छन्दांसि विविधानि च।।**

**त्रिशृङ्गारस्त्रिकपटः कार्यश्चायं त्रिविद्रवः ।**
**वस्तु द्वादशनालीभिर्भानप्याद्यं प्रथमाङ्कगम्।**

**द्वितीयाङ्के तिसृभिर्दाभ्याङ्कस्तृतीयकः।।**

समवकारः एकः विशिष्टः नाट्यरूपकः अस्ति, यस्य कथावस्तु प्रख्यातं पौराणिकं वा ऐतिहासिकं च भवति, यत् देवासुरसंबद्धं दृश्यते। अस्य रूपकस्य रचना त्र्यङ्कात्मिका भवति। अत्र विमर्शसन्धिः वर्ज्यते, केवलं चतुः सन्धयः प्रयुज्यन्ते। आद्ययोः द्वयोः अङ्कयोः द्वे–द्वे संध्यौ भवतः। तृतीये अङ्के एकः संधिः एव दृश्यते। अस्मिन् रूपके द्वादश (१२) नायकाः सन्ति, ये प्रसिद्धा देवता वा नराः सन्ति, ये च सर्वे धीरोदात्ता इति निर्दिष्टाः। एतेषां प्रत्येकस्य किञ्चित् पृथक् फललाभार्थं प्रवृत्तिः भवति। वीररसः अत्र अङ्गिरसः भवति, अन्ये रसाः सहायकत्वेन दृश्यन्ते। वृत्तिदृष्ट्या– कैशिकीवृत्तेः अभावः, किन्तु भारती, सात्वती, आरभटी इत्येताः वृत्तयः प्रयुज्यन्ते। अस्मिन् रूपके बिन्दु च प्रवेशकः च न स्यात्। तदन्यथा वीथ्याः त्रयोदशाङ्गानि अत्र यथाशक्ति सम्यक् प्रयोजनीयानि। छन्दोदृष्ट्या– गायत्री, उष्णिक् इत्येतयोः प्राधान्यं दृश्यते; तथापि अन्ये अपि विविधाः छन्दः प्रयुज्यन्ते। विशिष्टा अपेक्षाः–त्रिशृङ्गारः– त्रिविधाः नायिकाः, त्रिकपटः–त्रिविधाः युक्तयः, त्रिविद्रवः– प्रवृत्तयः कार्यगत्या च सम्बन्धिन्यः।

कालविभागः अपि अत्र विशेषः– प्रथमाङ्कस्य कथा– एकाहोरात्रे (२४ घटीषु), द्वितीयाङ्कस्य कथा– अष्टघटीषु, तृतीयाङ्कस्य कथा– चतुर्घटीषु सम्पन्ना। उदाहरणरूपेण– "समुद्रमन्थन" इत्येतत् समवकाररूपकं निर्दिष्टं, यत्र देवासुरमथनस्य पौराणिकं आख्यानं समवकारस्य समस्तलक्षणैः युक्तं दृश्यते।

**६. डिमरूपकस्य स्वरूपम्–**

**आचार्यविश्वनाथेन डिमरूपकस्य लक्षणं यथाऽनुक्तम्–**

**मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः**
**उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः।।**

**अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः।**
**चत्वारोऽङ्काः मताः नेह विष्कम्भकप्रवेशकौ।।**

**नायकाः देवगन्धर्वयक्षरक्षोमहोरगाः।**

**भूतप्रेतपिशाचाद्याः षोडशान्त्युद्धताः।।**

**वृत्तयः कैशिकीहीनाः निविमर्शाश्च संधयः।**

**दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्जिताः।।**

डिमरूपकं प्रख्यात इतिवृत्तपर आधारितं दृश्यते। अत्र माया, इन्द्रजाल, संग्राम, क्रोध, उद्ध्रान्तता इत्यादिभिः चेष्टाभिः सह उपरागानाम् अपि विशेषः समावेशः भवति। अत्र अङ्गीरसः रौद्रः भवति, अन्ये सर्वे रसाः अङ्गरूपेण स्वीक्रियन्ते। चत्वारः (४) अङ्काः अत्र भवन्ति। विष्कम्भकः च प्रवेशकः च न प्रयुज्येते। अत्र देवाः, गन्धर्वाः, यक्षाः, राक्षसाः, महोरगाः, भूताः, प्रेताः, पिशाचाः च दृश्यन्ते। एते सर्वे षोडश (१६) नायकाः अत्यन्तं उद्धताः तथा शक्तिसम्पन्नाः भवन्ति। कैशिकीवृत्तेः अभावः; अन्याः वृत्तयः (भारती, सात्वती, आरभटी) तु प्रयुज्यन्ते। विमर्शसन्धेः अभावः, किन्तु अन्याः चतस्रः संधयः (मुख, प्रतिमुख, गर्भ, निष्कृति) अत्र भवन्ति।अत्र शान्त, हास्य, शृङ्गार एतेषां वर्जनम् कर्तव्यम्; शेषः षड्रसाः (रौद्र, करुण, वीभत्स, अद्भुत, भयानक, वीर) दीप्त्यात्मकं रूपेण प्रयुज्यन्ते। उदाहरणरूपेण— ''त्रिपुरदाहः'' इत्येतत् रूपकं भरतमुनिना डिमरूपकत्वेन निर्दिष्टम्।

**७. ईहामृगरूपकस्य स्वरूपम्—**

आचार्यविश्वनाथेन ईहामृगरूपकस्य लक्षणं यथाऽनुक्तम्—

**ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्तितः।**

**मुखप्रतिमुखे संधी तत्र निर्वहणमेव च।।**

**नरदिव्यावनियमो नायकप्रतिनायकौ।**

**व्याप्तौ धीरोद्धत्तावन्यो गूढभावादयुक्तकृत्।।**

**दिव्यस्त्रियमनिच्छन्तीं यः हारादिन इच्छति।**

**शृङ्गाराभासमध्यस्य किञ्चित्किञ्चित्प्रदर्शयेत्।।**

**पताकानायका दिव्या मर्त्या वा दशोद्धताः।**

**युद्धमानीय संरम्भं परं व्यानात् निवर्तते।।**

**महात्मानो बधप्राप्ता अपि वध्याः स्युरत्र न।।**

**एक एवात्र देवो नायक इत्येकदेशिनः।**
**दिव्यस्त्रीहेतुकं युद्धं नायकाः षडिति परे।।**

ईहामृगरूपकं मिश्रवृत्तिप्रयुक्तं दृश्यते, यत्र इतिवृत्तं लौकिकं च पौराणिकं च स्यात्। अस्य चत्वारः अङ्काः सन्ति। मुख, प्रतिमुख, निर्वहण एते त्रयः संधयः अत्र सन्ति। अत्र मनुष्यः वा दिव्यः धीरोद्धतः नायकः, प्रतिनायकः तु गूढभावयुक्तः, अयुक्तकर्मपरः च दृश्यते। दिव्यस्त्रीकं अपहरणं वा बलात्कृतग्रहणम्, या स्वयं न इच्छति, किन्तु नायकस्तां हारादिना इच्छति। शृङ्गाराभासः मुख्यः, स च अल्पम्— अल्पं प्रदर्शनीयः। दश दिव्या वा मर्त्याः उद्धतपुरुषाः पताकानायकाः सन्ति। युद्धं संरम्भपूर्वकं आरभ्यते, किन्तु कस्यचित् कारणेन तत् निवर्त्यते, सफलं न भवति। वध्याः अपि महात्मनः वधं न यान्ति, अर्थात् हिंसा परिहार्य। कश्चन मतं यत् एकः देवः नायकः, अन्ये तु वदन्ति षट् नायकाः सन्ति। नामव्युत्पत्ति 'ईहामृग' इत्यत्र "ईहा" (इच्छा). "मृग" (दुर्लभ वस्तु)— दुर्लभा कन्या इति अर्थः। सा नायकेन इच्छिता, अतः 'ईहामृग' इति रूपकनाम निर्दिष्टम्। उदाहरणम्—''**कुसुमशेखरविजयः**'' इत्यादि ईहामृग रूपकस्य आदर्शः दृष्टव्यः।

## ८. अङ्करूपकस्य स्वरूपम्—

आचार्यविश्वनाथेन अङ्करूपकस्य लक्षणं यथाऽनुक्तम्—

**उत्सृष्टिकाङ्क एकाङ्का नेतारः प्राकृता नराः।**
**रसाऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम्।**
**प्रख्यातमितिवृत्तं च कविबुद्ध्या प्रपञ्चयेत्।**
**भाणवत्सन्धिवृत्त्यङ्गान्यस्मिञ्जयपराजयौ।**
**युद्धं च वाचा कर्तव्यं निर्वेदवचनं बहु।।**

अङ्कः अथवा उत्सृष्टिकाङ्कः एकाङ्कमयः रूपकविशेषः। अत्र प्राकृताः नराः नायकत्वेन स्वीकृताः, सामान्यजनाः एव प्रमुखपात्राणि भवन्ति। करुणरसः अत्र प्रधानः, यः नायकनायक्यादीनां दुःखवृत्तान्तेन उद्दीप्यते। अत्र बहुस्त्रीपरिदेवितं दृश्यते, यत्र नायिकाद्याः स्त्रियः दुःखविभ्रान्त्या विलपन्ति, रुदन्ति च। अत्र प्रख्यातं पौराणिकं वा इतिहाससम्बद्धं वृत्तं भवति, यत् कविना

स्वबुद्ध्या विस्तारपूर्वकं नाट्यरूपेण समर्प्यते। अस्य रूपकस्य सन्धयः, वृत्तयः च भाणरूपकसमानाः भवन्ति, अर्थात् मुख तथा निर्वहणसन्धी प्रमुखे स्तः। जय—पराजययोः वर्णनम् अत्र दृश्यते, यत्र युद्धदशायां शब्दतः (वाचा) युद्धं दृश्यते, न तु दृश्यरूपेण। अत्र वाक्कलहः (कठोरशब्दयुद्धं) च निर्वेदवचनानि (वैराग्य, शोकयुक्त वाक्य) बहुलतया दृश्यन्ते।

'अङ्क' इत्येतत् नाम सामान्यनाटकाङ्केन भ्रमं जनयति, अतः केचित् विद्वांसः 'उत्सृष्टिकाङ्क' इति नाम उपयोगं युक्तं मन्यन्ते। 'उत्सृष्टिका' इत्यस्य अन्यं व्युत्पत्तिमूलं मतं यत्— सृष्टेः उत्क्रान्तिः, अर्थात् विषयवृत्तं विषादात्मकं, शोकात्मकं च भवति, इति। उदाहरणम्—मृष्टाययातिः इत्ययं रूपकः अङ्करूपकस्य उत्तमं उदाहरणं मान्यते।

## ६. वीथी रूपकस्य स्वरूपम्—

आचार्यविश्वनाथेन ''वीथी'' नामकस्य रूपकस्य लक्षणं यथाऽनुक्तम्—

**वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते।**
**आकाशभाषितैरुक्तेश्चित्रां प्रत्युक्तिमाश्रितः।**

**सूचयेद् भूरि शृंगारं किञ्चिदन्यान्रसान् प्रति।**
**मुखनिर्वहणे सन्ध्यर्थप्रकृतयोऽखिलाः।।**

''वीथी'' इति रूपकं लघुनाट्यरूपकस्य एकं विशिष्टं प्रकारं भवति, यः केवलं एकाङ्कमयम् अस्ति। अस्मिन् रूपके एक एव नायकः कल्प्यते, यः समस्तं नाट्यवृत्तं स्वयमेव वहति। एषः नायकः आकाशभाषितान् उपयोग्य—काल्पनिकपात्रैः सह संवादस्य भ्रामकं दृश्यं निर्माय— चित्रप्रत्युक्तिप्रधानं संलापं करोति। अस्य रूपकस्य प्रमुखो रसः शृंगारः एव अस्ति, यद्यपि अन्ये अपि रसाः अल्पमात्रेण प्रयुज्यन्ते। अत्र केवलं मुखसन्धिः च निर्वहणसन्धिः एव दृश्येते। अर्थप्रकृतयः—यथा अर्थविकासस्य भेदाः—समग्ररूपेण यथासम्भवम् अत्र प्रयुज्यन्ते। वृत्त्याः परिप्रेक्ष्ये अत्र कैशिकीवृत्तिः प्रमुखा दृश्यते, यतः शृंगारप्रधानं नाट्यं भवति। ''वीथी'' रूपकस्य वैशिष्ट्यं तु तस्य त्रयोदश अङ्गेषु एव प्रकाशते, यैः नाट्यगतव्यवहारस्य विविधप्रकाराः निरूप्यन्ते। एते अङ्गानि उद्घात्यकः, अवलगितम्, प्रपञ्चः, त्रिगतः, छलम्, वाक्केलिः, अधिवलः, गण्डः,

अवस्यन्दितम्, नालिका, असत्प्रलापः, व्याहारः, मृदवः च। एते सर्वे अङ्गानि वीथीरूपकस्य सौन्दर्यं वर्धयन्ति तथा च तस्य रसपरिपाकं साधयन्ति। अतः ''वीथी'' रूपकम् स्वल्पप्रमाणकं सत्त्वे अपि, सम्पूर्णरससंवेदनायाः सामर्थ्ययुक्तं नाट्यरूपं दृश्यते।

## १०. प्रहसन रूपकस्य स्वरूपम्–

आचार्यविश्वनाथेन 'प्रहसन' नामकस्य रूपकस्य लक्षणं यथाऽनुक्तम्–

**भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गे विनिर्मितम्।**
**भवेत्प्रहसनं वृत्तं निन्द्यानां कविकल्पितम्।।**

**अत्र नारभटी, नापि विष्कम्भकप्रवेशकौ।**
**अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा।।**

**तत्र तपस्विभगवद्विप्रप्रभृतिस्वत्र नायकः।**
**एको यत्र भवेद् धृष्टो हास्यं तच्छुद्धमुच्यते।।**

यथा–कन्दर्पकेलिः।। द्वितीयभेदः–आश्रित्य कञ्चन जनं संकीर्णमिति तद्विदुः। यथा–'धूर्तचरितम्'।। प्रहसनं नाम रूपकम् एकं विशिष्टं हास्यप्रधानं रूपकमस्ति, यस्य स्वरूपे अनेकाः विशेषताः दृश्यन्ते। अस्य रूपकस्य रचना भाणवत् क्रियते, यत्र केवलं मुखसन्धिः च निर्वहणसन्धिः एव सन्ति, तथा सन्ध्यङ्गानि अपि लास्याङ्गानि च भाणरूपकवत् आयोज्यन्ते। अत्र आरभटीवृत्तेः अभावः स्पष्टतया दृश्यते, तथा विष्कम्भकः च प्रवेशकः च न प्रयुज्येते। अस्य मुख्यः रसः हास्यः एव अस्ति, यः अङ्गीरसत्वेन प्रतिष्ठितः। वीथ्यङ्गानां प्रयोगः अत्र ऐच्छिकः, अनिवार्यः न भवति।

प्रहसनस्य द्वौ भेदौ दृश्येते– शुद्धप्रहसनं च संकीर्णप्रहसनं च। शुद्धप्रहसने, यत्र तपस्वी, संन्यासी, ब्राह्मणः इत्यादयः श्रद्धेयजनाः धृष्टस्वभावेन नायकताम् आवहन्ति, तादृशं प्रहसनं शुद्धप्रहसनम् इति कथ्यते। तस्य उदाहरणं कन्दर्पकेलिः नाम रूपकं अस्ति। संकीर्णप्रहसने तु, यत्र धूर्तः, चेटः, गणिका, विटः इत्यादयः निन्द्याः व्यक्तयः नायकताम् वहन्ति, तादृशं संकीर्णप्रहसनम् इति कथ्यते। केचन आचार्याः वदन्ति यत् तादृशं प्रहसनं द्व्यङ्कात्मकं अथवा एकाङ्कात्मकं भवति, यत्र अनेकाः धृष्टाः अपि

नायकरूपेण दृश्यन्ते। तस्य उदाहरणरूपेण धूर्तचरितम्, लटकमेलकः च निर्दिष्टे।

भरतमुनिना अपि संकीर्णप्रहसनस्य स्वरूपं स्पष्टतया निर्दिष्टम्– यत्र वेश्या, चेटः, नपुंसकः, विटः, धूर्तः, बन्धकी च दृश्यन्ते, तथा च तेषां वेषः, परिच्छदः, चेष्टाः च अविकृतरूपेण सन्ति, तत्र तत् संकीर्णप्रहसनम् इति कथ्यते। यत्र तु षण्ढः, कञ्चुकिन्, तापसः इत्यादयः, भुजंगः, चारणः, भटः इत्यादीनां वेषं वाणीं च अनुकरोति, तत्र तत् विकृतप्रहसनम् इति ज्ञेयम्, यत् अपि संकीर्णस्य एव एकः भेदः अस्ति, अतः पृथक् न निर्दिष्टम्। एतेन प्रहसनं केवलं हास्यस्य साधनं न, अपि तु सामाजिकदोषाणां प्रहसनात्मकं चित्रणम् अपि भवति।

**श्रव्यकाव्यस्य भेदानां विवरणं–**

आचार्यविश्वनाथेन 'साहित्यदर्पणे' षष्ठे परिच्छेदे दृश्यकाव्य–वर्णनानन्तरं श्रव्यकाव्यस्य भेदानां विवरणं प्रदत्तम् साहित्यदर्पणस्य षष्ठे परिच्छेदे आचार्यविश्वनाथः दृश्यकाव्यानन्तरं श्रव्यकाव्यस्य विवेचनं करोति। सः प्रारम्भे एव श्रव्यकाव्यस्य स्वरूपं निर्दिशति–''श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यगयं द्विधा'' इति। अर्थात् यत् काव्यम् केवलं श्रोतव्यं भवति, न तु रंगमञ्चे अभिनययोग्यम्, तदेव श्रव्यकाव्यं कथ्यते। एतत् स्वपाठेन वा परश्रोतृणा वा रसानुभूतिसम्पादकं भवति। अस्य द्वौ प्रधानौ भेदौ स्तः– पद्यकाव्यम् एवं गद्यमयकाव्यम्। पद्यकाव्यं तु विविधछन्दोबद्धं तद्वाक्यमस्ति, यत्र रसादीनां विवक्षा छन्दानुग्राहिता भवति। आचार्यविश्वनाथः अत्र पञ्च पद्यभेदान् निर्दिशति– मुक्तकम्, युग्मकम्, सान्दानितकम्, कलापकं, कुलकं च। तेषां लक्षणं सः सूत्ररूपेण दर्शयति–

**''छन्दोबद्धं पदं पद्यं तेन मुक्तेन मुक्तम्।**
**द्वाभ्यां तु युग्मकं सान्दानितकं त्रिभिरिष्यते।**
**कलापकं चतुर्भिश्च पञ्चाभिः कुलकं मतम्''**

अत्र स्पष्टं प्रतिपाद्यते यत् मुक्तकं तु तादृशं पद्यमस्ति, यत्र प्रत्येकः श्लोकः स्वतंत्रः, न तु अन्यैः श्लोकैः संबद्धः। द्वाभ्यां श्लोकाभ्यां रचितं युग्मकम्,

त्रिभिः सान्दानितकम्, चतुर्भिः कलापकं, पञ्चभिः अथवा अधिकैः कुलकं भवति। एतेषां सर्वेषां एकः छन्दः अपेक्षितः। पद्यकाव्यं विषयवस्त्वनुसारतः द्विधा– महाकाव्यम् तथा खण्डकाव्यम्। खण्डकाव्यलक्षणं केवलं आचार्यविश्वनाथेन निर्दिष्टम्, यदन्यैः पूर्वालंकारिकैः न प्राप्यते। खण्डकाव्यं यत्र जीवनस्य केनचन एकदेशवृत्तान्तस्य संक्षिप्तं वर्णनं भवति, सर्गसन्धिवर्जितं च। आचार्यः लक्षणरूपेण वदति–

**''भाषाविभाषानियमात्काव्यं सर्गमुज्झितम्।**
**एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम्।**
**खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च।।''**

उदाहरणरूपेण मेघदूतम् इत्यादिकं खण्डकाव्यं गण्यते। अत्र सर्गबन्धनं नास्ति, नापि सन्धीनां रचना अपेक्ष्यते। ''एकदेशानुसारी'' इति पदेन सः काव्यस्य केवलं एका घटनाया विवरणं बोधयति, परन्तु ''एकदेश'' शब्दस्य परिशीलनं न दत्तम्। महाकाव्यं तु सर्गबद्धं विस्तीर्णं काव्यमस्ति, यत्र नायकः प्रमुखं स्थानं धारयति, रसदृष्ट्या एकः स्थायीरसः प्रधानः भवति। आचार्यः विस्तीर्णं लक्षणमालिका प्रस्तुतयति–

**''सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।**
**सद्वंशः क्षत्रियो वापि धीरोदात्तगुणन्वितः।।**

**एकवंशभवा भूपाः कुलजा बहवोऽपि वा।**
**शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।।**

**अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसङ्गयः।**
**इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।।**

**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्।**
**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।।**

**नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिकाः सदा।**
**नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।।**

**सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।**

**सन्ध्यासूर्येन्दुरजनीप्रदोषध्वराः।।**

**रणप्रयाणोपयममन्त्रपुत्रेदयादयः।**

**वर्णनीया यथायोगं सांगोपाङ्गा अमी इह।।**

**कवेः वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।**

**नामास्य, सर्गोपादेयकथया सर्गनाम तु।।''**

अत्र स्पष्टं प्रतिपाद्यते यत् महाकाव्ये एकः धीरोदात्तनायकः भवेत्, यो देवः वा क्षत्रियः वा कुलीनः राजा स्यात्। प्रधानरसः शृङ्गारः, वीरः वा शान्तः, अन्ये रसाः तस्य अङ्गभूताः। महाकाव्ये इतिहासे वा प्रसिद्धे वा वृत्तान्ते आधारितं विषयवस्तु भवेत्। फलरूपेण धर्मार्थकाममोक्षेभ्यः कश्चन उद्देशः प्राप्यः। न्यूनतः अष्टौ सर्गाः स्युः, प्रत्येकसर्गे प्रकृतिवर्णनं, दिनरात्रिवर्णनं, नायककर्मवर्णनं, तथा सर्गान्ते भाविसर्गस्य संकेतश्च अपेक्षितः। गद्यकाव्यं तु छन्दरहितं साहित्यरूपं भवति, यत्र काव्यरसस्य प्रस्तुतिरेव प्रधानं, न तु छन्दानुग्रहः। आचार्यः अत्र गद्यस्य चत्वारः भेदान् निर्दिशति—

**''वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।**

**भवेदुत्कलिकाप्रायं चूर्णिका च चतुर्विधम्।**

**आद्यं समासरहितं वृत्तभागयुतं परम्।**

**अन्यदीर्घसमासाढ्यं तुर्यं चाल्पसमासकम्।।''**

अत्र 'मुक्तकम्' समासरहितं गद्यं, 'वृत्तगन्धि' गद्यं तु छन्दच्छायायुक्तं, 'उत्कलिकाप्रायं' दीर्घसमासयुक्तं, 'चूर्णिका' तु लघुसमासयुक्तं। गद्यकाव्यस्य अन्तर्भेदरूपेण कथा तथा आख्यायिका आचार्येन निर्दिष्टे—

**''कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।**

**क्वचिदत्र भवेदार्या क्वचिद्वक्त्रपवक्त्रके।**

**आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम्।।''**

**उदाहरणरूपेण—** कादम्बरी कथा श्रेण्यां गण्यते। यत्र पद्येन देववन्दना, पश्चात् गद्यमयी कथा प्रस्तुति च।

**''आख्यायिका कथावत्स्यात्कवेर्वंशानुकीर्तनम्।
अस्यातन्यकवीनां च वृत्तं पद्यं क्वचित्क्वचित्।।
कथांशानां व्यवच्छेद आश्वास इति बध्यते।
आर्यावक्त्रपवक्त्राणां छन्दसा येन केनचित्।।
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम्।''**

आख्यायिका तु कथायाः सदृशी, परन्तु कविवंशवर्णनयुक्ता, पद्यान्तर्भूतवर्णना च। आख्यायिकायाः विभागाः ''आश्वासः'' इति कथ्यन्ते, यथा—हर्षचरितम्। एवं साहित्यदर्पणकारः आचार्यविश्वनाथः श्रव्यकाव्यस्य पद्यगद्यभेदौ, तयोश्च उपभेदान् अत्यन्तं सुसंगतं लक्षणशृङ्खलया सुस्पष्टं रूपेण निर्दिशति।

**निष्कर्षः—**

आचार्यविश्वनाथेन 'साहित्यदर्पणे' काव्यस्य स्वरूपं विशदं रूपेण निरूपितम्। तेन संस्कृतकाव्यं द्विविधं स्वीकृतम्— श्रव्यकाव्यं च दृश्यकाव्यं च। श्रव्यकाव्ये पाठकस्य वा श्रोतुः रसास्वादः मुख्यः, यथा महाकाव्येषु, खण्डकाव्येषु, गद्यकाव्येषु च। दृश्यकाव्यं तु नाटकादिकं भवति, यत्र अभिनयेन सह दृश्यरूपेण काव्यं प्रत्यक्षीकृत्य दर्शकानां हृदये रसप्रवाहितिः क्रियते। एते द्वौ प्रकारौ—श्रव्यं दृश्यं च— केवलं रसपरम्परायाः साधनं न, अपि तु संस्कृतसाहित्यस्य समग्रं वैभवं दर्शयतः। आचार्यविश्वनाथस्य अयं वर्गीकरणः काव्यरचनायाः सम्यक् दिशा—निर्देशं दत्ते। अतः, अस्य वर्गीकरणस्य महत्त्वं साहित्यशास्त्रे विशेषतया प्रकाशते।

***

# इतिहासे नगरनिर्माणविमर्शः

**डॉ. आर. शेषाद्रिः**
*असि. प्रोफेसर संस्कृतविभागः*
*स्वामी दयानंद कॉलेज ऑफ आर्ट्स एंड साइंस*
*मंजक्कुडी, तिरुवरूर, तमिलनाडु*

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती** इत्यभिधीयमानायां संस्कृतभाषायां न केवलं नानाविधशास्त्रग्रन्थाः साहित्यग्रन्थाः वर्तन्ते अपि च जीवनोपयगिविषयप्रतिपादनपराः ग्रन्थाश्च बहवः वर्तन्ते। तद्ग्रन्थस्थानां विषयाणां समीक्षणेन नवानंशान् ज्ञातुं शक्नुमः प्रतिदिनमिति तु निश्चप्रचम्। एतेषु ग्रन्थेषु याज्ञवल्क्यस्य याज्ञवल्क्यस्मृत्याख्यः ग्रन्थः, मनोः मनुस्मृतिः, भर्तृहरेः शतकत्रयमित्यभिधीयमानं नीतिबोधकग्रन्थः, चरकाचार्यस्य चरकसंहितेति गीयमानः आयुशास्त्रग्रन्थः च अध्ययनपथि प्रतिदिनं नवानंशान् पाठकेभ्यः बोधयन्तः वर्तन्ते। न केवलमेते ग्रन्था एव अपि च बहवः वर्तन्ते। तत्र इतिहासे वर्णित नगरनिर्माणविषयमधिकृत्य पश्यामः।

## नगरम्

नगरशब्दस्य व्युत्पत्तिम् आदौ जानीमः। तत्र शब्दकल्पद्रुमे यद्यपि महान् सङ्केतः अस्मिन् सन्दर्भे प्रदत्तः दृश्यते तथाऽपि तेषु सङ्केतेषु अपेक्षितान् कांश्चन सङ्केतानेव अत्र दातुम् ईहे। नपुंसकलिङ्गोऽयं नगरशब्दः । नगा इव प्रासादादयः सन्ति यत्र । नगा इत्यनेन न गच्छन्ति इति व्युत्पत्त्या पर्वताः वा वृक्षाः निर्दिश्यन्ते। इत्थञ्च पर्वतवद् वृक्षवद्वा यस्मिन् प्रदेशे (भूमिविशेषः प्रकृते) प्रासादायः वर्तन्ते तच्च स्थलं नगरम् इति नाम्ना व्यपदिश्यते। अस्यास्ति तथा अस्मिन् अस्ति एतयोः अर्थयोः ऊष, सुषि, मुष्क, मध तेभ्यः शब्देभ्यः प्रथमासमर्थेभ्यः र प्रत्ययः भवति इत्यर्थकेन **ऊषसुषिमुष्कमधो रः** (अष्टाध्यायी ५.२.१०७) इत्यनेन सूत्रेण तद्धितः रप्रत्ययः विहितः वर्तते। तस्मिन् सूत्रे नगपांसुपाण्डुभ्यश्च इत्येकं वार्तिकं वररुच्याचार्येण पठितं दृश्यते। तस्य च वार्तिकस्यायमर्थः यत् नग–पांसु–पाण्डु इत्येतेभ्यः शब्देभ्यः अपि मतुबर्थयोः

रप्रत्ययः भवति इति। एवञ्च अनेन वार्तिकेन नगशब्दात् बहुलोकवासस्थानम् अत्र अस्ति इत्यर्थे रप्रत्यये नगरशब्दो जायते। अस्यैव नगरशब्दस्य नैके पर्यायशब्दाः वर्तन्ते। ते च यथा– पूः, पुरी, पुरिः, पुरम्, नगरी, पत्तनम्, पट्टनम्, पट्टनी, पुटभेदनम्, पटभेदनम्, स्थानीयम्, निगमः इत्यादयः।।[1]

अत्र प्रत्येकं शब्दस्य व्युत्पत्तिरीत्या आलोचनं कुर्मो यदि तर्हि नूनं क्वचित् रक्षणं, वास इत्यादिषु अर्थेषु साम्यत्वं द्रष्टुं शक्नुमः। तद्यथा– पूः, पुरी इत्येतौ शब्दौ पृ पालनपूरयोः इत्यस्माद् धातोः निष्पन्नौ। पूर्यते जनैः इति व्युत्पत्तिः उच्यते। क्रीडार्थं नगाः वृक्षाः पर्वताः वा सन्ति अत्र इति नगरी। पत्तनशब्दस्तु पत्लृ गतौ इत्यस्माद् धातोः निष्पन्नः। पतन्ति जनाः अत्र इति व्युत्पत्तिस्तु पत्तनशब्दस्य ज्ञेया। केचन पट्टणम् इति व्यवहरन्ति। तत्र च पट गतौ इत्यस्माद् धातोः निष्पन्नस्य शब्दस्य पटन्ति गच्छन्ति जनाः अत्र इति व्युत्पत्तिः आश्रयणीया। पुटमगारं भिद्यते अत्र इति व्युत्पत्तिस्तु पुरभेदनम् इति शब्दस्य। तत्र भिदिर् विदारणे इति धातुः भेदनम् इति शब्दस्य मूलम्। अत्र पुटभेदनम् इत्यस्य अन्या अपि व्युत्पत्तिः आश्रियते क्वचित्। सा च– पुटाः घृतघटादयो जनसंमर्दद् अस्मिन् भिद्यन्ते इति। स्थानीयम् इति शब्दस्तु ष्ठा गतिनिवृत्तौ इत्यस्माद् धातोः निष्पन्नः। तिष्ठन्ति अस्मिन् इति व्युत्पत्तिः, अकुतोभयत्वात् स्थानाय वासाय हितम् इति व्युत्पत्तिर्वा स्थानीयशब्दस्य आश्रयणीया। नियतं गच्छति जनः अत्र इति व्युत्पत्तिस्तु निगमशब्दस्य। प्रायः प्रधानपुरनाम्नां निर्देशायायं शब्दः प्रयुज्यते। यथा वृक्षस्य शाखा तथा प्रधाननगरस्य अङ्गं शाखानगरम् इति शब्देन व्यवह्रियते। तदर्थः प्रधानपुराद् अन्यपुरनिर्देशाय अयं शब्दः उपयुज्यते। विश प्रवेशने इत्यस्मात् धातोः निष्पन्नः वेशशब्दः। विशन्ति कामुकाः अत्र इति व्युत्पत्तिस्तु अत्र समाश्रियते। वेश्याजनस्य समाश्रयः वासस्थानम् इति कथ्यते। इत्थञ्च सामूहिकरूपेण यत्र जनाः सन्ति तच्च स्थलं नगरशब्देन व्यवह्रियते इति सुष्ठु वक्तुं शक्नुमः।

---

१. पूः स्त्री पुरीनगर्यो वा पत्तनं पुटभेदनम्। स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात् पुरम्।।

तच्छाखानगरं वेशो वेश्याजनसमाश्रयः।। –अमरकोशः २.२.१

## श्रीमद्रामायणे नगरविषये

### अयोध्या

महर्षिणा वाल्मीकिना प्रणीते भगवतः श्रीरामचन्द्रस्य चरितवर्णनपरे श्रीमद्रामायणे आदावेव बालकाण्डे पञ्चमे सर्गे मनुना निर्मितायाः कोशलजनपदान्तर्वर्तिन्याः अयोध्याः वर्णने नगरनिर्माणविषये केचन सङ्केताः लभ्यन्ते। तदत्र यथाशक्ति प्रतिपाद्यते। तत्र–

**कोसलो नाम मुदितः स्फीतो जनपदो महान्।**
**निविष्टः सरयूतीरे प्रभूतधनधान्यवान्।।**

**अयोध्या नाम नगरी तत्रासील्लोकविश्रुता।**
**मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम्।।**[२]

इत्येभिः पद्यैः सरयूतीरे राजभिः धर्मतः परिपालनात् मुदितः, उत्तरोत्तरं वृद्धिं प्राप्तः, प्रभूतधनधान्यवांश्च महान् जनपदः कोसलाख्यः आसीत्। तस्मिन् जनपदे मनुना मानवेन्द्रेण स्वयं निर्मिता सप्तपुर्यन्तर्गता लोकविश्रुता अयोध्या नाम पुरी आसीत् इति कोसलजनपदान्तर्वर्तिन्याः अयोध्यायाः परिचयं यच्छति। तत्र –

**अयोध्या मथुरा माया काशी काञ्च्यवन्तिका।**
**पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः।।**[३]

इति गरुडपुराणोक्तरीत्या सप्तसु मोक्षदायिकासु पुरीषु अन्यतमा इयम् अयोध्या इति स्मर्तव्यम्। अस्तु श्रीमद्वाल्मीकि रामायणे प्रथमे बालकाण्डे तन्नगरवर्णने–

**आयता दश च द्वे च योजनानि महापुरी।**
**श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा।।**

**राजमार्गेण महता सुविभक्तेन शोभिता।**
**मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः।।**

---

२. श्रीमद्वाल्मीकिरामायणम्, बालकाण्डः, ५. ५–६

३. गरुडपुराणम्, धर्मकाण्डः, ३८.५–६

**तां तु राजा दशरथो महाराष्ट्रविवर्धनः।**
**पुरीमावासयामास दिवि देवपतिर्यथा।।**[४]

इत्येवं वदन्तः पुर्याः विषये वर्णयति। तत्र सरयूनदीतीरे वर्तते इयं द्वादशयोजनदीर्घा, त्रीणि योजनानि विस्तीर्णा, शोभनरूपेण विभक्तबहिर्मार्गवती च आसीत्। किञ्च नित्यशः मुक्तपुष्पावकीर्णेन जलसिक्तेन महता राजमार्गेण शोभिता आसीत्। तदर्थः चतसृषु दिक्षु पुष्पैः अवकीर्णा नाम नगरद्वारे पुष्पवृक्षाः आसन्निति परम्परया बोधयति। अग्रे–

**कपाटतोरणवतीं सुविभक्तान्तरापणाम्।**
**सर्वयन्त्रायुधवतीमुषितां सर्वशिल्पिभिः।।**

**सूतमागधसंबाधां श्रीमतीमतुलप्रभाम्।**
**उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलाम्।।**

**वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीम्।**
**उद्यानाम्रवणोपेतां महतीं सालमेखलाम्।।**[५]

इत्येभिः पद्यैः कपाटादिविषये वर्णयति। प्राकरस्योपरि सर्वशिल्पिभिः शोभनरूपेण स्थापितैः सर्वयन्त्रैः सर्वायुधैश्च इयं पुरी सदा रक्षिता आसीत्। किञ्च शतघ्न्यः नाम प्राकारस्य संरक्षणार्थम् अयोभारनिर्मिताः आयुधविशेषाश्च प्राकारस्योपरि स्थापिताः आसन्। सा पुरी आम्रवणोपेतैः उद्यानैः परिपूरिता आसीत्। सालवनं मेखला इव परिवृतम् आसीत् इति पुर्याः परिवेष्टनविषये वदति। अपि च–

**दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम्।**
**वाजिवारणसंपूर्णां गोभिरुष्ट्रैः खरैस्तथा।।**

**सामन्तराजसंघैश्च बलिकर्मभिरावृताम्।**
**नानादेशनिवासैश्च वणिग्भिरुपशोभिताम्।।**[६]

---

४. श्रीमद्वाल्मीकिरामायणम्, बालकाण्डः, ५. ७–६

५. श्रीमद्वाल्मीकिरामायणम्, बालकाण्डः, ५. १०–१२

६. श्रीमद्वाल्मीकिरामायणम्, बालकाण्डः, ५. १३–१४

इति एभिः पद्यैः दुर्गस्य विषये वर्णयति। जलदुर्गेण गम्भीरा परिखा यस्यां (पुर्याम्) ताम् अयोध्याम् इत्यर्थः। एवञ्च प्रकृते औदक—पार्वत—धान्वन—वनाख्येषु चतुर्विधेषु दुर्गेषु जलदुर्गं निर्दिष्टं वर्तते। किञ्च अन्यैः दुरासदाम् इत्यनेन मित्रैरपि दुःखगम्याम् इति कथनेन शत्रुभिः अशक्यसमीपगमनां पुरीं राजा दशरथः शशंस इत्यर्थः।

पुनश्च —

**प्रासादे रत्नविकृतैः पर्वतरिव शोभिताम।**
**कूटागारैश्च सम्पूर्णाम् इन्द्रस्येवामरावतीम्।।**

**चित्रामष्टापदाकारां वरनारीगणायुताम्।**
**सर्वरत्नसमाकीर्णां विमानगृहशोभिताम्।।**

**गृहगाढामविच्छिद्रां समभूमौ निवेशिताम्।**
**शालितण्डुलसंपूर्णाम् इक्षुकाण्डरसोदकाम्।।**

**दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा।**
**नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम्।।**

**विमानमिव सिद्धानां तपसाधिगतं दिवि।**
**सुनिवेशितवेश्मान्तां नरोत्तमसमावृताम्।।**

**ये च बाणैर्न विध्यन्ति विविक्तमपरापरम्।**
**शब्दवेध्यं च विततं लघुहस्ता विशारदाः।।**[७]

इत्येभिः श्लोकैः प्रासादादिविषये वर्णयति। पुर्याः प्रासादः रत्नैः शोभितः आसीत्। विमानगृहशोभिताम् इत्यनेन तादृशम् उन्नतानि विमानयुक्तानि गृहाणि आसन् इति वर्ण्यते। दिवि सिद्धानां विमानमिव पृथिव्याम् अनुत्तमाम् इमां पुरीम् अयोध्याम् आवासयामास। अन्ते वनविषये एकेनैव पद्येन वर्णयति—

**सिंहव्याघ्रवराहाणां मत्तानां नदतां वने।**

---

७. श्रीमद्वाल्मीकिरामायणम्, बालकाण्डः, ५. १५—२०

**हन्तारो निशितैः शस्त्रैर्बलाद्वाहुबलैरपि।।**[८]

यद्यपि सिंहव्याघ्रादीनां हन्तार इति निर्देशात् तत्पुरवासिनां बलविषये वर्णयति तथाऽपि सूक्ष्मतया निरीक्षणं कुर्मश्चेदवगन्तुं शक्नुमः यत् पुरीं वेष्टयित्वा वनमासीत् यत्र सिंहव्याघ्रादयः मृगा अपि रक्षकरूपेण विहरन्ति स्म इति।।

**लङ्का**

श्रीमद्वाल्मीकिरामायणस्य सुन्दरकाण्डे लङ्कायाः वर्णनं समुपलभ्यते। द्वितीयसर्गाद् आरभ्य हनूमतः लङ्कापुरीप्रवेशवर्णनेन सह लङ्कायाः वर्णनमपि उपलभ्यते। तस्मात् लङ्कायाः आकारः (नगरस्य आकारः) कथमासीत् इति ज्ञातुं शक्नुमः। किञ्च एकस्य नगरस्य वा एकायाः पुर्याः आकारविषये तत्रैव महर्षिणा बहुधा प्रतिपादितं दृश्यते। तदात्वे नगरनिर्माणं कथमासीत् इति एभिः वर्णनैः ज्ञातुं शक्नुमः। इमानि वर्णनानि आधारीकृत्यैव पश्चात् अस्माकं स्मृतिग्रन्थकाराः स्वीयग्रन्थेषु नगरस्य निर्माण के के अंशाः अवधेयाः इति प्रत्यपादयन्।

द्वितीये सर्गे त्रिकूटस्य तटे स्थित्वा हनूमान् लङ्कां ददर्श इत्युक्तमासीत्। तदा आरभ्य रावणान्तःपुरप्रवेशपर्यन्ते कीदृशी आसीत् सा पुरी इति वर्णयति आदिकविः।

**स तस्मिन्नचले तिष्ठन् वनान्युपवनानि च।**

**स नगाग्रे स्थितां लङ्कां ददर्श पवनात्मजः।।**[९]

इति प्रारभते। अस्मादारभ्य एकस्याः पुर्याः सीमा कथम् आसीत्, पुर्याः अन्ते प्रासादाः, भवनानि, उद्यानानि, वापीश्च कीदृशरूपेण आसन् इति लङ्कायाः वर्णनेन अस्मभ्यं बोधयति। तद्वर्णनप्रतिपादकानि पद्यानि यथा–

**शाद्वलानि च नीलानि गन्धवन्ति वनानि च।**

**गण्डवन्ति च मध्येन जगाम नगवन्ति च।।**[१०]

---

८. श्रीमद्वाल्मीकिरामायणम्, बालकाण्डः, ५. २१

९ श्रीमद्वाल्मीकिरामायणम्, सुन्दरकाण्डः,०२.०८

१०. श्रीमद्वाल्मीकिरामायणम्, सुन्दरकाण्डः,०२.०६

अत्र इदमवेध्यं नगर्याः सीमारूपेण शाद्वलानि, वनानि आसन् यत्र च नैके वृक्षाः संस्थापिताः आसन्निति। तान् अतिक्रम्य हनुमान् लङ्कायाः अन्ते प्रविष्टवान् इति वर्णयति।

किञ्च—

**सरलान् कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान्।**
**प्रियालून्मुचुलिन्दांश्च कुटजान् केतकानपि।।**

**प्रियङ्गून् गन्धपूर्णांश्च नीपान् सप्तच्छदांस्तथा।**
**असनान् कोविदारांश्च करवीरांश्च पुष्पितान्।।**

**पुष्पभारनिबद्धांश्च तथा मुकुलितानपि।**
**पादपान् विहगाकीर्णान् पवनाधूतमस्तकान्।।**

**हंसकारण्डवाकीर्णान्वापीः पद्मोत्मलायुताः।**
**आक्रीडान् विविधान् रम्यान्विविधांश्च जलाशयान्।।**

**संततान् विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः।**
**उद्यानानि च रम्याणि ददर्श कपिकुञ्जरः।।**

**समासाद्य च लक्ष्मीवल्लङ्कां रावणपालिताम्।**
**परिखाभिः सपद्माभिः सोत्पलाभिरलंकृताम्।।**[११]

सङ्क्षेपेण अर्थः प्रतिपाद्यते— पुर्याः बहिः अर्थात् सीमाप्रदेशे सरल—कोविदारादयः उन्नताः वृक्षाः आसन्। क्वचित् पुष्पवृक्षाः क्वचिच्च कण्टकवृक्षाश्च आसन्। क्वचित् स्वत एव जातवृक्षसमूहः, क्वचित् स्थापितवृक्षसमूहश्च आसीत्। एवं महान् समुद्रः सीम्नि आसीदिति तु ज्ञातपूर्व एव। सीम्नाम् अन्तेषुसीमरक्षणार्थं नदी, शिलाकूटः, वनं, बदरा नाम ओषधिः कश्चन वृक्षविशेषो वा, दरी, सेतुबन्धः, चिरकालस्थायिनः वृक्षान् इत्येतान् स्थापेयदिति आचार्याणां कौटिल्यानां वचनानि कदाचित् अस्मात् वर्णनादेव

११. श्रीमद्वाल्मीकिरामायणम्, सुन्दरकाण्डः, ०२.०६—१४

प्रभावितानि स्युः।

पुर्याः अन्ते च हंसाद्युपेताः वापीः आसन्। क्रीडनयोग्याः विविधाः जलाशयाः रम्याणि उद्यानानि च आसन् इति वर्णयति। एनमपि अंशम् आचार्यः कौटिल्यः प्रोवाच। तद्यथा एकस्य ग्रामस्य उपभोगः चतुः प्रकारेण ज्ञेयः इति। क्षेत्रेण, वास्तुना, गोप्रचारतया, देवतास्थान–आराम–तटाक–रथ्या–उदपानादिभिश्च। क्षेत्रशब्दे कृषिकार्यं विवक्षितम्, वास्तुशब्देन वास्त्वाधिरताः प्रासादभवनादयः निर्दिश्यन्ते। गोप्रचारशब्देन पशूनामपि उचितानि स्थानानि भवेयुरिति निर्दिश्यते। अन्ते च केचन दैविकभौगिकस्थानान्यपि स्युरिति वदति। देवतास्थानं नाम मन्दिराणि, आरामो नाम उद्यानम्, तटाकम्, रथ्या शब्देन वीथयः विवक्षिताः, उदपानशब्देन कूपादयः लघुजलाशयाः विवक्षिताः। इत्थंप्रकारेण कृषिसौकर्यार्थम्, उषितुम्, प्राणिनां सौकर्यार्थम्, दैविकभौगिकोप–भोगार्थञ्च स्थानानि सम्यग्विभज्य कर्तव्यानि भवन्ति इति सूचयति। तथा च लङ्कापुर्याः वर्णनेऽपि इमे अंशाः द्रष्टुं शक्याः।

किञ्च–

**अट्टालकशताकीर्णां पताकाध्वजमालिनीम्**[१२]

**वप्रप्राकारजघनां विपुलाम्बुनवाम्बराम्।**

**शतघ्नीशूलकेशान्तामट्टालकवतंसकाम।।**[१३]

अट्टालकविषयेऽपि वर्णयति महर्षिः। तत्र कोऽयम् अट्टालक इति चेत्, अट्टातिक्रमहिंसयोः इतिपाठात् प्राकारातिक्रमं परहिंसां च आसमन्तात् लातिइत्यट्टालकः। प्राकारोपरि युद्धार्थं कोष्ठसन्निवेश इत्यर्थः।।

इत्थम् इमे श्रीमद्वाल्मीकियरामायणे नगरनिर्माणविषये अयोध्याविषये तथा लङ्काविषये च लभ्यमानाः सङ्केताः।।

---

१२. श्रीमद्वाल्मीकिरामायणम्, सुन्दरकाण्डः, ०२.१७

१३. श्रीमद्वाल्मीकिरामायणम्, सुन्दरकाण्डः, ०२.२१

**श्रीमन्महाभारते नगरनिर्माणविषये**

**राज्यस्य सप्ताङ्गानि**

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्** इत्यनया उक्त्या गीयमाने सर्वविषयप्रदायके श्रीमन्महाभारते नैके सङ्केताः नगरनिर्माणविषय–संबद्धाः लभ्यन्ते। तत्र शान्तिपर्वणि भीष्मपितामहस्य वचनमिदं–

**राज्यं हि सुमहत्तन्त्रं धार्यते नाकृतात्मभिः।**
**न शक्यं मृदुना वोढुमायासस्थानमुत्तमम्।।**

**राज्यं सर्वामिषं नित्यमार्जवेनेह धार्यते।**
**तस्मान्मिश्रेण सततं वर्तितव्यं युधिष्ठिर।।**[१४]

अनेन इदं सूचयति पितामहः यद्राज्यम् एकं सुमहत्तन्त्रं यच् क्रूरैः न धार्यते तथैव मृदुभिश्च वोढुम् अशक्यम्। तर्हि कथं वा धर्तुं शक्यम् इति चेदुच्यते आर्जवेन इति। एवञ्च तादृशस्य महत्तन्त्रस्य विषये सन्देहो यदि वर्तेत तर्हि पृच्छतु इति भीष्मपितामहेन पृष्टे सति युधिष्ठिरः एकोनसप्ततितमे अध्याये–

**पार्थिवेन विशेषेण किं कार्यमवशिष्यते।**
**कथं रक्ष्यो जनपदः कथं जेयाश्च शत्रवः।।**[१५]

इत्येवं जनपदः कथं रक्ष्यः, कथं शत्रवः जेयाः इत्यादीन् नैकान् प्रश्नान् अपृच्छत्। तस्य उत्तरत्वेन अनेकान् उपायान् उक्त्वा मध्ये–

**राज्ञा सप्तैव रक्ष्याणि तानि चैव निबोध मे।**
**आत्माऽमात्याश्च कोशाश्च दण्डो मित्राणि चैव हि।।**

**तथा जनपदाश्चैव पुरं च कुरुनन्दन।**
**एतत्सप्तात्मकं राज्यं परिपाल्यं प्रयत्नतः।।**[१६]

---

१४. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ५८, श्लोकौ– २१–२२

१५. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ६६, श्लोकः १

१६. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ६६, श्लोकौ– ६४–६५

इत्येवं राज्यस्य अङ्गानि कानि इति प्रोवाच। तद्रीत्या–

१. आत्मा (राजा)

२. अमात्यः

३. कोशः

४. दण्ड

५. मित्राणि

६. जनपदः

७. पुरम्

इतीमानि संमिल्य राज्यपदलङ्कुर्वन्ति इति ज्ञेयम्। एतदेव मनसि निधाय कौटिल्योऽपि स्वीये अर्थशास्त्रे **स्वाम्यमात्यजनपददुर्ग–कोशदण्डमित्राणि प्रकृतयः**[१७] इति प्रोवाच।

**जनपदः**

किञ्च एषु सप्तसु अङ्गेषु अन्यतमम् अङ्गं भवति जनपदः। युधिष्ठिरेण राष्ट्रगुप्तिविषये पृष्टे सति भीष्मपितामहेन तस्य उत्तरत्वेन आदौ जनपदनिवेशः कथं कार्य इत्युक्त्वा ततः तस्य गुप्तिः कथं कार्या इत्युक्तमासीत्।

**तद्यथा–**

**ग्रामस्याधिपतिः कार्यो दशग्राम्यास्तथा परः।**
**द्विगुणायाः शतस्यैवं सहस्रस्य च कारयेत्।।**

**ग्रामे यान् ग्रामदोषांश्च ग्रामिकः प्रतिभावयेत्।**
**तान् ब्रूयाद्दशपायासौ स तु विंशतिपाय वै।।**

**सोऽपि विंशत्यधिपतिर्वृत्तं जापदे जने।**
**ग्रामाणां शतपालाय सर्वमेव निवेदयेत्।।**[१८]

---

१७. अर्थशास्त्रम् ६.१.१

१८. महाभारतम्, शान्तिपर्व, ८७.३–५

इत्येवं राष्ट्रगुप्तिविषये कथनसमये ग्रामस्य विभागः (निर्माणं) कथं कर्तव्यमिति परम्परया सूचयति। तस्य सङ्ग्रह उच्यते– जनपदः कदाचित् एकग्रामात्मकः, कदाचित् दश, कदाचित् विंशतिः, कदाचिच्च सहस्रग्रामात्मकः। एकेन राज्ञा प्रत्येकस्यापि जनपदविभागस्य कश्चन अधिपतिः नियोज्यः। तथा च तस्मिन् विभागे नाम प्रत्येकं विभागे जायामानानां दोषाणां निवेदनं समाधानं च तत् पूर्ववर्तिना ग्रामाधिपतिना कर्तव्यम्। तदेवोच्यते– एकग्रामात्मके जनपदे जायमानायाः समस्यायाः समाधानं कदाचित् तस्य अधिपतिना समाहितुं न शक्या चेत्तर्हि सा तदुपरि अर्थात् दशग्रामाधिपतिनिकटे नेया। तद्वात् अग्रे ज्ञेयम्। अस्तु अनेन किमिति पृष्टे एवमेव ग्रामस्य विभागः कर्तव्य इति ज्ञायते। अयमेव अभिप्रायः आचार्येण कौटिल्येन– **शूद्रकर्षकप्रायं कुलशतावरं पञ्चशतकुलपरं ग्रामं क्रोशाद्विक्रोशसीमानम् अन्योन्यारक्षं निवेशयेद्**[१९] इत्यनेन वाक्येन प्रतिपादितः। तदर्थस्तु तृतीये अध्याय एव यद्यपि प्रतिपादितः तथाऽपि प्रकृतमहाभारतवचनेन सह कथं सम्मतं भवति इत्येतदर्थं किञ्चिदिह उच्यते। कुलशतावरम् इत्यनेन गृहतशतान्यूनमित्यर्थः प्रकटीकृतः। तद्वत् पञ्चशतकुलपरम् इत्यनेन पञ्चशतानधिकगृहयुक्तम् इत्यर्थः स्फुटीकृतः। एवञ्च अधुना ज्ञायते जनानां वासयोग्यं ग्रामं रचयेत्। तत्रापि नात्यधिकैः संख्यैः जनैः न वा न्यूनसंख्याकैः जनैः ग्रामस्य रचना करणीया। तदेव महाभारतेऽपि एकः जनपदः इत्यनेन पदेन निर्दिष्टः।

**न्यसेत गुल्मान्दुर्गेषु सन्धौ च कुरुनन्दन।**
**नगरोपवने चैव पुरोद्यानेषु चैव ह।।**
**संस्थानेषु च सर्वेषु पुरेषु नगरेषु च।**
**मध्ये च नरशार्दूल तथा राजनिवेशने।।**[२०]

इत्येभिः पद्यैः न केवलं जनपदनिर्माणे अपि च तस्य रक्षाविषयेऽपि प्रत्यपादयत्। पद्यार्थः– दुर्गेषु, सन्धौ, नगरस्य उपवनेषु, सीमान्ते, पुरेषु,

१९. अर्थशास्त्रम् २.१.२

२०. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ६६, श्लोकौ – ६–७

उद्यानेषु, राजनिवेशने, अन्तः पुरेषु, कोष्ठपालाद्युपवेशनस्थानेषु च गुल्मान् नाम रक्षिणः संस्थापयेत् राजा इति।

**नगरनिर्माणे अवधेयांशाः**

भीष्माचार्यः युधिष्ठिरम् उद्दिश्य जनपदविषये प्रतिपाद्य अग्रे नगरनिर्माण के अंशा अवेधया इत्यपपि प्रत्यपादयन्। तदत्र उच्यते–

**विशालान् राजमार्गांश्च कारयीत नराधिपः।**
**प्रपाश्च विपणांश्चैव यथोद्देशं समाविशेत्।।**

**भाण्डागारायुधागारान् योधागारांश्च सर्वशः।**
**अश्वागारान् गजागारान् बलाधिकरणानि च।।**
**परिखाश्चौव कौरव्य प्रतोलीर्निष्कुटानि च।**
**न जात्वन्यः प्रपश्येत गुह्यमेतद्युधिष्ठिर।।**[२१]

अस्य अयमर्थः–एकः नराधिपः स्वस्य राज्यस्य नगरनिर्माणसमये विशालान् राजमार्गं कुर्यात्। एवं यथोद्देशं प्रपाः, विपणांश्च समाविशेत्। किमिदं प्रपा इति चेदुच्यते– प्रकर्षेण पिबन्ति अस्याम् इति प्रपा नाम पानीयशालिका । विपणो नाम विक्रयः। विपूर्वकात् पण व्यवहारे इत्यस्माद्धातोः घञ् प्रत्ययेन निष्पन्नोऽयं शब्दः। विशेषेण पण्यते अस्मिन्निति विपणिः। अत्र मन्वाचार्याणां वचनमपि स्मर्तव्यम्। तद्यथा– विपणेन च जीवन्तो वर्ज्याः स्युः हव्यकव्ययोः[२२] इति। किञ्च नैकेषाम् आगाराणां विषयेऽपि प्रोक्तं वर्तते। तथा च नगरनिर्माणसमये भाण्डानां नाम पात्रादीनाम् आगारः कश्चन गृहविशेषः, तं कुर्यात्। तथैव आयुधानाम् आगारं कुर्यात् तन्नाम अस्त्रगृहं कुर्यात्। अयमेव क्वचित् सेलाखाना इति नाम्नापि दीयते। अपि च योधशब्देन योद्धा विवक्षितः। तथा च–

**भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः। सेनायां समवेता ये**

२१. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ६६, श्लोकौ – ५३–५६

२२. मनुस्मृतिः ३.१५२

**सैन्यास्ते सैनिकाश्च ते।।**[२३] इतीदम् अमरसिंहपद्यमत्र स्मर्तव्यम्। इत्थं तेषामपि योधानां कृते पृथक् गृहविशेषः निर्मेयः। तद्विहाय अश्वागारान्, गजागारान् च कुर्यात्। एवं परिखा नाम राजधान्यादिवेष्टनखातं, तदपि कुर्यात्। अत्र परिखायाः मानविषये ब्रह्मवैवर्तपुराणवचनानि स्मर्तव्यानि। तानि च–

**प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम्।**
**परितः शिबिराणाञ्च गम्भीरं दशहस्तकम्।।**

**सङ्केतपूर्वकं चैव परिखाद्वारमीप्सितम् ।**
**शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च।।**[२४]

इत्थं परिखाः कुर्याद्राजा। तथैव प्रतुल्यते परिमीयते इति प्रतोली नाम रथ्या अपि सुष्ठु कुर्यात्। निष्कुटानि नाम गृहारामा इति नीलकण्ठीयव्याख्यानम्। तदर्थः गृहसमीपस्थस्य उपवनस्य निष्कुटम् इति नाम। एतत्सर्वं सुष्ठु शास्त्रोक्तपरिमाणे कुर्याद्राजा इति बोधयति भीष्मपितामहः।

## दुर्गाश्रयेण पुरनिर्माणम्

दुर्गाश्रयेण पुरस्य निर्माणविषयेऽपि केचन सङ्केताः समुपलभ्यन्ते। तद्यथा श्रीमन्महाभारते शान्तिपर्वणि षडशीतितमे अध्याये युधिष्ठिरः भीष्माचार्यम् एवं प्रार्थयति–

**कथंविधं पुरं राजा स्वयमावस्तुमर्हति।**
**कृतं वा कारयित्वा वा तन्मे ब्रूहि पितामह।।**[२५]

अर्थस्तु स्पष्टतया ज्ञायते। इत्थं कीदृशे पुरे राजा आवस्तुमर्हति इति युधिष्ठिरेण पृष्टे भीष्माचार्यः प्रोवाच–

**वस्तव्यं यत्र कौन्तेय सपुत्रज्ञातिबन्धुना।**
**न्याय्यं तत्र परिप्रष्टुं वृत्तिं गुप्तिं च भारत।।**

---

२३. अमरकोषः २.८.६१.१

२४. ब्रह्मवैवर्तपुराणम्, श्रीकृष्णजन्मखण्डः, २०२

२५. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ८६, श्लोकः १

**तस्मात्ते वर्तयिष्यामि दुर्गकर्म विशेषतः।**

**श्रुत्वा तथा विधातव्यमनुष्ठेयं च यत्नतः।।**[२६]

अर्थस्तु स्पष्टयता ज्ञायते यत् पुत्रज्ञातिबन्धुभिः सह वस्तव्यं दुर्गम् अधिंत्य वदामि, तच्छ्रुत्वा तथैव अनुष्ठानं करोतु इति। अत्र विशिष्य षड्विधं दुर्गम् अधिकृत्य प्रोवाच। तद्यथा–

**षड्विधं दुर्गमास्थाय पुराण्यथ निवेशयेत्।**

**सर्वसंपत्प्रधानं यद्बाहुल्यं चापि संभवेत्।।**

**धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च।**

**मनुष्यदुर्गं मृदुर्गं वनदुर्गं च तानि षट्।।**[२७]

इत्थं दुर्गाणाम् आश्रयेण पुराणि, महानगराणि च निवेशयेत् राजा इति एनम् अर्थं प्रत्यपादयति पद्यस्य वचनानि।

किञ्च–

१. धन्वदुर्गम्।

२. महीदुर्गम् ।

३. गिरिदुर्गम् ।

४. मनुष्यदुर्गम् ।

५. मृदुर्गम्।

६. वनदुर्गञ्चेति दुर्गं षड्विधं भवति।

एतेषां दुर्गाणां स्वरूपविषये मनुस्मृतेः व्याख्यातृणां वचनानि स्मर्तव्यानि। तदत्र निष्कृष्टरूपेण उल्लिख्यते[२८]–

---

२६. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ८६, श्लोकौ २–३

२७. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ८६, श्लोकः ५

२८. मानवधर्मशास्त्रम्, मेधातिथि–सर्वज्ञाननारायण–कुल्लूक–राघवानन्द–नन्दन–रामचनद्रप्रणीतव्याख्याभिःपरिष्कृतं परिशिष्टोपेतं च, नारायणसूनुना विश्वनाथेन मुम्बापुर्यां प्रकाशितं पुस्तकम्, १८८६. पुटसंख्या–७८६–७६०

## १. धन्वदुर्गम्

आदौ मेघातिथिः आचार्यः स्वव्याख्याने इत्थं प्रत्यपादयत् यत् द्विगुणोत्सेधेनैष्टकेन शैलेन द्वादशहस्ताद् ऊर्ध्वम् उद्धतेन तालमूलेन कपिशीर्षचित्ताग्रेण दृढप्रणाल्या परिकृतं धनुः दुर्गम् इति। यत्रातिनिर्जलतया तद्देशवासिभिरेव कथञ्चित् जलं लभ्यते तत् धन्वदुर्गम् इति सर्वज्ञनारायाणाचार्यः। मरुवेष्टितं चतुर्दिशं पञ्चयोजनम् अनुदकं दुर्गं धनुः दुर्गम् इति कुल्लूकाचार्यः। निरुदकपञ्चयोजनदेशेन समन्ततः व्याप्तेन दिवसद्वयपानार्थं जलाभावात् ससैन्यशत्रुभिः नाक्रम्यते यत् तत् धन्वदुर्गम् इति राघवानन्दाचार्यः। नन्दनाचार्यस्तु निरुदको देशो धन्वा, तेन दुर्गं धन्वदुर्गम् इति प्रत्यपादयत्। धन्वदुर्गं नाम मरुस्थलं यत्र अतिनिर्जलतया तद्देशवासिभिरपि कथञ्चित् जलं लभ्यते तत् धन्वदुर्गम् इति रामचन्द्राचार्यः प्रत्यपादयत्। महाभारतव्याख्याकर्ता नीलकण्ठाचार्यः स्वीये भारतभाव–दीपाख्यायां टीकायां धन्वा निर्जलदेशः तदेव परितश्च दुर्गं धन्वदुर्गम् इति उल्लिलेख।

## २. महीदुर्गम्

द्वितीयं **महीदुर्गम्।** पुनः पूर्वोक्तानाम् आचार्याणाम् अत्र कः अभिप्राय इति प्रतिपाद्यते। आदौ मेघातिथिमहाभागः– अगाधेन आश्रयणीयेन चोदकेन परिवेष्टितं दुर्गं महीदुर्गम् इति। सर्वज्ञ नारायणाचार्यस्तु पृथिवी एव यत्र समविषमतया प्राकारादिभिश्च अत्यन्तदुर्गा सा महीदुर्गाख्यपदेन दीयते इति प्रत्यपादयत्।

कुल्लूकाचार्यस्तु पाषाणेन इष्टकेन वा विस्ताराद् वैगुण्योच्छ्रायेण द्वादशहस्तादु उच्छ्रितेन युद्धार्थम् उपरि भ्रमणयोग्येन सावरणगवाक्षादियुक्तेन प्राकारेण वेष्टितं दुर्गं महीदुर्गम् इति कथयामास। तथा राघवानन्दाचार्यस्तु महीदुर्गं पाषाणेष्टाकाकृतेन द्वादशहस्ताद्युच्छ्रितेन बहुविस्तृतेन युद्धार्थम् उपरि परिभ्रमणायोग्येन साधारणगबाक्षादियुक्तेन प्राकारेण समन्ताद्वेष्टितं सद्वारञ्च इति कुल्लूकाचार्याणाम् अभिप्रायमेव प्रायः प्राकटयत्। प्राकारक्षेत्र–सीमादियुक्तया मह्या दुर्गं महीदुर्गम् इति नन्दनाचार्यः।

## ३. गिरिदुर्गम्

तृतीयं गिरिदुर्गम्। अत्र मेघातिथिमहाभागः– गिरिपृष्टे दुरारोहमेवैक–मार्गानुगतम् अन्तर्नदीप्रस्रवणोदकं गिरिदुर्गम् इति। गिरिवेष्टिततया दुर्गं गिरिदुर्गम् इति सामान्यमेव लक्षणं प्रोवाच सर्वज्ञनारायणाचार्यः। पर्वतपृष्टम् अतिदुरारोहं सङ्कोचौकमार्गोपेतं गिरिदुर्गम् इति कुल्लूकाचार्यः। राघवानन्दाचार्यस्तु गिरिदुर्गं नाम गिरिणा अभिवेष्टितं दुरारोगं गिरिपृष्टं सङ्कटैकमार्गोपेतम् अन्तर्नदीप्रस्रवणबहुसस्योत्पत्तिक्षेत्रवृक्षान्वितम् इत्याद्यूहनीयम् इति प्रत्यपादयत्।

## ४. मनुष्यदुर्गम्–

ततः मनुष्यदुर्गम्। तत्र मेघातिथिमहाभागस्य वचनानि इमानि चतुरङ्गबलाधिष्ठितं प्रवरायुधवीरपुरुषप्रायं नृदुर्गम् इति। सर्वज्ञ–नारायणाचार्यस्तु मानुषबहुलतया अगम्यं नृदुर्गम् इति प्रत्यपादयत्। चतुर्दिगवस्थायि हस्त्यश्वरथयुक्तबहुपादातरक्षितं दुर्गं नृदुर्गम् इति कुल्लूकाचार्यः। राघवानन्दाचार्यस्तु हस्त्यश्वरथपदातिभिः चतुर्दिक्षु वेष्टितं बहुमनुष्यं वा इत्युक्त्वा तत्र कारणमपि ब्रवीति शतमध्यमवध्यं सहस्रमध्यमवध्यम् इति न्यायादिति। अपरः व्याख्याता नन्दनाचार्यः शूरैः मनुष्यैः दुर्गं नृदुर्गम् इति सामान्येन प्रत्यपादयत्।

## ५. वनदुर्गम्

वनदुर्गविषये एतेषाम् आचार्याणाम् अभिप्रयाः अन्यथा वर्तते। तदर्थः एते आचार्याः वनदुर्गस्य स्थाने वार्क्षपदं प्रयुञ्जते। मेघातिथिमहाभागः इत्थं वदति अस्मिन् विषये समन्ततः अर्धयोजनमात्रं घनमहावृक्षान्वितं वार्क्षम् (वनदुर्गम्) इति। वनवेष्टितत्वेन वार्क्षम् इति सर्वज्ञनारायणः। कुल्लूकाचार्यस्तु बहिः सर्वतः योजनमात्रं व्याप्य तिष्ठत् महावृक्षकण्टकिगुल्मलताद्याचितं वार्क्षं दुर्गम् इति प्रत्यपादयत्। वार्क्षं न्यग्रोधादिमहावृक्षकण्टकलताद्यैः अभितः योजनाद्यावरकेन वेष्टितं तेन तच्छेदनोद्यताः ये शत्रवः ते तत्रस्थैः धानुष्कैः हन्यन्ते इति राघवानन्दाचार्यः। वृक्षाणां समूहो वार्दं तेन दुर्गं वार्क्षंदुर्गम् इति नन्दनाचार्यः। रामचन्द्राचार्यस्तु वृक्षैः दुर्गं वार्क्षंम् इति सामान्येन प्रोवाच। इत्थम् एतेषु दुर्गेषु मध्यात् अन्यतमं दुर्गम् आश्रित्य पुरं विरचयेत् राजा इति दुर्गस्य

वैविध्यविषये युधिष्ठिरं प्रोवाच भीष्माचार्यः।

**किञ्च अग्रे यत्पुरं दुर्गसंपन्नं धान्यायुधसमन्वितम्**[२६] इत्यादिपद्यै इतोऽपि प्रोवाच। तस्य सारमुच्यते– यत् पुरं पूर्वोक्तैः दुर्गैः संपन्नं, यत् धान्यागारायुधागारसमन्वितं, यत् दृढप्राकारपरिखासमन्वितं यत् हस्त्यश्वरथ–सङ्कुलं तत्पुरम् अकुतोभयं पुरमित्यभिधीयते। किञ्च तत्पुरं गीतवादित्रध्वनिमत् स्यात्, शूराढ्यजनसंपन्नं स्यात, ब्रह्मघोषानुनादितं स्यात्, समाजोत्सवसंपन्नं स्यात्, प्रशान्तं स्यात्, सुप्रभं स्यात्, तादृशं पुरं राजा स्वयम् आविशेत्। तत्र प्रविश्य राजा कोशं, बलं, मित्रं, व्यवहारं च वर्धयेत्। एतावदुक्त्वा अग्रे इतोऽपि प्रोवाच।

तद्यथा–

**काष्ठ–लोह–तुषाङ्गार–दारु–शृङ्गास्थि–वैणवान्।**
**मज्जा–स्नेह–वसा क्षौद्रमौषधग्राममेव च।।**

**शणं सर्जरसं धान्यमायुधानि शरांस्तथा।**
**चर्म स्नायुं तथा वेत्रं मुञ्जबल्वजदन्ध्वनान्**

**आशयाश्चोदपानाश्च प्रभूतसलिलाकराः।**
**निरोद्धव्याः सदा राज्ञा क्षीरिणश्च महीरुहाः।।**[३०]

इति इमे विषयाः निरोद्धव्याः राज्ञा इत्यकथयत्। इत्थं दुर्गपरीक्षाविषये युधिष्ठिरं प्रोवाच भीष्मपितामहः।।

**निगमनम्**

ब्रह्मपुत्रनदविषये भारत–चीनयोः अन्तर्कलहविषये सर्वैर्जायते एव। आधुनिकविश्वे अन्ताराष्ट्रियसहयोगिताभावात् विश्वस्य राष्ट्रेषु अर्थनैतिकवैश्म्यमूलकाः समस्या उत्पद्यन्ते। तासां फलश्रुतिरूपेण कुत्रचिद् अन्तरीक्षाभियानं कुत्रचित् वा बुभुक्षाजर्जरितानां करुणाकोलाहलं कुत्रचित्

---

२६. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ८६, श्लोकः ६

३०. श्रीमन्महाभारतम्, शान्तिपर्व, अध्यायः ८६, श्लोकाः १३–१५

ज्ञानान्वेषणरतानां मौनसाधनां कुत्रचित्सन्त्रासवादिनां मारणास्त्रप्रयोगकौशल प्रदर्शनं च दृश्यन्ते। आधुनिकविश्वस्य सर्वक्षेत्रविकासार्थं प्रकरणोक्तविधयः सहायका भविष्यन्तीति आशा।

किञ्च ग्रामो, नगरं, गृहं वा भवतु तस्य निर्माणप्रक्रियायाम् नूनं इमे विषयाः स्मर्तव्याः भवन्ति। अनेन प्राकृतिकदुर्घटनास्वपि नगरस्य वा नगरवासिनां काऽपि क्षतिः न भवति।

कदाचित् केचन एवं चिन्तयेयुः यद् इमे विषयाः पुरातनाः अद्यत्वेन नोपयोक्तुं शक्या इति वदेयुः। तत्र इदमेव यद् अद्यत्वे न केवलं भारते अपि च विदेशेषु इमान् विधीन् अनुसृत्य कानिचन नगराणि केचन ग्रामाश्च निर्मिताः वर्तन्ते येषु प्राकृतिकदुर्घनास्वपि जनपदस्य वा जनस्य न काऽपि क्षतिः संभवति इति। तथा च इमान् विषयान् मनसि निधाय अपेक्षितानि परिवर्तनानि च विधाय आदर्शनगरस्य निर्माणं कर्तुं शक्यमित्येव भाति।

***

# ऋकारलृकारयोः सवर्णविधिरिति वार्तिकविमर्शः

**डॉ. उत्तम–माझिः**

*अतिथि–प्राध्यापकः,संस्कृत–विभागः,*

*काजी–नजरुल–विश्वविद्यालयः,*

*पश्चिमवर्धमानः, आसानसोलः, पश्चिमवङ्गः*

**शोधसारः**

ययोर्वर्णयोरुच्चारणस्थानमाभ्यन्तरप्रयत्नश्च समानौ तौ वर्णौ परस्परयोः सवर्णसंज्ञकौ। अस्मिन्विषये पाणिनेः सूत्रं "तुल्यास्यप्रयत्नं सवर्णम्" (अष्टा. १/१/६) इति। सवर्णसंज्ञकस्य प्रयोजनं यथा– 'कृष्ण' + ऋद्धिः' इत्यत्राकार–ऋकारयोः गुणैकादेशेऽकारे रपरत्वे च 'कृष्णर्द्धिः' इति स्थिते दकारधकारयोः परस्परयोः सवर्णकत्वे (तालु स्थानं स्पृष्टं प्रयत्नञ्च) "झरो झरि सवर्णे" (अष्टा. ८/४/६५) इत्यनेन रेफात् परस्य धकारस्य वैकल्पिके लोपे 'कृष्णर्धिः' लोपाभावे तु 'कृष्णर्द्धिः' इति रूपं सिध्यति। परन्तु न ह्यृकारलृकारयोर्मूर्धादन्तात्मकभिन्नस्थानकत्वाद्सवर्णसंज्ञा। सावर्ण्याभावे 'ऋलृक्' इतिमाहेश्वरसूत्रऋलृवर्णस्योपदेशो वर्तते। ऋलृवर्णयोः सावर्ण्यविधानार्थं वार्तिककारेणोक्तम्–ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यमिति। ऋलृवर्णयोः सावर्ण्यविधाने व्यपकत्वं वर्तते। तावद्यथा– खट्वा. ऋर्ष्यः, माला. ऋर्ष्य इति स्थिते "ऋत्यकः" (अष्टा. ६/१/१२७) इत्यनेन वैकल्पिकेन ह्रस्व अकारे प्रकृतिभावे च खट्वऋर्ष्यः, मालऋर्ष्य इतिरूपं सिध्यति। तद्वद् खट्वा+ लृर्ष्यः=खट्वलृर्ष्यः, माला+ लृर्ष्यः = माललृर्ष्य इति रूपं सिध्यति। परन्तु सर्वत्र ऋकारेण लृकारग्रहणं सन्निहितं न। यथा 'कृष्णमित्र३' इत्यत्र **"गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्"** (अष्टा. ३/१५५) इत्यनेन ककारोत्तरवर्त्यृकारस्य प्लुतप्राप्ते 'अनृतः' इति पदेन प्लुतस्य निषेधः। तथैव 'क्ल्३प्तशिखः 'इत्यत्र ''अनृतः' इति पदेन प्लुतस्य निषेधो न भवति। अपि च न ह्य्लृकारेण ऋकारस्य ग्रहणम्। यथा– **"पुषादिद्युताद्यलृदितः परस्मैपदेषु"** (अष्टा.३/१५५) इत्यनेन विहितोऽङादेश ऋदित्स्थले (खादृ) न प्रवर्तते। अत ऋकारलृकारयोः परस्परं सावर्ण्यं नित्यमनित्यं वा? सवर्णविधायक

वार्तिकवचस्य व्यापकत्वं निरूप्य **"सवर्णदीर्घत्वे ऋति ॠ वा वचनम्, लृति ल्लृ वा वचनम्"** वार्तिकद्वयस्यापि विचारः प्रस्तूयते। अत ऋकालृकारयोः सावर्ण्ये दोषो वा? तस्य निवारणं कथं सम्भवम्? इत्यादि विषयामावलम्ब्य ऋकारलृकारयोः सावर्ण्यविषयेसमीक्षात्मकविचारः प्रबन्धेऽस्मिन् प्रदीयते।

## प्रमुखशब्दाः

सावर्ण्यम्, वार्तिकम्, अग्मात्रस्य, ॠ, ल्लृ, ऋलृवर्णयोः, अज्भक्तिः, लपरः, रप्रत्याहारः, प्लुतः, दीर्घः।

## उपोद्घातः

महर्षिपाणिनिना प्रणीत अष्टाध्यायीग्रन्थे **"तुल्यास्यप्रयत्नं सवर्णम्"** (अष्टा. १/१/६) इत्यनेनसूत्रेण सवर्णसंज्ञा विधीयते। **"अकः सवर्णे दीर्घः"** (अष्टा. ६/१/१०१), **"अनुस्वारस्य ययि परसवर्णः"** (अष्टा. ८/४/५८), **"झरो झरि सवर्णे"** (अष्टा. ८/४/६५) प्रभृतिषुनवसु सूत्रेषु सवर्णसंज्ञायाः साक्षात्प्रयोगेन कार्यं सिध्यति। ऋलृवर्ण्योर्मूर्धादन्तात्मकभिन्नस्थानकत्वान्न सवर्णसंज्ञा। परन्तु 'होतृ'+लृकारः' इत्यत्र ऋकारलृवर्णयोः सवर्णसंज्ञं स्वीकृत्वा **"अकः सवर्णे दीर्घः"** (अष्टा. ६/१/११०) इत्यनेन दीर्घ ऋकारे 'होतॄकारः' इति रूपं सिध्यति। ऋकारलृकारयोः सवर्णविधानार्थमष्टाध्याय्यां किमपि सूत्रं नास्ति। उक्तानुक्तदुरुक्तार्थ चिन्ताप्रकाशायवार्तिक कारकात्यायनेनोक्तम् **"ऋकारलृकारयोः सवर्णविधिः।"**[1] भट्टोजिदीक्षितेन तदीयवृत्तावक्तम्–**"ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्।"**[2] सावर्ण्यविधायक वार्तिकवचस्य व्यापकत्वं निरूपस्य सवर्णदीर्घत्व ऋति ॠ वा वचनम्, लृति ल्लृ वा वचनमिति वार्तिकद्वयस्यापि विचारोऽपिदीयते। सर्वत्र ऋकारेण लृकारस्य सन्निहितं वा? ऋकालृकारयोः सावर्ण्यं स्वीकारे दोषो वर्तते वा? ऋकारलृकारयोः परस्परं सावर्ण्यं नित्यमनित्यं वा? प्रभृति विषये सन्देह निरसनार्थं **'ऋकारलृकारयोः सवर्णविधिरिति वार्तिक विमर्शः'** इत्यस्मिन् प्रबन्धे समीक्षात्मक मध्ययनं प्रस्तूयते।

---

१. "तुल्यास्यप्रयत्नं सवर्णम्" (अष्टा.१/१/६) इति सूत्रस्यव्याकरणमहाभाष्यस्थितं वार्तिकम्।

२. तदेव सूत्रस्य वैयाकरणसिद्धान्तकौमुदीस्थितं वार्तिकम् १५०।

ऋलृवर्णयोर्मूर्धादन्तात्मकभिन्नस्थानकत्वाद् सावर्ण्याभावे तद्विधानार्थ मिदं वार्तिकम्। वार्तिकस्य प्रयोजनं यथा—होतृ+ लृकारः = 'होतृकारः 'इत्यत्र सवर्णदीर्घकत्व ऋकारलृकारयोः सवर्णसंज्ञा विधेया। किं प्रयोजनम्? यतो हि **''सवर्णदीर्घत्वे ऋतिर्ऋवा वचनम्"**[३], **"लृति ल्लृ वा''**[४] इति वार्तिकद्वये **"अकः सवर्णे दीर्घः"** (अष्टा. ६/१/१०१) इत्यतः 'अकः', 'दीर्घः' इति पदद्वयमनुवर्तते। वावचनमित्यत्र वाशब्दो दीर्घसमुच्चयार्थः। अतः प्रथम वार्तिकस्यार्थः— अकः ऋति परे वैकल्पिकेन पूर्वपरयोः ॠकारो भवति, पक्षे दीर्घैकादेशः। यथा— 'होर्त्र्कारः', 'होतृकारः' इति पदद्वयं सिद्धम्। द्वितीयवार्तिकस्यायमर्थः— अक लृति परेवैकल्पिकेन पूर्वपरयोः ल्लृकारो भवति, पूर्वपरयोः दीर्घैकादेशः। लृवर्णस्य दीर्घाभावा—वर्णस्यान्तरतमो दीर्घ ऋकारो भविष्यति। यथा— 'होत्ल्लृकारः', 'होतृकारः' इति पदद्वयं सिध्यति। तस्मा—लृवर्णयोः सावर्ण्यं विनापि 'होतृकारः' (होतृ+लृकारः) इति रूपं सिध्यतीत्यतो नेदं वार्तिकस्य प्रयोजनम्। ननु यद्यप्यत्र केवलमग्मात्रस्य कार्यं भवति, तर्हि 'दधि+लृकारः', 'मधु+लृकारः' इत्यत्र वैकल्पिकेन ल्लृकारस्यैवैका देशस्य प्रसक्ति र्भवति। न हिऋतिर्ॠ वा वचनम्, लृति ल्लृ वा वचनमत्र केवलमग्मात्रस्य कार्यम्। अपि तुसावर्ण्य ऋति लृति वा परे पूर्वपरयोर्दीर्घैकादेश, वैपल्पिकेनल्लृकारोऽपि स्यात्। अत ऋकारलृकारयोः सवर्णसंज्ञा विधेया। **"तत्र ऋतिर्ॠ वा वचनमित्यत्र वा शब्दो दीर्घस्य समुच्चयार्थः, तेनाप्राप्त एव दीर्घो भविष्यति। ननु यद्यविधायैव सवर्णसंज्ञां तदुच्यते, ततोऽक इति सम्बन्धादङ्मात्रस्य लृति तत्कार्यं स्याद्दध्य्ल्लृकारो मध्य्ल्लृकार इति तस्यैव व्यवस्थितं भवति तस्माद्विधेया सवर्णसंज्ञा"**[५] इति पदमञ्जरीकारेणोक्तम्।

ऋकारलृकारयोः सवर्णं विनापि 'होतृकारः' (होतृ+लृकारः) इति रूपं सम्भवम्। 'दधि लृकारः' अत्रापि दोषो न भवति। तद्यथा— **"ऋतिर्ॠवा वचनम्"**

---

३. "अकः सवर्णे दीर्घः" (अष्टा. ६/१/१०१) इति सूत्रस्य व्याकरणमहाभाष्यस्थितं वार्तिकम्।

४. तदेव वार्तिकम् ६1९६।

५. "तुल्यास्यप्रयत्नं सवर्णम्" (अष्टा.१/१/९) इति सूत्रस्य पदमञ्जरीटीका, पृष्ठा ८६।

अत्र 'ऋति' इति सप्तम्यन्तं पदं तच्च पञ्चम्यन्तंकर्तव्यम्। ततश्च वार्तिकस्येदं स्वरूपम्– 'ऋतः ॠ वा वचनम्' ऋकाराद् सवर्णे परे ॠकारो वा (होत्–ॠकारः), पक्षे सवर्णदीर्घः (होतॄकारः)। लृति ल्लृ वा वचनमिति द्वितीयवार्तिकेऽपि 'ऋतः' पञ्चचम्यान्तं पदमनुवर्तते। ऋकाराद् ल्लृकारे परे ल्लृकारो वा, पक्षे सवर्णदीर्घः। इदमसवर्णार्थम्, तेन लृति रूपद्वयं सिद्धम्– होतॄकारः, होतॢकारः। 'ऋतः' इत्यनुवृत्तेः 'दधि. लृकारः', 'मधु+लृकारः' इत्यादिस्थले ल्लृ आदेशाप्राप्तिः। विषयेऽस्मिन् मञ्जरीकारेण स्पष्टीक्रियते– **"यदेतद् ऋतीति 'एतदृत इति वक्तव्यम्, सवर्ण इत्येव ऋकारस्य ऋकार एव सवर्णः' इति ऋत्येव भविष्यति। तत लृति, ऋत इत्येव। इदं चासवर्णार्थम्, तेन लृति रूपद्वयं सिद्धम्– होतॄकारः, होतॢकार इति।"**[६]

यदा ऋकारलृकारयोः सवर्णसंज्ञा कर्तव्या तदा लाघवाद्ऋति ॠवा वचनम्, लृति ल्लृवा वचनमिति वार्तिकद्वयस्याप्रयोजनम्। कथम्? वार्तिकद्वयेन (होतृ+ऋकारः) होत् ॠकारः, होतॄकारः, (होतृ+लृकारः) होतॢकारः, होतॄकार इति चत्वारि रूपाणि यथा स्यात्, तथैव ऋलृवर्णयोः सावर्ण्य संज्ञा स्वीकारेऽपि **"अकः सवर्णे दीर्घः"** (अष्टा.६/१/१०१) इत्यनेन चत्वारि रूपाणि सिध्यन्ति। अतो लाघवाद्ऋलृवर्णयोः सावर्ण्यसंज्ञा विधेया।

नन्ववश्यं वार्तिकद्वयं वक्तव्यम्। कथम्? ॠकारः ल्लृकारो वानाजस्तीति। अत्र रेफद्वयघटितः ॠकारः, लृद्वयघटितः ल्लृकारश्च इत्यत्र सूचितम्। ॠ इत्यत्र द्वौ रेफौ तयोरेका मात्रा, परितोऽजभक्तेरपरा। एवंल्लृ इत्यत्र द्वौ लकारौ तयोरेका मात्रा, परितोऽजभक्तेरपरा।प्रदीपकारेणोक्तम्–**"द्वावप्येतौ दीर्घौ 'ॠल्लृ' इति। ऋकारे कदाचित् 'ऋ' इति दीर्घः कदाचिॠ। लृकारेऽपि 'ऋ' 'ल्लृ' इत्येतौ भविष्यतः सत्यां सवर्णसंज्ञायामिति भावः।"**[७] वार्तिकविधेय ॠकार ल्लृकारश्च द्विमात्रकमेवेति सूचितं **"अकां सवर्णे ऋति परतो वा ॠभवतिय द्विमात्रोऽयम्, मध्ये द्वौरेफौ तयोरेका मात्राय अभितोऽज् भक्तेरपरा, ईषत्स्पृष्टश्चायम्। तत्र प्रयत्नभेदादृकारेणा ग्रहणादनच्त्वाद्दीर्घ**

---

६. तदेव।

७. "तुल्यास्यप्रयत्नं सवर्णम्" (अष्टा.1/१/९) इति सूत्रस्य प्रदीपटीका, पृष्ठा २४६।

**संज्ञाया अभावादप्राप्तोऽयं विधीयते। लृति ल्लृ वा वचनमित्ययमपि द्विमात्र ईषत्स्पष्टश्च मध्ये द्वौ लकारौ, तयोरेका मात्रा, अभितोऽज्भक्तेरपरा। पूर्ववदप्राप्तो विधीयते।“**[८] ऋकाराद् ऋति लृति वा परे **"अकः सवर्णे दीर्घः“** (अष्टा.६/१/१०१) इत्यनेन पूर्वपरयोः सवर्णदीर्घः प्राप्तिरेव परन्तु वार्तिकद्वयेन पूर्वपरयोर्ह्रस्व ऋकारः ह्रस्व लृकारो वा विधीयत इति प्राचा व्याख्याताम्। प्राचामेतादृशा व्याख्या भाष्यकैयटादिविरोधादुपेक्ष्यमिति मनोरमाकारस्य मतम्। ऋति ॠ वा वचनम्, लृति ल्लृ वा इति वार्तिकद्वयमन्यथा सिद्ध्यर्थम्। अतः "यत्तु प्राचा व्याख्याताम्– दीर्घे प्राप्ते ह्रस्व ऋकारः, लृकारश्च विधीयत इति तद्भाष्यकैयटादिविरोधादुपेक्ष्यम्'' ॠकार ल्लृकारयोरीषद् स्पष्टत्वम्। परन्तु अच्प्रत्याहारस्यऋलृवर्णयोः विवृतत्वम्। प्रयत्नभेदादृकारेणाग्रहणादनच्त्वाद् दीर्घसंज्ञायाप्राप्तेऽयं विधीयते–ऋति ॠवा वचनम्, लृति ल्लृ वा वचनमिति। अतो वार्तिकद्वयं विधेयम्। परन्तु 'होतॄकारः' इत्यत्र दीर्घविधानार्थम् ऋ–लृवर्णयोरिति वार्तिकमुपेक्षनीयमिति चेन्न–

ॠकारस्य ल्लृकारस्य चाच्त्वं वक्ष्यते। अच्त्वाद् **"अकः सवर्णे दीर्घः“** (अष्टा. ६/१/१०१) इत्यनेनैव रूपद्वयसिद्धिर्भवति। मास्तु सावर्ण्यबोधकं वार्तिकम्। अचामेव प्लुतसंज्ञा, न त्वच्भिन्नस्य। ॠकारस्य ल्लृकारस्य च प्लुतविधानार्थात्च्त्वं कर्तव्यम्। ऊकालोऽज्झ्रस्वदीर्घप्लुतसंज्ञको भवत्युच्यते। यथा– होतृ+ऋकारः = होतॄकारः, 'होतृ३कारः। होतृ+लृकारः = होत्ल्लृकारः, होत्ल्लृ३कार इति। **"त्वयापि 'ॠवा वचनं ल्लृवा वचनम्' इति ब्रवाऽच्त्वमनयोर्वक्तव्यम्। अन्यथा विधानमात्रमनयोः स्यात्। नाऽच्कार्यं प्लुतः। सति त्वच्त्वेताभ्यां त्रिमात्रयोरपि सावर्ण्याद्ग्रहणे सति प्लुतसंज्ञा भविष्यतीति प्लुतसिद्धिः“**[१०] इति प्रदीपकारेणेत्युक्तम्। एवमप्युक्तं पदमञ्जरीकारेण– **"ऋति ॠवा वचनम्, लृति ल्लृवा वचनमिति ब्रूवतापि त्वयोरच्त्वं वक्तव्यम्य अन्यथा विधानमात्रमनयोः स्यात्। न त्वच्कार्यः प्लुतः।**

---

८. तदेव सूत्रस्य पदमञ्जरीटीका, पृष्ठा ८६।

९. "अकः सवर्णे दीर्घः“ (अष्टा.६/१/१०१) इति सूत्रस्य प्रौढमनोरमा, पृष्ठा २७५।

१०. "तुल्यास्यप्रयत्नं सवर्णम्“ (अष्टा.१/१/९) इति सूत्रस्य प्रदीपटीका, पृष्ठा २५०।

**सति त्वच्त्वेताभ्यां त्रिमात्रयोरपि सावर्ण्याद्ग्रहणे सति प्लुतसंज्ञा भवतीति प्लुतसिद्धिः।"**[११] अतो प्लुतसंज्ञाविधानादच्त्वंकर्तव्यम्। अतः तयोरादेशयोरच्त्वं तु सावर्ण्यपक्षे, सावर्ण्याभावपक्षे ऋति ॠवा वचनम्, लृति ल्लृ वा वचनमिति वक्तव्यमपि च पुनः प्लुतः कर्तव्यः। सत्यां दीर्घ संज्ञायां "अकः सवर्णे दीर्घः" (अष्टा. ६/१/१०१) इतियनेनैव ॠ–ल्लृकारयोरादेशयोः विधानं सम्भवति। अतः पक्षद्वयेषु लाघवात् 'ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम्' इति वार्तिकं न्याय्यम्।

सावर्ण्यपक्षे सावर्ण्याभावपक्ष इत्युभयत्र पक्ष इष्टरूपाणि सिध्यन्त्येव। सावर्ण्याभावपक्षे **"ऋति ॠवा वचनम्, लृति ल्लृ वा वचनम्"** इति वार्तिकद्वयेन 'होतृ+ऋकारः', 'होतृ+लृकारः' इत्यत्र रूपद्वयं सिध्यति। अत्रापि "ऋत्यकः" (अष्टा.६/१/१२८) इत्यनेन शाकल्यस्य मतेन ह्रस्वादेशे असंहितायां 'होतृऋकारः, 'होतृलृकारः' इति तृतीयरूपे भवतः। यदि सावर्ण्यसंज्ञापक्षेऽपि वार्तिकद्वयं विहाय रूपद्वयं सिध्यत्येव। यथा– 'होतृ+ऋकारः' इत्यत्र द्वयोर्ऋकारयोर्रेफद्वययुक्तत्वाद्विवृतत्वाच्च कदाचिद्रेफद्वययुक्तः ॠ भवति कदाचिदेकरेफयुक्तविवृत ऋकारो भवति। अतः 'होत् ॠकारः''होतॄकारः' इति रूपद्वयं सिध्यति। 'होतृ+लृकारः' इत्यत्र लृकारेऽपि कदाचिदृकारान्तरतम ॠकार आदेशः– 'होतॄकारः' इति। कदाचिद्लृकारान्तरतमो लकारद्वयघटितः ल्लृ इत्यादेशो होतल्लृकार इति। पक्षद्वयमवलम्ब्य उभयथा रूपाणि तु सिध्यन्ति। संशयाभिप्रायः कः पक्षोऽत्र ग्रहणीयः।

**"सवर्णसञ्ज्ञावचनमेव ज्यायः"**[१२] इति भाष्यकारेणोक्तम्। **"ननु स्थानेऽन्तरतमपरिभा, या विवृतस्य स्थानिनोविवृतावेव दीर्घौ स्यातां न त्वीषत्स्पृष्टाविति चेत्? न, रेफद्वययुक्त एवादेशः 'सुसदृशः' इत्यपि हि सम्भवति। तथा च किं रेफद्वययुक्तत्वमादर्तव्यं, किं वा विवृतत्वमित्यत्र विनिगमकाभावेन पर्यायेणोभयप्रवृत्तौ सिषाधयिषितस्य रूपद्वयस्य**

---

११. तदेव सूत्रस्य पदमञ्जरीटीका, पृष्ठा ८६।

१२. "तुल्यास्यप्रयत्नं सवर्णम्" (अष्टा.१/१/९) इति सूत्रस्य व्याकरणमहाभाष्यम्, पृष्ठा २५०।

**निर्वाहात्।"**[१३] सवर्णसंज्ञावचनमेव ज्याय इतिभाष्यकारस्यानेन वचनेन **"ऋति ऋृवा वचनम्, लृति ल्लृ वा वचनम्"**[१४] वार्तिकद्वयं प्रत्याख्यानं ध्वन्यते। **"तदेवं षाष्ठं वचनद्वयं न कर्तव्यमिति स्थितम्"** इत्युक्तंशब्दकौस्तुभकारेण। सारल्यत्वाद्, व्यपकत्वाद्, लाघवाच्च ऋलृवर्णयोः सावर्ण्यविधानमधिको युक्तियुक्तः। तयोः सावर्ण्ये सति **"अकः सवर्णे दीर्घः"** (अष्टा. ६/१/१०१) इत्यनेनेष्टसिद्धिर्भवत्येव। परन्तु **"ऋति ऋृवा वचनम्, लृति ल्लृ वा वचनम्"** इति वचनद्वयकथने गौरवदोषः। तावद्वार्तिकद्वये दीर्घपदस्यानुवृत्तिकरणरूपम्। सावर्ण्यकथने दीर्घपदमनुवृत्तिं विहाय दीर्घो भवत्येव।

ऋलृवर्णयोः सावर्ण्यविधाने व्यपकत्वमिपि वर्तते। तावद्यथा– खट्वा+ ऋर्ष्यः, माला ऋर्ष्य इति स्थिते **"ऋत्यकः"** (अष्टा. ६/१/१२८) इत्यनेन वैकल्पिकेन ह्रस्व अकारे प्रकृतिभावे च खट्वऋर्ष्यः, मालऋर्ष्यइतिरूपं सिध्यति। तथैव खट्वा लृर्ष्यः = खट्वलृर्ष्यः, माला लृर्ष्यः = माललृर्ष्य इति रूपं सिद्धम्। अपि चउप+ऋषभीयतीत्यत्र **"वा सुप्यापिशलेः''** (अष्टा. ६/१/६२) इत्यनेन अवर्णान्तादुपसर्गा–कारादौ सुब्धातौ परे विकल्पेन पूर्वपरयोर्वृद्ध्येकादेशेउपार्षभीयतीति रूपंसिध्यति। वृद्धयभावपक्षे तु उपर्षभीयतीति। तद्वत् सावर्ण् यत्वाद् उप लृकारीयतीत्यत्र अवर्णान्तादुप सर्गाद्लृकारादौ सुब्धातौ परे विकल्पेन पूर्वपरयोर्वृद्ध्येकादेशे वैकल्पिकेन वृद्धिरेकादेशे उपाल्कारीयतीति, वृद्ध्यभावपक्षे उपल्कारीयतीति रूपं सिध्यति।

ऋकारलृकारयोः सावर्ण्य ऋकारेण लृकारग्रहणमपि सन्निहितं भवतीति, सत्यम्। परन्तु **"उरण् रपरः"** (अष्टा.१/१/५१) इत्यत्र दोषो भवतीति। ऋकारस्य स्थाने विधीयमानोऽण् रपरो भवतीति प्रकृतसूत्रस्याशयः। यथा–'कृष्ण+ऋद्धिः' इत्यत्र रपरत्वे **'कृष्णर्द्धिः'** इति रूपं सिध्यति। तद्वत्लृकारस्य स्थाने विधीयमानोऽण् रपरो भवतीति। तर्हि 'तव+लृकारः' इत्यत्र रपरत्वे रपरत्वमिष्टरूपात्तिर्भवतीति। समाधाने भाष्यकारेणोक्तम्–

१३. "तुल्यास्यप्रयत्नं सवणम्" (अष्टा.१/१/६) इति सूत्रस्य शब्दकौस्तुभः, पृष्ठा ११६–१२०।

१४. तदेव सूत्रस्य शब्दकौस्तुभः, पृष्ठा १२०।

**"लृकारस्य लपरत्वं वक्ष्यामि।"**[१५] अर्थात् लृकारस्य स्थानेप्रयुज्यमानोऽण्लपरत्वं कर्तव्यम्। **"तच्चावश्यं वक्तव्यमसत्यां सवर्णसंज्ञायां विध्यर्थम्, तदेव सत्यां सवर्णसंज्ञायां विध्यर्थम्। तदेव सत्यां रेफबाधनार्थं भविष्यति''**[१६] इति भाष्यकारेणोक्तम्। लृकारस्य लपरत्वं वक्ष्यामीति भाष्यवचनस्य व्याख्या प्रङ्गे प्रदीकारेणोक्तम्– **"लपरत्वंमिति। व्याख्यास्यामीत्यर्थः। 'रपरः' इत्यत्र 'र' इति लकाराकारेण प्रत्याहार आश्रीयते। तत्रान्तरतम्या–कारस्यास्याण् रपरो भवति, लृकारस्याण् लपर इति।"**[१७] 'रपरः' इत्यत्र 'र' इति प्रत्याहारो विवक्षितः। 'हयवरट्' इत्यतो रकारं नीत्वा 'लण्' सूत्रे इत्संज्ञकेनाकारेण सह 'र' इति प्रत्याहारो भवति। अतः र–प्रत्याहारेण र्, ल् इति वर्णद्वयं ग्रहणीयम्। अत ऋकारस्य स्थानेऽण् रपरः, लृकारस्य स्थानेऽण् लपरः। 'तव+लृकारः' इत्यत्र लपरत्वे 'लवल्कारः' इति रूपं सिध्यति। र–प्रत्याहारं विहाय लपरत्वं न सम्भवम्। लपरत्वं व्याख्यार्थं र–प्रत्याहारः कर्तव्यः। सवर्णसंज्ञा भावेऽपिलृकारस्य लपरत्वं वक्तव्यम्। सवर्ण संज्ञापक्षेऽपि 'तव+लृकारः' इत्यत्र लृकारस्य रपरवबाधनार्थं लृकारस्य लपरत्वं वक्ष्यामीति वक्तव्यम्। अत ऋलृसावर्ण्ये दोषाभावः।

**"रषाभ्यां नो णः समानपदे"** (अष्टा. ८/४/१) इत्यस्मिन् सूत्रे **"रषाभ्यां णत्वे ऋकारग्रणम्''**[१८] इति वार्तिकवचनं पठितम्। अनेन वार्तिकेन ऋकाराद् परस्य नकारस्य णत्वं स्यात्, यथा– पितृणां, मातृणामिति। ऋकारलृकारयोः सावर्ण्येऋकारेण लृकारस्य ग्रहणं भवति। तर्हि 'क्लृप्यमानं पश्य' इत्यस्मिन् उदारणे **"अट्कुप्वाङ्नुम्व्यवायेऽपि"** (अष्टा. ८/४/२) इत्यनेन नकारस्य णत्व आपत्तिर्भवति। अत ऋकारलृकारयोः परस्परं सवर्णसंज्ञं स्वीकृत्वा ऋवर्णेनलृवर्णस्य ग्रहणे दोषः। तथासत्यमपि सवर्णसंज्ञायां 'क्लृप्यमानं पश्य' इत्यस्मनुदाहरणे "कृत्यचः" (अष्टा.

---

१५. "तुल्यास्यप्रयत्नं सवर्णम्" (अष्टा.१/१/६) इति सूत्रस्य व्याकरणमहाभाष्यम्, पृष्ठा २५०।

१६. तदेव।

१७. "तुल्यास्यप्रयत्नं सवर्णम्" (अष्टा.१/१/६) इति सूत्रस्य प्रदीपटीका, पृष्ठा २५०।

१८. "रषाभ्यां नो णः समानपदे" (अष्टा.८/४/१) इति सूत्रस्य वार्तिकम्, पृष्ठा २०१।

८/४/२८) इत्यनेन नकारस्य णत्वे प्राप्ते कथं न? भाष्यकारेणोक्तम्– **"चुटुतुलशर्व्यवायेने' ति वक्ष्यामि। अपर आह– त्रिभिश्च मध्यमैवर्गैर्लशसैश्च व्यवाये नेति वक्ष्यामीति।''**[१९] अर्थात् चवर्गः टवर्गः तवर्गः लकारः श 'एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि नस्य णो नेति। **"वर्णैकदेशाश्च वर्णग्रहणेनगृह्यन्ते इति"**[२०] नियमेन 'क्लृप्यमानं पश्य' इत्यस्मिनुदाहरणलृवर्ण आर्धमात्राव्यञ्जन्युक्ते लकारस्तदाश्रयः प्रतिषेधो भविष्यति। यदि वर्णैकदेशाश्च वर्णग्रहणेन ग्रह्यन्ते, तर्हि योऽसावृकारे रेफस्तदाश्रयंपितृणां, मातृणाम् अत्र **"रषाभ्यां नो णः समानपदे"** (अष्टा. ८/४/१) इत्यनेन नकारस्य णत्वं भविष्यति। अतो रषाभ्यां णत्व ऋकारग्रणमिति न वक्तव्यम्। न हि वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति। वार्तिकरस्ति– **"अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम्।"**[२१] अर्थात् नुड्विधिलादेशविनामन्यत्र वर्णैकदेशाश्च वर्णग्रहणेन न गृह्यन्त इति। अस्मिन्विषये काशिकाकारेण स्पष्टीकृतम्– **"वर्णेषु ये वर्णैकादेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति। तच्छायानुकारिणो हि ते, न पुनस्त एव। पृथक् प्रयत्ननिर्वर्त्त्यंवर्ण मिच्छन्त्याचार्याः।"**[२२] तर्हि पितृणां, मातृणाम् अत्र नकारस्य णत्वं कथम्? अतोरषाभ्यां णत्व ऋकारग्रणमिति वार्तिकमावश्यकम्। ऋकारलृकारयोः सवर्णसंज्ञकत्वे 'क्लृप्यमानं पश्य' अत्र नकारस्य णत्वं प्राप्नोतीति। परन्तु **"क्षुभ्नादिषु च"** (अष्टा. ८/४/३९) इत्याकृतिगणत्वाद् नकारस्य णत्वं प्रतिषेधो भविष्यति। अत ऋकारलृकारयोः सवर्णसंज्ञा स्वीकारे न हि दोषः। परन्तु **"तपरस्तत्कालस्य"** (अष्टा.१/१/७०) इत्यनेन 'ऋत्' इति षण्णां संज्ञा। यदा ऋकारेण लृकारग्रहणं सन्निहितं भवति तदा ऋदिदीत्यनेनलृदिदपि द्वादशानां ग्रहणं स्यात्। तर्हि सदा ऋदिद्ग्रहणीयम्। पृथक् लृदिद्ग्रहणं व्यर्थम्। प्रथमातिक्रमणे कारणाभावादित्यनेन न्यायेन

---

१९ "तुल्यास्यप्रयत्नं सवर्णम्" (अष्टा.१/१/९) इति सूत्रस्य महाभाष्यम्, पृष्ठा २५१।

२०. तदेव।

२१. व्याकरणमहाभाष्यम्, "ऐऔच्" इति माहेश्वरसूत्रस्य वार्तिकम् ४६।

२२. "ऐऔच्" इति माहेश्वरसूत्रस्य काशिकावृत्तिः, पृष्ठा २६।

प्रथमातिक्रमणे द्वितीयातृतीयाग्रहणं न युक्तियुक्तम्। **"अन्यथा ऋतो ङीत्यादौ क्वचिद् ऋद्ग्रहणस्य पुषादिद्युताद्यलृदित इत्यादौ क्वचिद् लृदिद्ग्रहणमस्य च वैयर्थ्यापत्तेः य प्रथमातिक्रमणे कारणाभावेणन सर्वत्र ऋदिद्ग्रहणास्यैव कर्तुं शक्यत्वात्।"**[२३] वर्णसमाम्नायेऽप्यादावृकारस्य पाठः, अतः सर्वत्र ऋदिदित्यने लृप्रपञ्चस्य ग्रहणं भवति। तथापि सूत्रकारेण **"पुषादिद्युतादिलृदितः परस्मैपदेषु"** (अष्टा. ३/१/५५), **"ऋतो ङि सर्वनामस्थानयोः"** (७/३/११०) इत्यस्मिन् सूत्रद्वयेलृदि–दिदिति पृथगुल्लेखं कृतम्। एतेन ज्ञापितं लृदिदित्यनेन ऋप्रपञ्चस्य ग्रहणं न भवति। अस्मिन्विषये बलमनोरमाकारेण स्पष्टीक्रियते– **"तथा च 'पुषादिद्युताद्यलृदितः' इत्यादिविधय ऋदित्स्वपि प्रवर्तेरन्नति चेन्न, ऋदित्यनेन लृप्रपञ्चचस्य ग्रहणेऽपि क्वचित् लृदिद्ग्रहणबलेन लृइत्यनेन ऋप्रपञ्चचस्य ग्रहणाभावात्।"**[२४] इदमेवाभिप्रेत्य "अनुदित्सवर्णस्य चाप्रत्ययः" (अष्टा.१/१/६६) इति ग्रहणकसूत्रे 'ऋत्' इत्यनेन लृप्रपञ्चचस्य ग्रहणम्, परन्तु 'लृत्' इत्यनेन ऋप्रपञ्चचस्याग्रहणम्।

ऋकारोऽनुबन्धविशिष्टकार्यं 'लृदित्' स्थले लृकारोऽनुबन्धविशिष्टकार्यं 'ऋदित्' स्थले न प्रवर्तते। तद्यथा–'बाधृ' इति ऋदित्धतोर्णिजन्तलुङ्लकारे **"णौ चङ्युपधाया ह्रस्वः" (अष्टा.७/४/१) इत्यनेनोपधाया ह्रस्वप्राप्ते "नाग्लोपिशास्वृदिताम्"** (अष्टा.७/४/२) इत्यनेन निषेधे 'अवबाधत्' इति रूपं सम्भवति। तद्वत् 'आप्लृ' इति लृदित्धातोर्णिजन्तलुङ्लकार उपधाह्रस्वस्य निषेधे 'अपिपत्' इति इष्टरूपापत्तिर्भवति।

लृकारोऽनुबन्धविशिष्टकार्यं 'ऋदित्' स्थलेऽपि प्रवृत्तिर्न भवति। यथा– गम्लृ, आप्लृ इति 'लृदित्धातौ, अत्र लुङ्लकारे **"पुषादिद्युतादिलृदितः परस्मैपदेषु"** (अष्टा. ३/१/५५) इत्यनेन 'च्लि' स्थाने अङादेशेअगमत्, आपदिति रूपद्वयं सिध्यति। तथैव 'खा–' इतिऋदित्स्थलेलुङ्लकारे **"पुषादिद्युतादिलृदितः परस्मैपदेषु"** (अष्टा.३/१/५५) इत्यनेन 'च्लि' स्थाने

---

२३. "तपरस्तत्कालस्य" (अष्टा.१/१/७०) इति सूत्रस्य बालमनोरमाटीका, पृष्ठा ३०।

२४. तदेव।

अङादेशे 'अखादीत्' इत्येष्टरूपापत्तिर्भवति।

अपि च "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" (अष्टा. ८/२/८३) दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। यथा–दे३वदत्त!। यदा ऋलृवर्णयोः सावर्ण्ये 'अनृतः' इत्यनेन 'क्लृ३प्तशिखः' इत्यनेन प्लुतोनिषेधो न। एतेन प्रमाणितं सर्वत्र ऋदिदनुबन्ध विशिष्ट कार्यंलृदित् स्थले, लृदिदनुबन्धविशिष्टकार्यं ऋदित् स्थले न प्रवर्तते।

निष्कर्षः

न क्वापि ऋकारलृकारयोः सावर्ण्ये दोषः। "ऋति ऋवा वचनम्, लृति ल्लृ वा वचनम्" इति वचनद्वयकथने गौरवदोषः। तावद्वार्तिकद्वये दीर्घपदस्यानुवृत्तिकरणरूपम्। सावर्ण्यकथने दीर्घपदमनुवृत्तिं विहाय दीर्घो भवत्येव। ऋलृवर्णयोः सावर्ण्यविधाने व्यपकत्वमस्ति। खट्वा+ऋर्ष्यः= खट्वऋर्ष्यः, माला+ऋर्ष्यः= मालऋर्ष्यः प्रभृतिरूपं यथा स्यात्, तथैव खट्वा. लृर्ष्यः=खट्वलृर्ष्यः, माला+लृर्ष्यः= माललृर्ष्यः इति रूपमपि सिध्यति। अपि चउप+ऋषभीयति=उपार्षभीयतिध्उपर्षभीयति। तद्वद्उप+लृकारीयति= उपाल्कारीयतिध्उपल्कारीयतीति रूपं सिध्यति। परन्तु न ह्यृकारेणलृकारः सर्वत्र सन्निहितम्। ऋ–लृवर्णयोः सावर्ण्ये सत्यप्यनुबन्धकार्ये ऋकारेण लृकारस्य अथवा लृकारेण ऋकारस्य न ग्रहणम्। बाधृ लोडने, खा–भक्षणे, गम्लृ गतौ, इत्यादिस्थल अनुबन्धंपृथक् पृथगुपदिष्टम्। ऋकारोऽनुबन्ध विशिष्टकार्यं 'लृदित्' स्थले लृकारोऽनुबन्धविशिष्टकार्यं 'ऋदित्' स्थले न प्रवर्तते। ऋदिद्लृदिदित्यनुबन्धभेदेन निर्देशेन परस्परेण परस्परस्याग्रहणं सूचितम्। माहेश्वरसूत्रेऽपि (ऋलृक्) पृथक् लृकारग्रहणेन ज्ञापितम् ऋकारलृकारयोः सावर्णविधिरनित्यमिति मम आशयः।

***

# काव्यस्यालौकिकत्वानुसन्धानम्

**डॉ० शुभङ्करबसाकः**

*सहायकाचार्यः*

*कुलटिमहाविद्यालयः, कुलटिनगरम्,*

*आसनसोलनगरम्, पश्चिमवङ्गः*

काव्यस्यालौकिकत्वं किमपि अनुभवसिद्धं सकलैः शास्त्रकारैः काव्यस्वरूपालोचने यथाकथञ्चिन् निर्विवादं स्वीकृतम्। तथाहि–

**"गुरूपदेशादध्येतुं शास्त्रं जडधियोप्यलम्।**

**जायते जातु कस्यचित् प्रतिभावतः"।।**[1]

न लौकिकमिति अलौकिकम्। लोकस्येदमिति लौकिकम्। नेति विपरीतभावः असितादिवत्। लोकस्य किमिदं यस्य विपरीतभावेन काव्यस्य काव्यत्वम्? लोकश्चित्यनुगृहीतप्रकृतिनिर्मितः। परस्परसमवेतत्त्रिगुणा हि प्रकृतिः जडा सत्त्वरजस्तमः स्वरूपा। तत्र सत्त्वांशे सन्निकृष्टचितिपुरुषं प्रतिबिम्बत्वेन अनुबध्नन्ती चितिसंक्रान्ता जडापि चेतनायते। तमः अंशे पुनः चितिसंकान्तापि जडायते। **''उपष्टम्भकं चलञ्च रजः''**[2] रजः अंशे प्रकृतिः तमाऽभिभूय चेतनायमानं सत्त्वम् अथवा सत्त्वमभिभूय जडायमानं तम उपकरोति। लोके हि द्विविधः पदार्थः। सेन्द्रियो जीवो रासायनिको जडश्च। गुणपरिणामसन्निवेशमूलकमानस्य सत्त्वप्राधान्यात् तमःप्राधान्याद् वा। तमः प्रधानमूलकमाने प्रकृतिः पाञ्चभौतिकपरमाणुरूपेण परिणता सती गुणानां परस्परविमर्दात्मकरजो रासायनिकस्रोतोरूपेण बिभर्ति। एवं सत्त्वप्रधानमौलिक गुणमाने जीवे प्रकृतिः बुद्धिरूपेण परिणता सती गुणानां परस्परविमर्दात्मकरजः प्रत्यक्षानुमानागमाद्यात्मकचित्तवृत्तिरूपेण बिभर्ति। काव्यं तु बुद्धिकर्म। बुद्धिश्च

---

१. काव्यालङ्कारः १/१४

२. साङ्ख्यतत्त्वकौमुदी २६

सत्त्वं रजस्तमोभ्यां संसृष्टं प्राकृतं लौकिकं च जडेन समाना कार्यकारणनियमात्मककर्मबन्धनियन्त्रिता, अतएव बाह्य विषय निमित्तक वृत्तिबाह्यवस्तुनियन्त्रित स्वरूपा। सा बुद्धिः पुनः पुरुषायमाणा अतिप्राकृतालौकिकस्वप्रकाश (self-stimulation) स्वभावा बाह्यवस्तु निरपेक्षवृत्तिः बाह्यवस्त्वनियन्त्रितस्वरूपा। या वृत्तिः बुद्धेः सत्त्वतात्पर्यवहा सा लौकिकी जन्तूनां क्षिप्त–मूढ़–विक्षिप्तावस्थानाम्। या च प्रसंख्यानस्वरूपा पुरुषतात्पर्यवहा सा अलौकिकी योगिनाम् एकाग्रनिरोधावस्थानाम्। काव्ये कोऽयं बुद्धिव्यापारः, तस्यालौकिकत्वंकेन सिध्यत्ति?

कवनीयमिति काव्यम्। आगमात्मिका तत्र बुद्धिवृत्तिः। शब्दाकारा बुद्धिः अर्थाकारेण परिणमति इति। तद् यावत् बुद्धिसत्त्वं तमः स्पृष्टत्वात् बाह्यशब्दनिबन्धनंतावल्लौकिकम्। एवं बाह्येन्द्रियगृहीतशब्दायाः वाच्यार्थ प्रतीतिः आगमबुद्धेः लौकिकी वृत्तिः। बाह्यनिमित्तकारणभूतेन शब्दे नैवाभिहितत्वात् तस्य कार्यरूपस्य वाच्यार्थस्य। आगमबुद्धिर्यावद् बुद्धिपुरुषभाचेन स्वप्रकाशतया युज्यमाना स्वतः शब्दार्थाकारेण परिणमति तावत् सा आगमात्मिका अलौकिकी वृत्तिः। सा योगिनाम् ॐ–कारानुभवः, ऋषीणां वेदोपलब्धिरित्यादि। सैव आगमात्मिका बुद्धिर्यदा लौकिक शब्दार्थाकारं गृह्णानापि तन्निबन्धनकार्यकारणभावमतिक्रम्य स्वप्रकाशतया युज्यते तदा भवति काव्यबुद्धिवृत्तिः। सापि अलौकिकी। तत्र बुद्धेः स्वप्रकाशताचरितार्थत्वात्। तथापि सान यौगिकीतत्र बुद्धेः लौकिक शब्दार्थाकार ग्राहित्वात्। तथापि न लौकिकीतत्र बुद्धेः लौकिकशब्दार्थाकाराया अपि लौकिकसीमातिक्रमपरिणमनात्। का खलु काव्ये लौकिकशब्दार्था कारत्वेऽप आगमबुद्धिवृत्तेः तदतिशयर्थवाहिता स्वप्रकाशयोगनिबन्धना काव्यस्य लौकिक लक्षणावहा?

शब्दार्थशरीरं तावत् काव्यम्। यदुक्त दण्ड्याचार्येण **"शरीरंताव दिष्टार्थव्यवच्छिन्ना पदावली"**[३]। तत्र **"शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव"**[४] इति ध्वन्यालोकलोचने। एतावदेव

---

३. काव्यादर्शः १/१०

४. ध्वन्यालोकलोचनम् १/२

आगमबुद्धिनिवृत्तस्य काव्यस्य अलौकिकत्वमूलम्। शास्त्रादिलौकिकवाक्येषु शब्दो बुद्धौ पतितः स्ववृत्त्या मुख्यया गौण्या (लक्षणया) वा अर्थं कार्यकारणभावनियमेन अभिदधाति। किं तु काव्ये तौ एव शब्दार्थौ बुद्धौ पतितौ स्वप्रकाशबुद्धिशरीरिणः शरीररूपेण पर्यवसितौ तावदेवार्थं वाच्यातिरिक्तं प्रतीयमानाख्यम् अधिकं निष्पादयतः। घटे सन्निबद्धाः परमाणवः जडपरमाणुत्वेनएव तिष्ठन्ति, जीवदेहे त एव पुरुषार्थसाधनानि इन्द्रियाणि सम्पद्यन्ते। एवं लौकिकशास्त्रादिषु शब्दार्थौ वाच्यवाचक रूपजडडशब्दार्थरूपेणैव तिष्ठतः, काव्ये तावेव स्वप्रकाश बुद्ध्यात्मनः शरीर सम्पद्यमानौ बुद्धेः स्वप्रकाशता रूपमर्थमधिकं निष्पादयितुं पर्यषस्यतः। स एव प्रतीयमानाख्योऽर्थो बाह्यशब्दाभिहित वाच्यादतिरिक्तः सहृदयस्य स्वप्रकाशधर्मिकबुद्ध्यात्मप्रतिभयैव निष्पादितो ध्वनिरिति उच्यते काव्यविद्भिः। **'वाच्यसङ्कलनाविमोहितहृदयैस्तु तत्पृथग्भावो विप्रतिपद्यते चार्वाकैरिवात्म–पृथग्भावः'**[5] इति ध्वन्यालोकलोचने। ध्वनिना अलौकिकंकाव्यं शास्त्रदेर्विलक्षणं यथा आत्मना जीवो घटादेः।

अलौकिकत्वं स्वप्रकाशत्वं, लौकिकत्वंकार्यकारणनियमतन्त्रत्वम्। पुरुषः अलौकिकः स्वप्रकाशत्वात्, प्रकृतिः लौकिकी कार्यकारणनियमतन्त्रत्वात्। घटादिः लौकिकः प्राकृतपरमाणुनिर्मितत्वात्, जीवः अलौकिकः पुरुषार्थ साधनेन्द्रियमयत्वात्। शास्त्रादिवाक्यं लौकिकं कारणरूप शब्दाभिहित कार्यरूपवाच्यार्थमयत्वात्, वेदवाक्यम लौकिकं स्वप्रकाश शब्दब्रह्ममयत्वात्। ननु मुक्तपुरुषविलक्षणजीवस्य इन्द्रियमयत्वेऽपि इन्द्रियाणां परमाणुनिर्मितत्वात् कथं न लौकिकत्वं घटादिवत्, एवम् अपौरुषेयवेदवाक्यविलक्षणकाव्यवाक्यस्य स्वप्रकाशधर्मिक–सहृदयात्मकबुद्धिवृत्तिस्वरूप–ध्वन्यात्मकत्वेऽपि ध्वनेः वाच्यसामर्थ्याक्षिप्तत्वात् कथं न लौकिकत्वं शास्त्रादिवाक्यवत् इति चेदुच्यते। अतएव जीवस्यालौकिकत्वं न यथा केवलपुरुषनिर्मितत्वात् किन्तु जडपरमाणूनां पुरुषप्रकाशकत्वाधायकत्वात्, एवं काव्यवाक्यस्यापि अलौकिकत्वं न केवलशब्दब्रह्ममयस्वरूपत्वात् किन्तु लौकिकशब्दार्थयोः स्वप्रकाशर्मिकध्वन्यात्मकार्थाक्षेपसामर्थ्याधायकत्वात्। तत्सामर्थ्यं च

---

५. तत्रैव

लौकिकशब्दार्थयोः कंकमभिनवव्यापारंप्रकटीकरोतीति एतावदेव काव्या लौकिकत्वानुसन्धायिनां काव्यविदामनुचिन्तनीयम्।

जीवस्य पाञ्चभौतिकशरीरस्य आत्माधिष्ठितत्वाद् यथा परमाणूनां प्राणावष्टभ्यमानानाम् इन्द्रियत्वप्राप्तिः, तथा काव्यस्य वाच्य–वाचक–परशब्दार्थशरीरस्य ध्वन्यात्माधिष्ठितत्वात् शब्दार्थानां प्रसादमाधुर्यादि–गुणावष्टभ्यमानानामनुप्रासोपमाद्यलङ्कारस्वरूपताप्राप्तिः। तथा हि–

**''योऽर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।।**

**तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः''**[६]।

शब्दार्थानामलङ्काररूपपरिणामे को व्यापारः? **''काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते''**[७] इति काव्यादर्शे। शोभा च विच्छित्तिर्वा सौन्दर्यंवा वस्तुनो यत् खलु बुद्धेः स्वप्रकाशव्यापारेण एव सचमत्कारानन्दचिन्मयस्वरूपेण संवदति। अनुप्रासादिशब्दालङ्कारा उपमाद्यर्थालङ्काश्च शब्दार्थानां स एव परिणामः येन बुद्धौ पतितास्ते बुद्धेः चमत्कारानन्दसंवित्स्वरूपे स्वप्रकाशप्रवाहे निमज्जन्ति। ननु कथमेतत् सम्भाव्यते। अलङ्कारितोऽपि वाच्यार्थः किमपि वस्तु लौकिकंप्रस्तुतं वक्ति। तदन्यत्, अन्यश्चालौकिकः बुद्धेः स्वप्रकाशव्यापारः। न खलु पटनिष्पत्तौ घटस्य व्यापार इति चेदुच्यते।

अतएव काव्ये श्रव्ये वा दृश्ये वा यः अलौकिकस्वप्रकाशबुद्धिव्यापारः सयोगिलब्धानन्दानुगतसमाधिप्रतीतानन्दमात्रविलक्षणरसध्वनिस्वरूप एव। रसश्च **''रसनात्मकवीतविघ्नप्रतीतिसंग्राह्यो भाव एव रस''**[८] इति अभिनवभारत्या रसाध्याये। तस्य निष्पत्तिश्च **''विभावानुभावव्यभिचारि–संयोगाद्रसनिष्पत्ति''–रिति**[९] नाट्यशास्त्रे। काव्यस्य यत् शब्दार्थशरीरं न तत्

६. ध्वन्यालोकः १/२–३

७. काव्यादर्शः २/१

८. अभिनवभारती, रसाध्यायः।

९. नाट्यशास्त्रम्, षष्ठोध्यायः।

किमपि अन्यत् स्थायिभाववासनात्मबुद्धेः रसनाख्यनिर्विघ्नस्वसंविच्चर्वण–व्यापारनिष्पादकसामग्रीतः। तथा हि काव्ये शब्दार्थरूपेण यावन्ति वस्तूनि प्रस्तुतानि वर्तन्ते तावतां प्रथमतो वासनात्मकबुद्धिभावानां यस्य कस्यापि कारण–कार्य–रूपता एव। लोके तादृशकारणेन उत्पादितस्ता–शकार्यमुत्पादयन् भावः प्रतीतोऽपि प्रतीतौ स्वप्रकाशतया विश्रान्तिं नाप्नोति। तादृशकारणकार्यरूपवस्तूनां हि देश–काल विशेषावच्छिन्नतया भावस्य स्वगतपरगतत्वादिनियमवशात् प्रतीतिः भावातिरिक्तविषयान्तरे संक्रामति। अतएव काव्ये शब्दार्थरूपेण यावन्ति वस्तूनि प्रस्तुतानि वर्तन्ते तावतां द्वितीयतो विगलितदेशकालविशेषावच्छेदतया चित्रतुरगादिन्यायेन साधारणीकृतरूपता एव। यामुररीकृत्य काव्ये भावकारणंभावकार्यं सहकार्यसहचारिभावान्तराणि च लौकिकानि अलौकिकविभावानुभावव्यभिचारिण इत्युच्यन्ते। तदेव च अर्थात् शब्दाभिहितलौकिकवस्तुरूपार्थानां देशकालविशेषपरिच्छेदभेदनमेव शब्दार्थानाम् अलङ्कारपरिणामव्यापारः इति सुधीभिर्विभाव्यम्। शब्दार्थशरीरस्य काव्यस्य उपमाद्यलङ्कारपरिणतस्य तत्परिणाममहिम्ना वाच्यार्थोपनत लौकिकवस्तूनां देशकालावगाहिताविगलनेन साधारणीकरणम्, साधारणीकृतानां च तेषां तत्कालसिद्धस्व प्रकाशहृदय प्रस्तुतोचित भावविशेषविभावादिपरिणामः, भावविशेषस्य च तस्य निर्विघ्नस्व प्रकाशप्रतीतिविषयत्वेन गृहीतत्वाद् रसत्वंसिद्धं भवति। सर्वथा तत्र तत्र बुद्धेः अलौकिकः स्वप्रकाशव्यापारो यो ध्वनिरिति नूतननाम्ना अभिधीयते काव्यविद्भिः। योगप्रसिद्धेकाग्रचित्तभूमिगतस्वप्रकाशव्यापाराद् भिन्न रूपत्वादस्य सहृदयनामकनूतनचित्तभूमिगतस्वप्रकाश–व्यापारस्य। सहृदयता नाम वासनात्मकस्थायिभावप्रत्यक्षीकरणयोग्यता। प्रत्यक्षीकरणञ्च बाह्येन्द्रियविषयीकरणम्। तच्च स्थायिभावानाम् उचितविभावादिरूपेणेव। तच्च विभावादिवस्तूनां साधारणीकरणमुखेन। साधारणीकरणञ्च वस्तूनां देशकालावच्छिन्नविशेषसङ्कल्पराहित्यम्। विशेषसङ्कल्पराहित्ये का प्रत्यक्षवृत्तिः? अतएवोच्यते सम्यग्मिथ्यासंशयादिसकललौकिकप्रत्यक्षप्रकाराद विलक्षणोऽयं रसनात्मकध्वनौ अलौकिकः स्थायिभावप्रत्यक्षः।

वाक्यं रसात्मक काव्यमित्युक्तम्। वाक्यमागमबुद्धिवृत्तिः। रसश्च

स्थायिभावः वीतविघ्नप्रतीतिसंगृहीतविषयात्मकावस्थः। सा च बुद्धेः स्वसंविच्चर्वर्णास्वरूपा स्वप्रकाशव्यापारमयता। अतएव रसोऽलौकिकः। रसात्मकवाक्यत्वात् काव्यमप्यलौकिकम्। ननु बुद्धेः स्थायिभाववृत्तिर्यदि रसः सा लोकेऽपि दृश्यतै। तथा हि "**जात एव हि जन्तुरियतीभिः संविद्भिः परीतो भवति**"[१०] इति, "**तत्र पुरुषार्थनिष्ठाः काश्चित्संविद**"[११] इत्यादि च उक्तम्। इति चेदुच्यते। लोके स्थायिभावः क्लेशरूपः प्रसुप्तो वा तनुर्वा प्रतीतौ मोदितः विच्छिन्नस्तु उदितोऽपि खण्डितः, उदारः पुनः स्यन्दमानः प्रतीतिं समाक्रान्तोऽपि कर्मविपाकमभिनिर्हरन् स्वबोधमात्रे तस्या विश्रान्तिं नाददत् स्वकारण कार्यादि—बाह्यवस्तुषु विषयान्तरेषु तामाक्षिपति। रसे तु स्थायिभावः अक्लेशरूपः प्रतीतिंसमाक्रान्तस्तां विषयान्तरक्षिप्तामकुर्वन् स्वात्मन्येव विगलितवेद्यान्तरंविश्रान्तां करोति। तथा हि "**नाट्ये तु पारमार्थिकं किञ्चिदद्य मे कृत्यं भविष्यतीत्येवमभूताभिसन्धिसंस्काराभावाद्**"[१२] इत्युक्तम् इति रसाधिकृतस्थायिभाववृत्ते लोकदृष्टस्थायिभाववृत्तिविलक्षणत्वाद्रसस्या लौकिकत्वं सिद्धम्। ननु बुद्धेः स्थायिभावप्रतीतिरक्लिष्टा यदि रसः स एकाग्रचित्तभूमौ एकाग्रसमाधिरूपेण दृश्येत। तथा हि "**तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति**"[१३] इत्युक्तम। इति चेदुच्यते। एकाग्रचित्तभूमौ एकाग्रसमाधिना या अक्लिष्टा स्थायिभावप्रतीतिः सम्भवेत् सा योगशक्तिवशाद् योगिजनेच्छया निवर्त्तनीया, अन्यथा एकाग्रचित्तभूमौ स्थायिभाव—विलक्षण—विषयेऽपि यस्मिन् कस्मिन्नपि एकाग्रसमाधिः योगिजनेच्छया सार्थको भवितुमलम्। न हि सम्प्रज्ञातयोगः स्थायिभावमेकान्तं ज्ञेयत्वेनापेक्षते। कविप्रतिभाशक्तितो यो रसनात्मकसमाधिः सहृदयहृदयभूमौ तत्र प्रतीतेः स्थायिभाव एव विश्रान्तिरेकान्ता। तथा हि "**अप्रधाने च वस्तुनि कस्य संविद विश्राम्यति? तस्यैव प्रत्ययस्य प्रधानान्तरंप्रत्यनुधावतः स्वात्मन्यविश्रान्तत्वात्। अतोऽप्रधानत्वं**

---

१०. अभिनवभारती, रसाध्यायः।

११. तत्रैव

१२. तत्रैव

१३. पतञ्जलिव्यासभाष्यम् १/२

**जडेविभावानु भाववर्गे व्यभिचारिनिचये च संविदात्मकेऽपि नियमेननान्य सुखप्रेक्षिणि संभवतीति तददतिरिक्तः स्थाय्येव चर्वणापात्रम्''**[१४] इति रस–निर्वर्तक–सहृदय–हृदयभूमेः लोकदृष्ट्चैकाग्रचित्तभूमिविलक्षणत्वाद्र सस्यालौकिकत्वं सिद्धम्।

ननु अन्तसंविदात्मके स्थायिभावे योगिप्रत्यक्षंविना केन प्रतीतिसम्बन्धः? तथा हि ''किं च प्रतीत्युपायानाम् अभावे कथं प्रतीतिः? अस्फुट प्रतीतिकारिशब्दलिङ्गसम्भवेऽपि न प्रतीतिर्विश्राम्यति। स्फुटप्रतीतिरूप प्रत्यक्षोचितप्रत्यय–साकाङ्क्षत्वात्। यथाहु **''सर्वा चेय' प्रमितिः प्रत्यक्षपरा''**[१५] इति। ''प्रत्यक्षं च'' **''इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषया सामान्यविशेषात्मनोर्थस्य बिशेषावधारणप्रधाना वृत्ति**[१६] रित्युच्यते। अतएव रसनात्मकस्थायिभावप्रतीतेर्निष्पादकानि स्थायिभावकारणकार्यभूतबाह्मवस्तूनि प्रत्यक्षयोग्यानि कविनटादिसकलकलाकारैरुपन्यस्तानि काव्याभिनयादि कलाकर्मसु विभावादिरससामग्रो व्यपदेश्यानि। तदुक्तः **''विभावानुभाव व्यभिचारिसंयोगाद्रसनिष्पत्ति''**[१७] रिति।

ननु विभावाद्यः अन्यथा लोकदृष्टस्थायिभावकारणकार्यरूपवस्तून्यैव, तत् तैः लोकवत् कर्मवन्धनियमित–क्लिष्ट–स्थायिभावजननेन रसनात्मक स्थायिच र्वणावारणं भवतु इति चेत् स्थायिसा क्षात्कारोन्मुखस हृदयहृदयेन तत्साक्षात्कार साधनसामग्रीतया आमन्त्रितानां विभावादीनां कुतो लौकिककारणकार्यभावः? तदेव तेषामलौकिकविभावादिशब्दव्यपदेशः, व्यापारश्च लौकिककारणकार्यव्यापारविलक्षणः अलौकिको ध्वनिरिति। तल्लिङ्गानि च विभावादिषु बाह्यवस्तुसाधारणीकरणादीनि रसनात्मक–स्थायिभावैकप्रतीतिविघ्नापसरणलक्षणानि बहुधा दर्शितानि अभिनवगुप्ताचार्यै रभिनवभारत्या रसाध्याये।

---

१४. काव्यानुशासनम्, सटीकम्, द्वितीयवृत्तिः

१५. अभिनवभारती, रसाध्यायः।

१६. व्यासभाष्यम् १/७

१७. नाट्यशास्त्रम्

"सर्वथा रसनात्मकवीतविघ्नप्रतीतिग्राह्यो भाव एव रसः। तत्र विघ्नापसारका विभावप्रभृतयः। तथा हि–लोके सकलविघ्नविनिर्मुक्ता संवित्तिरेवचमत्कारनिर्वेशरसनास्वादनभोगसमापत्तिलयविश्रान्त्यादिशब्दैरभिधीयते। विघ्नास्तस्यां सप्त। प्रतिपत्तावयोग्यता– सम्भावनाविरहो नाम स्वगतत्वपरगतत्वनियमेन देशकालविशेषावेशो निजसुखादिविवशीभावः, प्रतीत्युपायवैकल्यं, स्फुटत्वाभावोप्रधानता, संशययोगश्च"[१८]। इति सप्तधा रसप्रतीतिविघ्ना लौकिका उक्ताः। सप्तधा च विभावादिभिस्तद्विघ्नापसारणंतत्र विवृतम्। सप्तधा तर्हि विभावादीमामलौकिकत्वलक्षणम्। रसनात्मकभावचर्वणा निष्पादकविभावादीनां सप्तधाऽलौकिकत्वात् काव्यात्मभूतरसस्या लौकिकत्वंतेन सप्तधा सुधीभिर्विवेच्य वर्तते।

***

१८. अभिनवभारती, रसाध्यायः

# श्रीमद्भागवतमहापुराणे तथा वैष्णवदर्शने गोपीतत्त्वम् एकं पर्यालोचनम्

**डॉ० विप्लवचक्रवर्ती**

*सहाचार्यः,*

*सरोजिनी–नाइडु–कॉलेज–फॉर–विमेन्–महाविद्यालयः*

*३०, यशोर रोड, कोलकाता, पश्चिमबङ्गप्रदेशः*

**प्रबन्धसारः–**श्रीमद्भागतमहापुराणस्यांशविशेषे तथा वैष्णवदर्शने गोपीतत्त्वं प्राधान्येनालोचितम्। श्रीमद्भगवतमहापुराणस्य दशमस्कन्दस्य ऊनत्रिंशेऽध्याये रासलीलाप्रसङ्गे गोपीनां त्यागस्य वर्णना यथास्ति, वैष्णवपदावल्ल्यां, वैष्णवदर्शनस्य ग्रन्थेषु विशेषतः वैष्णवदर्शनस्य प्रकरणग्रन्थे श्रीश्रीराधारससुधानिधौ गोपीनां चरितानि यथा वर्णितानि तान्येव तत्त्वानि प्रबन्धेऽस्मिन् समुपस्थाप्यते।

गुप्–धातोः अचि गोपशब्दः निष्पद्यते। ततः गोपशब्दात् स्त्रित्वविवक्षायां 'पुंयोगादाख्यायाम्'[1] इति सूत्रेण ङीषि गोपीशब्दः निष्पन्नः।

श्रीमद्भागवतमहापुराणस्य दशमस्कन्दस्य ऊनत्रिंशेऽध्याये रासलीलाप्रसङ्गे गोपीनां चरित्रस्य दार्ढ्यं प्रकाशितम्। भगवान् श्रीकृष्णः योगमायया रासस्य सङ्कल्पमकरोत्। श्रीकृष्णः वंशीध्वनिना गोपिकानां भय–सङ्कोच–धैर्य–मर्यादादिवृत्तीः हृतवान्। गोपिकाः निर्गतनिखिलकल्मषाः आसन्। प्रियतमस्य श्रीकृष्णस्य विरहस्य सुतीव्रदहनेन तासामशुभकर्मफलानि भष्मीभूतानि। तदुक्तं श्रीमद्भागवतमहापुराणस्य दशमस्कन्दस्य ऊनत्रिंशेऽध्याये–

**दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः।**
**ध्यानप्राप्ताच्युतश्लेषनिर्वृत्या क्षणमङ्गला।।**[2]

---

१. वैयाकरणसिद्धान्तकौमुद्याम्– ०४/०१/४८

२. व्यासदेव, २०१३, श्रीमद्भागवत–महापुराण (बांगला), नवम– द्वादश स्कन्द,

गोप्यः अनन्यशरणा आसन्। श्रीकृष्णपदपङ्कजसेवा एव तासां जीवनलक्ष्यभूता आसीत्। गोप्यः जानन्ति स्म श्रीकृष्णो हि स्वतन्त्रः, सर्वसाधनदुर्लभश्च। केनापि बन्धनेन तस्य बन्धनं न सम्भवति, तथापि ताः सर्वदैव प्रेमबन्धनेन श्रीकृष्णस्य बन्धने यत्नशीलाः आसन्। ताः गोप्यः अनुभूतवत्यः श्रीकृष्णं विहाय पतिपुत्रादयः सर्वे एवान्ततो गत्वा दुःखं जनयन्तः। अतः श्रीकृष्णस्य प्रसन्नतैव ताभिः काम्यते। तदुक्तं—

**कुर्वन्ति हि त्वयि रतिं कुशलाः स्वात्मन्**
**नित्यप्रिये पतिसुतादिभिरार्तिदैः किम्।**
**तन्नः प्रसीद परमेश्वर मा स्म छिन्द्या**
**आशां भृतां त्वयि चिरादरविन्दनेत्र।।**[३]

श्रीकृष्णस्य सान्निध्यलाभात्परं तासां चित्तानि सांसारिकसुखेषु न सन्निहितानि न भवन्ति स्म। गृहकृत्यादिषु तासां रुचिर्नासीत्। तदुक्तं —

**चित्तं सुखेन भवतापहृतं गृहेषु**
**यन्निर्विशत्युत करावपि गृहकृत्ये।**
**पादौ पदं न चलतस्तव पादमूलाद्—**
**यामः कथं ब्रजमथो करवाम किम्वा।।**[४]

वृन्दवनस्य गोप्यः एवं कृष्णप्रेम्णि समाहितचित्ताः अभवन् यत् रासलीलायाः परं श्रीकृष्णेऽन्तर्हिते ताः श्रीकृष्णमयाः सत्यः श्रीकृष्णवदाचरणं कुर्वन्ति स्म। तदुक्तं श्रीमद्भागवतमहापुराणस्य दशमस्कन्दस्य त्रिंशेऽध्याये—

**गत्यानुरागस्मितविभ्रमेक्षितै—**
**र्मनोरमालापविहारविभ्रमैः।**
**आक्षिप्तचित्ताः प्रमदा रमापते—**

---

गीताप्रेस, गोरक्षपुर, सप्तम संस्करण, १०/२६/१०

३. तत्रैव, १०/२६/३३

४. तत्रैव, १०/२६/३४

**स्तास्ता विचेष्टा जगृहुस्तदात्मिकाः।।**[५]

श्रीकृष्णस्य गमनं, स्मितं, प्रेक्षणं तथा सम्भाषणं सर्वे एव विषयाः गोपीनामाचरणेषु प्रतिविम्बिता अभवन्। ताः स्वपरिचयं विस्मृत्य श्रीकृष्णतः अभिन्नाः जाताः। तदुक्तं—

**गतिस्मितप्रेक्षणभाषणादिषु**
**प्रियाः प्रियस्य प्रतिरूढमूर्तयः।**
**असावहं त्वित्यबलास्तदात्मिका**
**न्यवेदिषुः कृष्णविहारविभ्रमाः।।**[६]

कालिदासेन मेघदूते विरहातुरस्य यक्षस्य मेघं दूतीकृत्य प्रियायाः समीपं वार्तायाः प्रेषणस्य वर्णनाकाले उक्तं कामार्तस्य चेतनाचेतनयोर्मध्ये भेदज्ञानं लुप्यते। एवं वर्णिता—

**कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।**[७]

वृन्दावनस्य गोप्योऽपि रासलीलायाः परमन्तर्हिते श्रीकृष्णे श्रीकृष्णानुरागेन एवं मोहिता अभवन् यत्ताः अचेतनेषु वृक्षादिषु प्राणानामारोपं कृत्वा तान् पृच्छन्ति कृष्णवार्ताम्। अश्वथं, प्लक्षं, कुरुवकम्, अशोकं, नागकेशरं तथा चम्पकं, तुलसीं, मालतीं, मल्लिकां, चूतं, प्रियालं, पनसं, कोविदारं, जम्बुम्, अर्कं, विल्वं, वकुलम्, आम्रं कदम्बं च पृच्छन्ति श्रीकृष्णवार्ताम्। तदुक्तं श्रीमद्भागवतमहापुराणस्य दशमस्कन्दस्य त्रिंशेऽध्याये—

**दृष्टो वः क्वचिदश्वत्थ प्लक्ष न्यग्रोध नो मनः।**
**नन्दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः।।**

**कचित् कुरुवकाशोकनागपुन्नागचम्पकाः।**
**रामानुगो मानिनीनामितो दर्पहरस्मितः।।**

---

५. तत्रैव, १०/३०/०२

६. तत्रैव, १०/३०/०३

७. कालिदास, मेघदूत, सम्पादक— सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कोलकाता, तृतीय संस्करण, पूर्वमेघ, ०५।

**कच्चित्तुलसि कल्याणि गोविन्दचरणप्रिये।**
**सह त्वालिकुलैर्विभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः।।**
**मालत्यदर्शि वः कच्चिन्मल्लिके जाति यूथिके।**
**प्रीतिं वो जनयन् यातः करस्पर्शेन माधवः।।**
**चूतप्रियालपनसासनकोविदार–**
**जम्ब्वर्कविल्ववकुलाम्रकदम्बनीपाः।**
**येऽन्ये परार्थभावकान्यमुनोपोकूलाः**
**शंसन्तु कृष्णपदवी रहितात्मनां नः।।**[८]

श्रीकृष्णस्य भावेन भविताः गोप्यः श्रीकृष्णमयाः जाताः। तासु श्रीकृष्णस्य आवेशः एवं गाढतरः जातः यत्ताः भगवदात्मिकाः सत्यः भगवतः लीलानामनुकरणं कुर्वन्ति स्म। तदुक्तं–

**इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः।**
**लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिका।।**[९]

गोपीषु काश्चन पूतनालीलायाः अनुकरणं कृतवत्यः। काचित् गोपी बालकृष्णस्य अन्या च तृणावर्तदैत्यस्य रूपं स्वीकृत्य तृणावर्तलीलाम् अनुकरोति स्म। काचित् गोपी बालकृष्णस्य अन्या च वकासुररूपं स्वीकृत्य वकासुरबधलीलामनुकरोति स्म। गोप्यः प्रायः बोधं परित्यज्य वृन्दावनस्य अरण्येषु परिभ्रमणं कुर्वन्ति स्म। तदुक्तं–

**इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः।**
**यां गोपीमनयत् कृष्णओ विहायान्याः स्त्रियो वने।।**[१०]

एवं श्रीमद्भागवतमहापुराणस्य दशमस्कन्दस्य ऊनत्रिंशेऽध्याये रासलीलायाः वर्णनासमये तथा दशमस्कन्दस्य त्रिंशेऽध्याये रासोत्तरलीलायाः वर्णनासमये भगवता व्यासदेवेन गोपीतत्त्वस्य वर्णना कृता।

---

८. तदेव श्रीमद्भागवतमहापुराण, १० / ३० / ०५–०६

९. तदेव, १० / ३० / १४

१०. तदेव, १० / ३० / ३६

वैष्णवदर्शनस्य मुख्यो विषय एव गोपीभिः श्रीकृष्णस्य प्रेमलीला। गौडीयवैष्णवदर्शने कृष्णवल्लभानां गोपीनां भागद्वयं— स्वकीया परकीया च। तत्र रुक्मिणी, सत्यभामा, जाम्बवती इत्येताः श्रीकृष्णेन परिणयसम्बन्धेनाबद्धाः गोप्यः स्वकीया भवन्ति। अपरतः श्रीकृष्णस्य लीला—सङ्गिन्यः राधा, चन्द्रावली, विशाखा, ललिता, श्यामा, पद्मा इत्येताः परकीयाः गोप्यः आसन्। एताः एव चिराय मधुरवृन्दावने श्रीकृष्णस्य लीलासङ्गिन्यः आसन्। एते नित्यप्रियाः गोप्यः अपि कथ्यन्ते ।

राधाकृष्णाभ्यां सह गोपीनां सम्बन्धः अभेद्यः। वृन्दावनस्य असंख्याः गोप्यः स्वगुणैरेव कृष्णस्य प्राणप्रियाः अभवन्। यतः एताः कदापि आत्मसुखचिन्तां न कृतवत्यः। उक्तञ्च बङ्गभाषायां कृष्णदासकविराजेन रचिते श्रीश्रीचैतन्यचरितामृते—

**आत्मसुख दुःख गोपी ना करे विचार।**
**कृष्णसुख हेतु करे सव व्यवहार।।**
**कृष्णविना आर सव करि परित्याग।**
**कृष्णसुख हेतु करे शुद्ध अनुराग।।**[११]

वस्तुतः श्रीकृष्णसुखस्य हेतोरेव श्रीचैतन्यदेवोऽपि गोपीभावेन ईश्वरसाधनामकरोत्। भवगवतः साधना स्वान्तः करणस्य प्रेम्णा, भक्त्या तथा रागेण करणीया। अतः गोपीनां भक्तिर्हि रागभक्तिः। उक्तञ्च बङ्गभाषायां कृष्णदासकविराजेन रचिते श्रीश्रीचैतन्यचरितामृते—

**रागात्मिका भक्ति मुख्य ब्रजवासिजने।**
**तार अनुगत भक्ति रागानुगा नामे।।**[१२]

वैष्णवदर्शनस्य गोप्यः निष्कामप्रेम्णः अधिकारिण्यः। कस्यापि सुखस्य लाभाय ताः कृष्णेन सह मिलिताः न भवन्ति। उक्तञ्च कृष्णदासकविराजेन—

---

११. कविराज कृष्णदास, श्रीश्रीचौतन्यचरितामृत (आदिलीला), सम्पादक— राधागोविन्दनाथ, साधना प्रकाशनी, कोलकाता, चतुर्थ संस्करण, पत्राङ्कः—२७४।

१२. तदेव, २२/२२ पत्राङ्कः—४२६।

**गोपीगणेर प्रेमेर रूढभाव नाम।**

**शुद्ध निर्मलप्रेम कभु नहे काम।।**[१३]

मुरारीगुप्तेन विरचितं श्रीश्रीचैतन्यचरितामृतं हि वैष्णवदर्शनस्य एकः प्रकरणग्रन्थः। ग्रन्थकारः वृन्दावनस्य गोपीनां पदरेणुमाश्रयति। गोपीनां श्रीकृष्णप्रेम्णः एतादृशं माहत्म्यं यत् ताः गोप्यः यद हरिकीर्तनं कुर्वन्ति तच्छ्रवणेन भुवनत्रयं पवित्रं भवति। तदुक्तं मुरारीगुप्तेन श्रीश्रीचैतन्यचरितामृतस्य द्वितीयप्रक्रमस्य पञ्चदशसर्गे—

**वन्दे नन्दव्रजस्त्रीणां पदरेणुमभीक्ष्णशः।**

**यासां हरिकथोद्गीतं पुनाति भुवनत्रयम्।।**[१४]

प्रबोधानन्दसरस्वतीविरचितः श्रीश्रीराधारससुधानिधिः वैष्णवदर्शनस्य एकः प्रसिद्धः ग्रन्थः। अर्थवादग्रन्थेऽस्मिन् मुख्यतः गोपीश्रेष्ठायाः श्रीराधायाः प्रशंसनमस्ति। राधातत्त्वं तथा गोपीतत्त्वं वस्तुगत्या नामान्तरमेव इत्यतः तस्मिन् ग्रन्थे गोपीतत्त्वं कथं समुपस्थापितमिति संक्षेपेणात्र आलोच्यते।

वस्तुतः श्रीराधा हि गोपाङ्गनासु श्रेष्ठा। रासलीलासमये तस्याः श्रीराधायाः पादपद्मनखचन्द्रमणिच्छटायाः अपूर्वं विस्फूरणं दृष्टम्। सर्वाः एव गोप्यः मदनाख्यमहाभावस्य मूर्तविग्रहस्वरूपाः। तासु पुनः श्रीराधायां मदनाख्यमहाभावः चरमसीमामतिक्रमति। तदुक्तं श्रीश्रीराधारससुधानिधिग्रन्थे—

**यत्पादपद्मनखचन्द्रमणिच्छटायाः,**

**विस्फूर्जितं किमपि गोपवधुष्वदर्शि।**

**पूर्णानुरागरससागरमूर्तिः,**

**सा राधिका मयि कदापि कृपां करोतु।।**[१५]

---

१३. तदेव, १/४ पत्राङ्क—५८

१४. मुरारीगुप्तः, गौराङ्गाब्दः—४६८ श्रीश्रीकृष्णचौतन्यचरितामृतम्, सम्पादकः हरिदासशास्त्री, श्रीगदाधरगौरहरि प्रेस, वृन्दावन मथुरा, प्रथमसंस्करणम्, द्वितीयप्रक्रमः पञ्चदशसर्गः, १५।

१५. प्रबोधानन्दसरस्वती, गौराङ्गाब्दः—५२१—५२२ श्रीश्रीराधारससुधानिधिः, सम्पादकः हरिदासशास्त्री, श्रीगदाधरगौरहरि प्रेस, द्वितीयसंस्करणम्, ११।

राधा हि वृन्दावनेश्वरी। रसिकभ्रमरः श्रीराधायाः चरणकमलं वक्षसि धारयन् तीव्रकन्दर्पदाहं शान्तयति। तदुक्तं श्रीश्रीराधारससुधानिधिग्रन्थे–

**वृन्दावनेश्वरि तवैव पादारविन्दं,**
**प्रेमामृतैकमकरन्दरसौघपूर्णम्।**
**हृद्यर्पितं मधुपतेः स्वरतापमुग्रं,**
**निर्वापयत्परमशीतलमाश्रयति।।**[१७]

राधा हि लावण्यस्य सारमूर्तिः, रसराजकृष्णस्य सुखैककारणरूपा भवति। तदुक्तं श्रीश्रीराधारससुधानिधिग्रन्थे–

**लावण्यसार–रससार–सुखैसारे,**
**कारुण्यसारमधुरच्छविरूपसारे।**
**वैदग्ध्यसार–रतिकेलिविलाससारे,**
**राधाभिधे मम मनोखिलसारसारे।।**[१८]

राधा प्रणतजनानां चिन्तामणिस्वरूपा, ब्रजनारीणां चूडामणिः। श्रीश्यामसुन्दरस्य कन्दर्पविषनाशकः। तदुक्तं श्रीश्रीराधारससुधानिधिग्रन्थे–

**चिन्तामणिः प्रणमतां ब्रजनागरीणां,**
**चूडामणिः कुलमणिर्वृषभानुनाम्नः।**
**सा श्यामकामवरशान्तिमणिर्निकुञ्जः,**
**भूषामणिर्हृदयसंपुटसन्मणिर्नः।।**[१८]

राधा हि श्रीकृष्णस्य प्राणस्वरूपा। वेदादयः सर्वाण्यपि शास्त्राणि राधायाः यथार्थस्वरूपस्य वर्णानायां न समर्थानि अभवन्। तदुक्तं–

**अमन्दप्रेमाङ्कश्लथसकलनिबन्धहृदयं,**
**दयापरं दिव्यच्छविमधुरलावण्यललितम्।**

---

१६. तदेव, १३

१७. तदेव, २६

१८. तदेव, २७

**अलक्ष्यं राधाख्यं निखिलनिगमैरप्यतितरां**

**रसाम्भोधेः सारं किमपि सुकुमारं विजयते।।**[१६]

एवं श्रीमद्भागवतमहापुराणे तथा वैष्णवदर्शनस्य विभिन्नेषु ग्रन्थेषु गोपीतत्त्वं तथा राधातत्त्वं वर्णितमिति शम्।

***

१६. तदेव, ५२

# तर्कसङ्ग्रहस्य मङ्गलाचरणनिरूपणे निरुक्ति–पदकृत्य–वाक्यवृत्तिटीकानां तुलनात्मकमध्ययनम्

**नारुगोपालदासः**

*संस्कृतविभागः, स्वर्णमयीजोगेन्द्रनाथमहाविद्यालयः,*

*अमदाबादम्, नन्दीग्राम द्वितीयम्, पुरबा मेदिनीपुरम्*

**शोधसारः–**

दुःखनिवृत्तिप्रयोजनमवलम्ब्य दर्शनशास्त्रस्य सृष्टिरभवत्। स्थूलदृष्ट्या दर्शनं द्विविधम् आस्तिकदर्शनं नास्तिकदर्शनम् च। समानतन्त्रदर्शनेषु अन्यतमौ वैशेषिकदर्शनं न्यायदर्शनं च। न्यायवैशेषिकदर्शनयोः मूलावधारणानां परिचायको विद्यते तर्कसङ्ग्रहग्रन्थे। तर्कसङ्ग्रहाख्यः प्रकरणग्रन्थः श्रीमता अन्नंभट्टेन प्रणीतः। अन्नंभट्टेन बालबोधनार्थं स्वविरचिते तर्कसङ्ग्रहे ये ये प्रधानांशाः नोक्ताः तानपि अन्तर्भावयित्वा तर्कसङ्ग्रहस्य दीपिकानामका काचन् व्याख्या निर्मिता। तथापि अस्य ग्रन्थस्योपरि पञ्चविंशतोऽप्यधिकाः टीकाः विलसन्ति। तासु टीकासु मया तर्कसङ्ग्रहस्य मङ्गलाचरणनिरूपणे निरुक्ति–पदकृत्य–वाक्यवृत्तिटीकानां तुलनात्मकमध्ययनं कर्तुमिष्यते। तर्कसङ्ग्रहस्य निरुक्तिटीकायाः कर्ता जगन्नाथशास्त्रि। 'पदकृत्य' इति टीकायाः कर्ता उरुदत्तसिंहशिष्य श्रीचन्द्रजसिंहः। वाक्यवृत्तिटीका मेरुशास्त्रिगोडबोलनाममहाराष्ट्रदेशीयाऽभिनवविद्वत्कृता।

अल्पबुद्ध्या मया यः शोधपत्रं विरचितुमिष्यते स तुलनात्मकगवेषणापद्धत्या एव निर्मीयते।

अस्य शोधपत्रस्य अनेकानि प्रयोजनानि विद्यन्ते। अन्नंभट्टेन विरचितः तर्कसङ्ग्रहग्रन्थः न केवलं न्याय–वैशेषिकदर्शनयोः प्रवेशद्वारमपि तु तदतिरिक्तानां दर्शनानां तत्त्वज्ञानाय सहायकः। तर्कसङ्ग्रहस्य टीकाग्रन्थेषु नैयायिकनये तथा वैशेषिकनये आलोचना परिदृश्यते। तर्कसङ्ग्रहग्रन्थमवलम्ब्य अनेकाः टीकाः विद्यन्ते। परन्तु पठनकाले पाठकानां

मनसि संशयो जायते अर्थवोधे कस्य ग्रहणं भवेत्, कस्य न, अथवा कः समीचीनः कः असमीचीनः वा। कस्याः टीकायाः उत्कर्षः विद्यते, कथं वा उत्कर्षः विद्यते? इत्यादयः। तर्कसंग्रहस्य मङ्गलाचरणविषये उल्लिखितं संशयं निवारणाय मया शोधपत्रे यतः समुचितस्य वचनस्य ग्रहणे, असमुचितस्य वचनस्य परित्याजने युक्तिः प्रदीयते, अतः शोधपत्रोऽयं न्यायवैशेषिकनये प्रथमपाठार्थीनां सहायको भविष्यतीति मम आशयः। अतः मम शोधपत्रस्य नाम "तर्कसंग्रहस्य मङ्‌गलाचरणनिरुपणे निरुक्ति—पदकृत्य—वाक्यवृत्तिटीकानां तुलनात्मक— मध्ययनम्।"

संक्षिप्तेन कश्चन् विषयः मया उपस्थाप्यते। यथा—तर्कसंग्रहस्य मङ्‌गलाचरणे उल्लिखितस्य 'बालानाम्' इति पदस्य व्याख्यायां उल्लिखितासु टीकासु वैमत्यं मया परिलक्ष्यते। निरुक्तिटीकायां **'बालानाम्'** इति पदस्य अर्थः न उल्लिखितः। पदकृत्ये उल्लिखितम्— "अत्राऽधीतव्याकरण—काव्यकोशोऽनधीत न्यायशास्त्रो बालः। व्यासादावति व्याप्तिवारणाय—'अनधीतन्याये' ति। स्तनन्धयेऽतिप्रसक्तिवारणाय— 'अधीतव्याकरणेति'। "वाक्यवृत्तिटीकायाम् उल्लिखितं— "बालानां ग्रहणपूर्वकं धारणयोग्यानाम्।" मया मन्यते अत्र बालपदस्य यथार्थः अर्थः पदकृत्यटीकायाम् उल्लिखितः। अत्र स्पष्टरूपेण उल्लिखितं व्याकरणादिशास्त्रेषु अभिज्ञः परन्तु न्यायशास्त्रे अनभिज्ञः जनः बालः। पदकृत्यटीकायां न केवलं बालपदस्य अर्थः उल्लिखितः तेन सह स्वव्याख्यानस्य अतिव्याप्त्यादिदोषाः अपि उल्लिखिताः। यतः तर्कसंग्रहः न्यायवैशेषिकदर्शनस्य प्रवेशद्वाररुपेण ख्यातः अतः अस्मिन् शास्त्रे प्रवेशजनानां कृते पदकृत्यटीकायां उल्लिखितः अर्थः यथार्थः। अनेन प्रकारेण मङ्गलाचरणे उल्लिखितस्य अवशिष्टानां पदानां यथा **'सुखबोधाय', 'तर्कसंग्रहः', 'गुरुवन्दनम्'** इत्यादयः पदानां व्याख्यायां उल्लिखितासु टीकासु वैमत्यं मया परिलक्ष्यते। अतः अवशिष्टानां पदानां विचारः मया क्रियते। कथं मङ्गलाचरणे ईश्वरवन्दनायाः अनन्तरं गुरुवन्दना अन्नंभट्टेन कृतम् इत्यस्य विचारः मया शोधपत्रे कृतम्।

''समाप्तिकामो मङ्गलमाचरेत्''[1]— इति वचने आस्थाभाजिनः कर्मारम्भे सदा मङ्गलाचरणं कुर्वन्ति। प्रश्नः जायते मङ्‌गलाचरणं किम्? कथं क्रियते?

केनोपायेन क्रियते? इति। मङ्गलम् इति क्लीवलिङ्गान्तशब्दः मगिधातोः **'मंगेरलच्'**[२] इति औणादिकसूत्रेण अलच्–प्रत्यये कृते सिद्धति। मङ्गति हितार्थं सर्पति मङ्गतिदूरदृष्टमनेनास्माद्वेति इति व्युत्पत्त्या अस्यार्थः प्राप्यते अभिप्रेतार्थसिद्धिः। मङ्गलशब्दस्य बहुविधाः अर्थाः प्राप्यन्ते। यथा शुभम्, भद्रम्, शिवम्, प्रशस्तम्, कुशलम् चेति। श्रीमद्भागवते उक्तम्–

**''मङ्गलाय च लोकानां क्षेमाय च भवाय च।**

**कल्याणं मङ्गलं क्षेमं शान्तं शर्म्मशिवं शुभम्।।**[३]

इष्टदेवगुरुजनयोः वन्दनं मङ्गलाचरणम्। पण्डितजनाः मन्यन्ते मङ्गलाचरणं[४] त्रिविधम् –मानसिकमङ्गलाचरणम्, वाचिकमङ्गलाचरणम्, कायिमङ्गलाचरणञ्च। मनसि इष्टदेवगुरुजनयोः वन्दनं मानसिकमङ्गला–चरणम्। वाक्यप्रयोगेन इष्टदेवगुरुजनयोः वन्दनं वाचिकमङ्गलाचरणम्। शारिरीककर्मणा इष्टदेवगुरुजनयोः वन्दनं कायिमङ्गलाचरणम्। केचित् पण्डिताः इहलौकिकमङ्गलाचरणं पारलौकिकमङ्गलाचरणं च स्वीकुर्वन्ति। ग्रन्थारम्भे मङ्गलाचरण्म् अतीव तात्पर्यमण्डितम्। शास्त्रज्ञजनाः उक्तवन्तः ग्रन्थारम्भे मङ्गलाचरणं भिन्नोपायेन भवितुं शक्नोति यथा– इष्टदेवगुरुवन्दनम्, सर्वेषां जनानां कल्याणसाधनम्, प्रतिपाद्यविषयस्य निदर्शनञ्च।[५] तर्कसंग्रहस्य श्रीकृष्णधूर्जटिदीक्षितरचितायां सिद्धान्तचन्द्रोदय–टीकायाम् उल्लिखितम्–"आशीर्वादनमस्कारवस्तुनिर्देशभेदतः मङ्गलं त्रिविधं

---

१. त्रिपाठी श्रीयदुपति, तर्कसंग्रहः, सम्पा., द्वितीयमुद्रणम् (२००६), वि, एन्. पाब्लिकेशन्, कलिकाता, पृ.–१६

२. उणादिकोषः–५/३०।

३. श्रीमद्भागवद् पुराण–५/१४/३४

४. गोस्वामीश्रीनारायणचन्द्र, तर्कसंग्रहः, सम्पा., तृतीयसंस्करणस्य पुनर्मुद्रणम् (२००६), संस्कृत पुस्तक भाण्डार, कलकाता, पृ.–२।

५. गोस्वामीश्रीनारायणचन्द्र, तर्कसंग्रहः, सम्पा., तृतीयसंस्करणस्य पुनर्मुद्रणम् (२००६), संस्कृत पुस्तक भाण्डार, कलकाता, पृ.–२।

प्रोक्तं शास्त्रादीनां मुखादिषु"।[६] मङ्गलाचरणस्य प्रयोजनं किम्? इति जिज्ञासायां पण्डितेषु वैमत्यं परिलक्ष्यते। केचित् मन्यन्ते मङ्गलाचरणस्य प्रयोजनं कार्यसमाप्तिः। केचित् तु मन्यन्ते मङ्गलाचरणस्य प्रयोजनं विघ्ननाशः। केचित् मन्यन्ते मङ्गलाचरणस्य प्रयोजनं विघ्ननाशेन कार्यसमाप्तिः।

आचार्येण अन्नंभट्टेन तर्कसंग्रहग्रन्थस्य आदौ एकः श्लोकः उल्लिखितः–

**"निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।**

**बालानां सुखबोधाय क्रियते तर्कसंग्रहः।।"**[७]

पण्डिताः मन्यन्ते श्लोकोऽयं मङ्गलाचरणविधायकः। परन्तु अस्य प्रमाणं किम्? अन्नंभट्टेन अस्य ग्रन्थस्य दीपिकाटीकायां श्लोकोऽयं मङ्गलाचरणविधायकः इति रूपेण उल्लिखितः। दीपिकाटीकायां उल्लिखितम्– ''चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारान्मितश्रुतिबोधितकर्तव्यताकमिष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबन्धनश्चिकीर्षितं प्रतिजानीते–निधायेति।"[८] अन्ये टीकाकाराः अपि उल्लिखितवन्तः श्लोकोऽयं मङ्गलाचरणविधायकः। निरुक्तिटीकायां प्राप्यते– ''इह खलु प्रारिप्सितप्रकरणपरिसमाप्ति–प्रत्यर्थिप्रत्यूहव्यूहविध्वंसनाय ग्रन्थारम्भे मङ्गलमनुतिष्ठन्ति शिष्टाः। प्रतिपित्सूनां प्रतिपत्तये द्रव्यादिपदार्थान् प्रतिपिपादयिषुरन्नम्भट्टः स्वानुष्ठितं मङ्गलमुपनिबध्नाति–निधायेति।"[९] वाक्यवृत्तिटीकायामपि उल्लिखितम्–

---

६. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, वाराणसी, पृ.–२।

७. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, वाराणसी, पृ.–२।

८. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, , वाराणसी, पृ.–१।

९. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, वाराणसी, पृ.–५।

''ग्रन्थस्य निर्विघ्नपरिसमाप्त्ययये कृतं मङ्गलं शिष्यशिक्षायै निबन्धन् शिष्यप्रवृत्तये प्रयोजनाभिधेयौ च श्लोकेनाह–निधायेति।"[१०] उल्लिखितानां टीकाकाराणां वचनानुसारेण स्पष्टरूपेण ज्ञायते आचार्येण अन्नंभट्टेन निधायेति श्लोकेन वैदिकरीत्यनुसारेण तर्कसंग्रहग्रन्थरचनात् प्राक् मङ्गलाचरणं कृतम्। अस्य मङ्गलाचरणस्य प्रयोजनं टीकाकारैः भणितम् ग्रन्थस्य निर्विघ्नपरिसमाप्तिः।

अस्य मङ्गलाचरणस्य अर्थः विश्वेशं हृदये धारयित्वा तथा च गुरुप्रणामं कृत्वा बालानां सुखबोधाय अन्नंभट्टेन तर्कसंग्रहः ग्रन्थः रचितः। अस्य मङ्गलाचरणे उल्लिखितानां केषाञ्चित् पदानाम् अर्थमवलम्ब्य वैमत्यं परिलक्ष्यते टीकाकारेषु।

**'निधाय' इति पदस्य अर्थनिरूपणम्–**

तर्कसंग्रहस्य मङ्गलाचरणे उल्लिखितस्य 'निधाय' इति पदस्य व्याख्यायां दीपिकाकारेण उल्लिखितम्–''नितरां स्थापयित्वा सर्वदा तद्ध्यानपरो भूत्वेत्यर्थः''।[११]

**पदकृत्यटीकायाम् उल्लिखितम् ''निधाय नितरां धारयित्वा''।**[१२]

**निधायपदस्य अर्थः निरुक्तिटीकायां वाक्यवृत्तिटीकायां च न प्राप्यते।।**

**तुलनात्मकमध्ययनम्–**

उल्लिखितासु टीकासु निधाय पदस्य अर्थः दीपिकाकारेण यथार्थरूपेण उल्लिखिता। नि–उपसर्गपूर्वकात् धाधातोः ल्यप् इति प्रत्ययेन निधायशब्दस्य व्युत्पत्तिः भवति। पदकृत्यटीकाकारेण केवलं निधायशब्दस्य अर्थः निश्चितरूपेण

---

१०. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, वाराणसी, पृ.–६।

११. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, वाराणसी, पृ.–१।

१२. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३),चौखम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

धारयित्वा इति उल्लिखितः। धारणशब्देन किं बोध्यते अत्र स्पष्टरूपेण न उल्लिखितम्। दीपिकाटीकायां धारणशब्दस्य अर्थः यथार्थरूपेण उल्लिखितः। तेन धारणशब्दस्य अर्थः मकृतः स्थापयित्वा अर्थात् ध्यानसहायेन स्थापनमिति। अतः मङ्गलाचरणे उल्लिखितस्य निधायपदस्य अर्थः निश्चितरूपेण ध्यानेन स्थापनम्। प्रश्नः जायते ध्यानेन स्थापनं कुत्र भवति? मङ्गलाचरणे प्राप्यते 'हृदि' इति पदम्। 'हृदि' इति पदस्य अर्थः पदकृत्यटीकायां दृश्यते–'मनसि'।[१३] वाक्यवृत्तिटीकायामपि प्राप्यते–'मनसि'।[१४] अतः अत्र धारणस्य आधारः प्राप्यते मनः अन्तकरणं वा।

**'विश्वेशम्' इति पदस्य अर्थनिरूपणम्–**

मङ्गलाचरणे उल्लिखितस्य निधायपदस्य अर्थः निश्चितरूपेण धारणं बोध्यते। धारणशब्देन ध्यानेन स्थापनं बोध्यते। परन्तु प्रश्नः जायते कस्य ध्यानेन स्थापनं करणीयम्? मङ्गलाचरणे अस्य प्रश्नस्य उत्तरं प्राप्यते 'विश्वेशम्' इति पदे।

'विश्वेशम्' इति पदस्य अर्थः दीपिकाटीकायां प्राप्यते– 'जगन्नियन्तारम् शिवम्'[१५]

पदकृत्यटीकायां 'विश्वेशम्' इति पदस्य अर्थः दृश्यते– ''जगत्कर्तारं श्रीसाम्यमूत्तिम्''।[१६]

विश्वेशम् इति पदस्य अर्थः निरुक्तिटीकायां वाक्यवृत्तिटीकायां च नोपलभ्यते।

---

१३. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३),चौखम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

१४. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणमृ (२००२), भारतीय विद्या संस्थान, वाराणसी, पृ.–६।

१५. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, वाराणसी,, पृ.–१।

१६. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३), चौखम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

## तुलनात्मकमध्ययनम्

टीकाकाराणां वर्णनानुसारेण विश्वेशम् इति पदेन जगतः कर्ता बोध्यते। वैदिकदर्शनानुसारेण ईश्वरः जगत्कर्तृरूपेण विवेचितः। अतः अत्र वक्तुं शक्यते ईश्वरः एव विश्वेशम् इति पदे बोध्यः। दीपिकाटीकायाम् अन्नंभट्टेन स्पष्टरूपेण विश्वेशम् इति पदस्य व्याख्यानकाले जगतः नियन्तृरूपेण शिवस्य उल्लेखः कृतः। अनेन ज्ञायते अन्नंभट्टेन तर्कसंग्रहग्रन्थस्य रचनायाः प्राक् शिवस्य महादेवस्य वा मङ्गलाचरणं कृतम्। अतः अत्र ध्यानयोगेन धारणक्रियायाः आधारः जगत्कर्तारं शिवम्।

यः जगत्कर्तृरूपेण विवेचितः सः अस्माकं सृष्टिकर्ता पालनकर्ता विनाशकर्ता च। अतः सः अस्मान् धारयति। परन्तु केनोपायेन साधारणजनाः जगत्कर्तारं हृदये धारयितुं शक्नुवन्ति इति जिज्ञासा जायते। कौशिकीसंहितायां प्राप्यते–

**"पृथ्वी शेषधृता स शम्भुमुकुटे कैलाशवासोऽप्यसौ**
**कैलाशोऽपि दशाननेन तुलितो बद्धोऽप्यसौ बालिना।**
**बाली राघवविष्णुना युधि जितो विष्णुः सतां मानसे**
**तस्माद् विष्णुपरायणात् गुरुतरो नान्योऽस्ति लोकत्रये।।"**[१७]

एकदा ऋषिषु एकः प्रश्नः उत्थितः सर्वेषु श्रेष्ठः कः? कश्चन ऋषिः उक्तवान् पृथिवी श्रेष्ठा। यतः पृथिवी सर्वं धारयति। आधाराधेयसम्बन्धे यः आधारः सः श्रेष्ठः। आधारः आदौ विद्यते। तत्परं आधेयः आधारे विराजते। अत्र पृथिवी आधारः। अतः पृथिवी श्रेष्ठा। अन्यः ऋषिः उक्तवान् पृथिवी श्रेष्ठा न। यथा शेषनागः पृथिवीं धारयति। अतः शेषनागः श्रेष्ठः। यतः शेषनागः अत्र आधारः। इति श्रुत्वा अन्यः ऋषिः उक्तवान् शेषनागं महादेवः धारयति, अतः महादेवः श्रेष्ठः। महादेवः अत्र आधारः। अस्य वचनस्य खण्डनं कृत्वा अन्य ऋषिः उक्तवान् कैलाशः महादेवं धारयति। अतः कैलाशः श्रेष्ठः। पुनः एकः

---

१७. कौशिकी संहिता

ऋषिः उक्तवान् कैलाशः रावणेन तुलितः अतः रावणः श्रेष्ठः। असन्तुष्टः सन् अपरः ऋषिः उक्तवान् रावणः वानरराजेन बालिना बद्धः अभवत्। अतः बाली श्रेष्ठः। पुनः ऋषिः उक्तवान् बाली न श्रेष्ठः यतः रामेण बाली हतः। अतः रामः श्रेष्ठः। रामः विष्णोः अवतारः। विष्णुः भक्तस्य हृदये विराजते। अतः एकः ऋषिः उक्तवान् भगवत्प्रेमिजनः श्रेष्ठः, यतः तस्य हृदये विष्णुः विराजते। साधारणजनैः यदि भक्तिसहायेन ईश्वरवन्दना क्रियते तर्हि ईश्वरः भगवत्प्रेमिजनस्य हृदये विराजते। अतः वक्तुं शक्यते भगवत्प्रेमिजनः विश्वेशं हृदये धारयितुं शक्नोति। अनेन प्रकारेण वक्तुं शक्यते साधारणजनैः जगतकर्तारं हृदये धारयितुं शक्यते।

**'गुरुवन्दनम्' इति पदस्य अर्थनिरूपणम्–**

गुरुवन्दनम् इति पदेन अन्नंभट्टस्य कः अभिप्रायः अधुना विचार्यः। शोधप्रबन्धस्य केवलं दीपिकाटीकायाम् अस्य पदस्य अर्थः उल्लिखितः। गुरुवन्दनम् इति पदस्य अर्थः दीपिकायां परिदृश्यते– ''गुरूणां विद्यागुरूणां वन्दनं नमस्कारम्।"[१८]

निरुक्तिटीकायां पदकृत्यटीकायां वाक्यवृत्तिटीकायाञ्च गुरुवन्दन–शब्दस्य अर्थः न परिदृश्यते।

**तुलनात्मकमध्ययनम्–**

तर्कसंग्रहस्य श्रीरङ्गदेशिककृतलघुबोधिनीटीकायाम् गुरुवन्दन शब्दस्य अर्थः प्राप्यते "गुरुवन्दनम् विद्यागुरुवन्दनम्।"[१९] गुरुवन्दम् इति पदेन विद्यागुरुणां नमस्कारो बोध्यते। परन्तु जिज्ञासा जायते कः विद्यागुरुः? यः विद्यां ददाति सः विद्यागुरुः। परन्तु तेषां परिचयः अन्नंभट्टेन न दीयते। अतः कः विद्यागुरुः इति विचार्यविषयः। धर्मशास्त्रकारेण मनुना मनुसंहितायां उल्लिखितम्–

**"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।**

---

१८. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, वाराणसी,, पृ.–१।

१९. शर्माश्रीनिवास, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२००२), भारतीय विद्या संस्थान, वाराणसी, पृ.–४।

**आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्।।"**[२०]

लौकिकशब्देन अत्र बोध्यते अर्थशास्त्रादिज्ञानं यः ददाति सः अर्थात् लौकिकगुरुः। वैदिकशब्देन अत्र बोध्यते वेदार्थज्ञानं यः ददाति सः अर्थात् वैदिकगुरुः। आध्यात्मिकशब्देन अत्र बोध्यते यः ब्रह्मज्ञानं ददाति सः, अर्थात् आध्यात्मिकगुरुः। मनुना अत्र कथ्यते यत्र माननीयजनानां समावेशः परिलक्ष्यते तत्र यदि लौकिकगुरुः वैदिकगुरुः आध्यात्मिकगुरुः च परिदृश्यन्ते तर्हि एतेषां गुरूणां सम्मानप्रदर्शनम् आदौ कर्तव्यम्। पुनः एते गुरवः कुत्रापि एकत्रिताः भवेयुः तर्हि आदौ आध्यात्मिकगुरोः सम्मानप्रदर्शनं कर्तव्यम्। तत्परं वैदिकगुरोः सम्मानप्रदर्शनं कर्तव्यम्। तत्परं कर्तव्यं लौकिकगुरोः सम्मानप्रदर्शनम्।

अनया आलोचनया गुरोः विभागः स्पष्टः। यतः अन्नंभट्टेन स्पष्टरूपेण विद्यागुरोः उल्लेखः न कृतः। अतः मङ्गलाचरणे उल्लिखितस्य गुरुश्ब्देन लौकिकगुरुः वैदिकगुरुः आध्यात्मिकगुरुश्च बोध्यन्ते। मनुना एतेषां गुरूणां वैशिष्ट्यानि स्पष्टरूपेण न उल्लिखितानि। तेन आचार्योपाध्याय–ऋत्विकानां वैशिष्ट्यानि मनुसंहितायां उल्लिखितानि। लौकिकादिगुरूणां वैशिष्ट्यानि आचार्यादिषु प्रतिफलितानि न वा इति विचार्यः। मनुना आचार्यस्य वैशिष्ट्यम् उल्लिखितम्–

**"उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः।**

**सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्ष्यते।।"**[२१]

अत्र कल्पशब्देन यज्ञविद्या बोध्यते। रहस्यशब्देन उपनिषद् बोध्यते। कुल्लुकभट्टेन भणितं– "कल्पो यज्ञविद्या रहस्यमुपनिषद्।"[२२] द्विजः अर्थात् यः ब्राह्मणः शिष्याय यज्ञविद्योपनिषद्सहिताः सर्वाः वेदशाखाः अध्यापयति सः आचार्यः। उपाध्यायस्य स्वरूपं तेन कथितम्–

**"एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः।**

---

२०. वन्द्योपाध्यायशास्त्री डॉ. मानवेन्दु, मनुसंहिता, द्वितीयोऽध्यायः, द्वितीयप्रकाशन (१४१८), सदेश, कोलकाता, श्लोकसंख्या–११७।

२१. वन्द्योपाध्यायशास्त्री डॉ. मानवेन्दु, मनुसंहिता, द्वितीयोऽध्यायः, द्वितीयप्रकाशन (१४१८), सदेश, कोलकाता, श्लोकसंख्या–१४०।

**योऽध्यापयति वृत्तर्थमुपाध्यायः स उच्यते।।"**[२३]

वृत्त्यर्थम् इति पदेन अत्र उपजीविकार्थं बोध्यते। उपजीव्यते अनया इति उपजीविका अर्थात् जीवनोपायः। उपजीविकार्थं यः वेदस्यैकदेशं मन्त्रं ब्राह्मणञ्च, वेदरहितानि व्याकरणादीनि अङ्गानि पाठयति सः उपाध्यायः। मनुना ऋत्विग्लक्षणं कृतम्–

**"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्।**

**यः करोति वृतो यस्य तस्य ऋत्विगिहोच्यते।।"**[२४]

अर्थात् यः आह्वनीयाद्यग्न्युत्पादकं कर्म अग्नाधेयम्, अग्निष्टोमादीन् यज्ञान्, अष्टकादीन् पाकयज्ञान् यस्य कृते करोति सः तस्य ऋत्विक्। ऋत्विगत अपि ज्ञानं लभते। अतः सोऽपि गुरुः। मनुसंहितायां मनुना उल्लिखितः पिताऽपि गुरुः भवितुं शक्नोति। तेन कथ्यते–

**"निषेकादीनि कर्माणि यः करोति यथाबिधि।**

**सम्भावयति चान्नेन स विप्रो गुरुरुच्यते।।"**[२५]

अर्थात् यः गर्भाधानादीनि संस्कारकर्माणि यथाशास्त्रं करोति यः तेन सह अन्नेन च प्रतिपालयति सः पिता गुरुः इत्यभिधीयते।

यद्यपि लौकिकादिगुरूणाम् उल्लेखः स्पष्टरूपेण मनुसंहितायां नास्ति परन्तु आचार्यादिनां वैशिष्ट्यानि विचारेण प्राप्यन्ते अत्र यः उपाध्यायः ऋत्विक् च तौ लौकिकगुरूः। तयोः अर्थशास्त्रादिज्ञानं लभते। वृत्त्यर्थं तौ अध्यापयतः। यतः वैदिकशास्त्राणां ज्ञानम् उपाध्यायात् लभते अतः सः वैदिकगुरुः। अत्र यः

---

२२. वन्द्योपाध्यायशास्त्री डॉ. मानवेन्दु, मनुसंहिता, द्वितीयोऽध्यायः, द्वितीयप्रकाशन (१४१८), सदेश, कोलकाता, पृष्ठ संख्या–३०८।

२३. वन्द्योपाध्यायशास्त्री डॉ. मानवेन्दु, मनुसंहिता, द्वितीयोऽध्यायः, द्वितीयप्रकाशन (१४१८), सदेश, कोलकाता, १४१।

२४. वन्द्योपाध्यायशास्त्री डॉ. मानवेन्दु,मनुसंहिता, द्वितीयोऽध्यायः, द्वितीयप्रकाशन (१४१८), सदेश, कोलकाता, १४३।'

२५. वन्द्योपाध्यायशास्त्री डॉ. मानवेन्दु, मनुसंहिता, द्वितीयोऽध्यायः, द्वितीयप्रकाशन (१४१८), सदेश, कोलकाता, १४२।

आचार्यः सोऽपि वैदिकगुरुः इत्यभिधीयते। आचार्यः ब्रह्मज्ञानं ददाति अतः सः ब्रह्मगुरुः।

**'बालानाम्' इति पदस्य अर्थनिरूपणम्–**

तर्कसंग्रहस्य मङ्गलाचरणे उल्लिखितस्य 'बालानाम्' इति पदस्य व्याख्यायाम् उल्लिखितासु टीकासु वैमत्यं मया परिलक्ष्यते।

**दीपिकायामुल्लिखितं ''ग्रहणधारणपटुर्बालः, न तु स्तनन्धयः।"**

**निरुक्तिटीकायां 'बालानाम्' इति पदस्य अर्थः न उल्लिखितः।**[२६]

पदकृत्ये उल्लिखितम्– "अत्राऽधीतव्याकरणकाव्यकोशोऽनधीत न्यायशास्त्रो बालः। व्यासादावतिव्याप्तिवारणाय– 'अनधीतन्याये' ति। स्तनन्धयेऽतिप्रसक्तिवारणाय– 'अधीतव्याकरणे' ति।"[२७]

वाक्यवृत्तिटीकायाम् उल्लिखितं– "बालानां ग्रहणपूर्वकं धारणयोग्यानाम्।"[२८]

**तुलनात्मकमध्ययनम्**

मया मन्यते अत्र बालपदस्य यथार्थः अर्थः पदकृत्यटीकायाम् उल्लिखितः। अत्र स्पष्टरूपेण उल्लिखितं व्याकरणादिशास्त्रेषु अभिज्ञः परन्तु न्यायशास्त्रे अनभिज्ञः जनः बालः। दीपिकायां तथा च वाक्यवृत्तिटीकायां बालपदस्य उल्लिखितस्य व्याख्यानस्य अर्थः व्याकरणादिशास्त्रेषु अभिज्ञः परन्तु न्यायशास्त्रे अनभिज्ञः जनः बालः इति रूपेण भवितुं शक्नोति परन्तु इत्यस्य उल्लेखः स्पष्टरूपेण नास्ति। यतः ग्रन्थोऽयं न्यायवैशेषिकदर्शनस्य प्रवेशद्वाररूपेण ख्यातः अतः अस्मिन् शास्त्रे प्रवेशजनानां कृते पदकृत्यटीकायां उल्लिखितः अर्थः यथार्थः। अत्र न केवलं बालपदस्य अर्थः उल्लिखितः तेन सह स्वव्याख्यानस्य अतिव्याप्त्यादिदोषाः अपि उल्लिखिताः। बालशब्दस्य

---

२६. त्रिपाठी श्रीयदुपति, तर्कसंग्रहः, सम्पा., द्वितीयमुद्रणम् (२००६), वि, एन्. पाब्लिकेशन्, कलिकाता, पृ.–१८।

२७. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३), चौखऽम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

२८. वङ्गीयश्रीसत्कारिशर्मा, तर्कसंग्रहः, सम्पा., पुनमुद्रित (२०१५), चौखाम्वा संस्कृतसंस्थानम्, वाराणसी, पृ.–२।

व्याख्यायां तेन कथ्यते यः व्याकरणादिशास्त्रेषु अभिज्ञः परन्तु न्यायशास्त्रे अनभिज्ञः जनः बालः। कथं तेन अधीतव्याकरणेति पदं प्रयुक्तम् इति जिज्ञासायाः समाधानं कथ्यते "स्तनन्धयेऽतिप्रसक्तिवारणाय– 'अधीतव्याकरणे' ति।"[२९] अर्थात् स्तनन्धयेऽतिव्याप्तिवारणाय अत्र अधीतव्याकरणशब्दस्य संयोजनं कृतम्। यदि अधीतव्याकरणेति पदस्य प्रयोगं तेन न कृतम् तर्हि बालशब्देन केवलं 'अनधीतन्यायशास्त्रो' इति अर्थः बोध्यते। सद्यजातः शिशुः यः मातृदुग्धपानेन जीवनं निर्वहति सोऽपि बालशब्दस्य अभिप्रायः भवितुं शक्नोति। परन्तु ग्रन्थकारेण सद्यजातानां बालानां कृते ग्रन्थो न रचितः। अतः पदकृत्यकारेण भणितम् "स्तनन्धयेऽतिप्रसक्तिवारणाय 'अधीतव्याकरणे' ति"।[३०] पुनः तेन भणितं कथं तेन अनधीतन्यायशास्त्रपदं प्रयुक्तम् इति जिज्ञासायां समाधानं कथ्यते "व्यासादावतिव्याप्तिवारणाय–'अनधीतन्याये' ति।"[३१] अर्थात् व्यासादौ अतिव्याप्तिवारणाय तेन बालशब्दस्य अर्थः व्याख्यानसमये अनधीतन्यायशास्त्रेति पदं प्रयुक्तम्। व्यासादिपदेन पदकृत्यस्य अभिप्रायः स्पष्टः न। मया मन्यते व्यासशब्देन अत्र महाभारतस्य स्रष्टा वेदव्यासः बोध्यते। आदिशब्देन अत्र अन्ये पण्डिताः मन्यन्ते। ये ये जनाः व्याकरणकाव्यकोषादिग्रन्थेषु तथा च न्यायशास्त्रेऽपि पण्डिताः तेषां कृते अन्नंभट्टेन ग्रन्थोऽयं न रचितः। व्यासादि–पण्डिताः अतः अस्य ग्रन्थस्य अधिकारिणः न। यदि बालशब्दस्य व्याख्यानसमये केवलं अनधीतन्यायशास्त्रपदं न प्रयुक्तं तर्हि व्यासादिपण्डिताः अस्य शास्त्रस्य अधिकारिणः भवितुं शक्नुवन्ति। यतः तेऽपि व्याकरणादिशास्त्रे पण्डिताः। ग्रन्थकारस्य अभिप्रायः अत्र यः जनः व्याकराणादिशास्त्रे अभिज्ञः परन्तु न्यायशास्त्रे अनभिज्ञः तेषां कृते ग्रन्थोऽयं रचितः। पदकृत्यटीकायां यतः अस्य बालशब्दस्य अर्थः अतिव्याप्तादिदोषसहायेन स्पष्टीकृतः, अतः

---

२९. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३), चौखम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

३०. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३), चौखम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

३१. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३), चौखम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

पदकृत्यटीकायाः बालशब्दस्य अर्थः यथार्थः।

**'सुखबोधाय' इति पदस्य अर्थनिरूपणम्–**

मङ्गलाचरणे उल्लिखितस्य 'सुखबोधाय' इति पदस्य व्याख्यायां उल्लिखितासु टीकासु वैमत्यं मया परिलक्ष्यते।

तर्कदीपिकायां 'सुखबोधाय' पदस्य अर्थः न उल्लिखितः। परन्तु निरुक्तिटीकायां प्राप्यते "अन्नम्भट्टस्तु–सुखेन अनायासेन बोधः सुखबोध इति व्याचष्ट।"[३२] अनेन ज्ञायते अन्नम्भट्टस्य किं अभिमतम्। अनायासेन ज्ञानलाभः इत्यर्थः 'सुखबोधाय' इति पदेन अन्नम्भट्टेन गृहीतः।

निरुक्तिटीकायाम् उल्लिखितम्–"सुखं दुःखध्वंसः मोक्षः इति यावत्। सुखाय बोधः सुखबोधः। प्रयोजकत्वं चतुर्थ्यर्थः। तथा च मोक्षप्रयोजकं ज्ञानमिति फलितम्। तच्च ज्ञानं पदार्थविषयकमेव।[३३]

पदकृत्यटीकायामुल्लिखितम्– "सुखेन=अनायासेन। बोधाय= पदार्थतत्त्वज्ञानायेत्यर्थः।"[३४]

वाक्यवृत्तिटीकायामुल्लिखितम्–"सुखेन अनायासेन"।[३५] बोधायपदस्य अर्थः अत्र न प्राप्यते।

**तुलनात्मकमध्ययनम्–**

मया मन्यते अत्र 'सुखबोधाय' इति पदस्य अर्थः निरुक्तिटीकायां यथार्थरूपेण उल्लिखितः। दर्शनशास्त्रं मोक्षमार्गप्रदर्शकशास्त्रम्। मोक्षप्रयोजकज्ञानं दर्शनशास्त्रेषु प्राप्यते। अन्नंभट्टेनापि मोक्षप्रयोजक ज्ञानप्रदानाय तर्कसंग्रहग्रन्थः कृतः। अतः 'सुखबोधाय' पदस्य अर्थः

---

३२. वङ्गीयश्रीसत्कारिशर्मा, तर्कसंग्रहः, सम्पा., पुनमुद्रित (२०१५), चौखऽम्वा संस्कृतसंस्थानम्, वाराणसी, पृ.–३।

३३. वङ्गीयश्रीसत्कारिशर्मा, तर्कसंग्रहः, सम्पा., पुनमुद्रित (२०१५), चौखऽम्वा संस्कृतसंस्थानम्, वाराणसी, पृ.–२।

३४. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३), चौखऽम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

३५. वङ्गीयश्रीसत्कारिशर्मा, तर्कसंग्रहः, सम्पा., पुनमुद्रित (२०१५), चौखऽम्वा संस्कृतसंस्थानम्, वाराणसी, पृ.–२।

निरुक्तिटीकायां यथार्थः। दीपिकाटीकायां तथा पदकृत्यटीकायां 'सुखबोधाय' इति पदस्य अर्थः अनायासेन पदार्थज्ञानमिति उल्लिखितः। यदि सूक्ष्मरूपेण विचारः क्रियते तर्हि प्राप्यते अस्य ग्रन्थस्य अधिकारी व्याकरणादिशास्त्रेषु अभिज्ञः जनः परन्तु न्यायदर्शनशास्त्रे अनभिज्ञः तथा न्यायदर्शनविषये जिज्ञासुजनः। अनायासेन पदार्थज्ञानलाभः अस्य जनस्य अभिप्रायः। परन्तु पदार्थज्ञानस्य प्रयोजनं किम् इत्यस्य विचारः यदि क्रियते तर्हि प्राप्यते दुःखस्य चिरनिवृत्तिरेव अस्य प्रयोजनम्। अतः मोक्षप्रयोजकज्ञानरुपोऽर्थः अत्र यथार्थः। निरुक्तिटीकायाः अर्थः यदि गृह्यते तर्हि अवशिष्टानां टीकानां सुखबोधाय इति पदस्य यः अर्थः तस्य अत्र अन्तर्भावः भवति। दीपिकाटीकायाः पदकृत्यटीकायाः च 'अनायासेन बोधः' इति अर्थः पदकृत्यटीकायाम् उल्लिखिते अर्थेऽपि परिदृश्यते। पदकृत्यटीकायाः 'अनायासेन पदार्थतत्त्वज्ञानम्' इति अर्थः निरुक्तिटीकायाः उल्लिखिते अर्थेऽपि परिदृश्यते। अनायासेन पदार्थज्ञानलाभकारिजनस्य मुख्याभिप्रायः दुःखस्य पूर्णनिवृत्तिः अर्थात् मोक्षः। निरुक्तिटीकायाम् अस्योल्लेखः प्राप्यते। अतः वक्तुं शक्यते अन्नंभट्टेन तर्कसंग्रहग्रन्थे उल्लिखितस्य सुखबोधायपदस्य अर्थः निरुक्तिटीकायां सुस्पष्टः।

**'तर्कसंग्रह' इति पदस्य अर्थनिरूपणम्—** मङ्गलाचरणे उल्लिखितस्य 'तर्कसंग्रहः' इति पदस्य व्याख्यायां वैमत्यं परिलक्ष्यते।

तर्कदीपिकायाम् अस्य पदस्य अर्थः उल्लिखितः—"तर्क्यन्ते प्रतिपाद्यन्ते इति तर्का द्रव्यादिसप्तपदार्थाः, तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थः।"[३६]

निरुक्तिटीकायाम् उल्लिखितम्—"सम्यक् गृह्यन्ते बोध्यन्ते अनेनेति सङ्ग्रहः। बोधकः ज्ञानजनकः। तर्काणां द्रव्यादिपदार्थानां सङ्ग्रहः तर्कसङ्ग्रहः इति तदर्थत्वात्।"[३७]

---

३६. त्रिपाठी श्रीयदुपति, तर्कसंग्रहः, सम्पा., द्वितीयमुद्रणम् (२००६), वि, एन्. पाब्लिकेशन्, कलिकाता, पृष्ठऽसंख्या—१८।

३७. वङ्गीयश्रीसत्कारिशर्मा, तर्कसंग्रहः, सम्पा., पुनमुद्रित (२०१५), चौखऽम्वा संस्कृतसंस्थानम्, वाराणसी, पृ.—२।

पदकृत्यटीकायामुल्लिखितम्–"तर्क्यन्ते=प्रमितिविषयीक्रियन्ते इति तर्काः–द्रव्यादिसप्तपदार्थाः, तेषां संग्रहः=संक्षेपेणोद्देश–लक्षण–परीक्षाः यस्मिन् स ग्रन्थः"।[३८]

वाक्यवृत्तिटीकायामुल्लिखिम्–"तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः द्रव्यादिसप्तपदार्थाः। तेषां संग्रहः लक्षणस्वरूपविभागप्रकारकज्ञानानुकूलः संक्षिप्तो व्यापारः"।[३९]

**तुलनात्मकमध्ययनम्–**

अत्र यदि परिदृश्यते तर्हि प्राप्यते तर्कपदस्य अर्थः उल्लिखितासु टीकासु द्रव्यादिसप्तपदार्थरूपेण उल्लिखितः। द्रव्यादिपदेन वैशेषिकदर्शने उल्लिखिताः सप्तपदार्थाः बोध्यन्ते। वैशेषिकदर्शने उल्लिखिताः पदार्थाः यथा द्रव्यं गुणः कर्म सामान्यं विशेषः समवायः अभावश्च। उल्लिखितानां पदार्थानां साधर्म्यवैधमर्ययोः प्रतिपादकं कणादप्रणितं वैशेषिकसूत्रं निश्रेयसः प्रयोजकमिति।– "धर्म्मविशेषप्रसूताद् द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्मय–वैधर्म्म्याभ्यां तत्त्वज्ञानान्निः श्रेयसम्।"[४०] परन्तु संग्रहपदमवलम्ब्य वैमत्यं परिदृश्यते। दीपिकाटीकायां उल्लिखितः–" संग्रहः संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थः।" अर्थात् संक्षेपेण द्रव्यादिपदार्थानां स्वरुपोल्लेखः संग्रहपदस्य अर्थः। निरुक्तिटीकायां प्राप्यते–"– "सम्यक् गृह्यन्ते बोध्यन्ते अनेनेति सङ्ग्रहः। बोधकः ज्ञानजनकः।" अत्र संग्रहपदेन द्रव्यादिपदार्थानां बोधकं अर्थात् ज्ञानजनकं बोध्यन्ते। दीपिकाटीकायां उल्लिखितस्य संग्रहशब्दस्य अर्थः निरुक्तिकारेण सुसंस्कृतरूपेण प्रकाशितः। संग्रहपदस्य अर्थः पदकृत्यटीकायाम् उल्लिखितम्– "संग्रहः = संक्षेपेणोद्देश–लक्षण–परीक्षाः यस्मिन् स ग्रन्थः"। अर्थात् यत्र संक्षेपेण द्रव्यादिपदार्थानाम् उद्देश्य–लक्षण–परीक्षा क्रियते सः संग्रहशव्दस्य अर्थः। उद्देशशब्देन पदार्थानां

---

३८. बालशास्त्री, तर्कसंग्रहः, सम्पा., प्रथमसंस्करणम् (२०१३), चौखऽम्वा सुरभारती प्रकाशन, वाराणसी, पृ.–३।

३९. वङ्गीयश्रीसत्कारिशर्मा, तर्कसंग्रहः, सम्पा., पुनमुद्रित (२०१५), चौखऽम्वा संस्कृतसंस्थानम्, वाराणसी, पृ.–२।

४०. वैशेषिकसूत्रोपस्कारः, सुत्रम् ४।

नामोल्लेखः बोध्यते। पदार्थानाम् असाधारणं धर्मकथनं लक्षणम्। लक्षणं पदार्थे प्रयुक्तं न वा इति विचारः परीक्षा। तर्कसंग्रहस्य सम्पूर्णः ग्रन्थः उद्देशलक्षणपरीक्षाप्रभृतिरूपेण विभक्तः। परन्तु कुत्रापि अस्य भेदस्य निर्देशः तर्कसंग्रहकारेण न कृतः। पदकृत्यटीकायाः अनया व्याख्यया विषयोऽयं परिस्कृतः भवति। 'तर्कसंग्रहः' इति पदं ग्रन्थपदस्य विशेषणम् इति ज्ञानम् अनया व्याख्यया ज्ञायते। पदकृत्यटीकायां उल्लिखितः संग्रहशब्दस्य अर्थः यदि विचारः क्रियते तर्हि प्राप्यते दीपिकाटीकायाः निरुक्तिटीकायाः च उभययोः अर्थः अत्र अन्तर्भुक्तः। वाक्यवृत्तिटीकायाम् उल्लिखितः संग्रहशब्दस्य अर्थः प्राप्यते– "लक्षणस्वरूपविभागप्रकारकज्ञानानुकूलः संक्षिप्तो व्यापारः।" अत्र संग्रहशब्देन संक्षिप्तो व्यापारः बोध्यते। व्यापारशब्दस्य साधारणार्थः क्रिया। अत्र व्यापारस्य एकं विशेषणं टीकाकारेण प्रदत्तम्– 'लक्षणस्वरूपविभाग प्रकारकज्ञानानुकूलः संक्षिप्तः'। अर्थात् पदार्थानां लक्षणस्वरूपविभागाणां ज्ञानाय या संक्षिप्ता क्रिया सा संग्रहशब्दस्य अर्थः। आदौ पदकृत्यकारेण संग्रहशब्दस्य अर्थः व्याख्यानकाले पदार्थानां लक्षणं यत्र क्रियते स संग्रह इति उल्लिखितः। अत्रापि संग्रहशब्दस्य अर्थः व्याख्यानकाले वाक्यवृत्तिकारेण पदार्थानां लक्षणं यत्र क्रियते स संग्रह इति रुपेण उल्लिखितः। पदार्थानां असाधारणं धर्मकथनं लक्षणं। स्वस्य रूपं यस्मात् इति स्वरूपम् अर्थात् स्वभावः। अत्र स्वरूपशब्देन पदार्थानां स्वभावः बोध्यते। द्रव्यादिपदार्थानां लक्षणस्वभावविभागैः यथार्थज्ञानं जायते। यथार्थज्ञानं मोक्षप्रयोजकम्। वाक्यवृत्तिकारस्य संग्रहशब्दस्य अर्थेन तर्कसंग्रहपदस्य अर्थः सुपरिस्कृतः जातः। आदौ उल्लिखितानां टीकानां संग्रहशब्दस्य अर्थः अत्र अन्तर्भवति। अतः वाक्यवृत्तिकारस्य अभिमतम् 'तर्कसंग्रहः' इति पदमवलम्व्य सुस्पष्टम्।

उल्लिखितेन प्रकारेण तर्कसंग्रहस्य मङ्गलाचरणे आलोचितानां पदानां यदि अध्ययनं क्रियते तर्हि न्यायवैशेषिकनये प्रथमपाठार्थीनां अर्थज्ञाने सहायको भविष्यतीति मम आशयः।

***

# काव्यानन्दविमर्शः

**पीताम्बरनिराला**

*संस्कृताध्यापकः*

*कृष्णनगर–शासकीय–महाविद्यालयः, कृष्णानगरम्, पश्चिमबङ्गप्रदेशः*

**शोधसारः**–काव्यपाठनात्सचेतोभिरास्वाद्यमानः काव्यगत आनन्दः किंस्वरूपक इति सोपपत्तिको निर्णयो नितरामपेक्ष्यते काव्यमर्मविद्भिः। इन्द्रियैरास्वाद्यमानात् सुखात् काव्येन स्वाद्यमान आनन्दो वैलक्षण्यमापादयति। पार्थिवसुखं विषयरूपत्वादाशुविनाशित्वाच्च नोत्पादयितुमलं हि रुचिं सहृदयहृदये। प्रत्युत काव्यसुखस्य निरिन्द्रियत्वात् निरतिशयित्वाच्च बलात्तदनुधावन्ति सुधीचेतांसि। काव्यगतं सुखं रसपदवाच्यतां लभत इति आचार्यभरतादीनां काव्यमर्मविदां वचसां सूक्ष्मविमर्शेन ज्ञायते अस्मिन् शोधपत्रे। तस्य च रसपदवाच्यसुखस्य वेद्यान्तरशून्यत्वाद् ब्रह्मानन्दतुल्यता किम्प्रकारा इत्यपि श्रुत्याद्यनुमततर्केण प्रतिपादनं हि मुख्यं लक्ष्यमस्य च शोधपत्रस्य।

**भूमिका–** प्रतिकूलवेद्यत्वाद्दुःखस्य हेयता अनुकूल–वेदनीयत्वाच्चानन्दस्य प्रेयस्ता यावतामपि प्राणभृतामनुभव–सिद्धत्वादनपेक्षप्रमाणा। सन्तापपरिजिहीर्षु शोकाकुलं जीवकूलं क्लेशशतशातनशक्तम् आनन्दमेवानुबुभूषु सज्जिजीविषया स्वकर्मणि आत्मानं प्रचोदयति। तस्मात्तेषां कर्मारम्भास्तदायत्तं च कृत्स्नमपि फलमानन्दावाप्तावेव सार्थक्यं प्रतिपद्यन्ते। भगवती श्रुतिरपि देहिनामानन्दाधीनां कर्मपरम्परां प्रतिपादयति– **आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते तेन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति**[1] इत्येवं गिरा। अत आनन्दात्मकस्य परमप्रपित्सितपदार्थस्य एव प्रापञ्चिकप्रवृत्तौ प्रयोजकत्वमामनन्ति मनीषिणः।

**आनन्दसामान्यलक्षणम्–**सुख–प्रीति–हर्ष–मोद–प्रसादा आनन्दापर–पर्यायाः। अस्य चानन्दस्य अन्तरिन्द्रिय–वेद्यत्वेन अनुभवसिद्धत्वेऽपि आनन्दस्वरूपस्य संशीतिविषयतामभिमत्य भूतार्थपक्ष– पातित्वाद्विद्वद्भिर्दर्शन ग्रन्थेषु भूयशस्तद्विषयिणी सोपपत्तिचर्चा कृतावलोक्यते। तद्यथा

---

१. तैत्तिरीयोपनिषद्–भृगुवल्ल्यां षष्ठानुवाके द्वितीया श्रुतिवाक् ।

नैयायिकैस्तावत् सुखमनुकूलवेदनीयत्वेन प्रत्यपादि। तत्र हि न्यायशास्त्रे ज्ञानार्थवाचिनो विद्–धातोः कर्मणि अनीयरा सुखस्य आत्मविशेषगुणत्वेऽपि विषयरूपता न्यरूपि। न्यायदर्शने इव सांख्यदर्शनेऽपि प्रकृतिरूपात् चेतनानधिष्ठितप्रधानात् सत्त्वादिगुणत्रयानुस्यूतत्वेन अभिव्यक्ते सुखे विषयरूपता सूपपादिता। मीमांसाशास्त्रे पुनश्च सुखं हि स्वर्गपर्यायतामुपयाति। स एव स्वर्गो यत्र लेशतोऽपि दुःखस्पर्शो नोद्वेजयति तत्रस्थं जनम्। स चाग्निष्टोमादि–यागविशेषैरुत्पाद्यमानेन अपूर्वेति संस्काराख्येन यथाकालं साध्यः। तस्मादेव निगद्यते मीमांसाचार्यैः–

**यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।**
**अभिलाषोपनीतञ्च तत्सुखं स्वः पदास्पदम्।।**[३]

सुखदुः खमोहान्वितत्वाज्जागतिकवस्तुषु नैकमपि ऐकान्तिकतया सुखम्, वैलक्षण्येन दुःखमेव, आत्यन्तिकत्वेन च मुग्धतां केवलामुत्पादयितुमलम्। परन्तु प्रजापतिसर्जनवैलक्षण्यात् कविकर्मणः साहित्यपक्षे पार्थिववस्तुवद् सुखादिसङ्क्रान्तता नातीवोपयुज्यते। प्रतिभैककारणे कविसर्जने नास्ति समवायिकारणादिपारतन्त्र्यम्। तस्मादेव साहित्यजगति आभाणकमिदं जेगीयते–

**अपारे काव्यसंसारे कविरेको प्रजापतिः।**
**यथास्मै रोचते विश्वं तथैव परिवर्त्तते।।**[४]

ननु कविकृतेः सुखादिसङ्क्रान्तत्वस्य अत्यन्ताभावेनानुपादेयत्वाद् नैरर्थक्यमिति चेदुच्यते काव्यपाठेन आस्वाद्यमानस्य आनन्दस्यैव सर्वप्रयोजनमौलीभूतत्वात् सचेतोभिरुपादीयते काव्यम्। काव्येन आस्वाद्य आनन्दो हि विषयानन्दव्यतिरिक्तः लोकातिशायी विगलितवेद्यान्तरसम्पर्क शून्यश्च। सोऽयमानन्द एव काव्यमीमांसाशास्त्रेषु कथं परामृश्यते तदेवाग्रे सोपपत्त्या विशदीक्रियते।

---

२. सर्वेषामनुकूलवेदनीयं सुखम्–अन्नम्भट्टप्रणीत–तर्कसंग्रहे सुखलक्षणम्।

३. मीमांसादर्शने मीमांसाचार्यैः सुखस्य स्वर्गपर्यायत्वसाधिका कारिकेयं समुद्ध्रियते।

४. ध्वन्यालोकग्रन्थस्था कारिकेयं साहित्यमीमासाग्रन्थेषु भूयश उदाह्रियते विद्वद्भिः।

**रसस्वरूपम्–** आनन्दपदार्थबोधस्य काव्यमीमांसाशास्त्रे रसपदार्थज्ञाना–धीनत्वाद् रसपदार्थ एवादौ विमृश्यः। तथाहि रस्यते आस्वाद्यते इति भाववाच्यनिष्पन्नो रसशब्दो रत्यादिस्थायिभावपरः। बाह्येन्द्रियैः लौकिकघटपटादिविषयग्रहणात् अस्मन्मनोराज्ये कश्चन भावः समुत्पद्यते। इयं विषयदर्शनजन्यभावसमुत्थितिरेव चित्तवृत्तिरित्याख्यायते। यथा घटमहं जानामि इत्यादौ चेतसो ज्ञानात्मकपरिणामो जायते। अतो घटदर्शनेन ज्ञानात्मकचित्तवृत्तिरुदेतीति स्पष्टम्। काव्यपठनादेवमेव विभावानुभाव व्यभिचारिभावसंयोगात् काव्यवर्णितविषयानुकूला रसात्मिका चित्तवृत्तिः सहृदयाणां समुदेति। तथाहि रसात्मकचित्तविकारसाधनी भारती भारती भाति तद्विरचिते नाट्यशास्त्रे–**विभावानुभाव–व्यभिचारि–संयोगाद्रसनिष्पत्तिः।**[५]

रसात्मिका चित्तवृत्तिः तत्तद्विषयवैभिन्न्यात् रत्यादि–स्थायिभावरूपा। चित्तवृत्तिरूपस्य रत्यादेराशुविनाशित्वेऽपि वासनात्मकत्वात् सूक्ष्मरूपेणाव–स्थानात् स्थायित्वम्। तस्माद् विभावादि–संयोगान्निष्पाद्यमानस्य रसपदवाच्यता रत्यादिस्थायिभावरूपता च। तथाहि रससामान्यलक्षणं निगद्यते काव्यप्रकाशस्य चतुर्थोल्लासे मम्मटाचार्येण– **व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृत।**[६] रसस्याष्टविधता शास्त्रेषूपपादिता। तथाहि रससंख्याविषयिणी कारिका मम्मटाचार्येणावाचि–

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।।**[७]

ननु रसशब्देन पुनः रत्यादिस्थायिभावाः कस्माद्धेतोः व्यपदेष्टुं शक्या इति चेदुच्यते यद् रत्यादिस्थायिभावानामेव सामाजिकैः चर्व्यमाणत्वात्प्राधान्याच्च विभावाद्यपेक्षया स्थायिभावा एव रसपदव्यपदेश्याः। तस्मादेव निगद्यते–

---

५. भरतमुनिविरचितं नाट्यशास्त्रम्– षष्ठेऽध्याये वागियं विलसति।

६. आचार्यमम्मटकृतः काव्यप्रकाशः– ४.२८।

७. आचार्यमम्मटकृतः काव्यप्रकाशः– ४.२९।

**विभावैरनुभावैश्च युक्तो वा व्यभिचारिभिः।**

**आस्वाद्यत्वात्प्रधानत्वात्स्थाय्येव तु रसो भवेत्।।**[८]

रसानामाष्टविध्याद् यथासंख्यनियमेन स्थायिभावानामपि अष्ट–संख्याकत्वम्। अतो विभावादिसंयोगाद् निष्पन्नस्य रसस्य आस्वाद्यतया रत्यादिस्थायिभावरूपत्वम्। तादृगवस्थापन्नानां सचेतसां तदा वेद्यान्त रसम्पर्कशून्या काचिदलौकिकी दशा मनोराज्ये प्रादुर्भवति या किल रसचर्वणानुकूला। तस्यां दशायामेव स्थायिभावास्वादनेन चर्व्यमाणात् रसात् आनन्दसमुत्पत्तिर्जायते। तस्मात् आनन्दस्य कार्यता रत्यादिस्थायिभाव रूपरसस्य च कारणता।

**रसस्यैव आनन्दपर्यायत्वम्–** एवञ्च काव्यशास्त्र–प्रतिपादित आनन्दो हि रसास्वादनाज्जन्यः। स्थायिभाव–रूपाणां रसानाम् आनन्दपरार्थत्वात् स एव आनन्दः सकलकाव्य–प्रयोजनमौलीभूतः सहृदयभाजाञ्चाभीष्टतमः। तस्मात् **सद्यः परिनिर्वृतये**[९] इति काव्यप्रयोजनव्याख्यानावसरे काव्यप्रकाशे मम्मटाचार्यपादैरुक्तं– **सलकप्रयोजनमौलीभूतं समनन्तरमेव रसास्वादन–समुद्भूतं विगलित–वेद्यान्तरमानन्दमिति।**[१०] **रसास्वादन–समुद्भूतमिति मम्मटवचनं विशदीकुर्वता सारबोधिनीकृतोच्यते–रसस्य स्थायिभावस्य आस्वादनेन विभावानुभाव–व्यभिचारिभिः संयोजनेन समुद्भूतं निष्पन्नमित्यर्थ**[११] इति। विभावादिभिरभिव्यक्तस्य रत्यादिस्थायिभावस्य रसस्यास्वादनाद्या दशा सम्प्राप्ता सचेतोभिस्तत्र आनन्दातिरिक्तज्ञेयान्तर सम्बन्धस्य लेशतोऽपि स्पर्शो न विद्यते रसचर्वणादशायाम् आनन्दो हि केवलो विषयतामुपयाति नान्यत् किञ्चज्ज्ञेयान्तरम्म्। तस्मादेव निगद्यते विगलितवेद्यान्तरमानन्दमिति।

---

८. काव्यप्रकाशटीकायां वामनाचार्य–झलकीकरप्रणीतायां बालबोधिन्याख्यायां कारिकेयं समुदाहृता। पृष्ठम्–११६।

९. काव्यं यशसेऽर्थेते व्यवहारविदे शिवेतरक्षतये।

१०. सद्यः परिनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।–काव्यप्रकाशे आद्योल्लासे द्वितीया कारिका।

११. आचार्यमम्मटप्रणीतकाव्यप्रकाशः। – १.२ । पृष्ठम् –८।

विगलितवेद्यान्तरमानन्दमिति पदं हि रसानन्दयोस्तादात्म्यरूपतातात्पर्य–बोधकम्। तथाहि विगलितवेद्यान्तरमिति पदं व्याख्यायद्भिः नरसिंहठक्कुरपादैरुच्यते– **रस्यते इति रसो निरुपाधीच्छाविषयः, आस्वादनमास्वादः सुखस्वरूपम्, समुद्भूतः स्वप्रकाशो ज्ञानरूपः इति रसास्वादनसमुद्भूतपदानां कर्मधारयः**[१२] इति। तथा सति निरुपाधीच्छा विषय–सुखस्वरूपस्व–प्रकाशज्ञानरूपो हि आनन्द इति प्रोक्तकर्मधारय प्रकारस्य निर्गलितोऽर्थः। एवञ्चानन्दानुभूतौ हि निरुपाधीच्छाविषयत्वात् आनन्दस्य स्वप्रकाशज्ञानरूपता।

**रसात्मकानन्दस्य ब्रह्मानन्दसहोदरता–** वस्तुतस्तु विज्ञानमानन्दं ब्रह्म[१३] इति श्रुतिवाक्याद् ब्रह्मण आनन्दमयत्वं प्रकाश्यते। तथाहि अस्तमितायाम् अविद्यायां मुमुक्षुणा अखण्डसच्चिदानन्दब्रह्मसाक्षात्कारेण सममेव परमानन्दोऽपि आस्वाद्यते। प्रकृत्या खलु प्रमेयप्रमातृलयात् कस्यास्वादनं को वा आस्वादयिता, प्रमातृप्रमेयलयाद्धि तदा न कस्यापि आस्वाद्यत्वं न चापि कस्यचित् आस्वादयितृत्वम्। तस्मात् आनन्दो हि तादृशमोक्षदशायां स्वप्रकाश– ज्ञानात्मनैवावसीयते। एवं रसास्वादनस्थलेऽपि योऽयमानन्दो विगलित–वेद्यान्त–रसम्पर्कशून्यत्वेनाभिमन्यते तस्यापि स्वप्रकाश–ज्ञानस्वरूपतेति नरसिंहठक्कुर–पादानामभिप्रायः। तथाहि निगद्यते तैः स्वविरचितायां सारबोधिन्याम्– **विगलितमस्तमितं वेद्यान्तरं स्वातिरिक्त विषयान्तरं यत्रेत्यर्थः, ज्ञानान्तरे घटादिकं विषयः, ज्ञानं च विषयी, अत्र ज्ञानात्मक आनन्द एव विषयो विषयी च**[१४] इति। एतेन ह्यानन्दस्य मोक्षकालिकब्रह्मानन्दतुल्यता प्रतिपाद्यते।

**रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवति**[१५] इत्यादिश्रुतीनामपि

---

१२. काव्यप्रकाशटीकायां वामनाचार्य–झलकीकरप्रणीतायां बालबोधिन्याख्यायां सारबोधिनीकारिकेयं समुदाहृता। पृष्ठम्–११।

१३. काव्यप्रकाशटीकायां वामनाचार्य–झलकीकरप्रणीतायां बालबोधिन्याख्यायां पङ्क्तिरियं विलसति। पृष्ठम्–११।

१४. बृहदारण्यकोपनिषद्– ३.६.२८।

१५. काव्यप्रकाशटीकायां वामनाचार्य–झलकीकरप्रणीतायां बालबोधिन्याख्यायां पङ्क्तिरियं विलसति। पृष्ठम्–११।

आनन्दस्य रसात्मकत्वमाख्याप्यते। एतादृशो आनन्दानुभवो हि न लौकिक सुखास्वादनमिव तस्यान्तःकरणवृत्तित्वाभावात्। तस्मान्निगद्यते पण्डितराजेन जगन्नाथेन– आनन्दो ह्ययं न लौकिक–सुखान्तर–साधारणः, अनन्तः करणवृत्तित्वात्[१६]। विषयेऽस्मिन् मधुसूदन–सरस्वती–पादानामपि वचन मादरणीयम्– **निखिलमपि विषयनिष्ठं प्रेमाणं भगवत्येव प्रतिष्ठापयतः सकलविषयविमुखमनसः कस्यचिद् महाभागस्य विगलितायां चित्तवृत्तौ सर्वसाधनफलभूतायां गृहीतायां भगवदाकाराकारितायां विभावानुभाव–व्यभिचारिसंयोगेन रसरूपतया अभिव्यक्ततो भगवदाकारतारूपो रत्याख्यः स्थायिभावः परमानन्द–साक्षात्कारात्मकः प्रादुर्भवति**[१७] इति। भक्तिरसायने प्रतिपाद्यते यत् घटपटादिरूप–जगत्प्रपञ्चोऽयम् अद्वितीयवस्तु–परब्रह्मणः एव विवर्त्तभूतः। एवमेव काव्येऽपि आस्वाद्यमानोऽयं रसरूप आनन्दस्तस्यैव विवर्त्तमात्रम्। तथा चोच्यते–

**भगवान् परमानन्दः स्वरूपः स्वयमेव हि।**

**मनोगतस्तदाकारो रसतामेति पुष्कलम्।।**[१८]

**रसानुभूतौ प्रक्रिया–**रसास्वादसमुद्भूत आनन्दो रसचर्वणाया अन्तिमा परिणतिः। यावन्नानन्दस्य विगलितज्ञेयान्तरसम्पर्कशून्यता न तावत् रसास्वादस्य सार्थक्यम्। परन्तु आनन्दोद्रेक–कारणीभूतोऽयं रसास्वादः किम्प्रकारकः इत्यपि आलोच्यम्। तथाहि विभावानुभाव–व्यभिचारिसंयोगाद्रस निष्पत्तिः इति रससूत्रे तावत् निष्पत्तिशब्दमादाय रसास्वादप्रकियायां चत्वारो वादा प्रादुर्भूताः। ते च भट्टलोल्लटस्य आरोपवाद उत्पत्तिवादो वा, शङ्कुकस्यानुमितिवादः, भट्टनायकस्य भुक्तिवादः अभिनवगुप्तस्य चाभिव्यक्तिवादः। तथाहि रत्यादिस्थायिभावस्य विभावैः उत्पाद्योत्पादकरूपः, अनुभावैर्गम्यगमकलक्षणस्तथा व्यभिचारिभिः पोष्यपोषकभावाख्यः सम्बन्धः सर्वैरविषेशेणाङ्गीक्रियते। परन्तु प्रोक्तसम्बन्धात् रसस्य आरोपाद्याख्या

---

१६. तैत्तिरीयोपनिषद्– २.७.२।

१७. आचार्यपण्डितराजजगन्नाथप्रणीते रसगङ्गाधरे विलसतीयं पङ्क्तिः, पृष्ठम्–६५।

१८. आचार्यमधुसूदनसरस्वतीपादकृते भक्तिरसायनग्रन्थे पङ्क्तिरियं विद्यते।

निष्पत्तिर्भवतीति वादचतुष्कैः व्यूह्यते। निष्पत्तौ च प्रकारः एवंविधः— रत्यादिस्थायिभावकाः कान्ताद्यालम्बनकाः स्रक्चन्दनाद्युद्दीपिताः, कटाक्षाद्यनुभाविता व्रीडादिसञ्चारिताः शृङ्गारादयो रसा आस्वाद्यन्ते सामाजिकैः।

परिशेषे वक्तव्यं यत् प्राकृतरसचर्वणायां सोपाधिक आनन्दोऽनुभूयते। तस्मान्नास्ति प्राकृतरसास्वादने सचेतसामाग्रहस्तत्र निरतिशयानन्दस्वादना प्रसङ्गात्। निरुपाधिक—स्थायिभावरूप—रसास्वादनात् अस्तमित— वेद्यान्तर सम्पर्कशून्या दशा आनन्दमतिमात्रं वर्धयतितराम्। तदैव ब्रह्मानन्दसहोदरतुल्य आनन्द आस्वादयितुं शक्यस्तत्रैव स्थायिभावानां समेषां सार्थक्यात्। एतदेवाभिमत्य श्रीमन्मधुसूदनसरस्वतीपादैरगादि—

**नित्यं सुखमभिव्यक्तं रसो वै स इति श्रुतेः।**
**प्रतीतिः स्वप्रकाशस्य निर्विकल्पसुखात्मिका।।**[१६]

***

१६. आचार्यमधुसूदनसरस्वतीपादप्रणीतं भक्तिरसायनम्—१.१०।

# योगोपनिषदनुसारं यमतत्त्वविश्लेषणम्, साम्प्रतं तत्प्रासङ्गिकता च

**अलोकबेपारी**

*अनुसन्धाता, साङ्ख्ययोगविभागः*

*राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः*

एकविंशशतके विचरणशीलाः मनुष्याः अत्यधिकप्रयुक्तिनिर्भर–शीलास्सन्ति। प्रयुक्तिप्रयोगत्वात् यथा अतीव सरलतया कष्टसाध्यं दुर्लभञ्च कार्यसाधनं सम्भवति तथा समाजेन सार्धं मनुजानामतीव सुमधुरसम्पर्को विनश्यति। परन्तु प्राचीनकाले मानवीयजीवनयापनस्य मूलभित्तिरासीत् समाजः, तस्मिन् काले समाजव्यवस्थाऽपि अतीव रमणीयाऽऽसीत्। परन्तु इदानीन्तनकाले मानवाः परस्परान् प्रति परस्पराः हिंसा, विषममनोभावः, अन्यायश्चेति मूलकमाचरन्ति, पुनश्च इयं स्थितिः क्रमशो वर्धमानशीला अस्ति। साम्प्रतिककाले परिवारस्य विघटनमतीव साधारणविषयोऽस्ति, यतः प्रायस्सर्वेषु परिवारेषु नानाविधसमस्या विद्यन्ते। अस्यास्समस्यायाः मूलभूतकारणानि सन्ति परस्परं प्रति अविश्वास–हिंसा–ईर्ष्या–असूयादीनि। अतएव शान्तिशृङ्खलां विनश्य अस्मदीयसमाजोऽशान्तमूलकः, हिंसामूलकः, अराजकतापूर्णश्च भवति। अविश्वास–हिंसा–ईर्ष्या–असूयादीन् विमोच्य पुनः अस्मदीयसमाजेषु शान्तिशृङ्खलाताल्येत, तदर्थं योगविद्याऽस्ति अन्यतममार्गः। योगतत्त्वानुशीलनत्वाच्चित्तस्य निर्मलता–स्थिरता–शुद्धता सम्प्राप्तुं शक्यते। अतएव योगविद्या एव आत्मोन्नतेस्साधकतमा करणत्वेन स्वीक्रियते। योगतत्त्वमाश्रित्य प्रायस्सर्वेषु शास्त्रेषु न्यूनमाधिक्यञ्च रूपेण आलोचितवन्तश्शास्त्रकाराः, तेषु अन्यतमाऽस्ति योगोपनिषदिति। योगोपनिषत्प्रतिपादितानि योगतत्त्वानि अनुसृत्य मनुष्याः तदीयजीवनं परिपालयन्ति चेत्स्वीयस्य तथा च समाजस्य शान्तिशृङ्खला पुनः आगच्छतीति मे मतिः।

**उपक्रमः**

**'भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिद्ध्यति'**[1] इत्यस्मात्स्मृति–वचनाद्भूतवर्तमानभाविकालेषु सर्वासां विद्यानाम्मूलभूतस्थलमासीदस्ति भविष्यति च वेदशास्त्रम्। अतस्सर्वाणि ज्ञानानि वेदमूलकत्वानि संसिद्ध्यन्ति। वेदोऽस्ति प्राचीनतमसाहित्यिकनिदर्शनम्, वेदस्याऽन्तिमभागे स्थिताभ्य उपनिषद्भ्य एव दर्शनानां समुत्पत्तिर्जायते। दर्शनेषु योगदर्शनस्य स्थानमन्यतममस्ति, महर्षिपतञ्जलिप्रतिपादितस्य योगदर्शनस्य प्रतिपाद्यविषय योगेन चित्तस्य निर्मलता–स्थिरता–शुद्धता सम्प्राप्तुं शक्यते। अतएव योगविद्याएव आत्मोन्नतेस्साधकतमा करणत्वेन स्वीक्रियते। तथा चोक्तम्भगवता पतञ्जलिना–

**"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः"**[2]

पुनश्च श्रीमद्भागवतपुराणे योगस्य महत्त्वमेवं प्रतिपादितम्–

**"योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे।**
**अत्यन्तोपरतिर्यत्र दुःखस्य सुखस्य च"।।**[3]

**यमस्य स्वरूपम्–**

योगाङ्गेषु प्रथमस्तथा च अन्यतमोऽस्ति यमः, पुनश्च योगसाधनायां यमो भवति प्राथमिकसोपानमिति। 'यम्'– धातुना सार्धं घञि प्रत्यये 'यमः' इति पदमुत्पद्यते, यस्यार्थस्तावन्निवृत्तिः अर्थात् यमन्ति निवर्तयन्ति इति यमाः। अतएव योऽवाच्छनीयकार्येभ्योऽवाच्छनीयप्रवृत्तिभ्यश्च निवर्तयति, सैव यमपदेनाऽभिधीयते। पुनश्च 'यम्–उपरमे' इति धातोरुत्तरात् अपि प्रत्ययसंयोगेन 'यमः' इति पदं समुद्भूतं जायते, यस्यार्थस्तावत् यम्यन्ते उपरम्यन्ते निवर्त्यन्ते हिंसादिभ्य इन्द्रियाणि यैः। अतो य इन्द्रियाणि मनश्च हिंसाचौर्याद्यशुभकार्येभ्यो निवृत्तं कारयित्वा आत्मकेन्द्रितं कर्तुं शक्नोति, सैव

---

१. मनुस्मृतिः –द्वादशखण्डः, पृ.–१५५, श्लोक–१२ / ६७

२. पातञ्जल योगदर्शन, पृः– १४२, सूत्रम्–२ / २८

३. श्रीमद्भागवतम्, पृ.–२६६, श्लोक– ३ / २५ / १३

यम इत्युच्यते। भगवता पतञ्जलिना यमस्य लक्षणं प्रदत्तमस्ति–

**"अहिंसा सत्यास्तेय–ब्रह्मचर्यापरिग्रहा यमाः"।**[४]

अतएव यमो न त्वेकविषयः, स तु समष्टिगतविषयोऽस्ति। अहिंसा–सत्य–अस्तेयादिसम्मिलितभावेन यमो नाम्नाभिधीयते।

त्रिशिखिब्राह्मणोपनिषदि तथा च बभाषे –

**"देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः"।**[५]

इन्द्रियायतनम् इन्द्रियाणि च प्रति वैराग्यभावः खलु 'यम' इत्युच्यते। पुनश्च 'सर्वं ब्रह्म' इत्यस्मिन् ज्ञाने इन्द्रियाणां संयमनमेव यमो निगद्यते तेजोबिन्दूपनिषदि। श्रीगोरक्षनाथकृतसिद्धसिद्धान्तपद्धतौ यमस्य लक्षणमेवम्– **"यम इति उपशमः, सर्वेन्द्रियजयः, आहार–निद्रा–शीत–वाता–तपजयश्च। एवं शनैः शनैः साधयेत्"।।**[६]

**यमस्य प्रभेदः**

संस्कृतसाहित्यजगति यमस्योच्चावचप्रकारभेदा दरीदृश्यन्ते, यथा योगसूत्रे भगवता पतञ्जलिना पञ्चधायमास्स्वीकृताः, ते तावत् अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः। तदुक्तञ्च–

**"अहिंसा सत्यास्तेय–ब्रह्मचर्यापरिग्रहा यमाः"।**[७]

योगोपनिषत्सु अर्थात्योगतत्त्वोपनिषद्याम्नातं लघ्वाहार एव यमः, अतएव लघ्वाहारो मिताहारो वा यमस्यैकमात्रप्रभेदोऽस्ति। मण्डलब्राह्मणोपनिषदि चतुर्विधा यमा निर्दिष्टाः, तत्रावलोक्यते यत्–

**"शीतोष्णाहारनिद्राविजयः सर्वदा शान्तिर्निश्चलत्वं विषयेन्द्रियनि–**

---

४. पातञ्जल योगदर्शन, पृः– १४५. सूत्र–२/३०

५. उपनिषत्सञ्चयनम्– द्वितीयखण्डः, पृ.–४३२, श्लोक–२/२८

६. सिद्धसिद्धान्तपद्धतिः, पृ.–४१ (मूलपाठ), २/३३

७. पातञ्जल योगदर्शन, पृः– १४५, सूत्रम्–२/३०

**ग्रहश्चैते यमाः" ।**[८]

पुनश्च शाण्डिल्योपनिषदि, जाबालदर्शनोपनिषदि, त्रिशिखिब्राह्मणोप–निषदि, वराहोपनिषदि च यमा दशविधा उल्लिखिताः, ते तावत्–अहिंसासत्यास्तेयब्रह्मचर्यदयार्जवक्षमाधृतिमिताहारशौचानि। प्रसङ्गेऽस्मिन्नुपनिषत्प्रमाणमस्ति –

**"अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम्।**
**क्षमा धृतिर्मिताहारः शौचं चैति यमा दश" ।।**[९]

इतोऽपि पराशरसंहिता, याज्ञवल्क्यस्मृतिः, हठयोगप्रदीपिका, हठरत्नावली चादिग्रन्थेष्वपि दशविधा यमास्समुपलभ्यन्ते। एवञ्च रूपेणाऽखिलसंस्कृतजगति यमस्य विविधाः प्रकारभेदा विद्यन्ते, परन्तु शोधलेखेऽस्मिन् केवलमात्रं योगोपनिषत्प्रतिपादितानि तत्त्वानि यथामति सविमर्शं मयाऽऽलोच्यन्ते–

## (क) अहिंसा–

'हिंस'–पदेन साकं टापि प्रत्यये हिंसा, तत्पश्चात् 'न हिंसा' इति नञ्समासे अहिंसा पदमुत्पद्यते। यस्याऽर्थस्तावद्विद्वेषभावपरित्यागः। मानवीयसमाजस्य सार्विकविकाशार्थमहिंसा खलु परमो धर्मः।यथा प्रपञ्चितम्–

**"अहिंसा परमो धर्मस्तथाहिंसा परं तपः।**
**अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते" ।।**[१०]

अतो मनसा वाचा कायेन कर्मभिश्च सर्वदा सर्वत्र सर्वभूतानि प्रत्यक्लेशजननमाचरेयुः। प्रसङ्गेऽस्मिन् अथर्वामुनिभिरुक्तम्–

**"अहिंसा नाम मनोवाक्कायकर्मभिः सर्वभूतेषु सर्वदाऽक्लेशजननम्" ।**[११]

---

८. उपनिषत्सञ्चयनम् पृ.– ४७४, १/३
९. उपनिषत्सञ्चयनम्– पृ.– ३६६, १/६
१०. श्रीमन्महाभारतम्–१६, ११५/२३ पृ.–७६८६, १३/११५/२५
११. उपनिषत्सञ्चयनम्– तृतीयखण्डः, पृ.– २, १/५

सर्वेषां जीवानां कल्याणार्थमात्मनिष्ठपूर्वकं स्नेहपूर्णहितकर कर्मानुष्ठानमेवाहिंसा, एतस्मात्कर्मणो जीवा आत्मिकविकाशमाप्नुवन्ति। हिंसामूलकं कार्यं सम्पाद्यते चेत्स्वस्य समाजस्य च मूल्यबोधो क्षीयते। अतो ये सहिंसमाचरन्ति, तेषां काप्युन्नतिर्न सम्भवति। अतो हिंसामतिक्रम्याऽ हिंसाऽऽचरितव्या।

अहिंसाजये सर्वभूतानि प्रति विद्वेष–शत्रुता–ईर्ष्या–क्रोधादयो मनोभावा विनश्यन्ति।पुनश्च अहिंसायांप्रतिष्ठितसाधकस्योपदेशः, जीवनचरित्रम्, आचरणञ्चेति ये जना अनुसरन्ति, ते जनाऽपि

सर्वभूतानि प्रतिवैरभावं परित्यजन्ति। तथा चोक्तम्–

**"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः"।**[१२]

**(ख) सत्यम्–**

सते हितमिति सत्यम्, 'सत्'–धातोरुत्तरात् 'यत्'–प्रत्ययसंयोगे सत्यं पदन्निष्पद्यते। मनोवाक्कायकर्मभिर्मृषाकुत्सान्वितभाषणं चिन्ताञ्चोत्सृज्य सर्वदा सर्वत्र शिष्ट–संयत–न्यायसंगतकथपोकथनं खलु सत्यमित्युच्यते। तथा च अथर्वामुनिभिर्भाषितम्–

**"सत्यं नाम मनोवाक्कायकर्मभिर्भूतहितयथार्थाभिभाषणम्"।**[१३]

इतोऽपि चक्षुरादीन्द्रियैर्यथा दृष्टं यथा श्रुतं यथाऽनुमितं तथा मनसा वाचा कायेन च परिपालनं विवेचनञ्च सत्यम्। योगसूत्रीयव्यासभाष्येऽवलोक्यते यत्–"सत्यं यथार्थे वाङ्मनसे, यथा दृष्टं यथानुमितं यथा श्रुतं तथा वाङ्मनश्चेति"।[१४] पुनश्च योगीन्द्रदत्तात्रेयैस्स्पष्टीकृतम्–

**"चक्षुरादीन्द्रियैर्दृष्टं श्रुतं घ्रातं मुनीश्वर।**

**तस्यैवोक्तिर्भवेत्सत्यं विप्र तन्नान्यथा भवेत्"।।**[१५]

---

१२. पातञ्जल योगदर्शन, पृः–१५५, २/३५

१३. उपनिषत्सञ्चयनम्– तृतीयखण्डः, पृ.– २, १/६

१४. पातञ्जल योगदर्शन, पृः– १४५, २/३०

१५. उिपनिषत्सञ्चयनम्– तृतीयखण्डः, पृ.– ३६६, १/६

सत्ये प्रतिष्ठितयोगिनो वाणी अमोघस्वरूपा भवति। अतएव सत्यवादी न केवलं स्वीयमपितु अपरजनान् ब्रह्मप्राप्त्यर्थं मार्गं प्रदर्शयति।

## (ग) अस्तेयम्–

'न स्तेयम्' इति नञ्समासे अस्तेयपदं समुद्भूतञ्जायते। स्तेयं नाम चौर्य्यकर्म इत्युक्ते अशास्त्रपूर्वकमितरजनेभ्यो धनसम्पत्तिस्वीकरणं स्तेयमिति पदवाच्यम्। अतएव परद्रव्येषु लिप्सा खलु स्तेयस्य कारणमिति, तथा चोक्तम्–

**"प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा यत् परद्रव्यहरणं स्तेयं तत्परिकीर्त्तितम्"।।**[१६]

अतएव स्तेयप्रतिषेधरूपा तथा चाऽपरव्यक्तेर्धनसम्पत्तिं प्रति पुनरस्पृहारूपा विशेषस्थितिरस्तेयमिति नाम्नाभिधीयते। योगसूत्रीयव्या–सभाष्येऽवलोक्यते यत्–

**"स्तेयम् अशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणम्, तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयमिति"।**[१७]

पुनश्च प्रसङ्गेऽस्मिन् अथर्वामुनिना प्रपञ्चितम्–

**"अस्तेयं नाम मनोवाक्कायकर्मभिः परद्रव्येषु निःस्पृहता"।**[१८]

मनसा वाचा कायेन च सर्वदा सर्वत्र परद्रव्याणि प्रति लिप्साशून्यस्थितिरेव अस्तेयमिति निगद्यते। अत्र द्रव्यपदेन केवलमात्रं रत्नसुवर्णादयो न अवगम्यन्ते, अपि तु क्षुद्रतरतृणानि ज्ञायन्ते। तदुक्तञ्च महामुनिना दत्तात्रेयेण जाबालदर्शनोपनिषदि–

**"अन्यदीये तृणे रत्ने काञ्चने मौक्तिकेऽपि च।**
**मनसा विनिवृत्तिर्या तदस्तेयं विदुर्बुधाः"।।**[१९]

अस्तेये प्रतिष्ठिते सति परद्रव्येषु लिप्सा, तज्जनितदुःखञ्च विनश्यति।

---

१६. यन्त्रोपारोपितकोशांशः, अमरकोषः, शब्दकल्पद्रुमः
१७. पातञ्जल योगदर्शन, पृः– १४५, सूत्र–२/३०
१८. उपनिषत्सञ्चयनम्– तृतीयखण्डः, पृ.– २, १/१८)
१९. तदेव, पृ.–३६८, १/११

पुनश्च साधकस्य योगिनो वा समीपं ब्रह्माण्डस्थितसर्वरत्नानि उपस्थितानि भवन्ति। भगवता पतञ्जलिना उच्यते यत्–

**"अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्"।**[२०]

### (घ) ब्रह्मचर्यम्–

योगसाधनायां ब्रह्मचर्यमन्यतमप्रधानमङ्गमस्ति। 'बृह्'–धातोः 'ब्रह्म' इति पदमुत्पद्यते, 'चर्–धातोः 'चर्य' इति पदन्निष्पद्यतेय अतएव ब्रह्म प्राप्तुं वीर्यं भक्षणं तथा च स्वीयमध्ये वीर्यधारणमेव ब्रह्मचर्यं पदस्य अभिधार्थः। वीर्यं संरक्षणमेव ब्रह्मचर्यस्य प्रधानोद्देश्यमस्ति। अस्य स्वरूपम्–

**"ब्रह्मचर्यं नाम सर्वावस्थासु मनोवाक्कायकर्मभिः सर्वत्र मैथुनत्यागः"।**[२१]

जागरितस्स्वप्नश्चेत्यादिषु सर्वास्ववस्थासु मनसा वाचा कायेन च मैथुनपरित्यागः खलु ब्रह्मचर्यमिति नाम्नाभिधीयते। मैथुनपरित्यागेन वीर्यसंरक्षणं सम्भवति। पुनश्च दर्शनोपनिषदि मुनिदत्तात्रेयेणोच्यते यत्स्त्रीसङ्गपरिवर्जनमेव ब्रह्मचर्यमिति, तथा च निगदितमेवम्–

**"कायेन वाचा मनसा स्त्रीणां परिविवर्जनम्।**
**ऋतौ भार्यां तदा स्वस्य ब्रह्मचर्यं तदुच्यते"।।**[२२]

ब्रह्मचर्यमिदं पालयति चेदस्मदीयशरीरं बलिष्ठं तेजोमयं दीर्घायुयुक्तं स्वास्थ्यञ्च भवति। पुनश्च सुतीक्ष्णदृष्टिशक्तिः, मानसिकशक्तिश्च सम्प्राप्यते साधकेन। तदुक्तञ्च–

**"ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः"।**[२३]

### (ङ) दया–

'दय' इति पदेन साकं स्त्रीत्वार्थे टापि प्रत्यये दयापदं जायते। यस्यार्थस्तावत्करुणा, पुनश्च दयापदेन समवेदना सहानुभूतिश्चेति

---

२०. पातञ्जल योगदर्शन, पृः– १५६, २/३७)

२१. उपनिषत्सञ्चयनम्– तृतीयखण्डः, पृ.– २, १/८

२२. तदेव, पृ.– ३६८, १/१३

२३. पातञ्जल योगदर्शन, पृः– १५७, २/३८

अन्तर्भुक्ताऽस्ति। सर्वभूतेषु दुःखविनाशप्रवृत्तिस्तथा च सर्वभूतेषु कल्याणवृत्तिर्दया पदवाच्या। दया खलु धर्मस्य मूलमिति। अथर्वामुनिना निगदितम्–

**"दया नाम सर्वभूतेषु सर्वत्रानुग्रहः"।**[२४]

परक्लेशान् निवारयितुं हृदि या इच्छा जायते, सा एव दया। पुनश्च सर्वभूतानां हितार्थे कृतानुग्रहो दया नाम्नाऽभिधीयते। दयाभ्याससाधका अपरं स्वीयरूपेण, अपरक्लेशान् स्वीयक्लेशरूपेण चिन्तयन्ति च। कारणाद–स्मात्स्वीयक्लेशवदपरक्लेशेषु व्यथिताः, पुनश्च तत्क्लेशान् विमोचयितुं प्रयत्नमाना भवन्ति।

**(च) आर्जवम्–**

दशविधेषु यमेष्वार्जवमन्यतममस्ति, यस्यार्थस्तावदृजुता सरलता वा। सर्वदा सर्वत्र सर्वान् प्रति अनुरूपाचरणस्य मानसिकता आर्जवमिति नाम्ना सूच्यते। यथा पुत्रेषु स्त्रीषु मित्रेषु अरिषु अपि च केषुचित् जनेषु सततमेकरूपत्वमेव आर्जवं पदवाच्यमिति। तथा चोक्तम्–

**"पुत्रे मित्रे कलत्रे च रिपौ स्वात्मनि संततम्।**
**एकरूपं मुने यत्तदार्जवं प्रोच्यते मया"।।**[२५]

एकरूपत्वकारणात्सममनोभाववशात् वा सुखदुः खादिषु चित्तं न विचलति, क्रोधरागादयः कदापि चित्तं चञ्चलं कर्तुं न शक्नुवन्ति। प्रसङ्गेऽस्मिन् शाण्डिल्योपनिषदि दरीदृश्यते यत्–

**"आर्जवं नाम मनोवाक्कायकर्मणां विहिताविहितेषु जनेषु प्रवृत्तौ निवृत्तौ वा एकरूपत्वम्"।**[२६]

**(छ) क्षमा–**

'क्षमु सहने' इति धातोरुत्तरात् अङि, तत्पश्चात् स्त्रीत्वार्थे टापि प्रत्यये

---

२४. उपनिषत्सञ्चयनम्– पृ.– २, १/६

२५. तदेव, पृ.– ३६६, १/१६

२६. तदेव, पृ.–२, १/१०

'क्षमा' पदमुत्पद्यते। 'क्षमा' इति पदेन धैर्यं सहिष्णुता चेत्यादयस्सूच्यन्ते। क्षमेयं खलु वीरस्य भूषणम्। वाह्यक्षेत्रे आध्यात्मिकक्षेत्रे च कश्चिदपि क्षयोत्पादितो भवति चेदपि न कुप्यति न वा हन्ति, सा एव क्षमा निगद्यते। उक्तञ्च—

**"कायेन मनसा वाचा शत्रुभिः परिपीडिते।**

**बुद्धिक्षोभनिवृत्तिर्या क्षमा सा मुनिपुङ्गव"।।**[२७]

परन्तु शाण्डिल्योपनिषदि अथर्वामुनिरुक्तवान् केवलमात्रं नास्ति दुःखसहनम्, अपितु सुखमानन्दञ्च सहनं क्षमा इति पदेन अवगन्तव्यम्। तथा च भाषितमेवम्—

**"क्षमा नाम प्रियाप्रियेषु सर्वेषु ताडनपूजनेषु सहनम्"।**[२८]

अतएव अनुकूलस्थितौ प्रतिकूलस्थितौ च इतरजनेन प्रशंसितो निन्दितश्च भवति चेदपि अविचलितरूपेणाऽवस्थानमेव क्षमा पदवाच्या।

### (ज) धृतिः—

'धृ धारणे'—धातोरुत्तरात् 'क्तिन्'—प्रत्यययोगे धृतिरिति शब्दो जायते, यस्यार्थस्तावत् धैर्य्यम्, स्थिरता, दृढता, स्थैर्यञ्च। धृतिर्नाम चित्तस्य मनसो वा स्थैर्यमिति। शाण्डिल्योपनिषद्याम्नातम्—

**"धृतिर्नामार्थहानौ स्वेष्टबन्धुवियोगे तत्प्राप्तौ सर्वत्र चेतःस्थापनम्"।।**[२९]

मानवचित्तं चञ्चलस्वरूपम्, कारणादस्मात् अर्थप्राप्तौ अर्थहानौ स्वेष्टबन्धुप्राप्तौ स्वेष्टबन्धुवियोगे च अस्मदीयचित्तमतीव चञ्चलं भवति। परन्तु अस्यां स्थितौ चित्तं स्थिरकरणमेव धृतिरिति नाम्नाभिधीयते।

पुनश्च जाबालदर्शनोपनिषदि दृढसंकल्पः खलु धृतिः। यथा—वेदज्ञानान्निखिलजगत् मोक्षं मुक्तिं वा प्राप्तुं शक्नोति, नास्ति एतद्भिन्नकारणम्य एतत्संकल्पः खलु धृतिः। तथा च प्रपञ्चितमेवम्—

---

२७. तदेव, पृ.— ३६६, १/१७

२८. तदेव, पृ.— २, १/११

२९. तदेव, पृ.— २, १/१२

**"वेदादेव विनिर्मोक्षः संसारस्य न चान्यथा।**

**इति विज्ञाननिष्पत्तिर्धृतिः प्रोक्ता हि वैदिकैः।**

**अहमात्मा न चान्योऽस्मीत्येवमप्रच्युता मतिः" ।।**[३०]

धृतौ स्थितसाधकानां कर्माणि साफल्यमाप्नुवन्ति, चित्तवृत्तिर्निरुध्यते च। अतएव चित्तवृत्तिंनियन्त्र्य चित्तं परमलक्षे स्थिरं भवति।

**(झ) मिताहारः—**

योगानुष्ठाने मनसा सार्धं शरीरस्य नियन्त्रणमवश्यमेव प्रयोजनमस्ति। यतो हि मानसिकस्थितिः शारीरिकस्थितेरुपरिष्टान्निर्भरशीला। शरीरं नियन्त्रयितुमेकोऽन्यतमोपायोऽस्ति मिताहारः। अत्र 'मित' इत्यस्यार्थोऽस्ति स्पल्पः परिमितो वा, 'आहारः' इत्यस्यार्थोऽस्ति भोजनम्। अतएव सीमितभोजनं परिमितभोजनं वा "मिताहारः" इति पदस्याभिधार्थः। सामवेदीययोगचूडा—मण्युपनिषदि विद्यमानमिताहारलक्षणमेवं रूपम्—

**"सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः।**

**भुञ्जते शिवसंप्रीत्या मिताहारी स उच्यते" ।।**[३१]

अतश्श्रेष्ठं सुमधुरं सुस्निग्धञ्चेत्याहारं जठरस्य चतुर्थांशविवर्जितपूर्वकं भुञ्जीत। रूपेणानेन भगवन्तमर्पयित्वा परिमितभोजनं कर्तव्यमिति मिताहारो नाम्ना निगद्यते। पुनश्च "श्रेष्ठं सुमधुरं स्निग्धं गव्यञ्च विशेषणयुक्ताहारान् ससन्तोषं चतुर्थांशविवर्जितपूर्वकं भुञ्ज्यात्, सैव मिताहारः"[३२] कथ्यते इति घेरण्डसंहितायाम्। प्रथमद्वितीयांशो भोजनेन, तृतीयांशो जलेन च सम्पूर्येत, अवशिष्टांशः चतुर्थांशो वा तु वायुना सम्पूर्णार्थं भोजनकाले रिक्तं संस्थापनीयमिति "चतुर्थांशविवर्जितः"—इत्यस्यार्थ उभयक्षेत्रे। पुनश्च प्रसङ्गेऽस्मिन् ऋषिदत्तात्रेयेणोक्तम्—

**"अल्पमृष्टाशनाभ्यां च चतुर्थांशावशेषकम्।**

---

३०. तदेव, पृ.— ३९६, १/१८

३१. उपनिषत्सञ्चयनम्— द्वितीयखण्डः, पृ.— ४५६, ४३

३२. "शुद्धं सुमधुरं स्निग्धं उदरार्द्धविवर्जितम्।

**तस्माद्योगानुगुण्येन भोजनं मितभोजनम्" ।।**[३३]

## (ञ) शौचम्–

'शुचि'–पदेन सार्धं अणि प्रत्ययसंयोगेन शौचमिति पदन्निष्पद्यते, पुनश्च शुचेर्भावः शौचम्। शौचं नाम शुचिता शुद्धता वा। बाह्याभ्यन्तरभेदत्वात्शौचद्विविधः। शरीरस्य पवित्रता बाह्यशुचिता निगद्यते, शुचितेयं मृज्जलादिजनिता अर्थात् स्वच्छजले प्रत्यहस्नानम्, मेध्याभ्यवहरणञ्चेत्यनेन बाह्यशौचं संसिद्ध्यति। पुनश्च चित्तस्य मलानामाक्षालनमाभ्यन्तरशुचिता कथ्यते। अतएव अहङ्कार–अभिमान–ईर्ष्या–असूयाद्यशुभचिन्ताभ्यो मनो निवृत्तं कारयित्वा आत्मचिन्तने नियुक्तकरणमेव आन्तरशौचं निगद्यते। आत्मज्ञानेन आन्तरशौचं लभ्यते। प्रसङ्गेऽस्मिन् अथर्वामुनिना प्रपञ्चितमेवम्– **"शौचं नाम द्विविधं बाह्यमान्तरं चेति। तत्र मृज्जलाभ्यां बाह्यम्। मनः शुद्धिरान्तरम्। तदध्यात्मविद्यया लभ्यम्" ।।**[३४]

विधिवत्शौचमनुशीलयति चेन्मनसि चेतसि वा स्वाङ्गजुगुप्सा उत्पद्यते तथा च इतरजनेन सार्धं संसर्गलिप्सा नोत्पद्यते। अतएव स्वीयशरीरमितरशरीरञ्च प्रति साधकस्य योगिनो वा आकर्षणं नोत्पद्यते, इयमवस्था वैराग्यभावः कथ्यते, स तु योगस्याऽऽधारः। पुनश्च शौचजये सति चित्तशुद्धिः, तस्मान्मनसो निर्मलता, मनोनिर्मलतायाश्चित्तस्यैकाग्रता, तत इन्द्रियजयः, इन्द्रियजयादात्मदर्शनस्य योग्यता च समुपलभ्यते। प्रसङ्गेऽस्मिन् भगवता पतञ्जलिना प्रोक्तम्–

**"सत्त्वशुद्धि–सौमनस्यैकाग्रेन्द्रियजयात्मदर्शनयोग्यत्वानि" ।**[३५]

## साम्प्रतिककालेषु यमानाम्प्रासङ्गिकता–

योगसाधनायां नार्वाचीनकालादिदानीन्तनकालावधिः यमानां भूमिकाऽनस्वीकार्या, परन्तु साम्प्रतिककाले सर्वदा विचरणशीलजनानां समीपम् अहिंसा–सत्य–अस्तेय–दया–क्षमादियमानामनुसरणं परिपालनञ्च अतीव

---

भुज्यते सुरसं प्रीत्या मिताहारमिमं विदुः" ।। घे.स., ५/२१

३३. उपनिषत्सञ्चयनम्– पृ.– ३६६, १/१६

३४. तदेव, पृ.–२, १/१४

आवश्यकमस्ति। एतत्तु किमर्थम्? विषयोऽयमधोलिखिते वर्ण्यते–

**व्यक्तित्वविकासे यमाः–**

व्यक्तित्त्वविकासेषु यमानां भूमिकाऽनुपेक्षणीया। व्यक्तित्वविकासपदेन शारीरिक–मानसिक–बौद्धिक–सामाजिक–आध्यात्मिकोन्नतयोऽवगम्यन्ते। अतो मानवीयगुणविकासः खलु व्यक्तित्वविकास इति। अहिंसापालनेन सर्वान् जनान् प्रति कायिक–वाचिक–मानसिकेन हिंसामूलकभावं परित्यज्य तान् सम्मानं कर्तुं मनोभावो जायते, सत्यपालनेन आत्मानन्दानुभूतिः प्राप्तुं शक्यते, अस्तेयपालनेन अस्मदीयार्पितकर्तव्यं परिपालयितुं शक्यते, ब्रह्मचर्यपालनेन आत्मसंयमस्य शक्तिराप्तुं शक्यते च। पुनश्च दया–क्षमा–आर्जवकारणान्मानवीयगुणा अभिवर्धन्ते, यस्मान्मानवा अपरजनानां पीडा–शोक–दुःख–यन्त्रणासु सहानुभूतशीला भवन्ति। शौचात् यथैव शरीरस्य बाह्यशुचिता तथैव आन्तरिकशुचिता जायते, कारणादस्माच्चित्तशुद्धिर्भवति। अतएव यमानुष्ठानात् मानवीयगुणा ऋध्यन्ति तथा च व्यक्तित्त्वस्य विकासो भवति।

**सामाजिकस्वास्थ्यसंरक्षणे यमाः–**

एकविंशशतके विज्ञानयुगे सामाजिकस्वास्थ्यं तथा च समाजव्यवस्था क्रमागतं क्षयति। अतएव तत्संरक्षणे यमानामवदानमतीव महत्त्वपूर्णमस्ति। अहिंसापालनात् सत्यपालनाच्च अशान्तसमाजेषु हिंसायुक्तसमाजेषु च पुनश्शान्तिर्मैत्रीभावश्च आगच्छति। स्वीयस्वार्थं साधयितुमितरजनान् न पीडयन्ति, परस्परं प्रति परस्परस्य विश्वासता ऋध्यति च। पुनश्च अस्तेयपालनेन समाजस्य दुर्दशा दूरीभवति, आर्थिकविकासो जायते, हत्याचौर्यादिकार्याणाञ्च लोपो भवति।

साम्प्रतिकविश्वस्य एकाऽन्यतमा प्रबला समस्यास्ति जनसंख्याबृद्धिः। परन्तु ब्रह्मचर्यपालनेन जनसंख्याबृद्धिरूपसमस्याया निराकरणं सम्भवति। पुनश्च समाजेषु बलात्कारस्य चरित्रहीनतायाश्च समस्या निवारयति। एइडस् (AIDS) इति मारणव्याधिस्वरूपयौनसमस्याया अपि उत्पत्तिर्न भविष्यति।

**परिवारस्य विघटनसंरक्षणे यमाः–**

साम्प्रतिककाले परिवारस्य विघटनमतीव साधारणविषयोऽस्ति, यतः

प्रायस्सर्वेषु परिवारेषु नानाविधसमस्या विद्यन्ते। अस्यास्समस्याया मूलभूतकारणानि सन्ति परस्परं प्रति अविश्वासता–हिंसा–ईर्षा–असूयादीनि। परिवारस्य सदस्याः यदि परस्परं प्रति असत्यमूलकं स्तेयमूलकञ्च आचरन्ति, तर्हि अवश्यमेव परिवारस्य विच्छेदो भवति। अतएवअहिंसा–सत्य– अस्तेय–दया–क्षमा–आर्जवादियमानामाचरणपूर्वकं जीवनं परिपालयामश्चेत्परिवारस्य विघटनं रोद्धुं शक्नुमः।

**श्रमराहित्यनाशे यमाः–**

आधुनिके विज्ञानयुगे प्रत्यहं विज्ञानिकैर्भूयांसि यन्त्राणि सृज्यन्ते, तेषां यन्त्राणां प्रयोगेण साम्प्रतं मानवानां शारीरिकश्रमस्य न्यूनता जायते। शारीरिकपरिश्रमस्य स्पल्पपरिमाणवशाद्विविधा व्याधय उत्पद्यन्ते। योगमार्गेण यमेन च जीवनं परिपालनमतीव कष्ठसाध्यं परिश्रमसाध्यमस्ति। अतएव अहिंसा–अस्तेय–सत्यादिभिर्जीवनं परिपालनीयम्, यतो हि मनसा वाचा कायेन च आरोग्यमायाति।

**प्रतिस्पर्द्धा–शोषण–विनाशे यमाः–**

आधुनिकसभ्यतायामेकस्य जनस्योपरिष्टादपरजनस्तथा च एकस्य देशस्योपरिष्टादपरदेशः अन्यायपूर्णप्रतिस्पर्द्धया शोषणं करोति। परन्तु अहिंसा–सत्य–अस्तेय–ब्रह्मचर्य–दया–आर्जव–क्षमा–धृति–शौचादिभिः प्रतिस्पर्द्धां शोषणञ्च विनाशयितुं शक्नुमः। अतएव अहिंसादिपालनपूर्वकं जीवनं यापयेदिति।

**उपसंहृतिः–**

अतएव सर्वान्तिमे इत्थम्भाषितुम्पारयामि यद्योगोपनिषत्प्रतिपादितान् अहिंसादियमान् अनुसृत्य मनुजा जीवनं परिपालयन्ति चेन्मानवीयादर्श–सभ्यतायां शीर्षकासनधारिणो भवन्ति तथा च सपरिवारे समाजे राष्ट्रे ससम्मानं स्वीयस्थानमभिवर्धितुमर्हन्ति। अतएव अहिंसा–सत्य–अस्तेय–ब्रह्मचर्य–दया– आर्जव–क्षमा–धृति–मिताहार– शौचमार्गेषु जीवनं परिपालनीयमिति।

***

# यमुना कृष्णभक्तेः पर्यायः

**डॉ. श्रुतिरायः**

*सहायक–आचार्या, संस्कृतविभागः*

*दिल्लीविश्वविद्यालयः*

भक्तिः इत्युक्ते ईश्वरे सर्वस्वसमर्पणं– एतत् श्रेष्ठतमभक्तस्य लक्षणमस्ति। यमुनाऽपि श्रीकृष्णस्य श्रेष्ठभक्तासु अन्यतमास्ति। तया स्वस्य सर्वस्वं श्रीकृष्णाय समर्पितम्। श्रीकृष्णावतारकाले अपि यमुना श्रीकृष्णलीलानाम् आनन्दं लब्धुं देवलोकं विहाय भूमौ अवतीर्णवती। यमुना श्रीकृष्णे अत्यन्तं स्निह्यति। अतः सा तस्य पट्टमहिषी अभवत्। एवं स्वकीयभक्त्या यमुना सम्पूर्णजगद् भक्तेः वास्तविकस्वरूपमुपदिशति। तात्त्विकदृष्ट्या यमुना–श्रीकृष्णयोः तादात्म्यमस्ति। सा कृष्णात् अभिन्नाऽस्ति। अतः उपास्योपासकयोः द्वैतं नास्ति। एतस्मादेव कारणात् यमुनायाः कृष्णविरहो न जायते कदाचन। यमुनायाः सर्वसमर्पणभावना सिद्धयति यत् भक्तिः मानसिकविकारान्, मलिनताश्च अपाकरोति भक्तं च सहिष्णुं करोति। भक्तिः उपासकोपास्ययोः द्वैतमपि समापयति।

## १. भूमिकाः

''कर्षति आकर्षति इति कृष्णः'' अर्थात् यः आकर्षति सर्वान् सः कृष्णः। किन्तु एतद् आकर्षणं बाह्यं न अपितु आध्यात्मिकमस्ति। श्रीविष्णोः पूर्णावतारः श्रीकृष्णः स्वीयया लीलया मानवान् निजस्वरूपे बध्नाति। तस्य भक्तौ न केवलं मर्त्याः अपितु त्रिदिवौकसाः अपि तल्लीनाः भवन्ति। अतः यदा यदा स अवतरति श्रीलक्ष्मीः, शेषनागादयः अपि पृथिव्यां यत्किमपि रूपं धृत्वा अवतरन्ति तथा च श्रीकृष्णस्य लीलानामास्वादं स्वीकुर्वन्ति। यमुनाऽपि श्रीकृष्णभक्तासु अन्यतमास्ति। श्रीकृष्णमेव सेवितुं सा पृथ्वीलोके नदीरूपेण विराजते। अतः यमुना जलप्रवाहमात्रं नास्ति, न च सा अन्यभौतिकनदीवत् वा अस्ति। अपितु तस्याः स्वरूपमाध्यात्मिकम्। सा श्रीकृष्णेन सह तस्य परमधाम्नि गोलोके प्रियसखीरूपेण निवसति। यदा श्रीकृष्णः धर्मसंस्थापनार्थं पृथिव्यामवतरति, तदा यमुनाऽपि एतस्मिन् पुण्यकर्मणि स्वीयां भूमिकां निर्वोढुं

समागच्छति। तथा च श्रीकृष्णस्य लीलायां सहयोगिनी भवति। श्रीकृष्णप्रेम्णि रञ्जितहृदया यमुना गोलोकनिवासिनी अस्ति। सैव पृथिव्यां नदीरूपेण कृष्णलीलासु सहायकं पात्रं भवति। यथा श्रीकृष्णः श्यामवर्णः, तथैव यमुनापि कृष्णवर्णा। तस्याः धरावतरणस्य अपि अनेकाः कथाः सन्ति, याः श्रीकृष्णसम्बद्धाः सन्ति। द्वापरयुगे चौत्रमासस्य शुक्लपक्षे षष्ठ्यां तिथौ कालिन्दगिरौ यमुनोत्रीक्षेत्रे तस्याः उद्गमः अभवत्।''[1] अपरस्यां कथायां.... गोलोके श्रीकृष्णेन राधायाः धरावतरणं प्रार्थितम्। किन्तु तया उक्तं यत्, ''तत्र वृन्दावनं, यमुना च, गोवर्धनं च न अस्ति।'' अतः भूतले सुखानुभूतिर्न भविष्यति। ततः श्रीकृष्णेन यमुना वृन्दावनं च गोवर्धनं च अवतीर्णानि। अतः ज्ञायते यत् राधायै यमुना अतीव रोचते। अतएव राधा ''यमुनातीरनिलया?''[2] तथा ''सूर्यपुत्र्यवगाहिनी''[3] इति कथ्यते। गर्गसंहितानुसारं, गोलोकात् निस्सृत्य यमुना कालिन्दशिखरं गता। तस्मात् पर्वतात् उत्पन्नत्वात् तस्या नाम ''कालिन्दी'' अभवत्। ऋग्वेदेऽपि यमुनायाः उल्लेखः प्राप्यते परं तस्याः यमुनायाः श्रीकृष्णभक्तयमुनया सार्धं सामञ्जस्यं नास्ति। पौराणिकयमुना सूर्यस्य पुत्री, यमस्य शनिमहाभागस्य च भगिनी मता। मार्कण्डेयपुराणानुसारं सा गङ्गायाः अपि भगिनी अस्ति। श्रीकृष्णस्य भक्तात्वेन यमुनायाः उल्लेखः पुराणसाहित्ये तथा च नैकेषु महाकाव्येषु विशेषतया प्राप्यते। एतद्वयं निम्नलिखितबिन्दुभिः अवगन्तुं शक्नुमः–

## २. श्रीकृष्णस्य जन्मसंबन्धिनी कथा–

कृष्णस्य भक्तारूपेण यमुना आध्यात्मिकभक्तेः प्रेम्णश्च श्रेष्ठं प्रतीकं वर्तते। तस्याः श्रीकृष्णेन सह यः सम्बन्धः विद्यते सः भक्तेभ्यः शुद्धं निःस्वार्थं च प्रेम भगवत् समर्पणस्य च महत्वं शिक्षयति। श्रीकृष्णस्य जीवनमध्ये यमुनायाः अति महत्ता वर्तते। तस्याः धरावतरणं तस्मिन्नेव द्वापरयुगे अभवत् यस्मिन् युगे श्रीकृष्णः मानवस्वरूपेण पृथिव्यामवतीर्णः। अतः कृष्णस्य जन्मकालादेव यमुनानदी तेन सह अस्ति।, भगवान् श्रीकृष्णः स्वीयां दिव्यलीलाम् आदौ

---

१. श्रीगर्गसंहिता, माधुर्यखण्ड, 'यमुनासहस्त्रनाम', पृ २४६

२. बृहन्नारदीयपुराणम्, ८२.१४६

३. तदेव, ८२.१६१

यमुनानद्याः अभिषेकं सम्पाद्य एव प्रारभत। श्रीकृष्णस्य जन्मानन्तरं तस्य पिता वसुदेवः मथुरातः सुरक्षितं स्थलं गोकुलं प्रति कृष्णं निनाय। तत्कर्तुमुद्यतो वसुदेवः यमुनानदीम् अतरत्। पौराणिककथासु वर्ण्यते यत् वृष्टेः तीव्रत्वेन यमुनानदी उच्छलिता। वसुदेवस्य शिरसि स्थितस्य बालकृष्णस्य चरणकमलस्पर्शं लब्धुं सा विकरालरूपं धारयामास। तस्य चरणस्पर्शेन सा पवित्रा जाता। उच्यते यत् श्रीकृष्णः यदा यमुनातटे वंशीं वादयति तदा यमुनानदी तस्य संगीतं श्रोतुमागच्छति। सा तेन वंशीध्वनिना विमोहिता सती स्वमार्गमपि परिवर्तयति।

## ३. यमुनायाः कृष्णं प्रति सौख्यभावः

यमुनाश्रीकृष्णयोः नित्यः सम्बन्धः अस्ति। बृहन्नारदीयपुराणे राधाकृष्णसहस्त्रनामसु कृष्णः यमुनाजलसिक्ताङ्गः, यमुनायाः सौख्यदायकः चोक्तः।[४] यमुना श्रीकृष्णस्य वामभागाद् उत्पन्ना अस्ति। यमुनायाः निवासस्थानं गोलोकमस्ति, यत्र श्रीकृष्णस्य आस्थानम् अस्ति। अतः सा गोलोकवासिनी, गोलोकतटिनी (गोलोकधाम्नः नदी) इत्यपि उच्यते। कामं श्रीकृष्णः मानवरूपेण पृथिवीस्थितं भवेद् अथवा स्वस्य नित्यस्वरूपेण गोलोकस्थितं भवेद् यमुनायाः तेन साकम् अभिन्नता सदैव अस्ति। गोलोके एषा अभिन्नता साक्षादेवास्ते तथा च पृथिव्यां स्वभक्त्या यमुना श्रीकृष्णे एकात्मभावेन निवसति।

## ४. कृष्णेन सह रासलीलाः

यमुना भारतस्य पवित्रनदीषु अन्यतमा अस्ति। तस्याः कृष्णेन सह पारमार्थिकः सम्बन्धः अस्ति। यमुनायाः कृष्णसम्बद्धप्रमुखकथासु रासलीलाकथायाः प्रामुख्यम् अस्ति। अस्मिन्नवसरे कृष्णः यमुनातटे स्वप्रियगोपीभिः सह नृत्यविहारं कृतवान्। यमुना अपि हर्षेण भक्त्या च पूरिता। अयं दिव्यसंयोगः कृष्णभक्तेः प्रतीकम् अस्ति। यमुना अस्मिन् पवित्रनृत्ये भागं गृहीतवती येन कृष्णेन सह तस्य शाश्वतसम्बन्धः परिलक्ष्यते। एवं पुराणेषु यमुनायाः स्वरूपवर्णनं मुख्यतः श्रीकृष्णभक्तारूपेणैव भवति।

---

४. तदेव, ८२... ७६ः यमुनाजलसिक्ताङ्गो यमुनासौख्यदायकः।

## ५. यम्याः यमुनारूपेण परिवर्तनम्—

ध्यातव्यं यत् यमुना आदिस्वरूपतया यमी अस्ति। यमी यमुनारूपं धृतवती। पुराणेषु यम्याः यमुनारूपेण धरावतरणस्य तथा श्रीकृष्णस्य पटराज्ञीपदप्रापणस्य कथा वर्णिता अस्ति। अस्य पौराणिककथायाः अनेकानि संस्करणानि सन्ति। एकस्यां कथायाम् उक्तं यत् यम्याः वर्णः श्यामः आसीत्। अतः तस्याः विवाहः न सम्पद्यते स्म। सा दुःखिता भूत्वा भगवन्तं विष्णुं प्रति गत्वा स्वीयां व्यथां निवेदितवती। तदा भगवान् विष्णुः अवदत्— ''यदा अहं कृष्णरूपेण अवतरिष्यामि, तदा अहं स्वयमेव त्वया सह विवाहं करिष्ये'' इति। एतावद्दीर्घकालपर्यन्तं प्रतीक्षा कर्तव्या इति श्रुत्वा यमी अतीव दुःखिता तथा उद्विग्ना अभवत्। ततः सा हिमालयं गत्वा तत्रैव विराजिता। तस्मात् स्थलात् यमी श्यामवर्णा—श्रीयमुनारूपेण पृथिव्याम् अवतरिता।

## ६. यमुना श्रीकृष्णस्य पटराज्ञीः

गर्गसंहितायां उल्लिखितं यत् यमुना श्रीकृष्णं पतिरूपेण वाञ्छति स्म। अतः सा परमदिव्यं देहं धृत्वा खाण्डववने तपः कृतवती। यमुनायाः पिता सूर्यदेवः जलस्य अन्तः एकं दिव्यगृहम् निर्मितवान् यत्र अद्यापि सा निवसति।[५] यमुनायाः यमुनानद्यां निवासवर्णनं श्रीमद्भागवतपुराणे अपि कृतम् अस्ति।[६] श्रीमद्भागवतपुराणस्य दशमस्कन्धे (५८.१६–२३) यमुनायाः श्रीकृष्णेन सह विवाहस्य कथा विद्यते। यमुनया कालिन्दीरूपेण श्रीकृष्णं प्रति विवाहेच्छा प्रकटिता। ततः श्रीकृष्णः शुभे मुहूर्ते कालिन्द्याः पाणिग्रहणमकरोत्।[७] तात्पर्यं

---

५. गर्गसंहिता, वृन्दावन खण्ड, ३. १५–१६ः
पित्रा विनिर्मिते गेहे जलेऽद्यापि समाश्रिता।
तो वेगेन कालिन्दी प्राप्ताऽभूद्व्रजमण्डले।
वृन्दावनसमीपे च मथुरानिकटे शुभे।
श्रीमहावनपार्श्वे च सैकते रमणस्थले।।
कालिन्दीति समाख्यात वसामि यमुनाजले।

६. श्रीमद्भागवत महापुराण, दशम स्कन्ध, ५८.२२ः निर्मिते भवने पित्रा यावदच्युतदर्शनम्।।

७. तदेव, दशमस्कन्धः, ५८. २६ः अथोपयेमे कालिन्दीं सुपुण्यर्तृक्ष ऊर्जिते। वितन्वन् परमानन्दं स्वानां परममंगलम्।।

यत् यमुनायाः जलीयस्वरूपं तु भौतिकं अस्ति, परम् आधिदैविकस्वरूपतया सा श्रीकृष्णस्य राज्ञी अस्ति। अतः सा श्रीकृष्णस्य पट्टराज्ञी इति कथ्यते। यमुनासहस्त्रनामसु तस्याः 'आराध्या', 'श्रीकृष्णवरमिच्छति' 'स्वकीया' (श्रीकृष्णस्य विवाहिता पत्नी), 'अधीरा' (भगवद्दर्शनाय अधीरा), 'गोविन्दहृतमानसा' (श्रीकृष्णस्य चित्तं चोरयन्ती), 'सखी' (राधायाः सखी), 'वेणुनादिनी' (वेणुनादं कुर्वती), 'गोपगोपीश्वरी' (गोपगोपिकानां आराध्या), 'कृष्णप्राणाधिका', 'राधा' (श्रीकृष्णस्य आराध्यस्वरूपा) इत्यादिभिः नामभिः कीर्त्यते।

## ७. विरहेऽपि यमुनाश्रीकृष्णयोः शाश्वतसम्बन्धः

भक्तेभ्यः सर्वेयं सृष्टिः प्रभुमया भवति। विरहकालेऽपि यमुनायै श्रीकृष्णस्य साहचर्यस्य अनुभवः सततं भवति। सा सदा मुदिता भवति। श्रीमद्भागवतमहापुराणेऽपि एषा घटना वर्णिता अस्ति। एकदा श्रीकृष्णस्य षोडशसहस्रं राज्ञ्यः तस्य विरहात् व्याकुलाः अभवन्। किन्तु ताः राज्ञ्यः श्रीकृष्णस्य चतुर्थपटराज्ञीं कालिन्दीं अर्थात् यमुनां सदा आनन्दमयीमेव दृष्टवत्यः। तस्मात् कदाचित् सर्वाः राज्ञ्यः यमुनां उपसृत्य तस्याः विरहकालेऽपि आनन्दस्य कारणं पृष्टवत्यः। ततः यमुना प्रसन्नतया उवाच श्रीकृष्णस्य आत्मनि श्रीराधा वसति। अतः अहं सदैव दासीवद् भगवान् श्रीकृष्णस्य आत्मरूपिणी श्रीराधां सेवमाना तिष्ठामि। तस्याः सेवायाः प्रभावेन विरहः मां न स्पृशति।[८] एकस्मिन् आख्याने उक्तं यत् दुर्वासामुनिना गोपीभ्यः 'कृष्णपञ्चाङ्गं' प्रदत्तं, यस्मिन् यमुनायाः नामपाठः आसीत्। गोपीभिः तत्पाठं कृत्वा श्रीपतिः वररूपेण लब्धः। अतः यमुनायाः पञ्चाङ्गं समस्तसिद्धिदं तथा श्रीकृष्णस्य सारूप्यप्राप्तिदं भवति। यमुनायाः आधिदैविकं आध्यात्मिकं च स्वरूपं केवलं तदैव अनुभवितुं शक्यते यदा भक्ताः गोलोके तिष्ठन्ति। किन्तु उभाभ्यां स्वरूपाभ्यां साररूपतया अस्य सांसारिकक्षेत्रे यमुना नदीरूपेण प्रवहति। एवं च यमुना भक्तेः अनुपमप्रतिमा अस्ति। सा श्रीकृष्णेन

---

८. तदेव, द्वितीयखण्डम्, श्रीमद्भागवतमाहात्म्यः आत्मारामस्य कृष्णस्य ध्रुवमात्मास्ति राधिका।

तस्या दास्यप्रभावेण विरहोऽस्मान् न संस्पृशेत्।।

निर्दिश्यमानानां त्रयाणां मार्गाणां (ज्ञानमार्गः, कर्ममार्गः भक्तिमार्गश्च) मध्ये भक्तिमार्गं वृतवती। एषः मार्गः प्रेमाधारितः वर्तते।[६]

## ८. यमुनायाः पवित्रता शुद्धता च

स्वस्याः आध्यात्मिकशुद्धताभिः प्रदत्त– आशीर्वादैश्च यमुना ख्यातिं लभते। अनेके भक्ताः यमुनायां अवगाहन्ते। तेषां मतं यत् यमुनास्नानं तान् उपकृष्णं नयति तथा च तेषां शुद्धयति। यमुनादेवी भक्तेभ्यः मोक्षं तथा श्रीकृष्णसाक्षात्कारं सम्पादयति। यमुना अपि गङ्गासमं पापात् विमोचयति जनान्। गङ्गा यमुनां प्रणम्य स्तौति– 'हे कृष्णे! सम्पूर्णं ब्रह्माण्डं पुनासि त्वम् अत एव धन्या। श्रीकृष्णस्य वामभागात् तव प्रादुर्भावः जातः। त्वं परमानन्दस्वरूपिणी पूर्णा चास्ति। समस्तलोकैः वन्दनीया च। 'हे कृष्णे! अहं त्वां प्रणमामि। त्वं सर्वतीर्थेभ्यः देवताभ्यः च दुर्लभा। गोलोकेऽपि तव दर्शनं दुर्लभम् अस्ति।' आदिवराहपुराणे उक्तं– यमुनास्नानेन जन्मान्तरेषु कृतानि पापानि क्षीयन्ते। यः जनः यमुनां स्मरति सः अपि पवित्रः भवति।' कूर्मपुराणे च उक्तं यः गङ्गायाम् अथवा यमुनायां प्राणान् त्यजति सः अभीष्टकामान् प्राप्नोति।' यमुनाजलस्य तथा तस्यामवगाहनस्य महत्त्वं पद्मपुराणस्य स्वर्गखण्डस्य २६ अध्याये विस्तृतरूपेण वर्णितम् अस्ति।' एवं यमुना भक्तानां कृते मोक्षप्रदायिनी श्रीकृष्णप्रेमदायिनी च अस्ति।

## ९. परब्रह्मस्वरूपिण्याः यमुनायाः श्रीकृष्णेन तादात्म्यम्ः

श्रीकृष्णयमुनयोः तादात्म्यम् अस्ति अतः गर्गसंहितायां यमुनासहस्र नामसु यमुना परब्रह्म तथा परधाम इति वर्णिता। अतः पौराणिकं स्वरूपं यमुना केवलं नदी न भवति, अपितु शक्तिस्वरूपा सृष्टेः उत्पत्तेः च संचालनस्य कारणं च भवति। सा परमानन्दमयी, पूर्णब्रह्मप्रिया (पूर्णब्रह्म श्रीकृष्णस्य प्रिया), परा (पराशक्तिस्वरूपा), ब्राह्मी (ब्रह्मशक्तिस्वरूपा), परब्रह्म, प्रकृतिः परा (पराप्रकृतिस्वरूपा), प्रचेतना (प्रकृष्टचेतनास्वरूपा), चतुर्थी (जाग्रत्–स्वप्न सुषुप्तेः अतीता तुरीयावस्था), चतुरक्षरा (प्रणवस्य चत्वारि अक्षराणि), अध्यात्मम् (अध्यात्मस्वरूपा), अधिदैवम् (आधिदैविकस्वरूपा), द्विधा (प्रकृति–

---

६. तदेव, द्वितीयखण्डम्, ११.२०.६: योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म च भक्तिश्च नान्योपयोस्ति कुत्रचित्।।

पुरुषस्वरूपेण), त्रिधा (क्षर–अक्षर–पुरुषोत्तमरूपा) क्रियाशक्तिः, ज्ञानशक्तिः इत्यादिरूपेण स्तूयते। तात्पर्यम् यत् यमुना श्रीकृष्णस्य अन्तरंगा शक्तिः अस्ति।[१०] अतः परब्रह्मरूपेण तस्याः उपासना क्रियते चेत् श्रीकृष्ण एव उपास्यते अन्यरीत्या। यथा शिवस्य शक्तेः उपासना शिवस्य एव उपासना इति कथ्यते। एषा एव शक्तिः जगज्जननी इति उच्यते। गर्गसंहितायाः माधुर्यखण्डे श्रीयमुनाकवचं, श्रीयमुनास्तोत्रं, तथा श्रीयमुनासहस्रनाम इति त्रिविधाः पाठाः सन्ति येषु श्रीयमुनायाः सर्वाणि स्वरूपाणि वर्णितानि। श्रीगर्गसंहितायाः अष्टादश अध्याये 'यमुनासहस्रनाम' इत्यत्र यमुनायाः सहस्रनामानि उल्लिखितानि। श्रीयमुनास्तोत्रस्य पाठेन सर्वसिद्धयः लभ्यन्ते। धर्मार्थकाममोक्षरूपात्मकचतुर्विधपुरुषार्थफलप्रदायकः अस्ति।[११]

## १०. निष्कर्षः

श्रीकृष्णे यमुनायाः रतिः केवलं भौतिकं प्रतीकात्मकं वा नास्ति प्रत्युत एषा निःस्वार्थभक्तेः वास्तविकं निदर्शनं या सर्वैरपि भक्तजनैः सततं काम्यते। सा समर्पणस्य प्रेम्णश्च आदर्शरूपं ज्ञापयति। इत्युक्तदिशा सिद्ध्यते यत् भक्तिः बाह्यं न प्रत्युत किञ्चन आध्यात्मिकं तत्त्वमस्ति। वस्तुतस्तु भक्त्याः नित्यं प्रवहमाना प्रेमरूपिणी धारा एव यमुना। अतः तस्याः भक्तिः व्यवधानरहिता, निर्बाधा, अनन्तकालीना च भवति। विरहभयः तत्र नास्ति। यमुना श्रीकृष्णस्य अनन्यभक्ता अस्ति, अतः सदैव तं भजति। अतएव सा विरहात् कदापि व्याकुला न भवति। एवं यमुना भक्तस्य सर्वोत्कृष्टम् उदाहरणं अस्ति।

***

१०. तदेव, माधुर्यखण्डम्, १८.७८, ७६, ८०, ८२: परं धाम परं ब्रह्म पौरुषा प्रकृतिः परा।
तटस्था गुणभूर्गीता गुणागुणमयी गुणा।
चिद्घना सदसन्माला दृष्टिर्दृश्या गुणाकरी।
महत्तत्वमहंकारो मनो बुद्धिः प्रचेतना।
चेतो वृत्तिः स्वांतरात्मा चतुर्थी चतुरक्षरा।
त्रिधाधिभूतमध्यात्ममधिदैवमाधिस्थितम्।
ज्ञानशक्तिः क्रियाशक्तिः सर्वदेवताधिदेवता।

११. गर्गसंहिता, सप्तदशोऽवां अध्याय, यमुनास्तोत्रम्, २ः सर्वसिद्धिकरं भूमौ चातुर्वर्ग्यफलप्रदम्।

# विद्योत्तमाकालिदासीयं महाकाव्ये वर्णविन्यासवक्रता

**पबित्रदासः**

*गवेषकः, संस्कृतविभागः*

*सिधो–कानहो–बिरसा विश्वविद्यालयः, पुरुलिया, पश्चिमबङ्गप्रदेशः*

**शोधपत्रसारः–**

काव्यशास्त्रे वैचित्र्यपूर्णकथनं केवलं सौन्दर्यवर्धकमात्रं न भवति, अपितु तेन वक्तुः बौद्धिकविलासः प्रकाशते तथा श्रोतृणां चित्ते विशेषोऽनुभाव उत्पद्यते। अतः संस्कृतकाव्यशास्त्रीयाचार्यैः अस्य महत्त्वं स्वीक्रयते। विशेषतः आचार्यकुन्तकः वक्रोक्तिसिद्धान्तेन काव्यस्य मौलिकं तत्त्वं वक्रोक्तिमिति प्रतिपादितवान्। सः वक्रोक्तेः व्यापकस्वरूपं प्रतिपाद्य तस्य षड्विधानि भेदान् उल्लिखितवान्–

१. वर्णविन्यासवक्रता

२. पदपूर्वार्धवक्रता

३. पदपरार्धवक्रता

४. वाक्यवक्रता (वस्तुवक्रता)

५. प्रकरणवक्रता

६. प्रबन्धवक्रता

एतेषु वर्णविन्यासवक्रता विशेषरूपेण सौन्दर्यवर्धिनी विद्यते। आचार्य रामकिशोर मिश्रेण प्रणीत संस्कृताधुनिक "विद्योत्तमाकालिदासीयम्" इत्यस्मिन् महाकाव्ये वर्णविन्यासवक्रता विशेषतया प्रकाशते। प्रस्तुतशोधपत्रे विद्योत्तमाकालिदासीयम् महाकाव्ये वर्णविन्यासवक्रतायाः स्वरूपं प्रतिपाद्यते।

**प्रस्तावना–**

संस्कृतकाव्यशास्त्रस्य आलोचनाक्षेत्रे समयानुसारं विविधाः सिद्धान्ताः विकसिताः। काव्यशास्त्राणां अनुशीलनेन ज्ञायते यत् काव्यस्य समस्ततत्त्वानां

निदर्शनें यथा रसः, अलङ्कारः, रीति, ध्वनि, वक्रोक्ति, औचित्यञ्च– विभिन्नाचार्यैः निजस्वमेधानुसारं स्वस्वसिद्धान्तेषु सम्यक् प्रकारेण प्रतिपादितम्। भरतादिभ्यः प्रारभ्य एषा परम्परा अद्यावधि निरन्तरं प्रवहति।

वास्तवे काव्यस्य आत्मतत्त्वं प्राणतत्त्वं च इत्यत्र आचार्याणां परस्परं वैमत्यं दृश्यते। अस्यैव आत्मप्राणस्वरूपान्वेषणार्थं काव्यशास्त्रे षड्विधानि सम्प्रदायानि समुत्पन्नानि– रससिद्धान्तः, अलङ्कारसिद्धान्तः, रीतिसिद्धान्तः, ध्वनिसिद्धान्तः, वक्रोक्तिसिद्धान्तः, औचित्यसिद्धान्तश्च। एतेषु वक्रोक्तिसिद्धान्तस्यापि विशेषं महत्त्वं विद्यते। समस्ताचार्यैः वक्रोक्तिः भिन्नभिन्नरूपेणविचारिता, किन्तु काव्यस्य जीवनरूपेण सर्वप्रथमं आचार्यः कुन्तक एव वक्रोक्तिं व्यवस्थितमौलिकसिद्धान्तरूपेण प्रतिष्ठापितवान्। तस्य मतानुसारं वक्रोक्तिर्न केवलं अलङ्कारमात्रं, अपि तु व्यापकस्वरूपवती विद्यते।

वास्तवे वक्रोक्तेः निदर्शनं भासकालिदासादीनां कवीनां काव्येषु सुस्पष्टं दृश्यते। संस्कृतकाव्यसाहित्ये महाकविः कालिदासः सम्बद्धं बहूनि महाकाव्यानि दृश्यन्ते, किन्तु आधुनिककविसाहित्यिकेन रामकिशोरमिश्रेण विरचितं ''विद्योत्तमाकालिदासीयं'' महाकाव्यमेकं विशेषस्थानमधिगच्छति। एतत् महाकाव्यं शृङ्गाररसाश्रितं एकविंशति सर्गेषु विन्यस्तम्। महाकाव्यस्य विविधस्थलेषु वक्रोक्तिः स्पष्टं परिलक्षितम्। अत्र विप्रलम्भशृङ्गारस्य योजनया माऽहाकाव्यं सुखान्तं कृतम्। तेषु उल्लिखिता वर्णविन्यासवक्रता इत्यस्या विशेषचिन्तनं अस्य शोधप्रबन्धस्य प्रमुखविषयः।

## कुन्तकप्रणीतस्य वक्रोक्तिसिद्धान्तस्य स्वरूपम्–

कुन्तकस्य मतानुसारं वक्रोक्तेः अर्थः अस्ति– कविकर्मकौशलजन्यं वैचित्र्यपूर्णं कथनम्, यत् ''वैदग्ध्य–भङ्गी–भणिति'' इत्यनेन निर्दिश्यते।

कुन्तकः वक्रोक्तिं काव्यस्य आत्मत्वेन प्रतिष्ठापितवान्, यया काव्ये चमत्कारः सौन्दर्यं च उत्पन्नं भवति। वक्रोक्तेः प्रयोगेणैव काव्यं सजीवम् एवं रमणीयं भवति।

वक्रोक्तिः कविकौशलस्य प्रतिभायाश्च फलमस्ति। कविः शब्दार्थयोः अभिनवप्रस्तुत्या विशिष्टतां प्रदर्शयति, यत् काव्यस्य सौन्दर्यं वर्धयति।

वैदग्ध्य–भङ्गी–भणितिः

''वैदग्ध्यं'' = कुशलता

''भङ्गी'' = चमत्कारः वा चारुता

''भणिति'' = कथनप्रकारः

अयं समन्वयः वक्रोक्तेः मूलतत्त्वं निरूपयति।

वक्रोक्तिसिद्धान्तः केवलं एका काव्यशैली न, अपितु समस्तकाव्यसिद्धान्तानाम् समाहारः अस्ति। अस्मिन् निम्नलिखितविशेषाः समाविष्टाः–

वर्णचमत्कारः, शब्दसौन्दर्यम्, विषयवस्तुनः रमणीयता, अप्रस्तुतविधानम्, प्रबन्धकल्पना

कुन्तकः अलङ्कारस्य अलङ्कार्यस्य च वाचक–वाच्यभावसंबन्धं प्रतिष्ठापितवान्। वक्रोक्तिः अलङ्काररूपा अस्ति, यया काव्यं विशिष्टं भवति।

**वक्रोक्ति स्वरूपम्–**

कुन्तकस्य अनुसारं मिथ्यातर्कयुक्तौ द्वौ प्रकारौ स्वच्छन्दप्रसङ्गौ विद्येते। प्रथमः सः यत्र कविः त्रयाणां लोकानां पदार्थान् तेषां वास्तविकस्वरूपेण वर्णयति, यथा– ''दैवरक्ता हि किञ्शुकाः'' इत्युक्ते पलाशस्य पुष्पाणि रक्तवर्णानि भवन्ति। एवं प्रकारस्य आचार्यान् कुन्तकः तत्त्ववादिनः अर्थात् स्वभावोक्तिवादिनः इति निरूपयति।

द्वितीयः तु सः यत्र कविः स्वतन्त्रतया यथारुचिं स्वबुद्ध्याः काव्ये पदार्थानां स्वरूपं प्रतिपादयति, यथा मनुष्याणां त्रयः नेत्राणि, चत्वारः कर्णाः इत्यादि।

एतद् ''स्वच्छन्दतावादः'' इति कथयितुं शक्यते। एतयोः उभयोः मार्गयोः समन्वयात्मकः मार्गः, यः साहित्य–अर्थ–सुधारूपी अमृतसिन्धुः अस्ति, तस्य प्रतिपादनं कुन्तकेन वक्रोक्तिरूपेण कृतम्।

**''उभावेतावलङ्कार्यो तयोः पुनरलङ्कृतिः।**

**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।।''**[1]

---

१. वक्रोक्तिजीवितम्. १.१०

अस्य श्लोकस्य अर्थः— एते उभौ शब्दः च अर्थः च अलङ्कार्यौ स्तः। पुनः, एतयोः अलङ्कारे तिवैदग्ध्य—भङ्गी—भणितिरूपा वक्रोक्तिः एव इति उच्यते। एतौ शब्द—अर्थौ अलङ्करणीयौ स्तः, तथा च तौ कस्यचित् अतिशय— शोभायुक्तस्य अलङ्करणस्य सहितौ योजनीयौ। यदा शब्दः च अर्थः च पृथक्—पृथक् अवस्थितौ सन्तौ अपि कस्यचित् भिन्नस्य अलङ्करणस्य (यस्य स्वरूपं वक्रता—विचित्रता—युक्तं कथनं भवति) योगेन संयुज्येते, तदा तत् कथनमेव अतिशय—शोभायाः हेतुं भवति। वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैव अभिधा। कथा वैदग्ध्यभङ्गीभणितिः? वैदग्ध्यं नाम विदग्धभावः, कविकर्मणः कौशलं, तस्य भङ्गी विच्छित्तिः, तया भणितिः। अत्र वैदग्ध्यस्य अर्थः विदग्धभावः, यः च कविकर्मणः कौशलं भवति। तस्य भङ्गी नाम विच्छित्तिः, तथा भणितिः। अतः विचित्रैवाभिधा वक्रोक्तिरित्युच्यते।[२] अन्यथा उक्तं चेत्— विदग्धभाव—सम्पन्नस्य कवेः कर्मणः कौशलात् या अभिधा अभिधीयते, सा एव वक्रोक्तिः इति कथ्यते।

**वक्रोक्तेः प्रकाराः—**

कुन्तकः वक्रोक्तेः भेदान् प्रभेदांश्च विस्तृतं वैज्ञानिकं च प्रकारेण विवेचितवान्। सः प्रतिपादितवान् यत् काव्यस्य सर्वेऽपि तत्त्वाः वक्रोक्तेः अन्तर्भावं प्राप्नुवन्ति। कुन्तकस्य अनुसारं वक्रतायाः मुख्यः षड्भेदाः विद्यन्ते—

**"कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट्।**

**प्रत्येक बहवो भेदास्तेषां विच्छित्तिशोभिनः।।"[३]**

अस्य श्लोकस्य अर्थः— कविव्यापारस्य वक्रता षड् प्रकाराः सम्भवन्ति। एतेषां प्रत्येकस्य भेदस्य विच्छित्तिशोभासम्पन्नत्वात् अन्ये अपि बहवः उपभेदाः सम्भवन्ति।

**वक्रोक्तेः षड्भेदाः—**

१. वर्णविन्यासवक्रता (अक्षरसंयोजनस्य विचित्रता)

२. पदपूर्वार्द्धवक्रता (पदस्य पूर्वभागे वक्रता)

---

२. वक्रोक्तिजीवितम्. १.१० (वृत्ति—भाग)

३. वक्रोक्तिजीवितम्. १.१८

३. प्रत्ययवक्रता (प्रत्ययस्य प्रयोगे वक्रता)

४. वाक्यवक्रता (वाक्यरचनायां वक्रता)

५. प्रकरणवक्रता (प्रकरणविन्यासे वक्रता)

६. प्रबन्धवक्रता (समग्रप्रबन्धे वक्रता)

**वर्णविन्यासवक्रता–**

''वर्णानां विन्यासः अर्थात् संयोजनं वर्णविन्यासः इत्युच्यते।''[४] वक्रोक्तिजीवितस्य कर्ता कुन्तकः अस्य अर्थं विशेषरूपेण व्याख्यातवान्।[५] तस्य अनुसारं, वर्णानां विशेषप्रकारेण संयोजनं, यत्र वर्णानां विशिष्टनिबन्धनं भवति, सा वर्णविन्यासवक्रता इति कथ्यते।

यत्र वर्णानां विन्यासः सामान्यप्रस्थानात् भिन्नः भवति, तथा च सः शब्दशोभातिशययुक्तः सहृदयजनानाम् आह्लादजनकः भवति, तदा तं विन्यासं ''वर्णविन्यासवक्रता'' इति वदन्ति। सामान्यतः यः वर्णानां सामान्यः विन्यासः अस्ति, ततः भिन्नः यः विशेषविन्यासः अस्ति, तस्य कारणात् शब्दस्य शोभा अतीव वर्धते। एषः एव ''वर्णविन्यासवक्रता'' इति कथ्यते। उदाहरणम्–

**''प्रथममरुणच्छायस्तावत् ततः कनकप्रभः।**
**तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।।**
**प्रसरति ततो ध्यातक्षोदक्षमः क्षणदामुखे।**
**सरसविसिनीकन्दच्छेदच्छविभृंगलाञ्छनः।।''**[६]

अत्र 'तावत् ततः कनकप्रभः' इत्यत्र तकारस्य तथा ककारस्य, 'विरहोत्ताम्यतन्वी' इत्यत्र तकारस्य, 'कपोलतल' इत्यत्र लकारस्य, 'ध्वान्तक्षोदक्षमः क्षणदामुखे' इत्यत्र क्ष संयुक्ताक्षरस्य तथा दकारस्य, 'सरसविसिनी' इत्यत्र सकारस्य, 'कन्दच्छेदच्छविः' इत्यत्र च्छ संयुक्ताक्षरस्य

---

४. वक्रोक्तिजीवितम् १.१६ वृत्ति–भाग (वर्णानां विन्यासो वर्णविन्यासः)

५. वक्रोक्तिजीवितम्. १.१० वृत्ति – भाग (अक्षराणां विशिष्टन्यसनम्)

६. वक्रोक्तिजीवितम्. १.४१. उदाहरणांशः

पुनरावृत्तिः दृश्यते, येन पद्ये अपूर्वं सौन्दर्यं प्रकटते। उक्तेऽस्मिन् पद्ये कविना वर्णविन्यासवक्रतया निर्मितानां शब्दानां विशिष्टा शोभा सुस्पष्टं प्रकटिता। एषा एव वर्णविन्यासवक्रता अन्यैः आचार्यैः अनुप्रासालङ्कार इति कथ्यते। आचार्यकुन्तकः अपि एतत् स्वयमेव स्पष्टयति– 'एतदेव वर्णविन्यासवक्रत्वं चिरन्तनेषु अनुप्रास इति प्रसिद्धम्।'[७]

विद्योत्तमाकालिदासीयम् महाकाव्ये आचार्य रामकिशोर मिश्रस्य मतानुसारं वर्णविन्यसवक्रतायाः षड्विधानां विस्तृतं विवेचनं निम्नप्रकारेण विद्यते–

**१. एकस्य वर्णस्य स्वल्पान्तरतः पुनरावृत्तिः–**

**चित्तं प्रसन्नं राज्ञः समासीद् यत्तस्य पुत्री पतिसङ्गताऽऽसीत्।**
**या स्वं पतिं विद्वांसं समैच्छत् लब्धस्तया मूर्ख इदं न ज्ञातम्।।**[८]

**श्लोकोद्धृत विश्लेषणैव–**

रेफ (र) वर्णस्य आवृत्तिः– राज्ञः, पुत्री, पतिं, मूर्ख इत्यादिषु।

सकारस्य पुनरावृत्तिः – समासीद्, संगता, समैच्छत् इत्यादिषु।

नकारस्य पुनरावृत्तिः – चित्तं, प्रसन्नं, पुत्री, पतिं, ज्ञातम् इत्यादिषु।

तथैव पकार–तकारयोः आवृत्तिः– पतिसङ्गता, पतिं, पुत्री, प्रसन्नं इत्यादिषु।

अस्मिन् श्लोके रेफ, सकार, नकार, पकार, तकार इत्येषां वर्णानां पुनरावृत्तिः अस्ति। अतः अत्र वर्णविन्यासवक्रता अस्ति। अन्यैः आचार्यैः अनुप्रासलंकारः इति मन्यते। अतः अयं श्लोकः वर्णविन्यासवक्रतया शोभायुक्तः अस्ति।

**ध्यानेन वाक्यं शृणु राजपुत्रि!**
**स कालिदासः कविरस्ति मान्यः।**

---

७. वक्रोक्तिजीवितम्. १.४६ वृत्ति – भाग

८. विद्योत्तमाकालिदासीयम्, १/१

**चारूणि काव्यानि भवन्ति तस्य,**

**ख्यातिश्च जाता कविगोष्ठिकासु।।**[९]

वर्णविन्यासवक्रता–न्यायः एवं निर्णयः

अस्मिन् श्लोके 'क', 'व', 'य', 'न' इत्येषां वर्णानां स्वल्पान्तरतः पुनरावृत्तिः दृश्यते।

'क' वर्णस्य पुनरावृत्तिः– कालिदासः, कविरस्ति, काव्यानि, कविगोष्ठिकासु।

'व' वर्णस्य पुनरावृत्तिः– वाक्यं, कविरस्ति, काव्यानि।

'य' वर्णस्य पुनरावृत्तिः– ध्यानेन, वाक्यं, काव्यानि, ख्यातिः।

'न' वर्णस्य पुनरावृत्तिः– ध्यानेन, भवन्ति, मान्यः, जना।

अत्र विशेषतया 'क' वर्णस्य स्वल्पान्तरतः पुनरावृत्तिः अस्ति, यत् 'कालिदासः, कविरस्ति, काव्यानि, कविगोष्ठिकासु' इत्यत्र स्पष्टं दृश्यते।अस्मिन् श्लोके वर्णानां विशेषः संयोगः तथा पुनरावृत्तिः कवित्वशोभां वर्धयति। अतः अत्र ''एकस्य वर्णस्य स्वल्पान्तरतः पुनरावृत्तिः'' रूपा वर्णविन्यासवक्रता दृश्यते।

**२. द्वयोः वर्णयोः स्वल्पान्तरावृत्तिः–**

**जय जय भर्तस्त्वं जनहितकर्ता धर्म धर्ता प्रजादुःखहर्ता।**

**तथापि राजन्! तावककुटुम्बिनो वयं हि सर्वे धनिनोऽपि दुःखिनः।।**[१०]

अस्मिन् श्लोके ''धर्ता'' इत्यत्र ''ध'' तथा ''र्ता'', एवं ''हर्ता'' इत्यत्र अपि ''र्ता'' इत्यस्य पुनरावृत्तिः दृश्यते। एषा वर्णानां पुनरावृत्तिरूपा द्वितीयप्रकारा वर्णविन्यासवक्रता।

तथा ''धर्ता'', ''हर्ता'' इत्यत्र अन्तिमाक्षरस्य साम्यं दृश्यते, यतश्च ''र्ता'' इत्यस्य पुनरावृत्तिः अस्ति। एवं ''धर्ता–हर्ता'' इत्यत्र वर्णसाम्यं तथा आवृत्तिरपि लक्ष्यते। अतः अस्मिन् पद्ये वर्णविन्यासवक्रतानां द्वितीयप्रकारस्य रूपं स्पष्टं दृश्यते।

---

९. विद्योत्तमाकालिदासीयम्, १४/२

१०. विद्योत्तमाकालिदासीयम, ११/१८

**अधुना द्वयोर्वियोगो न स्यात्, काव्यचर्चया द्वौ सम्मिलताम् ।**
**कृपया तदादिशन्तु भवन्तो येन काव्यचर्चा प्रारभताम्।।**[११]

अत्र ''काव्यचर्चया'' तथा ''काव्यचर्चा'' इत्यत्र ''काव्यचर्चा'' इत्यस्य पुनरावृत्तिः दृश्यते। एवं ''द्वयोः—द्वौ'' इत्यत्र अपि ''द्व'' इत्यस्य पुनरावृत्तिः अस्ति।

तथा ''प्रारभताम्—सम्मिलताम्'' इत्यत्र ''ताम्'' इत्यस्य ध्वनिसाम्यं दृश्यते, यतश्च एतेषु पदयोः अन्तिमाक्षरं समानं वर्तते। अतः अस्मिन् पद्ये वर्णानां पुनरावृत्तिरूपा द्वितीयप्रकारा वर्णविन्यासवक्रता स्पष्टं दृश्यते।

**३. अनेकयोः वर्णयोः स्वल्पान्तरावृत्तिः—**

**छन्दसि छन्दसि तथा पादा एकैकाक्षरेणैधन्ते।**
**तथैव निशि तस्य तौ चरणौ पथि विपिनं प्रत्यवर्धेताम्।।**[१२]

अत्र परिलक्ष्यते—

१. ''छन्दसि छन्दसि'' इत्यत्र ''छन्दसि'' पदस्य पुनरावृत्तिः दृश्यते।

२. ''पदा'' तथा ''चरणौ'' इत्यत्र समानार्थकशब्दयोः आवृत्तिः अस्ति।

३. ''तथैव'' इत्यस्य प्रयोगः पूर्वपदस्य भावं पुनः दर्शयति।

४. ''प्रत्यवर्धेताम्'' इत्यत्र पूर्वं दर्शितस्य भावस्य पुनरुक्तिः अस्ति।

अस्मिन् श्लोके ''छन्दसि छन्दसि'' इत्यादिषु वर्णानां पुनरावृत्तिः अस्ति। विशेषतः, अनेक वर्णाः स्वल्पान्तर सहित पुनः पुनः आगच्छन्ति, यथा ''छन्दसि छन्दसि'' एवं ''पदा—चरणौ'' इत्यादयः। अतः अत्र अनेकवर्षाणां स्वल्पान्तरसहित पुनरावृत्तिरूपा तृतीयप्रकारा वर्णविन्यासवक्रता स्पष्टं दृश्यते।

**भारतस्य प्रतिकणं त्वावयोः रूपं निहितमस्ति तत्।**
**सांसारिकविषयस्य जीवितं स्वरूपमुच्यते हि यत्।।**

---

११. विद्योत्तमाकालिदासीयम्, १६/४

१२. विद्योत्तमाकालिदासीयम्, १०/१

**तदहं पत्नीषु स्वां लोके लोके पतिषु त्वाम्।**
**इतो मे राम! विलोकय माम्।।**[१३]

अत्र–

१. ''लोके लोके'' अत्र ''लोके'' इत्यस्य पुनरावृत्तिः अस्ति।

२. ''पत्नीषु स्वां'' तथा ''पतिषु त्वाम्''– एतेषु समानाक्षराणां तथा ध्वनिसाम्ययुक्तानां पदानां प्रयोगः दृश्यते।

३. ''विलोकय माम्''– अत्र ''लोक'' धातोः प्रयोगः पुनः दृष्टव्यः अस्ति, यः पूर्वं ''लोके लोके'' इत्यत्र अपि दृष्टः।

४. ''स्वरूपमुच्यते हि यत्''– अत्र ''स्वरूपम्'' तथा ''रूपं'' इत्ययोः ध्वनिसाम्यं दृश्यते।

अत्र ''लोके लोके'', ''रूपं–स्वरूपम्'', ''पत्नीषु–पतिषु'' इत्यादिषु वर्णानां स्वल्पान्तरयुक्ता पुनरावृत्तिः अस्ति। एषा अनेकवर्णानां स्वल्पान्तरसहित पुनरावृत्तिरूपा तृतीयप्रकारा वर्णविन्यासवक्रता भवति।

**४. स्पर्शवर्णानां वर्गान्तवर्णैः सह आवृत्तिः–**

**तरुणेन तरुणी वृद्धेन वृद्धा, प्रौढेन प्रौढा बालेन बाला।**
**वयस्कपत्या पत्नी सुशोभते, सुते! प्रतिज्ञा विहिता त्वया कथम्?।।**[१४]

संस्कृतवाङ्मये वर्णविन्यासवक्रता महत्त्वपूर्णा शैलीविशेषः अस्ति। विशेषतया स्पर्शवर्णानाम् आवृत्तिः तथा वर्गान्तवर्णसंयुक्तयोगः छन्दोबद्धश्लोकेषु माधुर्यं, प्रभावकता च वर्धयति। प्रस्तुतेषु श्लोकेषु एवं गुणः सुस्पष्टमुपलभ्यते।

''तरुणेन तरुणी'', ''वृद्धेन वृद्धा'', ''प्रौढेन प्रौढा'' इत्यत्र 'ट–वर्ग' (ट, ठ, ड, ढ, ण) तथा 'त–वर्ग' (त, थ, द, ध, न) वर्णानाम् युगलावृत्तिः अस्ति।

''पत्नी'', ''प्रतिज्ञा'', ''विहिता'' इत्यत्र 'प' 'त' 'ज्ञ' वर्णानां संयोजनं दृश्यते।

---

१३. विद्योत्तमाकालिदासीयम्, १६/३५

१४. विद्योत्तमाकालिदासीयम्, ३/३६

**५. त,ल,न इत्यदि वर्णानां द्वित्वरुपेण आवृत्तिः–**

**दैवज्ञेन शिशुकरो दृष्टो यत्र शङ्खचक्रादिदर्शनम्।**
**अस्मिल्लोके करोति जनता सदा यस्य पादयोरर्चनम्**
**तादृशः स विद्योत्तमाशिशुः सुन्दरमुखोऽस्ति शृणु रम्भे हे!**
**सुतजन्माऽभूत्सखि ! कविगेहे।**[१५]

ल'' वर्णस्य द्वित्वावृत्तिः– ''अस्मिल्लोके''– अत्र ''ल्ल'' संयुक्ताक्षरं द्वित्वरूपेण प्रयुक्तम्।

''शङ्खचक्रादिदर्शनम्''– अत्र ''ल'' वर्णस्य अप्रत्यक्षमपि प्रभावः अस्ति, यतोहि ''शङ्ख'', ''चक्र'' इत्यादिषु स्थानेषु उच्चारणे ''ल'' वर्णस्य समानध्वनिः भवति।

''त'' वर्णस्य द्वित्वावृत्तिः– ''अस्मिल्लोके करोति जनता सदा''– अत्र ''त'' वर्णस्य पुनरावृत्तिः स्पष्टम्। ''तादृशः स विद्योत्तमाशिशुः''– अत्र ''त'' वर्णस्य पुनरावृत्तिः दृश्यते।

**तत्तस्य वासे बाधा न कापि, धनी स भविता मत्तस्तवापि ।**
**विद्वत्तया मां कोऽपीह जेता, पितस्त्वया चिन्ता नो विधेया।।**[१६]

प्रस्तुते श्लोके ''त'' वर्णस्य द्वित्वावृत्तिः स्पष्टम्, यया पञ्चमप्रकारस्य वर्णविन्यासवक्रता प्रदर्श्यते। एषा पुनरावृत्तिः श्लोकस्य सौन्दर्यं वर्धयति, पाठकस्य चित्तं आकर्षयति, तथा छन्दोलालित्यं निर्माणं करोति।

''त'' वर्णस्य द्वित्वावृत्तिः – ''तत्तस्य''– अत्र ''त्त'' संयुक्ताक्षरं द्वित्वरूपेण प्रयुक्तम्।

''मत्तस्तवापि''– अत्र ''त्त'' वर्णस्य पुनरावृत्तिः अस्ति। ''विद्वत्तया''– पुनः ''त्त'' संयुक्ताक्षरस्य आवृत्तिः स्पष्टा। ''पितस्त्वया''– अत्र ''त'' वर्णस्य पुनरावृत्तिः दृश्यते।

---

१५. विद्योत्तमाकालिदासीयम्, १७/५

१६. विद्योत्तमाकालिदासीयम्, १७/४८

**६. रेफादि वर्णानां संयुक्तरुपेण आवृत्तिः—**

**शिवनाथः स आचार्यो राज्ञा सम्मानितस्ततः।**
**शिष्यैर्विवाहचर्चा तां कुर्वन् गुरुकुलं गतः।।**[१७]

संस्कृतकाव्ये वर्णविन्यासवक्रता ध्वन्यात्मकं सौन्दर्यं वर्धयति। अस्याः षष्ठः प्रकारः तदा दृश्यते, यदा रेफादि वर्णानां (र्, ऋ) संयुक्तरूपेण आवृत्तिः भवति। प्रस्तुतश्लोके ''र'' (रेफ) वर्णस्य पुनरावृत्तिः स्पष्टं दृश्यते।

आचार्यो''— अत्र ''र्य'' संयुक्ताक्षरं रेफयुक्तं अस्ति।

''राज्ञा''— अत्र ''र'' वर्णस्य स्पष्टः उच्चारणः अस्ति।

''शिष्यैर्विवाहचर्चा''— अत्र ''शिष्यैः'', ''चर्चा'' इत्यत्र ''र'' वर्णस्य आवृत्तिः दृश्यते।

''कुर्वन्— अत्र ''र्'' ध्वनि पुनः प्रयुक्ता।

संस्कृतकाव्ये षष्ठः प्रकारः वर्णविन्यासवक्रता तदा दृश्यते, यदा रेफादि वर्णानां (र्, ऋ) संयुक्तरूपेण आवृत्तिः भवति। प्रस्तुतश्लोके ''र'' (रेफ) वर्णस्य पुनरावृत्तिः स्पष्टं दृश्यते।

**मूर्वोऽसि न त्वं यदि वेदये र्मां**
**किं वृद्धिरादैच् विदधाति कार्यम्?**
**वागीशसिद्धिं वद सूत्रमुक्त्वा**
**कः सन्धिविच्छेद उमेश शब्दे?।।**[१८]

रेफादि वर्णसंयुक्तस्य आवृत्तिः ''वेदयेर्मां''— अत्र ''र्मां'' पदे रेफ वर्णस्य प्रयोगः। ''वृद्धिरादैच्''— अत्र ''वृद्धि'' इत्यस्मिन रेफ वर्णस्य प्रयोगः। ''विदधाति''— अत्र ''र'' वर्णस्य पुनरावृत्तिः। ''सूत्रमुक्त्वा''— अत्र ''सूत्र'' इत्यस्मिन रेफवर्णसंयुक्ताक्षरं दृश्यते।

एवं प्रकारेण कुन्तकः स्वस्य वर्णविन्यासवक्रतायाः अन्तर्गते प्रसिद्धानां

---

१७. विद्योत्तमाकालिदासीयम्, ८/८२

१८. विद्योत्तमाकालिदासीयम्, ६/५३

सर्वेषां वर्णविन्यासप्रयोगानां स्वीकारं कृतवान्। अन्यैः आचार्यैः प्रतिपादिताः अनुप्रासस्य विभिन्नाः भेदाः, वृत्तयः, गुणाः, यमकं तथा यमकाभासः इत्यादीनां सर्वेषां अपि अत्र अन्तर्भावः भवति। सर्वे आचार्याः स्वस्वसिद्धान्तस्य अनुसारं अनुप्रासादीनां शब्दालङ्काराणां तथा वृत्तीनां आश्रयेण वर्णचमत्कारस्य विवेचनं कृतवन्तः। रामकिशोरमिश्रकृतिषु कुन्तकेन प्रतिपादिता वर्णविन्यासवक्रतायाः प्रमुखाः षड्भेदाः सुगमतया प्रचुरतया च दृश्यन्ते। कुन्तकः स्वस्य सिद्धान्तस्य अनुगुणं एव वर्णविन्यासवक्रतां सर्वथा मौलिकरूपेण वर्णितवान्।

***

# शतपथब्राह्मणे वस्त्रालङ्करणविमर्शः

**डॉ. रेनूकोछड़शर्मा**

*सहायकाचार्या (वैदिकाध्ययनम्), संस्कृतविभागः,*

*इलाहाबादविश्वविद्यालयः, प्रयागराजः, उत्तरप्रदेशः*

'वेदोऽखिलोधर्ममूलम्'[१] इतिरूपेण वैदिकवाङ्मयस्य प्रतिष्ठा अखिल–जगति विद्यते। अस्मिन्नेव क्रमे ध्यातव्यमस्ति यत् मानवसभ्यतायाः विकासक्रमो वस्त्राणां प्रयोगवैविध्यरूपेणाप्यवगन्तुं शक्यते। अत्रोल्लेख्यमस्ति यद् वस्त्रधारणं हि मानवानां सर्वप्रमुखासु आवश्यकतासु वर्तते, नास्त्यत्र कश्चन सन्देहः। परमेश्वरेण पशुपक्षिभ्यः नैसर्गिकानि वस्त्राभूषणानि प्रदत्तानि। प्रकृत्या बुद्धियुक्तेभ्यः मानवेभ्यः वस्त्रनिर्माणे प्रयोगार्हाणि अनेकानि वस्तूनि प्रदत्तानि सन्ति यैः सः स्वोपयोगीनि विविधानि वस्त्राणि निर्मापयति। मानवाः सभ्यतायाः विकासक्रमे प्रकृतेरेव विविधोपादानादाय स्वकीय वातावरणानुसारमनेकानि वस्त्राभूषणानि निर्मितवन्तः। आवैदिककालाद् अद्यावधि यावद् विविधानां वस्त्राभूषणानां प्रयोगः तदानीन्तनस्य सभ्यस्य विकसितस्य च समाजस्य परिचायको विद्यते। तदनुसारमेव प्रस्तुतशोधपत्रस्य प्रमुखमुद्देश्यमस्ति शुक्लयजुर्वेदीय शतपथब्राह्मणे वस्त्राभूषणानां तैः सम्बन्धितानाञ्च तथ्यानामध्ययनमस्ति येन ब्राह्मणग्रन्थसम्बद्धानि वस्त्राभूषणविषयकानि, रुचीन्, विशेषोपलब्धीञ्च ज्ञातुं शक्यन्ते।

(I)

वैदिककाले नैकेषु सन्दर्भेषु विविधवस्त्राणां प्रयोगः सूच्यते येन सुस्पष्टं भवति यत् तदानीन्तनाः मानवाः वस्त्रनिर्माणकलायां पारङ्गता आसन्। अथर्ववेदे वस्त्रनिर्माणे प्रयुज्यमानानामुपकरणानां विविध रूपक–माध्यमेनोत्कृष्टं निरूपणं कृतमस्ति।[२] वस्त्राणां विषयेनैकेषां पदानां

---

१. मनुस्मृतिः, २/६

२. अथर्ववेदे (अथर्व.), १०/७/४२

प्रयोगं निर्दिष्टमस्ति तद्यथा वसनम्,[३] वस्त्रम्,[४] वासस्,[५] तन्तुः,[६] ओतुः,[७] अनुछादः,[८] पर्यासः,[९] स्यूमश्च।[१०] वैदिकवाङ्मये वस्त्राणां महत्त्वमनेकेषु सन्दर्भेषु संसूच्यते–

- **ओषधयो वै वासः।**[११]
- **तस्माद् सुवासा एव बुभूषयेत्।**[१२]
- **त्वग् घि वासः।**[१३]
- **रूपं वा एतद् पुरुषस्य यद् वासः।**[१४]
- **सर्वदेवत्यं वै वासः।**[१५]

उक्तसन्दर्भाः वस्त्राणां वैशिष्ट्यमुद्भावयन्ति। शतपथब्राह्मणे मानवैः वस्त्रधारणसन्दर्भे रोचकमाख्यानमेकं प्राप्यते–अथ वासः परिधत्ते। **सर्वत्वायैव स्वामेवास्मिन्नेतत्त्वञ्च दधाति।**[१६] वस्त्राणां प्रयोगः किमर्थं करणीयं

---

३. ऋग्वेदे (ऋ.), १/६५/७; छान्दोग्योपनिषद्, ८/५/३; निरुक्तम्, ८/६

४. ऋ., १/२६/१; ३/३६/२

५. ऋ., १/३४/१; १/१/१५; १/१६२/१६; शुक्लयजुर्वेदे, २/३२; ११/४०; ऐतरेयब्राह्मणे, १/३; य शतपथब्राह्मणे, ५/२/१/८

६. अथर्व., १४/२/५१

७. क. नाहं तन्तुं न विजानाम्योतुं।–ऋ., ६/२/६; य ओतवो ये च तन्तवः। – अथर्व., १४/२/५१

८. शतपथब्राह्मणे, ३/१/२/१८

९. शतपथब्राह्मणे, ३/१/२/१८

१०. स्यूमेव वस्त्रमिव।–ऋ., ३/६१/४ (सायणभाष्य)

११. शतपथब्राह्मणे, १/३/१/१४

१२. शतपथब्राह्मणे, ३/१/२/१६

१३. शतपथब्राह्मणे, ४/३/४/२६

१४. शतपथब्राह्मणे, १३/४/१/१५

१५. शतपथब्राह्मणे, १/१/६/११

१६. शतपथब्राह्मणे, ३/१/२/१३–१६

एतत्विषयेऽपि गहनचिन्तनमुपलभ्यते, तद्यथा–वस्त्राणि वर्षा–ग्रीष्म–शीतादिभिः च त्रायन्ते, सभ्यतायाः परिचायकरूपेणाऽपि वर्तन्ते इत्यादीनि नैकानि कारणानि सन्ति।[१७]

वैदिककालादेव अनेकप्रकाराणां वस्त्राभूषणानां प्रयोगो दृश्यते तेनैव ज्ञायते यत् तदानीन्तने समाजे जनाः वस्त्रकलायां निपुणा आसन्। मात्रा स्वसन्ततीनां कृते वस्त्रनिर्माणस्योल्लेखः प्राप्यते।[१८] शतपथब्राह्मणे वस्त्रनिर्माणसम्बन्धितानाम् अनेकेषां तथ्यानां वर्णनमपि सूच्यते।[१९] स्त्रीणां मुख्यकार्येषु तन्तुभिः वस्त्रनिर्माणमपि परिगणितमासीत्–

**तद्वाऽएतत्स्त्रीणां कर्म यदूर्णासूत्रम्।**[२०]

एकस्मिन् सन्दर्भे मानवकर्माणां तुलना तन्तुवायैस्सह कुर्वन् उक्तमस्ति यद् मानवा अपि तन्तुवाया इव स्वकर्माणि निर्मापयन्ति।[२१] अमीभिः सन्दर्भैः स्पष्टं भवति यद् वैदिकसमाजे वस्त्रनिर्माणकलायाः उत्कृष्टं ज्ञानमासीत्। कार्पाससः, ऊर्णस्य क्षौमस्य च तन्तूनां प्रयोगेण वस्त्राणि निर्मीयते स्म, अधोलिखितैः सन्दर्भैः स्पष्टीभविष्यति–

**कार्पासः–** एतेषां वस्त्राणां कृते मुख्यतया 'वासस्' पदस्य प्रयोगो दृश्यते स्म। शतपथब्राह्मणेऽपि ऊर्णस्य कार्पासस्य च वर्णनमुपलभ्यते।[२२]

**ऊर्णम्–** सन्दर्भेऽस्मिन्नुल्लेखनीयमस्ति यद् ऋग्वेदस्य दशमे मण्डले 'मर्मृजत्' इति पदं ऊर्णनिर्मितानां वस्त्राणां कृते एव निरूपितमस्ति–**वासोवायोऽवीनामा वासांसि मर्मृजत्।**[२३] ऐतरेयब्राह्मणे ऊर्णस्य कृते एव 'ऊर्ण'

---

१७. शतपथब्राह्मणे, ३/१/२/१४

१८. वस्त्रा पुत्राय मातरो वयन्ति।–ऋ., ५/४७/६

१९. शतपथब्राह्मणे, ३/१/२/१६–१८

२०. शतपथब्राह्मणे, १२/७/२/११

२१. तन्वाथे धियो वस्त्रापसेव।–ऋ., १०/१०६/१

२२. शतपथब्राह्मणे, १२/७/२/११

२३. ऋ., १०/२६/६

इत्यस्य पदस्य प्रयोगोऽपि लभ्यते।[२४] सहैवेमानि 'ऊर्णायुः'[२५] अपि कथ्यन्ते स्म।

**क्षौमम्–** वस्त्रमिदं 'तार्प्य'[२६] इति नाम्नाज्ञायत यद् यज्ञस्यावसरे धार्यते स्म। कुशवस्त्राणि–ब्राह्मणग्रन्थेषु दर्भनिर्मितानां वस्त्राणां वर्णनमपि प्राप्यते।[२७]

**कुशावस्त्राणि–**ब्राह्मणग्रन्थेषु कुशनिर्मितानां वस्त्राणां विवेचनमपि प्रतिपादितम्।[२८]

(II)

वैदिककाले वस्त्राणां विविधतया प्रयोगोऽपि परिलक्ष्यते। देववस्त्राणां शोभनवस्त्राणां शरीरस्य भिन्नभिन्नाङ्गानां कृते भिन्नभिन्नानां वस्त्राणां वर्णनमपि सङ्केतितं, क्रमशः द्रष्टव्यम्–

### (क) शोभनानि वस्त्राणि–

उल्लेख्यमस्ति यत् शोभनवस्त्राणां प्रयोगस्य वर्णनमनेकस्थलेषु प्रकटीक्रियते यत् तत्कालीनस्य समाजस्य शोभनवस्त्राणां विषये विशेषाग्रहस्य द्योतकमस्ति। तद्यथा–

- **वस्त्रेणेव वासया।**[२९]
- **युवं वस्त्राणि पीवसा वसाथे।**[३०]
- **भद्रा वस्त्राण्ययर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः।**[३१]
- **भद्रा वस्त्रा समन्या वसानः।**[३२]

---

२४. ऐतरेयब्राह्मणे, १/२३

२५. शुक्लयजुर्वेदे, १३/४०

२६. अथर्ववेदे, १८/४/३१

२७. शतपथब्राह्मणे, ५/३/५/२०

२८. कौशं वासः। शतपथब्राह्मणे, ५/२/१/८

२९. ऋ., १/१४०/१

३०. ऋ., १/१५२/१

३१. ऋ., ३/३६/२/६

३२. ऋ., ६/६७/२

- **अभि वस्त्रा सुवसनान्यर्षाभिः।**[३३]
- **स तु वस्त्राण्यध पेशनानि वसानः।**[३४]

**(ख) देवताविषयकाणि वस्त्राभूषणानि—**

वैदिकसंस्कृतिः प्रकृतेरुपासिकास्ति, प्रकृतिरियं नैसर्गिकालङ्करणैः सुशोभितास्ति। अत्रोल्लेखनीयमस्ति यत् शोभनवस्त्राणां प्रयोगेण सहैव देवानां स्वरूपवर्णनक्रमे तेषां चित्रविचित्राणां दिग्दर्शनमत्र प्रस्तूयते—

- इन्द्रस्य सोमयुक्तानां वस्त्राणामुल्लेखः सम्प्राप्यते—**इन्द्रं सोमैरोर्णुत जूर्नवस्त्रैः।**[३५]
- वरुण दीप्तिमद्भिः वस्त्रैः स्वशरीरमाच्छादयति— **विभ्रद् द्रापिं हिरण्ययम्।**[३६]
- मरुद्गणाः देदीप्यमानानि आभूषणानि धारयन्ति— **तनुषु शुभ्रा दधिरे विरुक्मतः।**[३७]
- रुद्रः दीप्तिमद्भिः स्वर्णाभूषणैः सुशोभते—**बभ्रः शुक्रेभिः पिपिशे हिरण्यैः।**[३८]

उक्तसन्दर्भातिरिक्तमेकस्मिन्प्रसङ्गेऽपि प्रभातस्यालङ्कारिके वर्णने आकाशेन सुन्दरवस्त्राणां प्रसारस्य वर्णनमप्युलभ्यते।[३९]

**(ग) विविधानि वस्त्राणि—** वैदिकसमाजे व्यक्तिविशेषस्य कृते विशेषवस्त्राणां वर्णनमपि दृश्यते। सहैवानेन भिन्नशरीरावयवानां कृते पृथक्—पृथग् वस्त्राणां प्रयोगस्य सङ्केतोऽपि प्राप्यते—

---

३३. ऋ., ६/६७/५०

३४. ऋ., १०/१/६

३५. ऋ., २/१४/३

३६. ऋ., १/२५/२३

३७. ऋ., १/८५/३

३८. ऋ., २/३३/६

३९. तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु। — ऋ., १/१३४/४

४०. सोमस्य नीविरसि।— यजुर्वेदे, ४/१०

- **नीवी–** यजुर्वेदे सोमविषयकैकस्मिन् सन्दर्भे नीवीवर्णनमायाति। अथर्ववेदेऽपि नीव्याः परिधानरूपेणोल्लेखः कृतोऽस्ति।[४१]
- **अधिवासः** – शरीरस्योर्ध्वभागे धार्यमाणस्य वस्त्रस्यास्य वर्णनं ऋग्वेदे[४२] तथा च शतपथब्राह्मणेऽपि प्राप्यते।[४३]
- **तार्प्यम्**– शतपथब्राह्मणे वस्त्ररूपेण तार्प्यस्य वर्णनमायाति।[४४]
- **पाण्डवः** – परिधानमिदं वस्त्राणामुपरि धार्यमाणं ऊणोष्णीषरूपेण स्वीकृतमस्ति। अस्य वर्णनं मुख्यरूपेण शतपथब्राह्मणे दृश्यते।[४५]
- **प्रघातः** – वस्त्रमिदं नीवीमाश्रित्य धार्यते स्म।[४६]
- **युद्धवस्त्राणि**–ऋग्वेदे सङ्गरे योद्धृभिः धार्यमाणानां वस्त्राणां समुल्लेखः प्राप्यते।[४७]
- **वधूवस्त्राणि**– वध्वाः वस्त्राणां वर्णनक्रमे स्पष्टमुल्लिखितमस्ति यद् तानि सुन्दराणि सुकोमलानि मनोहराणि च भवन्ति स्म।[४८]

इत्थं सुव्यज्यते यत्तदानीन्तने समाजे विविधानां वस्त्राणां प्रयोगः प्रचलित आसीद् यस्य विकसितं रुच्यनुसारं वैविध्यपूर्णञ्च रूपं दृश्यते।

(III)

वस्त्राणि मानवजीवनस्य अनिवार्यावश्यकतासु सम्मिलितानि सन्ति परन्तु आभूषणानि शोभायाः प्रदर्शनस्य च साधनानि भवन्ति। वैदिकसाहित्ये

---

४१. यत्ते वासः परिधानं यां नीविं कृणुषेत्वम्?– अथर्व., ८/२/१६

४२. ऋ., १/१४०/६

४३. शतपथब्राह्मणे, ५/४/५/३; १३/२/८/१

४४. शतपथब्राह्मणे, ५/३/५/२०

४५. शतपथब्राह्मणे, ५/३/५/२१

४६. शतपथब्राह्मणे, ३/१/२/१८

४७. वर्मेव युत्सु।– ऋ., १/१४०/१०

४८. अथर्व., १४/६/४१–४२; १४/२/५१

विविधवस्त्राणां प्रयोगेण सहैव स्वर्णनिर्मितानां[४९] रजतनिर्मितानां[५०] आभूषणानाञ्च वर्णनं परिदृश्यते। कण्ठाभूषणरूपेण निष्ककण्ठस्य वर्णनं प्राप्यते।[५१] कण्ठे धार्यमाणस्यैकस्यान्यस्य आभूषणस्य 'रुक्म' इत्यस्यापि उल्लेखोऽस्ति।[५२] एकस्मिन् स्थले स्वर्णाभूषणमण्डितानां कन्यानां वर्णनमायाति।[५३] उपलब्धान् सङ्केतानाधृत्य वक्तुमिदं शक्यते यत् संहिताकालानन्तरं ब्राह्मणग्रन्थेष्वऽपि विविधप्रयोगाः प्रसिद्धा आसन्।

**वस्त्राभरणविषये अत्रावधेयमस्ति यद्—**

- वस्त्रदातॄणां कृते ऋग्वेदे 'वासोदा'[५४] तथा च 'वस्त्रदा'[५५] इत्यादि पदानामुल्लेखो लभ्यते।
- 'सुवसनम्'[५६] इतिपदस्य प्रयोगः परिमापदृष्ट्योत्कृष्टानां वस्त्राणां कृते प्राप्यते।
- शतपथब्राह्मणे वस्त्राणां चयनेन परिधानेन वा जनस्य रुचेः सामाजिकतायाश्च च परिज्ञानं भवतीति प्रतिपादितमस्ति।[५७]
- शतपथब्राह्मणे वयनसम्बन्धितानां विविधपक्षानां वर्णनं प्राप्नोति।[५८] सहैवेदमपि परिज्ञायते यद् वयनकार्यं स्त्रियः कुर्वन्ति स्म।[५९] कुत्रचित्

---

४९. ऐतरेयब्राह्मणे, ७/१८; कौषीतकिब्राह्मणे, ७/१०

५०. ऐतरेयब्राह्मणे, ८/२२; कौषीतकिब्राह्मणे, ८/४

५१. ऐतरेयब्राह्मणे, ५.२२, ७/१८; कौषीतकिब्राह्मणे, १३/४/१/८

५२. ऐतरेयब्राह्मणे, ८/२२, ७/१८; कौषीतकिब्राह्मणे, ३/५/१/१०, ५/४/५/२२

५३. ऐतरेयब्राह्मणे, ८/२३

५४. ऋ., १०/१०७/२

५५. ऋ., ५/४२/८

५६. ऋ., ६/६७/५०

५७. शतपथब्राह्मणे, १३/४/१/१५

५८. शतपथब्राह्मणे, ३/१/२/१६

५९. शतपथब्राह्मणे, १२/७/२/११

पुरुषा अपि वयन्ति स्म।[६०]

- वस्त्रनिर्मातृणां कृते 'वासोवाय' इति पदं प्राप्यते।[६१] एतदतिरिक्तं वयनकार्ये सङ्लग्नानां स्त्रीणां कृते 'वय्या' 'वयित्री' चेति शब्दद्वयं प्रयुज्यते स्म।[६२]
- शतपथब्राह्मणे सुन्दरैः वस्त्रैरलङ्कारैश्च सुशोभितां योषां सुन्दरीति कथितमस्ति।[६३]

एवमुक्तपर्यालोचनेनेदं स्पष्टीभवति यद् वस्त्राणि मानवस्याधारभूतासु आवश्यकतासु अन्यतमानि सन्ति तथापि आवश्यकतानां त्रिविधस्तराणि इव वस्त्राभूषणानां प्रयोगेऽपि देशकालपरिस्थित्यनुसारं किंवा रुच्यनुसारमपि अनेकविधानि परिवर्तनानि दरीदृश्यन्ते। वस्त्राणामभिधाने तथा च विविधाभूषणानां प्रचलने तु महत्परिवर्तनं दृश्यते किन्तु तथ्यमिदं दाढ्र्येन स्वीकर्तुं शक्यते यद् वैदिककाले सर्वविधानां वस्त्राणां प्रयोगः प्रचलित आसीत् यस्मिन् परवर्तीकाले सौविध्यं किंवा रुचेर्वैचित्र्यानुसारमपि प्रयोगवैविध्यं परिलक्ष्यते। अत्र निश्चयेनेदं वक्तुं शक्यते यद् इदानीन्तनानां बहूनां वस्त्राभूषणानां विकासे वैदिकपृष्ठभूमेर्महत्त्वपूर्णं योगदानमस्ति, येन न केवलं विविधप्रकारकाणां वस्त्राभूषणानां विकासे वैदिकपृष्ठभूमेर्महत्त्वपूर्णं योगदानमस्ति। येन न केवलं विविधप्रकारकाणां वस्त्राभूषणानां परिज्ञानं सञ्जातमपितु तेषामभिनवप्रयोगस्य मार्गमपि प्रशस्तमिति शम्।

***

---

६०. पुमान् एतद् वयति।– अथर्व., १०/७/४३

६१. ऋ., १०/२६/६

६२. ऋ., २/३/६

६३. शतपथब्राह्मणे, ६/५/६/१०

# शिवलीलामृतमहाकाव्यम्–एकमध्ययनम्

**डॉ. देवाशीषशमिश्रः**

*सहायकाचार्यः, संस्कृतविभागः*

*फकीरमोहनविश्वविद्यालयः,*

*व्यासविहारः, वालेश्वरम्, उड़ीसा*

**शोधसारांशः**

अग्निचित्पण्डितनित्यानन्दविरचितं शिवलीलामृतमहाकाव्यम् ओडिशा राज्यस्य पर्यटनसांस्कृतिकव्यापारविभागनिर्देशालयेन श्रीभगवान पण्डामहोदयेन १६७८ खीष्टाब्दे भुवनेश्वरात् प्रकाशितम्। पण्डितस्यास्य कृतिचतुष्टयं लोकलोचनमागतम्। सुखस्य विषयो यत् ओडिशासांस्कृतिक–व्यापारविभागेन तेषु त्रयः ग्रन्थाः प्रकाशिताः। ग्रन्थचतुष्टयं यथा– शिवलीलामृतम्, श्रीकृष्णलीलामृतम्, नीलाद्रिनाथशतकम्, आरतध्वंसनञ्च। एतेस्वन्यतमोऽस्ति आलोच्यमिदं शिवलीलामृतमहाकाव्यम्। ऐतिहासिकदृष्ट्या सांस्कृतिकदृष्ट्या च कृतिरियं महत्त्वमावहति। अतः एतत्काव्यरत्नं विषयीकृत्य आलोचनायां प्रवृत्तोस्त्ययं लघुनिबन्धः। काव्यस्यास्य चरित्रचित्रणं साङ्गितिकमूल्यं शैल्यादिबिन्दूनां सूक्ष्मालोचना प्रस्तूयतेऽस्मिन्।

**उपक्रमः**

अग्निचित्पण्डितनित्यानन्दविरचितं शिवलीलामृतमहाकाव्यम् ओडिशा राज्यस्य पर्यटनसांस्कृतिकव्यापारविभागनिर्देशालयेन श्रीभगवानपण्डा महोदयेन १६७८ खीष्टाब्दे भुवनेश्वरात् प्रकाशितम्। सर्गान्तपुष्पिकायां ग्रन्थकारस्य नाम नित्यानन्द इत्युल्लेखो वर्त्तते।

यथा– 'इति श्रीमदग्निचिन्नित्यानन्दपण्डितकृते शिवलीलामृत–महाकाव्ये पार्वतीसम्भवो नाम प्रथमसर्गः' इति। ग्रन्थस्यान्तिमश्लोकेऽपि कवेर्नामोऽस्ति, यथा–'नित्यानन्दकवेर्निवेदितमिमं संशोधयध्वं बुधाः'। नित्यानन्दः स्वयं ग्रन्थं विरच्य स्वस्य पृष्ठपोषकस्य राज्ञः गदाधरमान्धातुः (१६५७–८६) नाम्नि एतत् उत्सर्गीकृतवान्। तस्य समयः १६६०–१७६१

खीष्टाब्दमध्ये वर्त्तते। तस्य कृतिचतुष्टयं लोकलोचनमागतम्। सुखस्य विषयो यत ओडिशासांस्कृतिकव्यापारविभागेन तेषु त्रयः ग्रन्थाः प्रकाशिताः। ग्रन्थचतुष्टयं यथा— शिवलीलामृतम्, श्रीकृष्णलीलामृतम्, नीलाद्रिनाथशतकम्, आरतध्वंसनञ्च।

श्रीकृष्णलीलामृतात् नीलाद्रिनाथशतकात् च ज्ञायते यत् कविः श्रीजगन्नाथभक्तः वैष्णवश्चासीत्। कविः महादेवस्य सन्तोषविधानार्थं काव्येकं च ग्रन्थः। तस्य पृष्ठपोषकः गदाधरः नयागडनिकटवर्त्तीशरणकुलस्य सुप्रसिद्ध—लडुकेश्वरशिवस्य उपासकरासीत।

**दीनानाथदयावशम्वदतया ख्यातः क्षितौ जग्मुषो**
**देशे यस्य वरीवृतीति भगवान् श्रीलड्डुकेशः शिवः।**
**तीव्राराधनसुप्रसन्नमनसा माङ्गल्यमुन्मीलय—**
**नित्यंराज्यधुरधन्धरत्वमुखरीकुर्वाण एष प्रभुः।।**[१]

नित्यानन्दः स्वपृष्ठपोषकस्य सन्तोषविधानार्थं शिवाय स्वीयभक्ति—ज्ञापनार्थं च ग्रन्थमिमं प्राणैषीदिति। कविः 'हरिहर'—उपासनाविधिं स्वीकृतवान् इति लक्ष्यते। हरिहरोपासनाविधिः समन्वयवादस्य प्रतीकः। पार्वती सुप्राचीना देवी, शिवश्च तद्वत् प्राचीनः प्रसिद्धः देवः। दुर्गा—अम्विका—चण्डिका प्रभृतिनामभिः, शिवः रुद्र—पशुपतिप्रभृतिभिः नामभिश्च आराध्यते। शैवशाक्त परम्पराऽस्य देशस्य सुप्राचीनपरम्परा। वैदिको देवो विष्णुः क्रमेण कृष्णोऽभवत्। लक्ष्मीतत्त्वमपि राधातत्त्वे पर्यवसितमभूत्। क्रमेण शैव—वैष्णवधर्ममतवादयोर्मध्ये समन्वयः स्थापितोऽभवत्। सम्पूर्णकृष्णलीलात्मके वैष्णवपुराणे शिवस्य उच्चासनं दृश्यते, यथा— **'ईशानः सर्वविद्यानामीश्वरः सर्वदेहीनाम्'**[२], **'रुद्रं त्रैलोक्यैकगुरुं नमामि शिरसा मुनिः'**[३] इत्यादयः। शिवस्तत्र 'परमभागवतः' 'परमवैष्णवः" इत्यादिभिः वर्णितः। हरिहरः—

---

१. शिवलीलामृतमहाकाव्यम्, १.१४

२. श्रीमद्भागवतमहापुराणम् १२.१०.८

३. तत्रैव, १२.१०.१४

उपासनायाः मूलसूत्रं तत्रैव निहितम्। उत्कलेषु गङ्गवंशराजत्वसमये अस्याः परम्परायाः प्रसारोऽघटत्। शिवस्य मन्दिरे विष्णोः, विष्णुमन्दिरे शिवस्य एकत्रावस्थानं, पूजनं प्राचलत्। भुवनेश्वरस्य लिङ्गराजस्य पूजा हरिहरमन्त्रेण विधीयते यत् उत्कलेषु बहुस्थलेषु हरि–हरयोः एकत्रोपसना क्रियते।[४] कविर्नित्यानन्दः अस्मिन् मतवादे आस्थावान् आसीत्। कविः गीतगोविन्दशैलीमनुसरति, परन्तु राधा–कृष्णयोः लीलायाः स्थाने पार्वती–शिवयोः लीलां शिवलीलामृतमहाकाव्ये वर्णयति। एवंभूताः 'गीतगिरीशः', 'गीतदिगम्वरः', 'गीतगङ्गाधरः', 'गीतशङ्करः'–प्रभृत्येकादश ग्रन्थाः अपि विद्यन्ते।[५]

## कथावस्तुनः मूलाधारः

शिवलीलामृतमहाकाव्यस्य कथावस्तुः विविधपौराणिकोपाख्यानेभ्यः संगृहीतम्। महाकाव्यस्य समीक्षायाः ज्ञायते यत् कविर्निम्नोक्तग्रन्थेभ्य उपादानमाहृत्य ग्रन्थं प्रणीतवान्। यथा– शिवपुराणस्य उत्तरखण्डम्, कुमारसम्भवम्, सारलामहाभारतस्य वनपर्वम्, एकाम्रपुराणम्, कपिलसंहिता, स्वर्णादिमहोदयश्च ।

## ग्रन्थस्य साहित्यिकानुशीलनम्

शिवस्य लीला एवामृतम्, अथवा शिवस्य लीलायाः अमृतं वर्णितं यस्मिन् महाकाव्ये तत् शिवलीलामृतमहाकाव्यम् एतत् महाकाव्यमिति कविना स्वीकृतम् गीतगोविन्दशैली अत्र मुख्यरूपेण अङ्गीकृता श्रीराधा–कृष्णयोः पारम्परिककेलिवर्णनायाः स्थाने अत्र कविः स्वस्य, स्वीयपृष्ठपोषकस्य चोपास्यदेवस्य नटराजशिवस्य लीलाविलासं विस्तृतभावेन वर्णयति। शिवलीलामृतमहाकाव्यं दशसर्गविशिष्टम्। अस्य इतिवृत्तिनायक–नायिका–रस–ऋतु–विवाह–पुत्रोदय–युद्ध–चन्द्रोदय–सूर्योदय–जलकेलि–नदी–सरोवर–तीर्थ–सर्गान्तछन्द–परिवर्त्तन–भाविसर्गसूचनाप्रभृतिविभव–प्राचुर्येभ्यः काव्यमिदं महाकाव्यं भवेदित्यत्र नास्ति विप्रतिपत्तिः। नानाविध–

4. See, Glimpses of Vaishnavism in Orissa
5. See, The Indian Historical Quarterly Journal, Vol-XXV, pp.95-101, Dr. V. W. Karmbelkar

रागतालनिबन्धप्रबन्धानां संयोगात् सांगीतिकतायाः प्रकृष्टभावेन स्फुटत्वाच्च शिवलीलामृतं गीतिमहाकाव्यम् अथवा एक संगीतमयं महाकाव्यं वा भवति ।

## १. नायिका–नायकौ

काव्यस्य नायको लीलामयः परमेश्वरः शिवः। अत्र प्रभोः धीरोदात्तगुणः प्रस्फुटितः। सः कैलासपतिः महायोगी महेश्वरः। स रूपवन्तः तरणं मदनं भस्मीचकार। रूपवत्याः पार्वत्याः प्रणयं प्रत्याख्याय तस्याः प्रणयगभीरतां जिज्ञासते। तपस्वी शिवः पार्वतीतपस्यया सन्तुष्टस्तस्याः पाणिग्रहणमिच्छति। पार्वतीं निजस्वम् अर्द्धाङ्गं यच्छति। नटवरश्चन्द्रमौली ब्रह्मचारीवेशमपि धारयति। ऐश्वर्यशाली महेश्वरः स्वकीयविवाहोत्सवे समस्तदैवगणैः सह महाडम्बरेण हिमालयनगरे उपस्थितो भवति। कार्त्तिकजननानन्तरं संहारकर्ता रुद्रः द्वारपालं स्वकीयं पुत्रम् अजानन् हन्ति, पार्वत्यनुरोधात् जीवदानं कृत्वा 'गणपतिः' (गणेश) अभिधानं तस्य करोति अभिशप्तायाः जयायाः मनोवाञ्छां पूरयति। प्रियतमायाः अभिलाषवशवर्त्तितः सः कदा हिमालयपुरे, कदा काश्यां, कदा अयोध्यायां, कदा च एकाम्रतीर्थे विराजते। प्रियामनोदुःखं दूरीकरोति। कीर्ति–वासयोः वधाय सम्मतिं ददाति। विन्दुसरोवरमसृजत्। पार्वत्या अन्याङ्गनाभिश्च रासलीलाम्, एकाम्रतीर्थस्य गन्धवतीजले जलकेलीं च विदधाति। भुवनेश्वरे लिङ्गराजो भवति। ग्रन्थे स भीमकान्तरूपेण प्रयुज्यते। स महाक्रोधकारी रुद्रः, तथापि लीलाविलासे शान्तः कान्तः कमनीयश्च। भक्ताधीनः, चिरसन्तुष्टः, महाज्ञानी, ज्ञानदाता, योगी, परमकरुणामयो महामहिमदेवाधिदेवः सुर–नर–गन्धर्व–किन्नरैः सर्वैश्च चिरवन्दितोऽसौ चिरमङ्गलमयः काव्यस्य नायिका पार्वती राज्ञीमेनका– गिरिराजहिमालययोः कन्या परमादरणीया। सा मुग्धा नायिका। निरुपमलावण्यसमन्विता नवयौवनवती सा। तद्भाता मैनाकः। पूर्वजन्मनि सा दक्षकन्यासतीरूपेण पतिं शिवमलभत्।

नारदोपदेशक्रमेण सा शिवं मनोमध्ये पतिरूपेण वृतवती। मदनभस्मीकरणं दृष्ट्वा **'तपसा किं न साध्यते'** इत्यादर्शानुसारेण सा राजकीयैश्वर्यं परिहाय सखिभिः तपस्यति स्म। ऐकान्तिकनिष्ठया तस्याः

तपस्या आदर्शस्थानीया बभूव। सा अपर्णा अभवत्। सन्यासिनस्तां द्रष्टुमागताः। छद्मवेशधारिणः शिवस्य शिवनिन्दापरकं वचनं तां लक्ष्यच्युतां नाकरोत्।

तपोवलेन शिवं लब्ध्वा तस्य अर्धाङ्गिनी जाता। एतत् तस्याः कर्त्तव्यनिष्ठायाः दृढभक्तेश्च परिचायकम्।

एकनिष्ठसाधना तां दुर्लभफलमददात्। महिममयशिवस्य सोहागिनी भावेन सा देवसेनापतिं कार्तिकेयमजनयत्। अङ्गरागात् सन्तानमेकमुत्पाद्य शिवकरुणया तं गणपतिं कारितवती। पतिना सह काश्यां निवसन्ति दुर्भिक्ष–अनाहारं दूरीकृत्वा अन्नपूर्णारूपेण परिचिता जाता।

स्वपरिचारिकायाः सख्याः कलुषितमनोभवस्य परिचयं प्राप्यं तां शशाप। पतिः शिवः जयायाः (सत्यवत्याः) मनोऽभिलाषं पूरयत् तां पुत्रद्वयमददादिति श्रुत्वाऽपि तमभिनन्दितवती। एषस्तस्या उदारहृदयस्य परिचयः। जयायाः नन्दि–भृङ्गीति पुत्रद्वयं स्वपुत्ररूपेण स्वीकृतवती। एकाम्रतीर्थे लास्यमयीदेवी गोपालिनीवेशेन स्वामिनमर्चितवती। स्वमायाबलेन स्वाम्यनुमत्या कीर्ति–वासौ जघान। कान्तविरहिण्याः पार्वत्याः भावाभिव्यक्तौ प्रगाढपतिभक्तौ, उन्नत शृङ्गारचेतनायाः परिचयो लभ्यते। तस्याः पिपासादूरीकरणार्थं विन्दुसरोवरः सृष्टः। पतिना सह गन्धवतीतीरे भ्रमति। अन्याङ्गनाभिः शिवस्य महारासलीलायां सा आनन्दिता भवति। वालुकालिङ्गं पूजयति। सर्वं तस्याः उदात्तभावस्य परिचायकम्।

## २. रसः

ग्रन्थे आदिरसः शृङ्गारो मुख्यरसरूपेण गृहीतः। वीरशान्तादयः रसाः गौणभावेन स्थिताः। पार्वती–शिवयोर्मिलने, जयया महाप्रभोः सम्भोगस्य वर्णनायाम्, एकाम्रक्षेत्रे महारासरचनायां, जलक्रीडायां, देव्याः विप्रलम्भप्रसङ्गे च शृङ्गाररसः सम्पूर्णतया प्रकटितः। शृङ्गाररसात्मकं भव्यवर्णनं यथा–

**अभिमतनायकस्य सङ्गसुखापि करणे कलं कलयन्तम्।**

**अभिनवं दधती मधुरं न–न–नेति कृतापि समिव निवसन्तम्।।**[६]

---

६. शिवलीलामृतमहाकाव्यम्, प्रबन्धः, १८

अन्यत्र–

**नमयसि किमपि मुखं रुचिरम् ।**

**लिखसि भुवं च नखेन चिरम् ।।[७]**

अथवा महारासवर्णनायाम्

**काचन मनसिजविभ्रमशिथिलितसकुसुमकुन्तलभारा।**

**चञ्चलकनकघटस्तननिपतितवर्त्तुलनिस्तुलहारा।।**

**रासे पुररिपुणा, सह विललास निपुणा।।[८]**

शृङ्गारवर्णनामुपयुक्त–आलम्बनोद्दिपनविभावैः अनुभाव–व्यभिचारिणाञ्च संयोगो दृश्यते। शृङ्गारानुकूल–माधुर्यगुण–व्यञ्जकशब्द–प्रयोगानाञ्च विधानमपि लक्ष्यणीयम्।

यथा–

**ततः कुञ्जे कुञ्जे नवकुसुमपुञ्जे विरचितः**

**स्वतश्चचामीकरनिकररोचिरुचिरया।**

**पराधीनस्येव स्मरनिगमपारङ्गमतया**

**या शम्भोरासीद्वतविधिसम्भोगललितम्।।[९]**

पुनश्च

**मञ्जुलतरवञ्जुलदरदलितललितसुमनसम्**

**मृदुलगीतमधुपपीतकुसुममधुरमधुरसम्।**

**विकचकुन्दसुन्दरकीर्तिवितत शोभनम्**

**लोकय जन नयन मदन–मुदुपतिमति लोभनम्।।[१०]**

---

७. तत्रैव, प्रबन्धः, ३५

८. तत्रैव, प्रबन्धः, ३८

९. तत्रैव, ६/१५

१०. तत्रैव, प्रबन्धः, २६

## ३. प्रबन्धसङ्गीतम्

ग्रन्थे ४० प्रबन्धसङ्गीतानि २० रागैः, ११ तालैः निबद्धानि। अत्र कल्याण—आहारी—मुखावरी—मारुप्रभृतिरागाणां नूतनप्रयोगोऽभवत्। अड्डु—आड्डि—कुड्डुक—सारिमान्देढी—पडि—मठादितालानां नूतनतया प्रयोगोऽत्र दृश्यते। कविः नित्यानन्दः सङ्गीतशास्त्रे स्वतन्त्रपारदर्शितामलभत् शिवपरकग्रन्थे झम्पकतालस्य, भैरव—कामादी—वसन्त—मङ्गलगुज्जरी प्रभृतिरागाणां विशेषप्रयोगं कुरुते। सप्तमसर्गस्य उनत्रिंश (२६) तमप्रबन्धे कविः वसन्तरागेण सूडप्रबन्ध—निःसारी—मण्ठ—सिंहनन्दन—झम्पक—त्रिपुटान्तरायति—अड्डु—सप्तकल— दढीपडी—ढेंकि (पञ्चकला) सारिमान—कुड्डुक—चाचपुट—नलकूवरतालानां व्यवहारं दर्शयति। प्रबन्धगीतानि न सर्वत्र अष्टपदजातीयानि, कुत्रापि दशपदि चापि दृश्यते। प्रबन्धगीतानां भावोऽतिसूक्ष्मः, सङ्गीतविषयत्वात् भाषा सुकोमला, श्रुतिसुमधुरा चेति, यथा—

**दलितललितकुङ्कुमरसचर्चितमङ्गरागम्**
**सघनसारगन्धसारलम्भितपरभागम्।**
**यवतीततिरिहजनयति भृशमुपचितकामम्**
**ध्यायति हृदि दयितसततसङ्गमभिरामम्।।**[११]

अथवा

**दर्शय वदनसुधाधरविम्बम्। नाशय हृदयतिमिरमविलम्बम्।**
**मधुरमधरमधुपाययकामम्। पूरय नो न चिरादिव कामम्।।**[१२]

पुनश्च

**सुकुसुमपुञ्जसुषमपुञ्जमन्दमलयमारुतम्।**
**मण्डयदलममलपूतमेकचूतकाननम्**
**चण्डिकिरणखण्डनरुचिरुचिरतरदिगाननम्।।**[१३]

---

११. तत्रैव, प्रबन्धः, २६

१२. तत्रैव, प्रबन्धः, ३७

१३. तत्रैव, प्रबन्धः, ३०

प्रथमसर्गस्य प्रथमगाथायां नाटरागाधारितं 'मान'स्य रूपं निम्नोक्तप्रकारकं दृश्यते, यथा–

१. सा सा सरिगमरिगम पधनसि रिगनिगमपधनिमपधस पसनिसरिग, द्वितीयगाथागीते गुज्जरीरागाधारितं मानरूपं यथा–

२. सा सा सारिगम रिगमरि गमपधनि मगपरिपधपनि सा सा सा। चतुर्थगाथायां देशाख्यरागाधारितं यथा–

३. सा सा रिगमरि गम पधनि निसा निगमग सा सा सा। एवं च सप्तमप्रबन्धेऽपि वर्त्तते। तद्वत् तालानां चच्चकारा अपि दृश्यन्ते। प्रथमप्रबन्धे दितालाधारितचच्चकारो यथा–

क. पझेक्रिणे धां धां धुगधुग धौ कट द्रें कं तिदक् दिक् ता तेनां तेनां तेनां तेना तेना तेना तेना।

द्वितीयप्रबन्धे यतितालाधारितो यथा–

ख. त्रिपुट–थाङ्ग थोङ्ग द्रिकिद्रिमिङ्कटे थो। क्रिणां क्रिणां सा सा सा।

पुनः तेना तेना तेना ते तेना तेना तेना तेना तेना इआ।

चतुर्थप्रबन्धे– सारिमान–मण्ठतालाधारित चच्चकारो यथा–

**'झक्रेण क्रिटि द्रिमिङ्कट तेना इआ'**। एवं च सप्तमप्रबन्धे अड्डालाधारित चच्चकारोऽस्ति। प्रथमसर्गस्य द्वितीयप्रबन्धे 'ध्रुवपदेन' सह आभोगस्य निर्देशः कृतः। अष्टमप्रबन्धान्तिमभागे कविः चयनिः नित्यानन्दः स्वप्रबन्धं 'ललित– स्वर–पाट–तेना–ज्ञानकरागबन्धं शङ्करप्रियङ्करं प्रबन्धं सहृदयानन्दम्' इति आख्याति। दशमसर्गस्य षष्ठश्लोके कविः 'पाट–ताल–स्वर–विरुदपदातानतेनोपबन्धं' प्रबन्धमिति निर्दिशति (१०.३)। कविः केवलमुत्कलेषु प्रसिद्धस्य कुड्डुकतालस्य व्यवहारं करोति। २६ प्रबन्धे 'सूडप्रबन्धः' प्रयुक्तः। २३, २७, ३४, ४१ तम गाथासु राग–तालानां निर्देशो नास्ति।

## ३. शैली

ग्रन्थरचनायां कविना द्विविधा शैली अनुसृता। कुत्रापि शृङ्गारकला

वैदर्भी, अन्यत्र आवश्यकतया गौडी, अन्यरीतयश्च प्रयुक्ताः। प्रबन्धगीतेषु बहुस्थलेषु स्वल्पसमस्तपदानां व्यवहारं दृश्यते, यथा–

**चलदलकलयसि किलशशिचूडम्, परिहृतपरिजनमत्र निगूढम्।**

**क्वन विजने केलिवने, विलयसि पशुपतिरिह गहने।।**[१४]

पुनश्च–

**कलय कलावती दलितलवङ्गमलयनिलमनिलं सुखसङ्गम्।**

**यो वितनति पुलकमयमङ्गं जीवयतीव परेतमङ्गम्।।**[१५]

एकेन समस्तपदेन एकं पादं विरच्य स दीर्घसमासप्रयोगं दर्शयति। यथा–

**मृदुलमृणालभुजारुणकुवलयमञ्जुलकरतलशोभा।**

**संहतमिथुनरथाङ्गधृतस्तनकनककलशसदाभा।।**[१६]

सूर्यास्तवर्णनायां गौडीरित्याः प्रयोगो लक्षणीयम्– **मार्तण्डे जगदण्डदीपकलिकार्यातिदिष्टे चिरादासीदुर्ध्वकपालपालिकलितं यत्कज्जलं श्यामलम्। नीरन्ध्रसमभारितेन गगनं व्याजान्धकारात्मना, यत्रोन्मीलित–निर्विवेकवद–भून्नोतारतम्यस्थितिः।**[१७]

## ५. भक्तिः

महाकाव्यमिदं शैवानां परमादरणीयम्। अग्निचिन्नित्यानन्दस्य पृष्ठपोषको नवदुर्गाधिपतिः गदाधरमान्धाता–शरणकुलस्य लडुकेश्वरशिवस्य परमभक्तः आसीत्। स्वयं नित्यानन्दो वैष्णवोऽपि शैवः आसीत्। कविः स्वस्य कृते स्वस्य पृष्ठपोषकश्च उभौ भुवनेश्वरः (एकाम्रतीर्थः) पाश्वर्वावर्त्तिस्थान–निवासिनौ आस्ताम् गीतगोविन्दस्य पारम्परिकः श्रीराधाकृष्णलीलावर्णनाशैल्या

---

१४. तत्रैव, प्रबन्धः, ३६

१५. तत्रैव, प्रबन्धः, २६

१६. तत्रैव, प्रबन्धः, ३३

१७. तत्रैव, ८.३०

कविः शम्भुभक्तिपरकं काव्यमकरोत्। उत्कलेषु तदा शैव– वैष्णवधर्मयोः एकत्रप्रसारः उभयधर्मयोर्मध्ये समन्वयश्चाघटत्। कवेः शिवभक्तिपरकाः श्लोकाः, प्रबन्धाश्च अतीवरुचिराः भक्तभक्तिजनिकाश्च। ग्रन्थारम्भे भवानी–शङ्करयोः वन्दनापरक–श्लोकावली दृश्यते। यथा–

**शोणां पाणितले कलेवरिमदं गौरं गले श्यामलम्**
**विद्युत्पिङ्गलमीक्षणे निटिलगे नेत्रद्वये पाटलम्।**
**राजत्कुण्डलिराजकुण्डलमलं शीतांशुखण्डोज्ज्वलम्**
**वन्दे किञ्चन शैलभूपतनया सौभाग्यभोग्यं महः।।**[१८]

ग्रन्थस्य छत्रे छत्रे शिवभक्तिपरकाणि सङ्गीतान्यवलोक्यन्ते, यथा महाप्रभुलिङ्गराजस्य स्तुतिर्यथा–

**मधुसमयकुसुममयवल्लिपुञ्जे, लिङ्गराजं नौमि राजतमेकान्तकुञ्जे।**
**कोदकिलावलीकलितकाकलीके, लिङ्गराजं नौमि**
**मधुलोलमधुपावलीके।।**[१९]

## ६. ग्रन्थछाया

शिवलीलामृतस्य विषयवस्तु–भाव–भाषाप्रभृतिषु पूर्ववर्त्तिकवीनां स्पष्टछाया दृश्यते। अत्र श्रीमद्भागवतस्य दशमस्कन्धे वर्णिता रासलीलाऽनुसृता। कालिदासकुमारसम्भवस्य, जयदेवगीतगोविन्दस्य च स्पष्टच्छाया अत्र दृश्यते। भागवते भगवान् श्रीकृष्णः गोपिकानां चित्तविनोदनार्थं वंशीमवादयत्। शिवलीलामृतऽपि कृष्णः इव शिवो वेणुं वादयते, यथा–

**तासां प्रसदयांमुख्यादथ प्रख्यातवैभवः।**
**दिदर्शयिषुरात्मानं वेणुमक्कणयद्भवः।।**[२०]

---

१८. तत्रैव, १.३

१९. तत्रैव, प्रबन्धः, ३०

२०. तत्रैव, ६.२८

पुनश्च–

**निपीय मुरलिनादं प्रसादं गिरीशस्य ताः।**
**ततश्चकितनेत्रान्तास्तत्कान्तास्तर्कमब्रुवन्।।**[२१]

पुनश्च–

**मृद्विका ध्रुवधारया विरचिता मृद्वी न वणोरियम्।**[२२]

कवितायामपह्नुत्यलङ्कारद्वारेण वेणुध्वनिः प्रशंसिता। श्रीमद्भागवत–मिवात्रापि कानने विहारः, पार्वती–शिवयोरन्तर्ध्यानं, विरहिणीनां शिवान्वेषणं, विलापः, शिवस्य पुनराविर्भावः, रासक्रीडातोयक्रीडाप्रभृतयश्च वर्णिता। अत्र शिवपुराणस्य स्पष्टछायाऽपि विद्यते। शिवः गोपालिनीवल्लभः (१०.१), नटवरः, रासरसिकः (४२ प्रबन्धः) इत्याद्युच्यते। सः **'श्याम–शङ्करो'** भूत्वा वेणुः वादयते।

पार्वती गोपीरूपं धारयति, एकाम्रतीर्थे छद्मवेशेन भ्रमतीति कवेः कृष्णभक्तेः निदर्शनमिदम्। यथा–

**पान्ती तापात् पिपशतवधगामगादथयोगाद।**
**गोपीरूपं विपिनममुना ताः सवत्सा न्यरोत्सीत्।।**[२४]

पुनश्च–

**दुग्धं स्वयं नवदुग्धं दुग्धं भुवनाधिनाथलिङ्गस्य।**
**अङ्गे सिञ्चती सा कञ्चन मनसः प्रसादमगादुमा।।**[२५]

---

२१. तत्रैव, ६.२६

२२. तत्रैव, ६.३०

23. Śiva, Purāna, O.S.M.Mass, Part-III, ch, - XXVIII

२४. शिवलीलामृतमहाकाव्यम्, ७.३२

२५. तत्रैव, ७.३३

पुनश्च–

**त्रिभुवननायककलिङ्गादैशानीमास्थितामाशाम्।**
**प्रमथमहीपतिमहीषीं तदवधि गोपालिनीति गायन्ति।।**[२६]

इत्यादिः। नीलकण्ठः गोपालकृष्णो भवति–

**अथ तत्र शिखण्डमण्डनस्तडिदम्वरस्तदनुविडम्बिताम्बुदः।**
**वनमाभारि हृदस्थलः कलस्वनवशमागमदमाप्रियङ्करः।।**[२७]

एकत्रिंशप्रबन्धे एवंभूता मञ्जुलवर्णना विद्यते–

**'नीलकण्ठशिखण्डमण्डनचारुकेशम्।**
**मौलिमञ्जुलकुशुमसञ्चयसंनिवेशम्' इत्यादिः।**

गोपिकाः कृष्णविरहिण्यः भागवते यथाऽभवत्, तथैवात्र दृश्यते, रात्रौ कानने शिवं न दृष्ट्वा ताः वनतरु–मृगादीन् तस्य विषये पृच्छन्ति–

**अथ तास्त्रिनयनवनितान्तरतापं प्रलापगिरम् ।**
**पृच्छन्ति स्म पुरःस्थान् वनतरुवीरन्मगान्मृग्यमाणाः।।**

पुनश्च–

**चलदलकलयसि किल शशिचूडम्, परिहृतपरिजनमत्र निगूढम्।।**[२८]

मध्यकालीनभारतवर्षे राधा–कृष्णलीलायाः व्यापकप्रसारोऽभवत्। मरहट्टशासनाधीने उत्कले कृष्णभक्त्याः प्राधान्यमासीत्। कविर्नित्यानन्दः तत्कालीनं भक्तिस्रोतसा राधा–कृष्णलीलया च अनुप्राणितः सन् शिवलीलामृतं कृष्णचरितानुरूपं रचितवान्।

कालिदासस्य कुमारसम्भवे पार्वतीजन्मादारभ्य कार्त्तिकेयकर्त्तुकतार–कासुरनिधनं यावत् वर्णितम्। शिवलीलामृते कुमारसम्भवमिव

---

२६. तत्रैव, ७.३४

२७. तत्रैव, ८.८

२८. तत्रैव, प्रबन्धः, ३६

मदनभस्मदर्शनात् पार्वतीतपः सिद्धान्तादयः वर्णिताः। कुमारसम्भव–पञ्चमसर्गस्य विषयवस्तुः शिवलीलामृतस्य द्वितीयसर्गे वर्णितः। कुमारसम्भव–पञ्चमसर्गस्य ३,५,२८,३०,८३ श्लोकानां शिवलीलामृतस्य ६,१०,१३,१४,१८ श्लोकैः क्रमेण तुलना करणीया। पुनश्च ब्रह्मचारिणः पार्वतीं तपोविषयकप्रश्नं (५,३३–५०) पार्वतीसख्या उत्तरं (५.५१–६१) कालिदासो वर्णयति, नित्यानन्दः शिवलीलामृतस्य १२श – १३ श च प्रबन्धे तद् वर्णयति। कालिदासरीत्या (८. ३–४) शिवलीलामृते विवाहहस्तग्रन्थिं शृङ्गारविलासादयः वर्णिताः, यथा–

**कम्बुना वितरणाम्बु संभृतं वेपथुश्लथकराम्बुजच्युतम्।**
**खेसपूरपरिपुरणात् सन्दधे पुनरलक्षितं हरः।।**[२९]

पुनश्च–

**विन्धुन्वाना नानाकरकिशलयं कोपनपरा**
**निषेन्धन्ती कान्तं दृढतनुपरीरम्भरभसम्।**
**दधत्यन्तः सन्तोषणमपिमनोजन्मवशगा**
**नवोढा वोढारं तमरमयतैव प्रियतमा।।**

गीतगोविन्दशैलीं कविः मुख्यभावेनानुसरतीत्यतः छायाग्रन्थे सर्वत्रानुभूयते। प्रबन्धेषु श्लोकेषु च भावस्य भाषायाश्च सामञ्जस्यं विद्यते। गीतगोविन्दस्य वसन्तवर्णनायाः छाया (१.७)–

**वसन्ती वासन्ती सरभसपरीरम्भचटुले**
**रसाले सारभं सुदति कलकण्ठी निगदती।**
**समासङ्गेऽनङ्गे परिचरिता कान्तं प्रियतमा**
**न मानस्य श्रीमानयमवसरः पुष्पसमयः।।**[३०]

पुनश्च (१.८) 'दरविदलितमल्लीवल्लीचञ्चत् पराग' इत्यादिगीत

---

२९. तत्रैव, ३.१८

३०. तत्रैव, ६.१३

गोविन्दश्लोकस्य छाया शिवलीलामृते विद्यते, यथा–

**स्फुटन्मल्लीवल्लीमधुरिमधुरीणो मधुरसौ**
**वनोद्देशोऽप्येषोऽनुपदहृदयानन्दजनकः।**
**सुधामूर्त्तिश्चायं प्रवलितमनोजन्मविभवो**
**नवोदञ्चद्भावप्रणयिनिमनश्चञ्चलयति।।**[31]

गीतगोविन्दस्य चतुर्थ–द्वितीयप्रबन्धाभ्यां शिवलीलामृतस्य ३८श, ४२श प्रबन्धयोः क्रमेण तुलनाकर्त्तुं शक्यते।

## ७. एकाम्रक्षेत्रप्रीतिः

जनाकीर्णवारणस्यां विजनवनविहारार्थं पार्वती शिवं गुप्तस्थान सङ्केतविषये यदा पृच्छति, शिवस्तान् **'एकचूतम्'** अथवा **'एकाम्रक्षेत्रम्'** निर्दिशति। दारुब्रह्म (जगन्नाथः) निवासस्थलीपुरीविरजा क्षेत्रयोर्मध्ये स्थितम् उत्कलदेशस्य **'गुप्तवाराणसीक्षेत्रम्'** एकाम्रक्षेत्रमिति जैमिनीखण्डे वर्णितम्। तत्स्थाने अनन्तपुरुषोत्तमः (अनन्तवासुदेवः) विराजते। गन्धवतीनद्याः सुगन्धिसमीरणेन काननपल्लवकुसुमानि सञ्चालितानि सञ्चालितानि भवन्ति। मुनिजनानां शान्तिमयवासस्थानमिति विद्यन्ते। सर्पनकुलयोः, दृश्येन–पतङ्गयोः, व्याघ्र–कुरङ्गयोश्च शत्रुता तत्र नास्ति, यथा–

**नागानां नकुलैर्भवेन्नकलहो यस्मिन् प्रशान्तात्मभिः**
**श्यनोऽप्येन उपाददीत पतगालम्भार्जितं यत्र न।**
**निर्वैरैः प्रशमायनैर्मुनिजनैरध्यासिते दृश्यते**
**प्रीत्या यत्र समं कुरङ्गशिशुभिः शार्दुलविक्रीडितम्।।**[32]

शार्दुलविक्रीडितछन्दसि **'शार्दुलविक्रीडितम्'** पदप्रयोगेऽपूर्वसंयोगश्च। पार्वतीदेव्या 'देवीपादहरायाः' शिवेन 'विन्दुसरोवरस्य' च सृष्टिरभवत्। गन्धवतीतीरकाननं निपुणं वर्णितम्। यथा–

---

३१. तत्रैव, ६.६

३२. तत्रैव, ७.२५

**सुगन्धिभिर्गन्धवतीसमुद्भवैर्नवैः सरोजैरधरधिवासितान्तरम्।**

**तरङ्गसङ्गातितुषारमारुतवनप्रियव्रतमधुव्रतारुतम्।।**[३३]

अष्टमसर्गस्य ३३ तमे सम्पूर्णप्रबन्धे गन्धवतीनदी युवतीरूपेण वर्णता, यथा—

**सुन्दरदलदरविन्दुमुखीमुखरभ्रमरध्वनिगीता।**

**शैवलकोमल नालकलापवतीरससम्पदुदिता।।**

कलियुगे गङ्गा गन्धवतीरूपेण प्रवहतीति कपिलसंहितायां वर्णितम्। यथा—

**काननोद्भपुष्पाणां केतकीनां लतान्तरे**

**केशराणां च पद्मानां चम्पकानां विशेषतः।**

**फलानां वायुसंगर्गाद्गन्धार्थाभान्महीतले**

**नाम्ना गन्धवती गङ्गे भवैकाम्रवने शुभे।।**[३४]

कोटितीर्थस्य (तीर्थैः कोटिभिरूत्तमैरभिदधुर्या गुप्तवाराणसीम्—७.२१), ब्रह्मलिङ्गस्य ब्रह्मेश्वरस्य वा (एकान्ते ब्रह्मलिङ्गं प्रणयभरनतं कन्धरं संददर्श—१०.२३), लिङ्गराजस्य ४०तमे प्रबन्धे च वर्णना कृता। लिङ्गराजस्य भव्यस्थितिर्यथा—

**मधुसमयकुसुममयवल्लिपुञ्जे।**

**लिङ्गराजं नौमि राजतमेकान्तकुञ्जे।।**

लिङ्गराजस्य वर्णना अत्रापि पुनः—

**तत्रासौ चन्द्रचूडं सितललितमुखं नागयज्ञोपवीतं।**

**त्रियक्षं शार्दुलसाराजिनवसनधरं कुन्दकर्पूरगौरवम्।।**

**गौरीवामाङ्कदेशं वरपरशुमृगाभीतिहस्तं महेशं।**

---

३३. तत्रैव, १०.२७

३४. कपिलसंहिता, १७.८२

**रत्नालङ्कारवेशं सरसिरुहसमासीनमालोकते स्म ।।**[३५]

**कविः पाण्डित्यम्**

चयनिः नित्यानन्दः विपुलवैदुष्यविमण्डितः आसीत् । शिवलीलामृते कवेः विद्वतयाः वहुनिदर्शनानि सन्ति ।

**(१) अलङ्कारप्रयोगः**

कविः नानाविधालङ्कारान् प्रयुज्य स्वीयकृतित्वं प्रमाणी करोति । कविरयं सर्वथा अनुप्रासप्रियः । अनुप्रास–यमकादयः शब्दालङ्काराः ग्रन्थे व्यापकभावेन प्रयुक्ताः, यथा–

**संसार सारनायिका लतालतानन चारवम्**
**ससारतारलोचना प्रसारिकोकिलारवम् ।**
**अनन्तपुरषोत्तमप्रभुप्रभावपालितं**
**वनं तदेकचूतकं नवप्रवाललतिलम् ।।**[३६]

पुनश्चं–

**सुगन्धिना गन्धवतीनभस्वता वनं तदा धूनितसूनपल्लवम् ।**
**ददर्श संक्रन्दननन्दनादपि प्रति प्रतीकाद्भुतमद्रिनन्दता ।।**[३७]

ग्रन्थे ८.६ श्लोके उपमा, ८.४ श्लोक मालोपमा, ८.३, ५.१३ पद्ययोः उत्प्रेक्षा, ६.८, ४.२७, इत्यत्र विरोधाभासाश्च विद्यन्ते । २६ तम प्रबन्धे निरोष्ठ्योगीतं यथा–

**शतकिरणकिरणराजरञ्जिते गीततालकङ्कणगणशिञ्जिते ।**
**ललितललितसदनराजदङ्गणे रतिरसचलजन इह ललनागणे ।।**[३८]

सर्वलघुपद्यं यथा–

---

३५. शिवलीलामृतमहाकाव्यम् १०.२७

३६. तत्रैव, ७.२३

३७. तत्रैव, ७.२४

३८. तत्रैव, प्रबन्धः, २६

**सुदति सुदति विषम विशिखवितितिभिरति–**

**विरहियुवतिहृदयमदयरतिपतिरिहसमय उदयति।।**

**अपि मुनिजनतपचितवनविहरिणरतिं रचयतिसति**

**मधुरमधुरजनिरनिभृतपरभृतविरुति।।**

**एवं च अन्यालङ्काराः सन्ति।।**

**उपसंहारः**

शिवलीलामृतकाव्यात् ज्ञायते यत् कविनित्यानन्दः उत्कलीयपरम्परा–प्रभावितो लक्ष्यते। अतः तदनुसारेण शिवस्य चत्वारः पुत्राः अभवन्। ब्रह्मपुराणे जया वर्णशक्तिः, पार्वत्याः सखीति च वर्णिता। नन्दि–भृङ्गीश्वरयोः शिवसङ्गमात् जन्मवृत्तान्तमाकर्ण्यापि उदारहृदया पार्वती–शिवयोः मिलनं नेर्ष्यान्विताः क्षमते, स्वीकृतिं च ददाति, सत्यवत्याः पुत्रद्वयं स्वपुत्रभावेन स्वीकृत्य स्वकीयमहनीयतां प्रतिपादयति च। शैवस्मार्त्तानां च भक्ति–सरसतामधिकृत्य उपादानानि एकत्रीकरोति। काव्यसंगीतधर्मयोः मिश्रणं कुरुते। पण्डितानां साधारणजनानां च कृते गाम्भीर्यपूर्णमर्थं मधुवर्षिशब्दावलीसमन्वितं प्रयुनक्ति। क्षुद्रकलेवरविशिष्टमपि शिवलीला परकमिदं पूर्णाङ्गमतिप्रशंसनीयं गीतिकाव्यम् इत्यत्र नास्ति सन्देहः।

***

# संस्कृतवाङ्मये आदर्शभूतं जीवनस्वरूपम्

**डॉ० अभिमन्युसिंहः**

*सहाचार्योऽध्यक्षश्च, संस्कृतप्राकृतभाषाविभागः*

*लखनऊविश्वविद्यालयः, लखनऊ*

**शोधसारः**

गतिशीलता एव जीवनम्, अन्यथा जायते जीवने जडत्वम्। यत्र गतिशीलता न स्यात् तत्र जीवनं किं जीवनसंज्ञाम् अर्हति। संस्कृतवाङ्मये गत्यर्थकधातूनां बाहुल्यं मानवजीवने गतिशीलताम् एव द्योतयति। संसारे सर्वे जनाः जीवनस्य साफल्यं वाञ्छन्ति। किन्तु तेषामेव जीवनं सफलं ये तेजस्विनः सन्ति, ये धीराः सन्ति, मनस्विनः सन्ति, ये च परोपकारिणः सन्ति। अतः धर्मयुक्तजीवनम् एव साफल्यमधिगच्छति।

संस्कृतवाङ्मये अनेन प्रकारेण धर्मस्य विविधाः चर्चाः अभवत्। एवमपि सिध्यति यत् मानवजीवने धर्मस्य प्राधान्यम्। जीवनधारणं धर्मं विना न भवति। विविधरूपेऽपि धर्मः अस्माकं समग्रं जीवनं व्याप्नोति। क्वचिद् राजधर्मः, क्वचित् समाजधर्मः, क्वचित् व्यक्तिधर्मः, क्वचित् समष्टिधर्मः संस्कृतवाङ्मये जीवनस्य समग्रं रूपं प्रतिपादितं वर्तते।

गतिशीलता एव जीवनम्, अन्यथा जायते जीवने जडत्वम्। जडत्व–विशिष्टं जीवनं न तु श्रेयः, न च श्रेयस्करं नृणाम्। यत्र गतिशीलता न स्यात् तत्र जीवनं कि जीवनसंज्ञाम् अर्हति? संस्कृतवाङ्मये गत्यर्थकधातूनां बाहुल्यं मानवजीवने गतिशीलताम् एव द्योतयति। श्रुतिरपि प्रेरयति–

**चरैवेति चरैवेति**[१]

सर्वे जनाः जीवनस्य साफल्यं वाञ्छन्ति। किन्तु तेषामेव जीवनं सफलं, ये तेजस्विनः सन्ति, ये धीराः सन्ति, मनस्विनः सन्ति, ये च परोपकारिणः सन्ति। अस्मिन् विषये भर्तृहरिणा कथितं यत्–

---

१. ऐतरेयब्राह्मणम् ३३

**सिंह शिशुरपि निपतति मदमलिनकपोल भित्तिषु गजेषु।**
**प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसां हेतुः।।**[२]

साधव एव परोपकारिणो भवन्ति, ते एव धीराः, ते एवं मनस्विनः तेजस्विनश्च परोपकारिणां विषये भर्तृहरिः कथयति–

**किं तेन हेमगिरिणा रजताद्रिणा वा**
**यत्राश्रिताश्च तरवस्तरवस्त एव।**

**मन्यामहे मलयमेव यदाश्रयेण**
**कङ्कोलनिम्बकुटजा अपि चन्दनाःस्युः।**[३]

संस्कृतवाङ्मये साधुजनानाम् एव प्रशंसा सर्वत्र दृश्यते। तेषां सङ्गतिः सर्वेषां हितकारी यथोक्तम्–

**स धूनाम् दर्शनम् पुण्यं तीर्थभूता हि साधवः।**
**कालेन तीर्थ फलति सद्यः साधुसमागमः।।**[४]

मनस्विनां जीवनं साधारणं न भवति अपितु तेषां जीवनं पुष्पगुच्छवद् भवति–

**कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनाम्।**
**मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा।।**[५]

सम्पूर्ण भूमण्डले जिजीविषा न केवलं मानवेषु लभ्यते, सा तु मानवेतरेषु सकलेष्वपि जीवेषु दृश्यते। कोऽपि मृत्यु नाङ्गीकरोति, यथाकथञ्चित् जीवितुम इच्छति। किं जिजीविषैव जीवनस्य हेतुः। नास्ति तद्व्यतिरिक्तं किञ्चित्। नास्ति चेत्, मानवेतरेभ्यो मानवाः कथं गरीयांसः। किं पशु–पक्षि–कृमि–

---

२. नीतिशतकम् ३८

३. नीतिशतकम्– ८०

४. चाण्क्यनीतिः १२/०८

५. नीतिशतकम्– ३३

कीटवत् मानवजीवनं जीवनसंज्ञाम् अर्हति। अस्मिन् सन्दर्भे भर्तृहरिणा सत्यमेवो उक्तवान्।

**आहारनिद्रा भयमैथुनञ्च, सामान्यमेतत् पशुभिर्नराणाम्।**

**धर्मो हि तेषामधिको विशेषः, धर्मेण हीनोः पशुभिः समानाः।।**[६]

अत्र जिज्ञासा भवति यद् धर्मः कः? अस्य विषये मनुस्मृतौ प्रतिपाद्यते–

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।**[७]

वैशेषिकदर्शनेऽपि उच्यते–

**यतोऽभ्युदय निःश्रेयससिद्धि स धर्मः।**[८]

अस्य सूत्रस्य भाष्यं कुर्वता ब्रह्ममुनिना कथितम् न केवलं सांसारिक–सुखमैश्वर्यं च धर्मः, न मोक्षचिन्तनमात्रं धर्मः, किन्तु उभयसहभावो धर्मः। धर्मऽाश्रित्य अर्थकामौ साध्यौ तौ एव अभ्युदयः। धर्ममुपजीव्य निःश्रेयसं मोक्षः साध्यः। एवं धर्मतः प्रयोजनद्वयं साध्यम्। वाल्मीकि रामायणेऽपि उत्तरकण्डे कथितम्–

**धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रज्ञाः।**

**पस्माद् धारयते सर्व त्रैलोक्यं सचराचरम्।।**[९]

ईश्वरकृष्णः साङ्ख्यकारिकायामपि कथयति–

**धर्मेण गमनमूर्ध्वं गमनमध्यस्ताद् भवत्यधर्मेण**[१०]

संस्कृतवाङ्मये अनेन प्रकारेण धर्मस्य विविधाः चर्चाः अभवत्। एवमपि सिध्यति यत् मानवजीवने धर्मस्य प्राधान्यम्। जीवनधारणं धर्मं विना न भवति।

---

६. चाणक्यनीतिदर्पणा १७/१७

७. मनुस्मृतिः ६/६२

८. वैशेषिकदर्शनम् १/१/२

९. वाल्मीकिरामायणम्, उत्तरकाण्डम्, उत्तरार्धे द्वितीयसर्ग, प्रक्षिप्तश्लोक, ७

१०. साङ्ख्यकारिका ४४

विविध रूपोऽपि धर्मः अस्माकं समग्रं जीवनं व्याप्नोति।

क्वचिद् राजधर्मः, कवचित् समाज धर्मः, क्वचिद् व्यक्तिधर्मः, क्वचित् समाष्टिधर्मः। संस्कृतवाङ्मये जीवनस्य समग्रं रूपं प्रतिपादितं वर्तते। ये जनाः विचारकाः सन्तिः ते जीवनं गाम्भीर्येण पश्यन्ति। ते जीवने उर्ध्वगतिम् एवं वाञ्छन्ति। ते ऐहिकं जीवनं पर्याप्तं न मन्यन्ते। ते जीवनं सूक्ष्मेक्षिकया पश्यन्ति। ते पुरुषार्थम् एवं जीवनस्य लक्ष्यं मन्यन्ते। सामान्याः जनाः पुरुषार्थम् परिश्रमस्य पर्यायं मन्यन्ते, किन्तु विवेकशीलाः जनाः अत्यन्तपुरुषार्थम् एव श्रेयस्करं मन्यन्ते यथा च साङ्ख्यसूत्रम्–

**त्रिविधदुः खात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः।**[११]

संस्कृतवाङ्मये धर्मः, अर्थः, कामः, मोक्षः इति पुरुषार्थ चतुष्ट्यं वर्णितम्। एतेन समग्रं जीवनं व्याप्तं पुरुषार्थचतुष्टये धर्मस्य स्थानं प्रमुखम्।

अर्थः धर्ममूलः स्यात्।

आचार्य मनुः कथयति–

**ब्राह्मे मुहुर्ते बुध्यते धर्मार्थौ चानुचिन्तयते।**[१२]

अर्थात् पूर्वे धंर्म चिन्तयेत् ततश्च अर्थम्।

एष एव जीवनादर्शः। पुरुषार्थचतुष्ट्ये कामस्य स्थानं तृतीयं वर्तते। किन्तु वर्तमान समये पुरुषार्थचतुष्टये कामस्य प्राधान्यं दृश्यते, तस्य पूत्यै अर्थः अपेक्ष्यते, सोऽपि धर्मेण स्यात् अधर्मेण वा इति नैव चिन्त्यते। मोक्षचर्या तु विलुप्तैव सम्प्रति एवं प्रतीयते। यत् मोहः एव महान् पाशः यस्मात् मोक्षः दुःसाध्यः। पाशाः एव दुःखत्रयं जनयन्ति, पाशाः एव क्लेशान् जनयन्ति। दुःखत्रयस्य अभिधातं तु सर्वे अनुभवन्ति।

तद् विषये श्वेताश्वतरोपनिषद् प्रतिपादयति–

---

११. साङ्ख्यसूत्रम् १/१

१२. मनुस्मृतिः ४/६२

**"ज्ञात्वा देवं सर्वपाशायहानिः**

**क्षीणै क्लेशैर्जन्म–मृत्युप्रहाणिः[१३]**

**यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।**

**तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति।।[१४]**

यदि वयं सूक्ष्मेक्षिकया पश्यामः तर्हि संस्कृतवाङ्मये मानवजीवनस्य पक्षद्वयं श्रेयः प्रेयश्च दृश्यते यथा यमराजः कथयति–

श्रेयश्च प्रेयश्च मनुष्यमेत–

**स्तौ सम्परीत्यविविनक्ति धीरः।**
**श्रेयो हि धीरोऽभि प्रेयसो वृणीते**
**प्रेयो मन्दो योगक्षेमाद् वृणीते।।[१५]**

उभयपक्षे मनुष्यः जीवनं मधुमयं वाञ्छति। सः प्रार्थयति–

**मधुमन्मे निष्क्रमणं मधुमन्मे परायणम्।**
**वाचा वदामि मधुमत् भूयासं मधुसन्दृशः।।**

**मम जीवनं मधुमयं भवेत्।[१६]**

तृष्णा एव असन्तोषं जनयति। असन्तोषः मनुष्यं मनसा दरिद्रं विध्धाति। कथिञ्च–

**वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः**
**सम इह परितोषः को निर्विशेषो विशेषः।**

**स तु भवति दरिद्रो यस्य तृष्णा विशाला**
**मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः**

---

१३. श्वेताश्वतरोपनिषद् १/११

१४. श्वेताश्वतरोपनिषद् ०६/२०

१५. कठोपनिषद् १/०२/०२

१६. अथर्ववेदः ०१/३४/०३

**'सन्तोष एवं पुरुषस्य परं निधानम्।[१७]**

इति कथनम् मानवजीवनस्य आदर्श दर्शयति।

अत्र श्रेयो हि धीरो—अभिप्रेयसो वृणीते अत्र शब्दः विचारणीयः। यः धीरः भवति स एव श्रेयः वृणीते न तु मन्दः। यः प्रेयः वृणीते सः मन्दः। 'धीरः कः' इति विषये भर्तृहरिः प्रोक्तवान् —

**न निश्चितार्थाद् विरमन्ति धीराः**

तथा च —

**कान्ता कटाक्षविशिखा न लुनन्ति यस्य**
**चित्तं न निर्दहति कोपकृशानुतापः।**
**तर्षन्ति भूरिविषयाश्च न लोभपाशैः**
**लोकत्रयं जयति कृत्स्नमिदं स धीरेः।।[१८]**
**कालिदासेन अपि धीरस्य परिभाषा एवं कृता**
**विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः[१९]**

एतद् गुणविशिष्टः पुरुषो धीरः भवति। एवं च धीरोऽभिप्रेयसः श्रेयः वृणीते। किन्तु न सन्ति सर्वे धीराः। यः प्रेयः वृणीते सोऽपि संसारे धन्यतां याति। संसारे सर्वे जनाः योगक्षेमम् इच्छन्ति योगक्षेमं निर्वहन्तः जनाः श्रेयोऽभिमुखः भवेयुः। भगवद्गीतायां भगवान् श्रीकृष्णः स्वभक्तान् कथयति—

**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।[२०]**

योगक्षेमार्थ भगवद्भक्तिः परमावश्यकी, भक्तियुक्तं जीवनम् एव वास्तविकम्, भक्तिः एव जीवनादर्शः भक्ति एव मानवजीवनस्य लक्ष्यम्।

पुरुषार्थ चतुष्टये धर्मादनन्तरम् अर्थस्य स्थानम्। अर्थं विना जीवनं

---

१७. वैराग्यशतकम्— ५३

१८. नीतिशतकम् — १०७

१९. कुमारसम्भवम्— १/५९

२०. श्रीमद्भगवद्गीता— ९/२२

व्यर्थम् एव मन्यते। अर्थस्य महत्त्वं को न जानति? अर्थेन विना संसारस्य किमपि कार्यं न सिध्यति कथितं च–

**यस्यास्ति वित्तं स नरः कुलीनः**
**पण्डितः स श्रुतवान् गुणज्ञः।**
**स एव वक्ता स च दर्शनीयः**
**सर्वे गुणाः काञ्चनमाश्रयन्ति।।**[२१]

जीवने अर्थस्य उपेक्षा कर्तुं न शक्यते, किन्तु अर्थस्य प्राधान्यं सार्थकं जीवनमपि निरर्थकं कुरुते यद् अर्थस्य प्राधान्येन तृष्णा प्रवर्धते अशान्तिश्च तथा च जीवने विलाशिता उत्पद्यते, संस्कृतवाङ्मये यस्या निन्दा क्रियते।

एकस्मिन् श्लोके आदर्शभूतं जीवनदर्शनं वण्यते–

**अजरामरवत् प्राज्ञो विद्यामर्थश्च चिन्तयेत।**
**गृहीत एव केशेषु मृत्युना धर्माचरेत्।**[२२]

दैवस्य निर्माणं मानवस्य कर्मभिरेव। कर्म कीदृशं स्याद् इत्यपि व्याख्यायते संस्कृत वाङ्मयेगहना कर्मणो गतिः[२३] इति गीतोक्तं सर्वदैव विचारणीयम्। मनुष्यः यथा कर्म करोति तस्य फलं तथैव लभते–

**अवश्यंमेव भोक्तव्यं कृतकर्म शुभाशुभम्।**
**निश्चययं ह्रदये कृत्वा विचरस्व यथासुखम्।**[२४]

इति विचार्य एव कर्म कर्तव्यम्। तथा च

**उचितमनुचितं वा कुर्वता कार्यजातं**
**परिणतिरवधार्या यत्नतः पण्डितेन।**

---

२१. नीतिशतकम् –४१

२२. हितोपदेशः, मित्रलाभ– ०३

२३. श्रीमद्भगवद्गीता ४/१७

२४. श्रीमद्देवीभागवत ३१/२५

**अतिरभसकृतानां कर्मणामविपत्तेः**
**भवति हृदयदाही शल्पतुल्यो विपाकः।।**[२५]

अस्मान् विषये महाकविः भारविः अपि सम्बोऽधयति–

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।**[२६]

संसारे सर्वेषां विचाराः भिन्नाः परस्परम् यथा उक्तम्–मुण्डे मुण्डे मतिर्भिन्ना। अतएव सर्वत्र वैषम्यम् दृश्यते। प्रकृतिरेव यदा गुणवैषम्यं धारयति तदैव तु सृष्टिजायते, साम्यावस्थायां प्रलयः भवति। यदा सृष्टेः मूले विषमता वर्तते तर्हि कथं न भवेत् विचारेषु भिन्नता, कर्मसु भिन्नता, आचारेषु भिन्नता। सर्वेषां जनानां लक्ष्यमपि एकम् नास्ति तथैव जीवनमपि भिन्नम्। एकस्मिन्नेव परिवारे अनेके जनाः भवन्ति, पितुः एकत्वमपि तथापि परस्परं विचारेषु भिन्नता एव दृश्यते। संसारस्य शोभा वैषम्यमेव। यथा वाटिकायां विविधाः पादपाः शोभन्ते।

**जीवनस्य आस्तिक, नास्तिक स्वरूपं दृश्यते।**

वर्तमान काले नास्तिकानामेव बाहुल्यम्। ते वर्तमानम् एव अवेक्षन्ते। यदास्वार्थपरान् नास्तिकान् पश्यन्ति सामान्याः जनाः तथैव आचरन्ति।

प्रत्यक्षवादिनो जनाः स्वार्थपरान् अन्यायनितरान् जनान् दृष्ट्वा स्वयमपि अन्यायं कर्तुं प्रोद्यताः भवन्ति। तेषामपि जीवनं स्वार्थस्यैव प्राधान्यं जायते। श्रीभर्तृहरिणा जनानां श्रेणयः विभाजिताः सः कथयति–

**एके सत्पुरुषाः परार्थघटकाः स्वार्थ परित्यज्य ये**
**सामान्यास्तु परार्थमुद्यमभृतः स्वार्थविरोधेन ये।**
**तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निहनन्ति ये**
**ये तु हनन्ति निरर्थकं परहितं ते के न जानीमहे।।**[२७]

---

२५. भोजप्रबन्धः २४

२६. किरातार्जुनीयम् २/३०

२७. नीतिशतकम् ७५

संसारे सर्वत्र कलहमयं वातावरणं सर्वत्र संघर्षः दृश्यते। स्वार्थपूर्तिरेव लक्ष्यम्, सर्वत्र अशान्तिः, सर्वत्र हिंसामयी क्रान्तिः दृश्यते।

मानवः पशुभ्योऽपि निकृष्टतरो भूत्वा आत्मानम् उत्कृष्टतमं मन्यते, महद् आश्चर्यं जनयति स न वेत्ति मानवो यत् स्वार्थेन स्वार्थोऽपि न सिध्यति। स्वार्थ एवं स्वार्थं एष निकृष्टतमो मानवो न जान ति महिमानं परोपकारस्य नावगच्छति यत् स्वार्थोऽपि परोपकारणैव साध्यते। जगति स्वार्थपराणां जीवनं जीवनं न मन्यते।

**यो नात्मना न च परेण च बन्धुवर्गे**
**दीने दयां न कुरुते न च भृत्य वर्गे**
**किं तस्य जीवितफलं हि मनुष्यलोके**
**काकोऽपि जीवति चिरं हि बलि च भुङ्क्ते।।**[२८]

वस्तुतः जीवनं तु परोपकारिणामेव प्रशस्यम्, प्रशस्यतरम्।

**उपसंहारः –**

सङ्क्षेपरूपेण कथितुं शक्यते यत् सामाजिक–जीवने वयं सावधानाः स्याम। स्व स्व कर्तव्यं सर्वैः साधनीयम्। समाजे मानवानां विविधाः विचारधाराः वर्तन्ते। सर्वासु विचारधारासु समन्वयः स्युः। संन्यासिनः प्रशस्याः किन्तु गृहस्थाः ततोऽपि प्रशस्यतराः। जीवने चत्वारः आश्रमः यथा समय सेवनीयाः। जीवने प्रवृत्तिरपि मधुमयी स्यात्, निवृत्तिरपि मधुमयी स्यात्। एवं प्रकारेण संस्कृतवाङ्मये आदर्शभूतं जीवनस्य स्वरूपं वर्णनमस्ति।

***

---

२८. पञ्चतन्त्रम् मित्रलाभः २५

# साङ्ख्यदर्शनानुसारं मनुष्यसृष्टेः क्रमो वैज्ञानिकता च

**डॉ० सूरजरॉयः**

*उकिलपारा (मार्चेंट क्लब),*

*रायगञ्जम्, उत्तरदिनाजपुरम्, पश्चिमबङ्गप्रदेशः*

**शोध–सारः**

भारतीयदर्शनशास्त्राणि मोक्षशास्त्राणि। तत्र जगतो जीवस्य चोत्पत्तेः कारणमन्विष्य तत्कारणैकान्तिकात्यन्तिकत्वमेव मोक्ष इत्युच्यते। जगतो जीवस्य च कारणत्वेन विविधदार्शनिकानां विविधमतानि परिलक्ष्यन्तेऽस्मिभिः। विश्वस्य प्राचीनतमे मोक्षशास्त्रे सांख्यशास्त्रे वा जगतो जीवस्य च मूलकारणत्वेन प्रकृति–पुरषौ मन्यते। सामग्रिकजडानां कारणं प्रकृतिः तथा चेतनानां जीवानां वा कारणं पुरुष इत्युच्यते। जीवेषु सर्वाधिकबुद्धिमन्तारः मनुष्याः श्रेष्ठाः मन्यन्ते। अतः मनुष्यसृष्टेः कस्तावत्क्रमः इत्यस्मिन् विषये चर्चा क्रमेण अधोल्लिखितेन क्रियते।

साङ्ख्यदर्शनस्य सृष्टिप्रक्रिया चतुर्षु क्रमेषु दर्शयित्वा अन्तिमे पर्याये मनुष्यानां सृष्टिप्रक्रियायाः वैज्ञानिकताऽपि आलोचना करिष्यते। साङ्ख्यदर्शनस्य मुख्यपञ्चविंशतिस्तत्त्वानि सन्ति, तेषामुत्पत्तिक्रमः एतादृशरूपेण वर्णीयते सांख्यप्रकरणे सांख्यसप्तत्यां यथा–

**प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्‌गणश्च षोडशकः।**

**तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि।।**

एवं हि तत्त्वोत्पत्तिक्रमः, लिङ्गशरीरोत्पत्तिक्रमः, प्रत्ययसर्गक्रमः, भौतिकसर्गक्रमश्चेति चतुर्षु क्रमेषु मनुष्यसृष्टिप्रक्रिया मूलपत्रे आलोकपातं करिष्यते।

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**

**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।**[१]

---

१. साङ्ख्यकारिका–३

एवं हि पञ्चविंशतितत्त्वोत्पत्तिक्रमः, लिङ्गशरीरोत्पत्तिक्रमः, प्रत्यय सर्गक्रमः, भौतिकसर्गक्रमश्चेति चतुर्षु क्रमेषु मनुष्यसृष्टिप्रक्रियासांख्य दर्शनानुसारम् अधोलिखितेन वर्णनं क्रियते।

**पञ्चविंशतितत्त्वोत्पत्तिक्रमः–** साङ्ख्यसृष्टिप्रक्रियायाः प्राथमिकक्रमस्तु वर्ततेऽयम्। सक्रियाचेतनमूलप्रकृत्या सह निष्क्रियचैतन्यात्मकस्य पुरुषस्य संयोगान्मूलप्रकृतेः प्रधानाद्वा महतोत्पत्तिरजायत। महतो बुद्धेर्वा विकारद्वयं स्यात्। यथा सात्त्विकविकारः धर्म–ज्ञान–विरागैश्वर्यात्मकः। अपरश्च तामसिकविकारः अधर्माज्ञानावैराग्यानैश्वर्यात्मकः। बुद्धेः सात्त्विकविकारात् खलु प्रकृतिलयः पुनः तामसिकविकारात् संसारप्राप्तिर्भवति। रजो गुणस्तूभयोः विकारयोः सहायको वर्तते। तस्मादेव महतो बुद्धेर्वा अहङ्कारो जातः। अहङ्कारस्यापि विकारद्वयं स्यात्। तत्र सात्त्विकाहङ्कारात् ज्ञानेन्द्रियपञ्चक–कर्मेन्द्रियपञ्चकमनश्चेत्येकादशकगणोऽजायत। अन्यस्मिन् तामसि–काहङ्कारात् शब्दस्पर्शरूपरसगन्धात्मकपञ्चतन्मात्राणि जातानि। उक्तञ्च सांख्यसप्तत्याम्–

**अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः।**
**एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव।।**

**सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्।**
**भूतादेस्तन्मात्रः सः तामसस्तैजसादुभयम्।।**[२]

तैजसादुभयमित्यनेन रजोगुणस्योभयसहायकत्वं प्रतिपादितम्। अहङ्कारस्य तामसिकविकारात्मकपञ्चतन्मात्रेभ्यः शब्दादिभ्यः आकाशादिनि तमोप्रधानानि पञ्चमहाभूतानि प्रवर्तन्ते। तानि आकाश–वायु–अग्नि–जल–पृथिवीसञ्ज्ञकानि।

**लिङ्गशरीरोत्पत्तिक्रमः–** मनुष्यसृष्टिक्रमे साङ्ख्यसृष्टिप्रक्रियायामयं द्वितीयः

---

२. साङ्ख्यकारिका– २४, २५

क्रमः। क्रमेऽस्मिन् महदहङ्कार—एकादशकगण—पञ्चतन्मात्राणां सम्मिलितरूपेण शुक्राथवा डिम्बरूपेण सुक्ष्मशरीरस्योत्पत्तिर्जायते। तस्माद्धि क्रमेण स्थूलशरीरोत्पत्तिर्भवति। सुक्ष्मशरीरं खलु लिङ्गशरीरमित्यप्युच्यते। लिङ्गशरीराणि षट्कोशिक इति। तत्र मातृजाः त्रिणि लोम—लोहित—मांसानि। पितृजाः अपि त्रिणि स्नाय्वस्थिमज्जानः इति। स्थूलशरीराण्यपि तादृशानि। षट्कोशिकशरीरस्य पुनः अष्टभावाः सन्ति। तद्यथा— कुक्षिगतावस्थाथवा गर्भावस्था, ताः पञ्चविधाः शुक्रशणितौ डिम्बावस्था वा प्रथमः, द्वितीयः वुद्बुदावस्था, तृतीयः मांसपेशी, चतुर्थः करण्डः यकृद्वा, पञ्चमः तावदङ्गप्रत्यङ्गानि, ततः बाल्यकौमारावस्था वा, यौवनावस्था बार्धक्यावस्था चेति। क्रमेऽस्मिन् सुक्ष्मशरीरादारभ्य क्रमेण स्थूलशरीरस्योत्पत्तिर्जायते।

**प्रत्ययसर्गक्रमः—** मनुष्यसृष्टिक्रमे सांख्यसृष्टिप्रक्रियायामयं तृतीयः क्रमः। सुक्ष्मस्थूलशरीरस्योत्पत्यानन्तरं शरीरस्याभ्यन्तरे विराजमानस्य बुद्धेः विकारात्मकमिदं सर्गकार्यं वर्तते। बुद्धेः सृष्टिकार्यमिदं प्रत्ययसर्गः इत्युच्यते। प्रत्ययशब्दस्यार्थः बुद्धिः तथा सर्ग इत्यस्यार्थः सृष्टिरिति। प्रत्ययसर्गाः बुद्धेः सृष्टिकार्याणि प्रत्ययसर्गाः वा विपर्ययाशक्तितुष्टिसिद्धिभेदात् चतुर्विधाः। ते पुनः त्रिगुणानां वैषम्यवशात् पञ्चाशत्संख्यकाः भवन्ति। उक्तञ्च कारिकायाम्—

**एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्धाख्याः।**
**गुणवैषम्यविमर्दात्तस्य च भेदास्तु पञ्चाशत्।।**[३]

तत्र विपर्ययः अज्ञानमित्युक्तम्। तदज्ञानं तममोहमहामोहतामिश्रान्धता—मिश्रभेदात्पञ्चधा वर्तते विपर्ययः। अशक्तेः अष्टाविंशतिभेदाः सन्ति, तुष्टेः नवभेदाः तथा सिद्धेः अष्टभेदाः वर्तन्ते। पञ्चविपर्ययस्य भेदोपभेदाः पुनः द्विषष्टिसंख्यकाः। तमस्य मोहस्य च अष्टविधभेदाः, मोहस्य दशभेदाः, तामिस्रस्यान्धतामिस्रस्य च अष्टादशभेदाः वर्तन्ते। तदुक्तं सांख्यसप्तत्याम्—

**पञ्चविपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्**

---

३. साङ्ख्यकारिका, ४६

**अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधासिद्धिः।।**

**भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः।**

**तामिस्रोऽष्टादशधा तथा भवन्त्यन्धतामिस्रः।।**[४]

सप्तदशबुद्धिवधैः सह एकादशेन्द्रयवधाः अशक्तिः इति कथ्यते। आध्यात्मिक–बाह्यभेदात्तुष्टिर्पुनः द्विविधा। प्रकृत्युपादानकालभावाख्यः आध्यात्मिकस्तुष्टिः चतुर्विधा। विषयोपरमात् बाह्याः पञ्चधा। ऊहः, शब्दः, अध्ययनम्, त्रिविधो दुःखविघातः स सुहृत्प्राप्तिः दानञ्च अष्टौ सिद्धयः वर्तन्ते।

भावैः विना लिङ्गशरीरं तथा लिङ्गशरीरेण विना भावनिवृत्तिः नास्ति। अतः भावाख्यः लिङ्गाख्यश्च द्विविधः सर्गः प्रमाणितः। तच्चाह श्रीमदीश्वरकृष्णेन–

**न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिवृत्तिः।**

**लिङ्गाख्यो भावाख्यस्तस्माद्विविधः प्रवर्तते सर्गः।।**[५]

**भौतिकसर्गक्रमः–** मनुष्यसृष्टिक्रमे सांख्यसृष्टिप्रक्रियायामयम् अन्तिमः क्रमो वर्तते। अस्मिन्नेव क्रमे मनुष्यैः सह अन्येषामपि जीवानां सृष्टिर्भवति। गुणवैषम्यवशात् ब्रह्मादिस्तम्बपर्यन्तं भौतिकः सर्गः खलु त्रिषु आयामेषु विभज्यते। प्रथमः आयामः सात्त्विकायामः, सत्त्वविशालत्वात् ऊर्ध्वलोके विराजते। द्वितीयः रजोविशालत्वात् मध्यलोके विराजते। ततश्च तमोबहुलत्वात् निम्नलोके विराजते तामसिकायामः। तच्चाह श्रीमदीश्वरकृष्णेन–

**ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।**

**मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः।।**[६]

तत्र ऊर्ध्वलोके सात्त्विकायामे अष्टदैवयोनयः विद्यन्ते। ते च योनयः साङ्ख्यसप्ततिव्याख्यायाः जयमङ्गलायाः अनुसारं ब्राह्म–प्राजापत्य–सौर–आसुर–गान्धर्व–याक्ष–राक्षस–पिशाचाः। निम्नलोके तामसिकायामे

---

४. साङ्ख्यकारिका, ४७, ४८

५. तदेव, ५२

६. तदेव, ५४

पञ्चतिर्यग्योनयः विराजन्ते। ते च पुनः जयमङ्गलानुसारं पशुः यथा– गौः, रासभादयः, मृगः यथा– सिंहः, बिडालादयः, पक्षी यथा– हंसः, मशकादयः, सरीसृपः यथा– सर्पादि कृम्यन्ताः, स्थावरः यथा– वृक्षादि स्थूणान्ताः[७] इति। मध्यलोके राजसिकायामे रजोगुणप्रधानः एक एव मनुष्ययोनि विद्यते। एवं हि भौतिकः सर्गो भवति। अस्मिन्नेव सर्गे मनुष्योत्पत्तिर्जायते। कारिकायामाह–

**अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।**

**मानुष्यश्चैकविधः समासतो भौतिकः सर्गः।।**[८]

सांख्यसृष्टिप्रक्रियायाः वैज्ञानिकता– वर्तमाने वैज्ञानिककाले महाविश्वस्योत्पत्तिप्रसङ्गे महाविस्फोरणतत्त्वं सर्वजनगृहीतं भौतिकविश्वतत्त्वं वर्तते। बेलजियामराष्ट्रस्य धर्मप्रचारकेन जर्ज–एदुयार–ल्यमेत्रमहोदयेन सर्वप्रथमं तत्त्वमिदं प्रस्तावितम् १९२९ क्रैस्तवर्षे। तत्त्वस्यास्य वैशिष्ट्यं वर्तते यत्, कस्याश्चित् धारावाहिक प्रक्रियायाः परिवर्ते एकस्मिन् विशेषे मुहूर्ते महाविश्वस्यास्योद्भवः जातः। तन्मतानुसारं महाविश्वोऽयं १३७५ कोटिवर्षपूर्वं एकस्मात् अतिस्थूलात् अत्युत्तप्तात् सुप्राचीनात् परमाणोः विन्दुवदवस्थात् सञ्जातः। सांख्यकार्यकारणतत्त्वे सत्कार्यवादे तदेवोच्यते। सांख्यसत्कार्य वादानुसारं जगदिदमुत्पत्तेः प्राक् मूलप्रकृतौ एव सद्रूपेण विद्यमानमासीत्। तस्या एव मूलप्रकृतेः क्रमेण महाविश्वस्यास सृष्टिरभूत्। सत्कार्यवादप्रसङ्गे कारिका वर्तते–

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**

**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।**[९]

मूलप्रकृतेः परमाणुत्वमपि प्रमाणितं कारिकाकारेण। तद्यथा–

---

७. जयमङ्गला, साङ्ख्यकारिका– ५३

८. साङ्ख्यकारिका–५३

९. तदेव, ९

**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः।**

**महदादि तच्च कार्यं प्रकृतिस्वरूपं विरूपञ्च।।**[१०]

फ्रिडमैन–ल्यमेत्र–रबार्टसन–वाकारमेट्रिकप्रभृतिभिः वैज्ञानिकैः महाविस्फोरणतत्त्वमिदम् आपेक्षिकतायाः साधारणतत्त्वानुसारेण व्याख्या कृता। तस्मादेव हि महाविश्वोऽयम् एकस्मात् सुप्राचीनात् बिन्दुवदवस्थातः जातः इत्युच्यते। किन्तु महाविस्फोरणात् प्राक् तस्य बिन्दोः अवस्थानप्रसङ्गे पदार्थवैज्ञानिकाः नैकमत्याः। बहुभिः वैज्ञानिकैः तस्य बिन्दोः अर्थात् शक्तेः अद्वैतावस्थानस्य सिङ्गुलारिटि इति शब्दस्य प्रस्तावः कृतः। किन्तु विपरीतपक्षे सांख्यदर्शने महाविश्वस्योत्पत्तिशक्तेः ऐक्यता अस्वीकृत्य द्वैतवादमेव प्रस्तावितम्। यतोहि सांख्यसप्तत्यामाह–

**पुरषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**

**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।**[११]

सांख्यदर्शनानुसारं प्रकृति–पुरुषयोः संयोगादेव त्रिगुणात्मिकायाः प्रकृतेः समग्रमहाविश्वयोऽयमजायत। प्रकृति–पुरुषयोः संयोगोऽयं भौतिक–विज्ञानस्य क्वान्टामबिजडनतत्त्वेन सह तुलयितुं शक्यते। क्वान्टाम–बिजडनतत्त्वमुच्यते यत्, द्वयधिककणानाम् एकः समवायः परस्परेण सह एवं प्रकारेण मिलित्वा आन्तः क्रिया सम्पादयति यत् एकस्याः क्वान्टाम–इत्यवस्थायाः अपरस्य क्वान्टाम–इत्यस्य सापेक्षे स्वाधीनतया व्याख्यायितुं नैव शक्यते। तत्परिवर्ते सम्पूर्णस्य क्वान्टामसमूहस्य व्याख्यातव्यं भवति। तत्सादृशमेव सांख्यदर्शनस्य प्रकृति–पुरुषयोः संयोगः व्याख्यायितः। तच्चोक्तं कारिकायाम्–

**तस्मात्तसंयोगादचेतनं चेतनावदिवलिङ्गम्।**

**गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः।।**[१२]

---

१०. सांख्यकारिका–८

११. तदेव, २१

१२. तदेव, २०

अर्थात् पुरुषस्य संयोगात् अचेतनं प्रधानं चेतनवदनुभवति। अन्यस्मिन् निर्गुणः पुरुषः त्रैगुण्यप्रकृतेः संयोगात् गुणकर्तृत्ववदनुभवतीति।

**उपसंहारः–** एवमेव हि सांख्यदर्शने बहुलरूपेण वैज्ञानिकता विद्यते। तथा आधुनिकवैज्ञानिकतत्त्वैः सह सांख्यतत्त्वानां तुलयितुं समर्थाः विद्यन्ते। अत्र हि सांख्यसृष्टिप्रक्रियायाः चत्वारः पर्यायाः दर्शिताः। तेषु अन्तिमे पर्याये मनुष्ययोनिसृष्टेः कथा सांख्यसम्मता वर्णितास्ति। चतुर्दशभौतिकसर्गेषु एक एवोऽयं मनुष्ययोनिः रजप्रधानत्वात् चञ्चलप्रवृत्तियतो भवति। दृश्यन्तेऽप्य–स्माभिः मनुष्याः बहुषु कारणेषु अस्थिराः चञ्चलाः वा सन्ति अधिकाधिकसमये।

सांख्यशास्त्रस्यास्य सृष्टिप्रक्रिया वैज्ञानिकदृष्ट्या अतुलनीया। आधुनिक– वैज्ञानिकैरपि अवश्यस्वीकरणीया।

***

# संस्कृते समानरूपाणि, विभक्तीनाञ्च विशिष्टमध्ययनम्

**डॉ. उषाराणी सङ्का**

*सहायकप्राध्यापिका, संस्कृतविभागः*

*आर्यविश्वविद्यालयः, कालिफोर्निया, अमेरिकादेशः*

**शोधलेख–सारांशः**

प्रातिपदिकात् विभक्तीनां योजनेन सुबन्तपदानि निष्पद्यन्ते। अनर्गलं भाषणाय, सामान्यभाषायाः प्रयोगाय तेषां नामपदानां स्मरणमत्यन्तम् आवश्यकम्। विद्यार्थिनः संस्कृतार्थिनश्च तेषां स्मरणे भीतिमनुभवन्ति। स्मरणाय ये यतन्ते तेषां क्लेशनिवारणाय लाघवोपायः कश्चन कल्प्यते। शब्दरूपाणां समग्रदर्शनेन तेषां परिकल्पने यत्किञ्चित् साम्यं दृश्यते। तज्ज्ञानेन विद्यार्थी स्मरणे क्लेशं नानुभवेत्। स्मरणीया सामग्री अधिका परन्तु काचन प्रणाली, व्यवस्था वा तत्र समस्तेषु नामपदेषु विस्पष्टं दृश्यते यया स्मरणाभ्यासकृद्भ्यः लाभो जायते। का प्रणाली, कीदृशी सा व्यवस्था इति ज्ञापनमेव अस्य परिशोधनपत्रस्य उद्देश्यम्।

**का नाम विभक्तिः?**

विभक्तिः का? इति जिज्ञासायां स शब्दः स्त्रीलिङ्गशब्दः इति ज्ञायते। तस्यार्थः सामान्यतया विभजनं विभागः इति वेति शब्दकल्पद्रुमकोशोक्तदिशा। सङ्ख्याकर्मादयः अर्था विभज्यन्ते आभिरिति व्युत्पत्त्यर्थदिशा, वि– इत्युपसर्गपूर्वकस्य भज–धातोः क्तिन् प्रत्यये कृते शब्दोऽयं निष्पद्यते। यथा–

**सङ्ख्यात्वव्याप्यसामान्यैः शक्तिमान् प्रत्ययस्तु यः।**
**सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङ्चेति प्रभेदतः।।**

ततश्च 'सङ्ख्यात्वावान्तरजात्यवच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिः'। सुप्, तिङ् चेति भेदाद् द्विविधा। इति शब्दशक्तिप्रकाशिका।।

## विभक्तीनां नामानि, प्राथमिकरूपाणि च

विभक्तयः कति इति प्रश्ने कृते सप्त इति कल्पितास्ति भाषायाम्। सम्बोधनं पुनः प्रथमायामेव अन्तर्भवति। आङ्ग्लभाषायां विभक्तीनां नामानि नामिनेटिव्, अक्यूसेटिव् इत्यादिरूपेण भवन्ति, परन्तु संस्कृते विभक्तिनामानि सङ्ख्यया सूच्यन्ते। यथा– प्रथमा, द्वितीयेत्यादि। कुतः एवमिति चिन्तिते तत्र किञ्चन कारणमस्ति। एका विभक्तिः कारकं कारकेतरत् च बह्वर्थं निरूपयति।

यथा– कर्मणि द्वितीया तु भवति, पुनः कर्मप्रवचनीयेषु अपि प्रवर्तते। उपपदद्वितीयापि अभितः परितः इत्यादिभ्यः भवति। षण्णां कारकाणां नामानि निर्दिष्टानि किन्तु विभक्तीनां पुनः न।

'अपदं न प्रयुञ्जीत' इति प्राचीननियमः। पदं यद् भवति तदेव प्रयोक्तव्यं लोके। किं नाम पदमिति पृष्टे 'सुप्तिङन्तं पदमि' ति (अष्टा १.४.१४) प्रातः स्मरणीयेन महर्षिणा पाणिनिना सूत्रं कल्पितम्। 'ङ्याप्प्रातिपदिकात्' (अष्टा. ४.१.१) इति सूत्रेण 'प्रत्ययः', 'परश्च' इत्यधिकारद्वयान्तः विभक्तिर्विहिता। विभक्तियोजनेनैव प्रातिपदिकं पदं भूत्वा प्रयोगार्हत्वं साधयति । का च ता विभक्तयः इति पृष्टे 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्य–स्ङसोसाङ्ङ्योस्सुप्' (अष्टा. ४.१.२) इति अनेन च विभक्तिरूपाणां पङ्क्तिका दत्ता मुनिना पाणिनिना।

तेषां प्रथमम् अध्ययनं कुर्मः। एकैकस्याः विभक्तेः त्रीणि वचनानि भवन्ति (अष्टा. हे कयोर्द्विवचनैकवचने १.४.२२, बहुषु बहुवचनम् ४.४.२१)। प्राथमिकरूपाणि इत्सहितानि आहत्य एकविंशतिसङ्ख्याकानि एवं भवन्ति। तत्र सम्बोधनं पृथक्तया योजयामश्चेत् चतुर्विंशतिः भविष्यन्ति। सूत्रमुद्घाट्य पश्यामश्चेत् एवं भवन्ति रूपाणि–

- सु, औ, जस्।
- अम्, औट्, शस्।
- टा, भ्याम्, भिस्।
- ङे, भ्याम्, भ्यस्।
- ङसि, भ्याम्, भ्यस्।

- ङस्, ओस्, आम्।
- ङि, ओस्, सुप्

एतेषां स्थानेषु अकारादित्वमनुसृत्य विभक्तयः 'अः, औ, आः' 'आ, ए, आः' इत्यादिकाः (यथा– रामशब्दात्– रामः रामौ रामाः इति, लताशब्दात्– लता, लते, लताः इति च) भवन्ति। स्त्रीलिङ्गादिषु हलन्तादिषु च सुलोपोपि भवति। यथा– लता, मरुत्। ततश्च 'प्रत्ययलोपे प्रत्ययलक्षणमि' ति (अष्टा. १.१.६२) सुप्तिङन्तत्वेन पदत्वं साध्यते।

**विभक्तिमाधृत्य शब्दानां विभागाः**

उपर्युक्ता विभक्तयः प्रातिपदिकेभ्यः भवन्ति। केनाधारेण इति प्रश्नः। तत्र समाधानम्। विभक्तिः प्रातिपदिकस्य लिङ्गमाधृत्य, अन्त्यं वर्णं, वचनं च आश्रित्य रूपाणि परिवर्तयति। विभक्तिमाधृत्य शब्दानां विभागाः एवं भवितुमर्हन्ति–

- अन्त्यवर्णमाश्रित्य– अजन्ता हलन्ता इति।
- प्रत्यययुक्ताः – तद्धिताः, कृदन्ता इत्यादयः।
- लिङ्गमाश्रित्य– पुंलिङ्गाः, स्त्रीलिङ्गा, नपुंसकलिङ्गा इति।
- पुनः विभागान्तरमेवम्– सामान्यनामपदानि, सर्वनामानि, विशेषणानि, सङ्ख्यापदानि

विभक्तिमाधृत्य शब्दानाम् आन्तरिकविभागान् कर्तुं शक्यते। तत्र अन्त्यवर्णमाधृत्य एवं भवितुमर्हन्ति।

**अजन्ताः –** अकारान्ताः (यथा– राम), आकारान्ताः (यथा– हाहा), इकारान्ताः (यथा– हरि), ईकारान्ताः (यथा– सुधीः), उकारान्ताः (यथा–गुरु), ऊकारान्ताः (यथा– स्वभू), ऋकारान्ताः (यथा–पितृ), ऐकारान्ताः (यथा–रै), ओकारान्ताः (यथा– गो), औकारान्ताः (यथा–ग्लौ)। अत्र त्रिषु लिङ्गेष्वपि शब्दाः भवन्ति। यथा– स्त्रियाम्–आकारान्ताः (यथा–रमा), इकारान्ताः (यथा–मति) इत्यादयः। नपुंसके पुनः– अकारान्ताः (यथा–फल), इकारान्ताः (यथा–दधि) इत्यादयः।

हलन्ताः–चकारान्ताः (यथा–जलमुच्), जकारान्ताः (यथा–ऋत्विज्), तकारान्ताः (यथा– मरुत्), दकारान्ताः (यथा– उद्भिद्), धकारान्ताः (यथा–

बुध्), नकारान्ताः (यथा–नामन्), शकारान्ताः (यथा–तादृश्), सकारान्ताः (यथा–विद्वस्), हकारान्ताः (यथा– अनडुह्)। अत्रापि त्रीणि लिङ्गानि अन्तर्भवन्ति। क्लीबेपि, स्त्रियामपि यथा– सरित् वाच् जगदादयः।

तत्र पुनः सामान्यः विशेषः इति विभागं कुर्मश्चेत् एवं श्रेणयः भवन्ति–

- अजन्तेषु सामान्यशब्दाः, हलन्तेषु सामान्यशब्दाः
- अजन्तेषु विशेषशब्दाः, हलन्तेषु विशेषशब्दाः
- अजन्तेषु प्रत्ययान्ताः (तद्धित–कृदन्तादयः), हलन्तेषु प्रत्ययान्ताः (तद्धित–कृदन्तादयः)

अवधेयमत्र यत् पुंलिङ्गे क्लीबे एव एतेषां रूपाणि नवानि भवन्ति। स्त्रीलिङ्गे तु तद्धित–कृदन्तादयः प्रत्ययान्ताः प्रायः ईकारान्ताः नदीसदृशाः एव। यथा– भगवत्–भगवती, गच्छत्–गच्छन्ती इत्यादि।

**शब्दरूपाणां स्मरणाय प्राथमिकनियमाः–**

नूतनं ये भाषामधीयते ते एतावन्ति रूपाणि स्मरणीयानि इति भावनेनैव खिन्ना भवन्ति, मार्गान्तरज्ञानाभावात्।

सामान्यतया जनाः रूपस्मरणं विभक्तिमाश्रित्य कुर्वन्ति– नाम "प्रथमाविभक्तिः– रामौ, रामाः, रामः, द्वितीयाविभक्तिः–रामम्, रामौ रामान् इत्यादिविधानेन पठन्ति। तत्र समान्तरविधाने (Horizontal) एकाधिक–सप्त पङ्क्तयः पठनीयाः। एवं पठनेन समानरूपेषु दृष्टिर्न पतति। भङ्ग्यन्तरेण यदि वचनमाधृत्य ऊर्ध्वाधरं (Vertical) शब्दरूपाणि पठामः तदानीं तिस्रः एव श्रेण्यः –एकवचनम् द्विवचनम् बहुवचनम् इति। तेन न्यासलाभात् समानरूपाणि सपदि दृश्यन्ते।

तादृशात् अध्ययनात् पूर्वं ज्ञातव्यं यत्, तत्र शब्दरूपेषु साम्यं द्विविधम्।

- पारस्परिकं साम्यम्
- सार्वत्रिकं साम्यं च

पारस्परिकम्– समानत्वं कस्मिंश्चित् परस्परं रूपेषु भवेत्। यथा– सर्वत्र द्विवचने प्रथमाद्वितीये च समानरूपे भवतः। यथा– प्रथमापि 'फले', द्वितीयापि

'फले' इति। तत्र समानत्वे परिधिस्तु केवलं विभक्तिरूपे, अर्थे न। यथा– फले भवतः, फले खादामि। रूपात् अतिरिच्य विभक्तेरर्थः अत्र भाव्यः। तथैव– सार्वत्रिके साम्ये चतुर्थ्याः पञ्चम्याः च बहुवचनरूपे चिन्मः, तत्र 'भ्यः' इत्येव। परन्तु लिङ्गसूचने 'एभ्यः मरुद्भ्यः' इति पुंसि, 'आभ्यः सरिद्भ्यः' इति स्त्रियां च भवन्ति।

**शब्दरूपेषु सामान्यतया समानस्थानानां विभागः–**

शब्दरूपाणां समानरूपाणाम् अध्ययनवेलायां समानस्थानानां विभागाः एवं त्रयः भवितुमर्हन्ति–

- समस्तशब्देषु सार्वत्रिकतया समानस्थानानि Common similarities in all words पारस्परिकसमानरूपाणि Mutually similar forms
- विभागविशेषे (अजन्तेषु हलन्तेषु वा) सामान्यसमानस्थानानि Common similarities among some category as Vowel/Consonant-Ending ending
- वर्णान्ततामाधृत्य सामान्यसमानस्थानानि Common similarities in particular letter–
- लिङ्गमाधृत्य सामान्यसमानस्थानानि Common similarities in particular gender

**१. समस्तशब्देषु सार्वत्रिकतया समानस्थानानि**

यत्र कश्चन नियमः समस्तशब्दरूपेषु सामान्यतया दृश्यते– तादृशानि स्थानानि। विभागास्तु प्रधानतया एवं सन्ति– अजन्ताः, हलन्ताः, प्रत्ययान्ताः, नामपदानि, सर्वनामाः, अस्मद्युष्मदौ चेति। अपवादस्थानानि तत्र बहुलं न सन्ति –एकः एवास्ति।

- द्विवचने– तृतीया, चतुर्थी, पञ्चमी–भ्याम्। यथा– हरिभ्याम्, मरुद्भ्याम्, द्वाभ्याम्
- द्विवचने–षष्ठी, सप्तमी– ओः (ओस्)। यथा– रामयोः, गुर्वोः, सरितोः
- बहुवचने–चतुर्थी, पञ्चमी–भ्यः (भ्यस्) (अपवादास्पदम्–अस्मद्–युष्मद् –भ्यम्, अत्)।

- बहुवचने–षष्ठी–(अजन्तेषु) णाम्/नाम्, (हलन्तेषु) आम्, (सर्वनामेषु) षाम्/साम्। यथा–रामाणाम्, कवीनाम्, मरुताम्, सर्वेषाम्।) (अपवादास्पदम्–अस्मद्–युष्मद्–आकम्–अस्माकम्, युष्माकम्)। बहुवचने–सप्तमी– षु/सु

## २. पारस्परिकं रूपयोः समानत्वम्

यत्र सार्वत्रिकरूपेण अभूत्वा परस्परं द्वयोः साम्यं भवति, तत्र पारस्परिकं साम्यं भवति। तादृशं साम्यं विभक्तिस्थानमधिकृत्य भवति। सर्वत्र साम्यं भवति, किन्तु परस्परमेव दृश्यते।

- द्विवचने प्रथमा, द्वितीया च विभक्ती (एष नियमः सार्वत्रिकोपि)। यथा– युवाम्, आवाम्
- पुंसि– हरी, गुरू, मरुतौ, तौ,
- स्त्रियाम्– लते, धेनू, वाचौ, ते,
- क्लीबे– फले, दधिनी, जगन्ती, ते,
- नपुंसकलिङ्गे एकवचने, द्विवचने, बहुवचने च प्रथमायाः द्वितीयायाः परस्परसमानरूपाणि (नियम एष सार्वत्रिकोऽपि)। यथा–
- अजन्ते– दधि, दधिनी, दधीनि
- हलन्ते– कर्म, कर्मणी, कर्माणि
- आकारान्ते स्त्रीलिङ्गे, बहुवचने प्रथमाद्वितीये च सदा परस्परसमानरूपे। यथा– रमाः, सरितः
- ऋकारान्तेषु सर्वत्र– पुंलिङ्गाः स्त्रीलिङ्गाः च परस्परसमानरूपाः। यथा– पितरम्, मातरम्। केवलं बहुवचने द्वितीया भिद्यते। यथा–पितॄन्, मातॄः। तत्र क्लीबे पुनः रूपाणि भिद्यन्ते, हलन्तवत् भवन्ति।
- हलन्तेषु बहुवचने प्रथमा–द्वितीये परस्परसमानस्थाने (प्रायः)। यथा– मरुतः, वाचः (प्रत्ययान्तशब्देषु केवलमत्र भेदः– यथा–धनवन्तः, धनवतः)
- अस्मद्–युष्मद्–शब्दयोः द्वयोः प्रायः अन्तिमे प्रत्ययांशे परस्परस–

दृशरूपत्वम्। यथा– युष्माभिः, अस्माभिः

- सम्बोधनप्रथमायां– प्रायः एकवचनं विहाय, सर्वत्र द्विवचने बहुवचने च प्रथमाविभक्त्या समाने रूपे भवतः।
- प्रायः एकवचने एव प्रथमायाः भिन्नरूपभवतः। यथा–राम।
- हलन्तेषु तदपि समानमेव। यथा– मरुत्

### ३. विभागविशेषे सामान्यसमानस्थानानि

सामान्यनामपदेषु, सर्वनामेषु च अकारान्ते पुंलिङ्गं, क्लीबं विहाय[१]

एकवचने पञ्चमी, षष्ठी च परस्परसमानस्थाने। यथा–

- पुंसि– हरेः, गुरोः, मरुतः
- स्त्रियां– रमायाः, वध्वाः, वाचः
- क्लीबे– (पुं–समानरूपाणि)
- बहुवचने तृतीया–भिः (भिस) यथा– रमाभिः, मरुद्भिः
- अजन्ते हलन्ते च, सामान्यनामपदेषु, सर्वनामसु च, पुंलिङ्गे, स्त्रीलिङ्गे च, केवलं नपुंसकलिङ्गं विहाय एकवचने द्वितीयायां–म्। यथा– रामम्, लताम्, पितरम्, मरुतम्, (परं, जगतं इति तु न)
- अजन्ते पुंलिङ्गे बहुवचने द्वितीयायां न्। यथा–रामान्, गुरून्

### ऋकारान्तेषु

- पुंलिङ्गे, स्त्रीलिङ्गे च एकवचने तृतीयाविभक्तेः आरभ्य रा, रे, उः, उः, अरि इति। यथा–पित्रा, मात्रा। क्लीबे चापि एतादृशमेव भवति, पुनः च वैकल्पिकरूपाणि अपि भवन्ति।

---

१. अत्र विभागविशेषे सामान्यसमानस्थानानाम् अध्ययनाय किञ्चित् स्मर्तव्यम्। तत्र भिन्नस्थाने द्वे। अकारान्ते पुंलिङ्गः, क्लीबः च केवलौ भिन्नौ। पुंलिङ्ग– क्लीब– सर्वनामशब्दाश्च तदेवानुवर्तन्ते, तेपि भिन्नाः। अन्येषु सर्वेषु शब्देषु (नाम अकारान्त सर्वनामानि च पुंसः, क्लीबान् च विहाय, अन्यत्र अजन्तेषु नाम इकारान्तादिषु, हलन्तेषु, प्रत्ययान्तेषु, स्त्रीलिङ्गसर्वनामसु च) उपरिदत्तमनुवर्तते।

## हलन्तेषु

- सर्वत्र– एकवचने, तृतीयायाः आरभ्य आसप्तमी क्रमः (प्रातिपदिकस्य अन्त्यवर्णः+) – आ, ए, अः, अः, इ इति। यथा– मरुत्– मरुता, मरुते, मरुतः, मरुतः, मरुति। नामन्– नाम्ना, नाम्ने, नाम्नः, नाम्नः, नाम्नि।
- हलन्तेषु सर्वत्र– बहुवचने षष्ठ्याम्–आम्। यथा– वाचाम्, जगताम्

## अस्मद्–युष्मद्–शब्दयोः

- रूपाणां त्रिलिङ्गसमानत्वम्। (परस्परं समानत्वं च पूर्वं दर्शितम्)।

## सर्वनामसु

सर्वनामशब्दाः प्रायः अकारान्तपुंशब्दसदृशाः। इदमिति मकारान्तः, तदिति एतदिति च दकारान्तावित्यादि यतो हि उक्तं तथापि एते सर्वे अकारान्तत्वसादृश्यमेव भजन्ति। प्रायः पञ्च स्थानानि पुंसि,

## पुंलिङ्गे क्लीबे च

सर्वनाम्नां पुंलिङ्गे क्लीबे च अकारान्तपुंलिङ्गशब्दैः असमानत्वं पञ्चसु स्थलेषु

- एकवचने चतुर्थ्याम्– आय >> स्मै (यथा– रामाय झ तस्मै)
- एकवचने पञ्चम्याम् – आत् >> स्मात् (यथा–रामात् झ तस्मात्)
- एकवचने सप्तम्याम् – ए >> स्मिन् (यथा– रामे झ तस्मिन्)
- बहुवचने प्रथमायां–आः >> ए (यथा–रामाः झ ते)
- बहुवचने षष्ठ्याम्–णाम्/नाम् >> षाम् (यथा– रामाणाम् > तेषाम्)

## स्त्रीलिङ्गे

- सर्वनामानां स्त्रीलिङ्गे आकारान्तस्त्रीलिङ्गशब्दैः असमानत्वं पञ्चसु स्थलेषु।
- एकवचने चतुर्थ्याम्– आयै >> स्यै (यथा–रमायै झ तस्यैः)
- एकवचने पञ्चम्याम् – आयाः >> स्याः (यथा–रमायाः > तस्याः)

एकवचने षष्ठ्याम् – आयाः >> स्याः (यथा– रमायाः > तस्याः)

एकवचने सप्तम्याम् – आयाम् >> स्याम् (यथा– रमायाम् > तस्याम्)

बहुवचने षष्ठ्याम्– णाम् / नाम् >> साम् (यथा–रमाणाम् > तासाम्)

**४. लिङ्गमाधृत्य सामान्यसमानस्थानानि**

- नपुंसके, अकारान्ते हलन्ते च तृतीयायाः आरभ्य– पुंसदृशत्वम्। यथा– देवेन > फलेन, मरुता > जगता।
- नपुंसके, सर्वनामस्वपि तृतीयायाः आरभ्य–पुंसदृशत्वम् (अकारान्त–सदृशत्वात्)। यथा–तेन।
- नपुंसके, इकारान्ते उकारान्ते ऋकारान्ते च– किञ्चित् हलन्तस–शत्वम्। यथा–सप्तमी–एकवचने–मधुनि, वारिणि।

**५. वर्णान्ततामाधृत्य सामान्यसमानस्थानानि**

- हलन्तेषु अप्रत्ययान्ताः (यथा– मरुत्, वाक्) पुंलिङ्गाः, स्त्रीलिङ्गाः च समानरूपाः।
- तालिका पूर्णा समाना। कुत्रापि रूपे भेदो न।
- हलन्तेष्वपि नपुंसके तृतीयारभ्य पुंसमानत्वम्। केवलं प्रथमा–द्वितीये भिद्येते।

**प्रत्यययुक्तस्य शब्दस्य सम्भाव्यता**

स्मरणाय क्लेशराहित्यसाधनसम्बन्धविषयः अत्र समाप्तः। अधुना समानरूपाणाम् अन्यत् पार्श्वं पश्यामः। तत्र एकमेव रूपं कतिभ्यः विभक्तिभ्यः कतिष्वर्थेषु भवतीति आश्चर्यं जनयति। ततश्च कदाचित् धातुभ्योपि समानत्वं भजन्ति रूपाणि। तत्र कतिपयानि उदाहरणानि पश्यामः। यथा– 'औ, आनि, ए' इत्येतोषां शब्देषु धातुरूपेषु च।

औ–प्रत्यययुक्तस्य शब्दस्य सम्भाव्यता (द्विवचने)

अकारान्त / हलन्तपुंलिङ्गः–प्रथमाविभक्तिः, यथा – रामौ, मरुतौ

अकारान्त / हलन्तपुंलिङ्गः–द्वितीयाविभक्तिः, यथा – रामौ, मरुतौ

इकारान्तपुंलिङ्गः–सप्तमीविभक्तिः, यथा – हरौ

इकारान्तस्त्रीलिङ्गः–सप्तमीविभक्तिः, यथा–मतौ (वैकल्पिकरूपम्–मत्याम्)

उकारान्तपुंलिङ्गः– सप्तमीविभक्तिः, यथा–गुरौ

उकारान्तस्त्रीलिङ्गः–सप्तमीविभक्तिः, यथा धेन्वो (वैकल्पिकरूपम्–धेन्वाम्)

आकारान्तस्त्रीलिङ्गः–प्रथमाविभक्तिः, यथा–नद्यौ

आकारान्तस्त्रीलिङ्गः– द्वितीयाविभक्तिः, यथा– नद्यौ पाधातोः परस्मैपदिनि लिट्लकाररूपम्– पपौ

आनि–त्यययुक्तस्य शब्दस्य सम्भाव्यता (बहुवचने)–

अकारान्तनपुंसकलिङ्गः–प्रथमाविभक्तिः, यथा– फलानि

अकारान्तनपुंसकलिङ्गः–द्वितीयाविभक्तिः, यथा– फलानि

परस्मैपद–धातोः–लोटलकारे उत्तमपुरुषैकवचनम्, यथा– भवानि

ए – प्रत्यययुक्तस्य शब्दस्य सम्भाव्यता

ए–प्रत्ययस्तु इतोपि बहुत्र दृश्यते। न केवलं शब्देषु अपि तु धातुरूपेष्वपि अयं प्रत्ययः दृश्यते।

अकारान्तनपुंसकलिङ्गः–प्रथमाविभक्तिः – द्विवचनम्– यथा– फले

अकारान्तनपुंसकलिङ्गः–द्वितीयाविभक्तिः – द्विवचनम्– यथा– फले

अकारान्तनपुंसकलिङ्गः–सम्बोधनाप्रथमाविभक्तिः– द्विवचनम्– यथा– फले

आकारान्तस्त्रीलिङ्गः–प्रथमाविभक्तिः – द्विवचनम्– यथा– रमे

आकारान्तस्त्रीलिङ्गः–द्वितीयाविभक्तिः– द्विवचनम्– यथा– रमे

आकारान्तस्त्रीलिङ्गः–सम्बोधनप्रथमाविभक्तिः–एकवचनम्–यथा–रमे

आकारान्तस्त्रीलिङ्गः–सम्बोधनप्रथमाविभक्तिः– द्विवचनम्– यथा– रमे

इकारान्तपुंलिङ्गः– चतुर्थीविभक्तिः एकवचनम्– यथा– हरये

इकारान्तपुंलिङ्गः–सम्बोधनप्रथमाविभक्तिः एकवचनम्– यथा– हरे

उकारान्तपुंलिङ्गः–चतुर्थीविभक्तिः एकवचनम् – यथा– गुरवे

इकारान्तनपुंसकलिङ्गः—चतुर्थीविभक्तिः— एकवचनम्— यथा— वारिणे

उकारान्तनपुंसकलिङ्गः—चतुर्थीविभक्तिः एकवचनम् — यथा— मधुने हलन्ते

त्रिलिङ्गाः— चतुर्थीविभक्तिः एकवचनम्— यथा— भवते

ऋकारान्तपुंस्त्रीलिङ्गाः—चतुर्थीविभक्तिः एकवचनम्— यथा— पित्रे

अकारान्तपुंलिङ्गः—सप्तमीविभक्तिः एकवचनम् — यथा— रामे

अकारान्तनपुंसकलिङ्गः— सप्तमीविभक्तिः एकवचनम्— यथा— फले

पुनश्च आत्मनेपदिनि ए इति प्रत्ययः दृश्यते। ''टित आत्मनेपदानां टेरे'' (अष्टा. ३.४.७९, सिद्धान्तकौमुदी—२२३३) इति सूत्रेण टितो लस्य आत्मनेपदानां टेरेत्वं भूत्वा एधते इति रूपं सिध्यति। तत्रापि ए इति अन्ते श्रूयते।

ए— लट्लकारे प्रथमपुरुषैकवचने— यथा— एधते

लट्लकारे प्रथमपुरुषद्विवचने— यथा— एधेते

लट्लकारे प्रथमपुरुषबहुवचने— यथा— एधन्ते

लट्लकारे मध्यमपुरुषैकवचने— यथा— एधसे

लट्लकारे मध्यमपुरुषद्विवचने— यथा— एधेथे

लट्लकारे मध्यमपुरुषबहुवचने— यथा— एधध्वे

लट्लकारे उत्तमपुरुषैकवचने— यथा— एधे

लट्लकारे उत्तमपुरुषद्विवचने— यथा— एधावहे

लट्लकारे उत्तमपुरुषबहुवचने— यथा— एधामहे

ए— आत्मनेपदिनि—

लिट्लकारे प्रथमपुरुषैकवचने— यथा— चक्रे

तथैवान्यरूपाणि यथा उपरि—

चक्रे चक्राते चक्रिरे

चकृषे चक्राथे चकृढ्वे

चक्रे चकृवहे चकृमहे

एवमेव पुनः लृट्लकारे आत्मनेपदिनि सर्वत्र– ष्यते इत्यादीनि नव रूपाणि भवन्ति। यथा–एधिष्यते (लडनुसृत्यैव रूपाणि भवन्ति। तथैव लुट्लकारे आत्मनेपदिनि मध्यमोत्तमेषु आहत्य षड्रूपाणि भवन्ति। यथा–एधितासे।

**विभक्तिनिर्णयाय निकषः–**

विभक्तिसारूप्यं तु स्मरणे सुकरं परन्तु अर्थकरणे तत्र समस्या जायेत। तत्र सत्सु समानरूपेषु कथं विभक्त्यर्थनिर्णयः इति जिज्ञासायां, समाधानमेवम्। तत्र कारकसन्दर्भे क्रिया सहायिका। पुनः लोकानुभवेन किञ्चित् ज्ञातुं शक्यते। पुनः वाक्यादिषु अनुच्छेदादिषु च सन्दर्भांशाः द्रष्टव्याः। यथा– सर्वनामपदानि, विशेषणानि इत्यादीनि। लिङ्गनिर्णयाय निकषः कोशः यत्र प्रत्येकं शब्दस्य लिङ्गमुच्यते।

एवंरूपेण विभक्तीनां सुपां तिङां च विषये प्रत्ययसाम्यं दृश्यते। तदाधारेण रूपाणां स्मरणे सौकर्यं भवति। इत्यलं विस्तरेण।। शुभमस्तु

***

# वृक्षायुर्वेदस्य वैज्ञानिकता–एका दृष्टिः

**डॉ० प्रीतिरञ्जनमाझी**

*सहायकप्राध्यापकः, स्नातकोत्तरसंस्कृतविभागः,*

*फकीर–मोहन–विश्वविद्यालयः, बालेश्वरम्, उड़िसा*

**शोधसारः**

वृक्षाणाम् आयुः सम्पर्कितम् आलोचनं वृक्षायुर्वेदे क्रियते। बहुपद्धतयः वृक्षाणाम् उत्पत्त्यर्थं वृद्ध्यर्थं सुपोषणाय च उद्भाविताः येषां विवरणं वृक्षायुर्वेदे लभ्यते। न केवलं वृक्षाणां जन्मतः मृत्युं यावदनुष्ठेयाः रोपण–सेचनादिसामान्यविधयः अधिकन्तु वृक्षाः कथमुत्पद्यन्ते, कथं नोत्पद्यन्ते, उपयोगिवृक्षाणामुत्पत्तिः कथं स्यात्, अनुपयोगिवृक्षाणां कथं नाशो भवेत्, कस्याम् ऋतौ के रोप्याः, वृक्ष विकासाय समुपयुक्तदेशः कालो वाक्, तेषां वास्तुशास्त्रीय–शुभाशुभलक्षणानि, बीजानां सुपरिचर्या, वृक्षरोगाः प्रशमनोपायादि–विविधविषयाःवृक्षायुर्वेदभुक्ताः। यथा आयुर्वेदशास्त्रे रोगार्तानां मनुष्याणां स्वस्थता सुस्थानां च स्वास्थ्यरक्षा विधीयते तथैववृक्षायुर्वेदे वृक्षान्नधिकृत्यद्विषयाः आलोचिताः।

प्रस्ताविलेऽस्मिन् प्रबन्धे सुरपालाचार्यस्य वृक्षायुर्वेदे आलोचितानां केषाञ्चित् तथ्यानां प्रयोगाणां च आधुनिकविज्ञानदृष्ट्या सत्यता स्यान्न वेति विचार्यते। अध्ययनमिदं भारतीय विज्ञानगवेषणायां साहित्यालोचनायां भारतीय ज्ञानपरम्परायाः ओत्कर्ष्यापादने च सहायकमस्त्विति धीः।

**उपक्रमः**

जीवमात्रस्य प्राणाधारः प्रकृत्याः अभिन्नोपादानं सृष्टेः अविच्छेद्यः अङ्गः वृक्षः। वृक्षस्य उपकारितासर्वैरनुभूयते किल, अतः मनुष्याणां दैनन्दिनजीवने वृक्षस्य किं महत्त्वमिति प्रश्नः न कञ्चिदुत्तरम् अपेक्ष्यते। बहुप्राचीनकाले भारतीयविद्वद्भिः वृक्षेषु चेतनायाः अस्तित्वं प्रतिपादितम् बहुवैदिकमन्त्रेषु वृक्षाणां चेतनत्वं प्रतिफलितं दृश्यते। तेषां प्राणवत्त्वम् अधुना आधुनिकविज्ञानेऽपि सिद्धम्। जैनदार्शनिकाः जीवितप्राणिषुवृक्षान् अपि अन्तर्भावयन्ति।

भारतीयसंस्कृत्याः आधारशिलारूपेण प्रसिद्धे महाभारते शान्तिपर्वणिचतुर शीत्यधिकशततमे अध्याये मुनयोः भृगुभरद्वाजयोः कथोपकथनमाध्यमेन सयुक्त्या वृक्षाणां चेतनत्वं प्रमाणितं दृश्यते। तत्र मनुष्यादिवत् वृक्षाः पञ्चमहाभूतादुत्पन्नाः तेषाम् अपि पञ्च इन्द्रियाणि विद्यन्ते इति प्रतिपादितम्।[1]

भारतवर्ष धर्मभूमिः, धार्मिकाः खलु भारतीयाः। अतः प्राचीनशास्त्रेषु धर्मेण सह संयुज्य एवविधानानिनिर्दिष्टानि। तेषु लोकप्रवृत्यर्थम् अर्थवादरूपेणापि शंसात्मकानि विधानानि आसन्। वृक्षायुर्वेदे अयमेव कौशलः अनुसृतः। सर्वैः वृक्षस्य उपकारिता यद्यद्यपि अनज्ञाता तथापि वृक्षाणां संरक्षणाय रोपणाय च येषु श्लोकेषु निर्देशः अस्ति तेषु लोकविश्वासं धर्मीयप्रवृत्तिं मिश्रीकृत्य तत्कर्मणः सुफलमपि निर्दिष्टं दृश्यते।

तरुमहिमाध्याये तुलसीविल्वादीनां बहूपादेयतरूणां रोपणार्थं प्रेरकाः श्लोकाः ग्रथिताः। तेषु श्लोकेषुयेषां वृक्षाणांमुल्लेखः अस्ति तेषाम् अमूल्योपकारिता आधुनिकविज्ञाने अपि सिद्धा। यथा नवमश्लोकेकथितमस्ति–

**यावद्दिनानि तुलसी रोपितापि गृहे वसेत्।**

**तावद्वर्षसहस्त्राणि वैकुण्ठे स महीयते।।**[2]

अर्थात् यावत्पर्यन्तं वासगृहे तुलसीवृक्षः रोपितस्तिष्ठति गृहस्वामी तावत्वर्षसहस्त्राणि वैकुण्ठलोके महीयते। श्लोकोऽयं तुलसीवृक्षस्य महिमकथनाय प्रवृत्तः। भारतवर्षे तुलसी धर्मीयपादपेषु पवित्रतमः इति पूज्यते। पुराणमतानुसारं वृक्षोऽयं विष्णोः प्रियः। वैकुण्ठः विष्णुना संबद्धः अतः तुलसीरोपणेन विष्णुलोकः मिलतीतिउच्यते। पुराणेषु तुलस्याः महिमकीर्तनं बहुत्र सुलभम्। आयुर्वेदशास्त्रे अपि वृक्षोऽयं बहुप्रथितः। आधुनिके विज्ञाने Labiatea परिवारभूक्तस्यास्य वैज्ञानिकसंज्ञा Ocimum sanctum Linn. इति। तुलस्याः रोगप्रतिरोधशक्तिः अतिप्रबला। यस्मिन् स्थाने तुलसीवृक्षः रोपितस्तिष्ठति तच्चतुर्पार्श्वं रोगाणूरहितं वर्तते। तुलसीप्रवाहिता वायुः शुद्धः हितकारी च। अतः भारतवर्षे प्रतिगृहं तुलसी रोपिता प्राप्यते। आयुर्विद्भिः

---

१. महाभारतम् शान्तिपर्व १८४/१७

२. वृक्षायुर्वेदः ६

बाजीकरणे ज्वरादिपरिशमनार्थं च तुलस्याः अवयवाः व्यवह्रियन्ते। तुलस्याः रसः विषनाशकः ब्रणनाशकः रक्तशोधकः पीडान्तकः चेतिप्रसिद्धः। युनानीचिकित्सकाः हृद्रोगोपशमार्थमपि तुलस्याः प्रयोगमकुर्वन् इति ज्ञायते।[३] एतादृशः बहूपादेयः वृक्षः यदि गृहे रोपितः स्यात् गृहकर्ता निरोगः सन् धर्मार्थान् अर्जयति। अतः गृहपरिसरे तुलस्याः रोपणं निर्दिष्टम्।

आचार्यसूरपालेन तस्य वृक्षायुर्वेदग्रन्थे न केवलं तुलस्याः विल्बस्य वा रोपणम् निर्दिष्टम्, अधिकन्तु अश्वत्थं धात्रीं वटं निम्बं प्लक्षम् आम्रं शिरीषं पलाशम् उदुम्बरं मधुकादिकं च रोपयितुं निर्देशयति। एतेषाम् आयुर्वेदीयमहत्वं सामाजिक–धर्मिक–परिवेशतात्त्विकगुरुत्वं च अपरिसीमम्।

## उद्देश्यम्

आदिकालात् कृषिविषयकमालोचनायां भवतु आयुर्वेदाधारितालोचनायां वा भारतीयाः वृक्षसम्बन्धितां चर्चानूनं कुर्वन्ति। अतः संस्कृतसाहित्ये एवं बह्वयः कृतयः सन्ति यत्र प्रसङ्गवशात् वृक्षस्य विज्ञानं न्यूनाधिकम् उल्लिखितं प्राप्यते, बहुस्मिन् अध्यायाः आलोचनानि च प्राप्यन्ते तथापि विषयमिममाधारीकृत्य संपूर्णग्रन्थः सुरपालेनैव रचितः। आचार्यसुरपालः तान् विषयान् भिन्नेषु शास्त्रेषु संगृह्य तेषूपदिष्टानि साधु परीक्ष्य चस्वानुभूतान् सिद्धयोगान् विषयीकृत्य जगद्धिताय ग्रन्थाकारेण लिपिबद्धं चकार। तस्य ग्रन्थेऽस्मिन् वृक्षसम्पर्किताः विविधविषयाः एकत्र प्राप्यन्ते यस्मात् लघुकायः अपि ग्रन्थोऽयम् विषय महिम् नैव विदूषां दृष्टिमाकर्षयितुं क्षमः। किन्तु आधुनिकाः जनाः प्रामाण्यमन्विषन्तः प्रवर्तन्ते खलु, अतः संस्कृतशास्त्रेषु लब्धं विज्ञानम् अधुना अवहेलितं दृश्यते जनग्राह्यप्रमाणाभावात् प्रमात्रभावाच्च। आलोच्येऽस्मिन् पत्रे तत्र निर्दिष्टानां वृक्षविज्ञानस्य तथ्यानि संगृह्यआधुनिक विज्ञानदृष्ट्या समीक्षन्ते।

## वास्तुविज्ञानम्

शुभाशुभलक्षणानीति द्वितीयाध्याये वास्तुशास्त्रीयविषयाः आलोचिताः। वृक्षरोपणकाले भवनान्तिकेरोपितानां वृक्षाणां प्रभावः ज्ञातव्यः। विषयमिमं

---

३. चिरञ्जिववनौषधिः, प्रथमखण्ड, पृ. ७८

केन्द्रीकृत्य आचार्येण चतुर्विंशतितमादारभ्य चतु: त्रिंशत्तमं यावत्दशभिः श्लोकैः आलोचना कृता। तत्र दिशानिर्देशपूर्वकं रोप्यारोप्यवृक्षाणां तालिका दीयते। वास्त्वनुसारंनिर्मितस्य गृहस्य कक्षविन्यासमुपरि वृक्षाणां विशेषप्रभावो वर्तते। ऋत्वनुसारं सूर्यस्य वायोश्च गतेः उपरिनिर्दिष्टवृक्षाणां सम्बन्धो वर्तते येन वृक्षभेदेन शुभाशुभलक्षणानि निर्धारितानि। वृक्षस्य स्थूलतयाः उच्चतायाः च उपरिशिफायाः विस्तारः निर्भरशीलः। पुरा वासस्थानानि मुख्यतः काष्ठैः मृत्तिकया वा निर्मितानि आसन्। अतःगृहाणां भित्तिः न तावत् शक्तिशाली आसीत्। यदि गृहवृक्षयोः व्यवधानं समुचिततया न निर्णयेत तर्हि बर्धितस्य वृक्षस्य विस्तृतमूलं गृहस्य भित्तिस्थलं प्राप्य गृहनाशस्य कारणं भवितुमर्हति। अतः आचार्येण उक्तं कस्यापिवृक्षस्य छाया गृहस्योपरि न स्यात्। अर्थात् गृहान्तिके रोपितानां वृक्षाणां व्यवधानम् एवं स्यात् येन बर्धितानामपि वृक्षाणां छायापातः गृहे न भवेत्।

## भूविज्ञानम्

वृक्षाणाम् अभिबृद्धयर्थं भूमिमध्यस्थानि जल–वायु–तापादितत्त्वानि प्रयोजनीयानि। एतेषां यथेष्टोपलब्धतावृक्षाणां सुस्थतायाः बर्धनस्य च कारणम्। अतः वृक्षायुर्वेदे विविधाः भूमयः तासां प्रकाराः, कस्यां भूमौ के वृक्षाः योग्याः इति विषयाः निर्दिष्टाः वर्तन्ते। अस्मात् ज्ञायते प्राचीनभारते कृषिजीविनः कृषिशास्त्रिणः भूमेः स्वभावसम्पर्क सचेतनाः आसन्। चरक सुश्रुतप्रभृतयः आयुर्वेदीयोपयोगिता–दृष्ट्या तथा कौटिल्यादयः अर्थ नैतिकोप योगिता–दृष्ट्या भूमेः विभिन्नाः प्रकाराः स्वीकृतवन्तः। प्राचीन शास्त्रेषु वृक्षाणाम् औषधीयगुणाः तदाधारभूमिमुपरि निर्भरशीलाः इति कथ्यते। तदर्थमेव वृक्षेभ्यः औषधिसंग्रहकाले भूमेः प्रकाराः गुणागुणाश्च परीक्ष्यन्ते।

भिन्नैः आचार्यैः भूमेः विभागीकरणस्य बहवः आधाराः स्वीकृताः, यैः भूमिः बहुधा विभक्ता। यथा अमरकोशस्य भूमिवर्गे उर्वरताधारेण, तत्रैव वैश्यवर्गे निर्दिष्ट विकासशील वृक्षाधारेण, चरकसंहितायां सुश्रुतसंहितायां वृक्षायुर्वेदे च पर्यावरणस्य स्वभावानुसारेण, वृक्षायुर्वेदे उपवनविनोदे च वर्णाधारेण रूपाधारेण चभूमेः विभागाः दर्शिताः। आचार्यसुरपालेन भूमिनिरूपणं नाम तृतीयाध्याये दर्शितं जलतत्त्वस्यविद्यमानतामभि लक्ष्य भूमिः त्रिधा विभक्ता–जाङ्गलभूमिः

(Arid Land), आनूप भूमिः (Aquatic Land),सामान्य भूमिश्चेति (Medium type Land)।[४] एवं शास्त्रान्तरे अपि भूमेः अयं विभागः कृतः प्राप्यते। चरक संहितायां जाङ्गलस्य लक्षणं कृतम् अस्ति। तद्यथा–

**अल्पोदकद्रुमो यस्तु प्रवातः प्रचुरातपः।**
**ज्ञेयः स जाङ्गलो देशः स्वल्परोगतमोऽपि च।।**[५]

तथोक्तं चानूपस्य सामान्यस्य लक्षणम्–

**प्रचुरोदकवृक्षो यो निवातो दुर्लभातपः।**
**अनूपो बहुदोषश्च समः साधारणो मतः।।**[६]

अर्थात् यस्मिन् स्वल्पवृक्षाः प्राप्यन्ते तथा आतपस्य तेजः वायोर्गतिश्च अतिप्रबलं तादृशः वारिहीनो देशः जाङ्गलः उच्यते। तद्विपरीतस्तु यस्मिन् बहुवृक्षाः प्राप्यन्ते तथा आतपस्य तेजः न प्रखरं, नातिप्रवला च वायोर्गतिः तादृशः वारिबहुलः देशः आनूपः उच्यते। यस्मिन् तु वायुः आतपश्च उभयं समानं तादृशः देशः सामान्यम् इति कथितम्।

एतासु भूमिषु सामान्या भूमिः वृक्षाणां बर्धनाय उपयुक्ता। सुश्रुत संहितायामपि ध्वनितमिदं–

**सर्वलक्षणसम्पन्ना भूमिः साधारणा स्मृता।**
**द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः।।**[७]

जलं वृक्षविकासे अतिप्रयोजनीयतत्वम्। वृक्षाः जलमाध्यमेन हि भूमध्यात् आवश्यकीयतत्त्वानि आकृष्य जीवन्ति। अतः वृक्ष विकासे भूमौ जलस्य विद्यमानता महत्वपूर्णा भूमिकां निर्वहति। उपर्युक्तासु भूमिषुजाङ्गलभूमेः जलधारणक्षमता अत्यल्पा। तादृशी भूमिः रूक्षा शुष्का च वर्तते। अतः तस्यां वृक्षाणां समुचित बर्धनंन सम्भवति। तद्विपरीता च आनूपभूमिः। अस्यां

---

४. वृक्षायुर्वेदः ३५

५. चरकसंहिता विमानस्थानम् ३/५३

६. तत्रैव, ३/५४

७. सुश्रुतसंहिता, ३७/१४

जलीयपरिमाणम् अधिकम्। सर्वदा आर्द्रताकारणात्जलाधिक्यात् सर्वविध वृक्षाणां विकाशः बाधाप्राप्तः भवति तथा जलबहुले बहुवृक्षाः रुग्णाः म्रियन्ते। एतदुभयभिन्ना अर्धरूक्षा स्वल्पार्दा सामान्या भूमिः सर्वविधानां वृक्षाणां विकासाय प्रशस्ता। अस्यां जलस्यपरिमाण तथा अन्येषां तत्त्वानां विद्यमानता वृक्षाणाम् आवश्यकतानुसारमेव वर्तते। अतः आचार्येणोक्तम्–

**न जाङ्गला न वानूपा भूमिः साधारणा शुभा।**

**तस्यां सर्वेऽपि तरवः प्ररोहन्ति न संशयः।।**[८]

अव्यक्तषड्रसं जलं गृहीत्वैव भूमिस्वभावानुसारम् वनस्पतयः गन्धवर्णरसयुक्ताः भवन्ति। अतः उक्ताः भूमिप्रकाराः पुनः वर्णतः षड्भिः रसतश्च षड्भिरुपविभागैः निर्देष्टाः। यथा वर्णतः असित–विपाण्डु–श्यामल–लोहित–सित–पीताः, रसतश्च मधुर–अम्ल–लवण–तिक्त–कटुक–कषायाः इति। आचार्येण आलोच्येभूमिनिरुपणाध्याये अप्रशस्तायाः प्रशस्तभूमेः च निर्णयार्थ सोपमाः पद्धतयः उपदिष्टाः।[९] तथा च कस्यां भूमौ के के वृक्षाः प्ररोहन्ति तेषां नातिदीर्घा एका तालिका अपि प्रस्तुता।[१०]

## तरुपरिचर्या

वृक्षाणां संरक्षणं वृक्षायुर्वेदस्य अन्यतमः अङ्गः। सचेतनाः अपि वृक्षाः इतरेभ्यः चेतनेभ्यः विविधकारभात् व्यावृत्ताः। अन्ये प्राणिनः अस्वस्थावस्थायां कथमात्मनः आरोग्यं स्यादिति विषये प्रकृतिदत्तप्रज्ञया सचेतनास्तिष्ठन्ति, किं च आत्मनः आरोग्योपायं ज्ञात्वा तस्मिन् प्रवर्तन्ते। किन्तुल शक्तत्यभावात् वृक्षाणां क्षेत्रे एवं न सम्भवति। देशान्तरीयपथ्यं पादपैः ग्रहीतुं न शक्यम्। तदर्थं वृक्षाःपराधीनाः।

रोपणक्षेत्रे वृक्षाणां सुरक्षा तथा पोषणम् आवश्यकम्। औषधीय वृक्षेषु भिल्लोटवृक्षस्य गणनाबहुप्रचीनकालादेव क्रियते। रोपितानां वृक्षाणां निरामय

---

८. वृक्षायुर्वेदः, ४०

९. वृक्षायुर्वेदः, ३७, ३८

१०. तत्रैव, ४१–४३

विकासाय परितः भिल्लोटवृक्षाणां रोपणं विधीयते।[११] वृक्षाणां पोषणे जलस्य महती आवश्यकता वर्तते। अतः जलसेचनस्य समुचितकालः अपि आचार्येण निर्दिष्टः। तेनोक्तम् जाङ्गलप्रदेशे अर्थात् यत्र जलस्य अभावः वर्तते तत्र रोपितानां वृक्षाणां सेचनं प्रतिदिनं वारद्वयं कुर्यात्। अनेन वृक्षेषु जलाभावः न भवति। येन तेषां विकासश्च बाधाप्राप्तः न भवति। अनूपदेशे जलाधिक्यात् प्रत्यहंजलसेचनस्य आवश्यकता नास्ति। किन्तु पञ्च दिनानि व्यवधानेन सेचनम् अवश्यं कुर्यात्। साधारणभूमौदसदिवसं यावत् प्रत्यहं प्रातः सायं च सीमितजलेन सेचनं निर्दिष्टम्।

वृक्षाः भूम्याः आवश्यकीयतत्त्वानि संगृह्य बृद्धिं लभन्ते। अतः भूमेः उर्वरता क्रमेण ह्रसति। यदि भूमौपोषकतत्त्वानां प्रयोगः न कुर्यात् तर्हि तस्यां भूमौ वृक्षाणां सुष्ठुः विकाशः बाधां प्राप्नोति। आचार्येण मृत्तिकायाः उर्वरतां स्थिरीकर्तुं कुणपजलस्य विधानं दत्तम्। कुणप इति शब्दः सामान्यतः दुर्गन्धं सूचयति। किन्तु वृक्षायुर्वेदेशब्दोऽयं पोषकमिश्रणविशेषं सूचयितुं व्यवहृतः। वृक्षरोपणकाले गर्तखननादनन्तरम् अस्थिचूर्ण–गोमयादि परिपूर्यदग्ध्वा च कुणपजलस्य सिञ्चनं कुर्यादिति कथ्यते। कुणपजलं तरलं पोषकविशेषं यत् पशुवर्येषु प्रस्तूयते।

## वृक्षरोगविज्ञानम्

वृक्षायुर्वेदे कुशलः विद्वान् रोगग्रस्ते वृक्षे व्याधेः सम्प्राप्तिम् उपशमोपायञ्च सम्यक् ज्ञात्वा एवतच्चिकित्सार्थ प्रवर्तते। वृक्षायुर्वेदस्य रोगज्ञानाध्याये वृक्षाणां रोगान् द्विधा विभज्य तेषां लक्षणादिकम् आलोचितमस्ति। तत्र वृक्षरोगाः द्विधा विभक्ताः शारीरागन्तुभेदेन। अर्थात् आभ्यन्तरः बाह्यश्चेति वृक्षरोगः द्विविधः। अयं विभागः मनुष्यशरीरे स्थितरोगाणां विभागवत् निर्धारितः। यथा मनुष्याणां तथैव वृक्षाणाम् आभ्यन्तररोगाः वात–पित्त–कफेति त्रिभिः विकारैः वर्गीकृताः। वाह्यरोगाणां कारणत्वेन तु कीटशीतादिः कल्पितः। वृक्षायुर्वेदे विस्तारेण रोगाणां कारणं लक्षणम् उपचारोपायाः च वर्णिताः। यथा वातजरोगाणां लक्षणत्वेनकथ्यते–

---

११. तत्रैव, ६२

**ते कार्यकुब्जताग्रन्थि गुटिका रुढपत्रता।**

**कर्कशाल्परसास्वादुफलता चेति कीर्तिताः।।**[१२]

अर्थात् वृक्षेषु कुब्जता ग्रन्थिः कर्कशता अल्पस्वादुफलता चेति वातजरोगाणां लक्षणम्। तत्कारणं तु रुक्षभूमिः कषायरसयुक्तद्रव्यैः सेचनं तथा जलाभावः। आवश्यकीयपोषकतत्त्वानाम् अभावेन एतादृशाः रोगाः प्रादुर्भवन्ति। हिमागमकाले वसन्ते च वृक्षेषु कफजरोगाः जायन्ते। तल्लक्षणं यथा फलागमे बिलम्बः, फलानां स्वादहीनता, कुब्जपत्रता, रसहीनता इत्यादिः। अस्य कारणं तु स्वादुद्रव्यैः अम्लद्रव्यैः शीतद्रव्यैः च अत्यधिकसेचनम्। पीतपत्रता अकाले फलस्स्रावः शुष्कतादिः पित्तजरोगस्य लक्षणानि। कटुद्रव्यैः लवणाक्तद्रव्यैः तीक्ष्णद्रव्यैः मात्राधिकसेचनेन पित्तजरोगाः प्रादुर्भवन्ति। एवं वृक्षाणां बाह्यरोगाः तत्कारणाणि लक्षणानि चवृक्षायुर्वेदे आलोचिताः प्राप्यन्ते।

**वृक्षचिकित्साविज्ञानम्**

वृक्षायुर्वेदे निरूपितानां रोगाणाम् उपशमः कथं भवेत् तदुपायाः तत्फलञ्च आलोचितानि सन्ति। न केवलं रोगार्त्तानाम् अपि च वज्रदग्धवृक्ष–शुष्कवृक्षादीनामपि पुनरुद्धारोपायाः दर्शिताः। येषामुपायानां निर्देशः सुरपालेन कृतोऽस्ति तेषामनुध्यानेन ज्ञायते तेषु उपशामकद्रव्येषु बहूपादेयानितत्त्वानि वर्तन्ते यानि रोगान्नाशयन्ति। यथा चिकित्साध्याये कफरोगाणां चिकित्सार्थं पञ्चमूलक्वाथस्य विधानं दत्तम्। यथा–

**कषायैः कटुकैस्तीक्ष्णैः कफकृतान् गदाञ्जयेत्।**

**पञ्चमूलकृतक्वाथैः सुरभी सलिलेन तु।।**[१३]

पञ्चमूलक्वाथेति पञ्चानां वृक्षाणां मूलानि व्यवहृत्य प्रस्तुतः जलीय–औषधिः। ते च वृक्षाः श्रीफलः/विल्व (Aegle Marmelos) सर्वतोभद्रः (Gmelina arborea) पाटल (Stereopermumsuaveolens) गणिकारिका/श्रीपर्णी (Clerodendrum Phlomidis) श्योनकः (Oroxylumindicum)।[१४]

---

१२. तत्रैव, १६८

१३. तत्रैव, १८७

१४. Nalini Sadhale, Vrikshayurveda, Translation, p. 54

एतेषां वृक्षाणां गुणाः कफरोगाणां प्रतिषेधे कारणानि भवन्ति। यथा श्रीपर्णी कवकनाशी, विषाणुरोधी जीवानूनाशकश्च भवति। अस्य मूले कवकनाशकतत्त्वं Triterpenoidsaponin कीटबृद्धिरोधकतत्त्वं Neoclerodane Diterpenes जीवाणुनाशकगुणानि च वर्तन्ते।

विल्वे कवकनाशकतत्त्वं Sclerotinia Scleotiorum कीटनाशकानि कृमिनाशकानि च तत्त्वानि चवर्तन्ते। पाटले Crystallineukeda जीवाणुनाशकतत्त्वं विद्यते यत् कवकनाशी च भवति। एवं च श्योनके। lkaloids, Tannic acid तथा Tetuin नामकं पोषकतत्त्वम् अस्ति। एतेषां प्रयोगेण वृक्षेभ्यः क्षतिकरकीटादीनां दूरीकरणं सम्भवम् तथा च स्वादुस्निग्धाम्लशीतद्रव्यसेचनेन प्रादुर्भूताः कफजरोगाः कषायकटुतीक्ष्ण द्रव्यसेचनेन अपाक्रियन्ते।

हिमागमकाले वसन्ते च वायौः शैत्याधिक्यकारणादेव रोगाः भवन्ति किन्तु तीक्ष्णोष्णद्रव्याणां प्रयोगेणतेषां निवारणं सम्भवम्। एवम् अन्येषां वृक्षगदानां निवारणोपायाः वृक्षायुर्वेदे विस्तरशः आलोचिताः।

**विचित्रयोगाः** सुरपालकृतवृक्षायुर्वेदे पञ्चविंशत्यधिकत्रिशतसंख्यकेषु एकोनसप्तति संख्यकाः श्लोकाः विचित्राध्यायान्तर्गताः येषु अकाले फलोपायः गन्धार्थप्रयोगः बीजरहितफलोपायादयः विचित्रप्रयोगाः आलोचिताः। अत्र विचित्रेति पदेन वृक्षाणां तदवयवानां फलपुष्पादीनां प्राकृतिकस्वभावे परिवर्तनं सूचितम्। यथापुष्पाणां वर्णपरिवर्तनार्थ कथ्यते—

**निशाकिंशुककर्पासीमञ्जिष्ठारोध्रवारिभिः।**

**श्वेतं पुष्पं तरोः सेकाद्भुत्ते चामीकरद्युतिम्।।**[१५]

अर्थात् यः वृक्षः श्वेतपुष्पाणि धारयति सः स्वर्णद्युतिप्रभपुष्पान्वितः भवति यदि तस्य मूले निशा—किंशुक—मञ्जिष्ठा—कर्पासी—रोध्रजलेन सेचनं कुर्यात्। Asian Agri History Foundation इति संस्थायाः प्रख्यात विज्ञानी Dr. Y. L. Nene महोदयेन एतादृशानां केषाञ्चित् प्रयोगानां सूक्ष्मम् अनुध्यानं

१५. वृक्षायुर्वेदः, २३०—२३१

कृत्वा तेषां वैज्ञानिक विश्लेषणं कृतमस्ति। तेनोच्यते निशायां Xanthophylls नामकं वर्णतत्त्वं वर्तते येन निशायाः वर्णः पीतः भवति। कर्पास्यामपि Gossypol नामकंतत्त्वं विद्यते यत् वृक्षमध्ये पोषकतत्त्वानि अन्तर्भावयितुं प्रभवति। तथैव रोधे Lotutine, Colloturine, Loturidine, Glycosides इत्यादीनि। सांसवपक तत्त्वानि वर्तन्ते येषां कोशेषु रक्तवर्णकारकत्वं वर्तते। वृक्षस्य मूलं भुमध्यात् पोषकतत्त्वानि गृहीत्वा Xylem माध्यमेन समग्रे वृक्षे प्रवाहयति। अतः यदावर्णकारकद्रव्याणि वृक्षस्य मूलदेशे दीयन्ते तदा समाधेयानि (Soluble) रसायनतत्वानि Xylem माध्यमेन अवयवेषु गच्छति यैः पुष्पाणां वर्णः परिवर्तिताः जायन्ते।

सुरपालेन एतादृशाः बहुप्रयोगाः निर्दिष्टाः येषु बहुयोगाः असम्भवतया प्रतीयन्ते। तत्काले एतेषांविचित्रयोगानां प्रयोगेण सिद्धहस्ताः विज्ञानिनः आशानुरूप फलप्राप्ताः आसन्। तस्मात् न केवलंआचार्यसुरपालेन किन्तु चक्रपाणिमिश्रण विश्ववल्लभे वराहमिहिरेण वृहत्संहितायां शार्ङ्गधरेण उपवनविनोदे अपिएतादृशाः विचित्रविधयः आलोचिताः। एते विषयाः पूर्वसूरीणां वैज्ञानिकीदक्षतां चिन्तनञ्च प्रमाणीकुर्वन्ति।

**उपसंहारः**

आधुनिकसमये विज्ञानस्य प्रयोगेन यद्यपि मनुष्यः विलासमयजीवन यापनं कर्तुं शक्नोति तथापिपक्षान्तरे पृथिव्याः सन्तुलनं दिने दिने विनश्यति। कृषिक्षेत्रे रासायनिकवस्तूनां प्रयोगः परिवेशं दूषयति। वृक्षायुर्वेदे एवं बहूनि तत्त्वानि आलोचितानि येषां प्रयोगेण परिवेशस्य काञ्चित् हानिं विना अपि भूयः उत्पादनः सम्भवेत्। पर्यावरणस्य दुरवस्थया मनुष्यः अपि क्रमेण विनाशं प्रति याति। प्राचीनभारतीयविज्ञानंपरिवेशानुकूलमासीत्। प्राचीनशास्त्राणाम् अनुशीलनेन तात्कालिकसमुन्नतकौशलानि ज्ञायन्ते यस्मात्पर्यावरणस्य रक्षा सम्भवेत्। अधुनातनसमये विश्वतापायनस्य सन्तुलनार्थं प्राकृतिकविपर्ययेभ्यः निष्कृत्यर्थं चवृक्षरोपणस्य संरक्षणस्य च महती आवश्यकता वर्तते। वृक्षायुर्वेद ज्ञानेन वेदकालादारब्धा परन्तु क्रमेण भग्नाकाचित् प्रवला वैज्ञानिक परम्परा पुनर्जीविता भवेत् तेन च भारतं पुनः भा–रतं स्यात्।

***

# संस्कृतसाहित्ये राष्ट्रचिन्तनम्

**डॉ. सूर्यप्रकाशशुक्लः**

*सहाचार्यः, संस्कृतविभागः*

*राजकीयमहाविद्यालयः, पलिया कलां, लखीमपुरखीरी (उ.प्र.)*

स्वराष्ट्रस्य भूमि–धर्म–कला–साहित्य–सभ्यतेतिहासादीन् प्रति तत्रत्यानां जनानां हृदि यत् स्वाभाविकं चिन्तनं भवति तदेव राष्ट्रचिन्तनम्। अथवा राष्ट्रचिन्तनं नाम सुदृढं मानसिक–चिन्तनं यस्मिन् स्थिताः जनाः स्वकीयां सर्वोत्कृष्टां श्रद्धां भक्तिञ्च राष्ट्राय अर्पयन्ति। राष्ट्रचिन्तनं राष्ट्रोन्नयनवाहकैः सद्विचारैः प्रारभते। राष्ट्राराधनमेव तस्य प्रमुखं लक्ष्यम्। ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'' इति सूक्तिमनुसृत्य सर्वेषां जनानां मनसि स्वराष्ट्रं प्रति अपरिमिता निष्ठा भवति। एष एव राष्ट्रभक्तेः केन्द्रीभूतभावः भवति। राष्ट्रियभावनाभाविताः राष्ट्रभक्ताः स्वं जीवनादधिकं राष्ट्रं स्वीकुर्वन्ति। ते सदैव राष्ट्रसेवातत्पराः भवन्ति। ते अहर्निशं इदमेव चिन्तयन्ति यत् केनोपायेन अस्माकं राष्ट्रं समृद्धिं गौरवं च लभेत्। राष्ट्रसेवायै समर्पिताः देशभक्ताः देशे आर्थिक–सामाजिक– सांस्कृतिक दृशा राष्ट्रम् उन्नतिं प्रति नेतुं सततं यतन्ते। सर्वतोभावेन राष्ट्रहिताय प्रतिबद्धाः समर्पिताः प्राणपणेन संलग्नाः भवन्ति यतः तेषां कृते प्राणेभ्योऽप्यधिकं राष्ट्रं भवति। अतः ते राष्ट्रपरिधौ सम्मिलिताः सर्वाणि तत्त्वानि समाद्रियन्ते। राष्ट्रस्य नागरिकाः पशवः भूमिः सर्वे स्वस्थाः सुरक्षिताः भवन्तु एतदर्थं बद्धपरिकराः भवन्ति। राष्ट्रस्य पर्यावरणं स्वच्छं शुद्धं माङ्गलिकं च भवेत् एतदर्थं जागरूकाः तिष्ठन्ति। नदीषु निर्मलं जलं प्रवहेत्, शुद्धा वायुः भवेत्, कुत्रापि मालिन्यं न तिष्ठेत् एतदर्थं प्रयत्नशीलाः भवन्ति। वस्तुतः अस्माकं राष्ट्रं प्राचीनकालादेव गौरवमण्डितमस्ति। ज्ञानस्य आलोकः अस्माद् राष्ट्रात् एव लोके प्रसृतः जातः। यतः देशोऽयं ऋषिमहर्षीणां साधनया दिव्यज्ञानेन च सम्पृक्तोऽस्ति। अत एव अस्माकं समेषां राष्ट्रभक्तानामिदं पावनं कर्त्तव्यमस्ति यत् ज्ञानस्येयं परम्परा अक्षुण्णा तिष्ठते। ''ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति'' इति श्रुतिवचनमनुसृत्य स्पष्टतया अवगन्तुं शक्यते यत् राष्ट्ररक्षणाय शासकः शमदमादिगुणैः सम्पन्नः भवेत् तदेव

भोगासक्तिं विना परार्थभावनया राष्ट्रं समुन्नतं समृद्धं च कर्तुं शक्नोति।

एतत् चिन्तनं न केवलं साम्प्रतिकम् अपितु आदिकालादारभ्य सततं प्रवहमानम् अस्ति। सनातन–भारतीय संस्कृत्याः ईदृशी परम्परा आसीत् यत् पावने भूतलेऽस्मिन् अवतरिताः मनीषिणः, विचारकाः, वैज्ञानिकाः, विद्वांसः कवयश्च सर्वे एव सर्वदा राष्ट्रहितचिन्तनाय जागरूकाः सचेष्टाश्च आसन्। फलतः संस्कृत साहित्ये राष्ट्रियोदात्तचिन्तनं प्रायशः सर्वत्र परिलक्ष्यते। अस्ति रामायणमहाकाव्यम् अस्माकं भारतीय संस्कृतेः प्रकाशस्तम्भभूतम्। तत्र आदिकविः महर्षिः वाल्मीकिः रामराज्यस्य आदर्शस्वरूपं सर्वप्रथमं कल्पितवान्। सङ्कटापन्ने सति राष्ट्रे राष्ट्रनायकः तत्रत्याः जनाश्च राष्ट्रगौरवं कथं रक्षयेयुः इति आदिकविना राष्ट्रनायकस्य भगवतः श्रीरामचन्द्रस्य उदात्तचरितमाध्यमेन सम्यक् निरूपितम्। यतोहि श्रीरामः आसीद् आदर्शभूतो राष्ट्रनायकः। कारणेन अनेनैव भारतीयाः जनाः अद्यापि अभिलषन्ति रामराज्यम्। तदादर्शभूता गुणाश्च सन्त्येते–

**"न चानृतकथो विद्वान् वृद्धानां प्रतिपूजकः।**
**अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्यते।।**[1]

**दद्यान्न प्रतिगृह्णीयान्न ब्रुयात् किञ्चिदप्रियम्।**
**अपि जीवितहेतोर्वा रामः सत्यपराक्रमः।।"**[2]

यदि अस्माकं राष्ट्रनायकाः प्रजावत्सलस्य श्रीरामस्य पन्थानम् अनुसरेयुः तदा राष्ट्रस्य सर्वविधम् उत्थानं निश्चयेन भविष्यति, नात्र कोऽपि सन्देहः। यतोहि प्रजारञ्जकाः, प्रजापालकाः, राष्ट्रहितचिन्तकाः, सर्वहिते रताः, राष्ट्रोन्नायकाः, सन्मार्गदर्शकाः भारतीयाः राजानः स्वेच्छाचारिणः पाश्चात्यशासका इव न भवन्ति स्म। राजा राष्ट्रहिताय धर्मस्य सत्यस्य चोद्भवस्थलं भवति। तदभावे राष्ट्रस्य रक्षणमसंभवम्–

---

१. वाल्मीकिरामायणम् अयोध्याकाण्डम् १/१३

२. वाल्मीकिरामायण्– ५/३३/३६

**''नाराजके जनपदे धनवन्तः सुरक्षिताः।**
**शेरते विवृतद्वाराः कृषि–गोरक्षजीविनः।।[३]**
**न हि तद् भविता राष्ट्रं यत्र रामो न भूपतिः।**
**तद् वनं भविता राष्ट्रं यत्र रामो निवत्स्यति।।''[४]**

एवमेव महाभारतेऽपि वर्णितम्–

**''अराजकेषु राष्ट्रेषु धर्मो न व्यवतिष्ठते।[५]**
**यदा रक्षति राष्ट्राणि यदा दस्यूनपोहति।**
**यदा जयति संग्रामे स राज्ञो धर्म उच्यते।।''[६]**

राष्ट्रहिताय कर्तव्यनिष्ठस्य राष्ट्रनायकस्य औदार्यम् उद्घोषितं महाकविना भवभूतिना ''उत्तररामचरितम्'' इति नाटके–

**''स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा।''[७]**

अर्थात् प्रजानामाराधनाय स्नेहं, दयां सौख्यम् अथवा स्वकीयां वल्लभां सीतामपि मुञ्चतो राष्ट्रहितचिन्तकस्य राष्ट्रनायकस्य मर्यादापुरुषोत्तमस्य भगवतः श्रीरामस्य तत्क्षणेऽपि व्यथा पीडा न भवति। राष्ट्रहितचिन्तनवशात् श्रीरामेण सीतापरित्यागव्यथा तदानीं न अनुभूता इति राष्ट्रनायकस्य श्रीरामस्य तच्चरितस्य महद् वैशिष्ट्यम्। वस्तुतः अयमेवास्ति प्रजातांत्रिकराष्ट्रस्य आदर्शः यत् प्रजानुरञ्जनाय लोकहिताय वा पारिवारिकं मोहं स्वार्थं च विहाय व्यवहरेत् राजा राष्ट्रनायको वा।

राष्ट्रियभावनाभावितान्तः करणानां राजनीतिज्ञानां कृते श्रीमद्भगवद्गीता

---

३. तदेव– २/६७/१६
४. तदेव– २/३७/२६
५. महाभारतम् शान्तिपर्व– ६७/३
६. तदेव–६१/३४
७. उत्तररामचरितम् – १/१२

अपूर्वमादर्शमुपस्थापयति। तत्र विषम परिस्थितौ राष्ट्रनायकानां कृते किं करणीयं किम् अकरणीयं वा इति धिया अर्जुनमुद्दिश्य लीलापुरुषोत्तमेन योगिराजेन भगवता श्रीकृष्णेन प्रतिबोधिता गीता अद्यापि सर्वोच्चपथप्रदर्शिका वर्तते। यामाश्रित्य विनोबा–गान्धि–गोखले–तिलक–अरविन्द–विवेकानन्द प्रभृतयः राष्ट्रनायकाः राष्ट्रोत्थाने राष्ट्रहितचिन्तने च सचेष्टाः जाताः। भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां स्पष्टरूपेण उक्तम्–

**''यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।''[८]**

सन्दर्भेऽस्मिन् ध्यातव्यमस्ति यत् आचारसंवलितराष्ट्रसमुन्नतिः तदेव सम्यक् रूपेण भवितुं शक्नोति यदा राजा स्वयमेव सर्वतोभावेन सदाचारणपरायणः भवेत् यतः जनाः तमेव अनुसरन्ति तदनुसृत्य आचरन्ति च। अतः राजा शासको वा प्रजानां कृते आदर्शभूतः भवति।

वस्तुतः राजा प्रजायाः प्रथमं शरीरं भवति इत्यस्ति मान्यता। राजा ईश्वरस्य अंशभूतः मन्यते। अतः राजा राष्ट्रनायको वा स्वस्य कृते न किञ्चित् कामयते अपितु सः राष्ट्रस्य हिताय कल्याणाय वा सततं यतमानः भवति। तस्य केन्द्रे राष्ट्रमेव तिष्ठति–

**''न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन्।**

**नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि।।''[९]**

एवमेव भगवान् श्रीकृष्णः यत् कथयति तत् राष्ट्रसंचालकैः राष्ट्राध्यक्षैश्च सर्वथा अनुपालनीयः। कर्मशैथिल्ये जाते राष्ट्रे अव्यवस्था प्रसरति। अतः सर्वथा सावधानता करणीया भवति शासकैः–

**''उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।**

**सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः।।''[१०]**

---

८. श्रीमद्भगवद्गीता – ३/१२

९. तदेव – ३/२२

१०. तदेव – ३/२४

प्रजापालकः नृपः शिबिः धर्मस्य रक्षणाय राष्ट्रोत्थानाय च स्वात्मानमर्पयन् कथयति–

**''न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम्।**

**प्राणिनां दुःखतप्तानां कामये दुःखनाशनम्।।''**[११]

संस्कृतमहाकाव्येषु ईदृशां राज्ञां शासनं वर्णितमस्ति येषां काले राजतन्त्रस्य प्रणाली प्रचलिता आसीत् किन्तु तेषां व्यवस्थायां प्रजातान्त्रिकानि मूल्यानि परिपालितानि जातानि येन राष्ट्रस्य समेषां सुखसौविध्यसंवलितं चिन्तनं दरीदृश्यते।

'किरातार्जुनीयम्' महाकाव्यस्य रचना आपि प्रजारक्षणभावनया एव जाता। महाकाव्यस्य आरम्भे एव द्यूतक्रीडायां दुर्योधनेन पराजितः राज्यभ्रष्टः युधिष्ठिरः पुनस्तदधिगन्तुं प्रजां प्रति शासनाधिरूढस्य तस्य दुर्योधनस्य प्रजापालननीतिं विज्ञातुं ब्रह्मचारिवेषधृतम् एकं किरातं हस्तिनापुरं प्रेषयति–

**''श्रियः कुरुणामधिपस्य पालनीं**

**प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**

**स वर्णिलिङ्गी विदितः समाययौ**

**युधिष्ठिरं द्वैतवने वनेचरः।।''**[१२]

राज्यशासन व्यवस्थान्तर्गतं न केवलं राजा अपितु सचिवोऽपि महत्वपूर्णं स्थानं धत्ते। सचिवानां समूहः राजानं कश्मिंश्चित् विषये विचारविमर्शं निधाय निर्णयं करोति। अतः राज्ञः सचिवानां च सम्बन्धः वैमत्यरहितः स्यात् तदेव राष्ट्रस्य माङ्गल्यं सम्भवति–

**''स किंसखा साधु न शास्ति योऽधिपं**

**हितान्न यः संश्रृणुते स किंप्रभुः।**

---

११. महाभारते श्येनकपोतीयाख्यानम्

१२. किरातार्जुनीयम् – १/१

**सदानुकूलेषु हि कुर्वते रतिं**

**नृपेष्वमात्येषु च सर्वसम्पदः।।''**[१३]

एवं किरातार्जुनीयम् महाकाव्ये राज्ञः तद्राजनीतेश्च वर्णनं प्राचुर्येण समुपलभ्यते।

कविकुलगुरुः महाकविः कालिदासः राष्ट्रिय एकतायाः प्रबलः समर्थकः प्रचारकश्च अस्ति। तस्य सम्पूर्णासु कृतिषु प्रायशः राष्ट्रचिन्तनं, राष्ट्रभक्तिः विद्योततेतराम्। रघुवंशे रघोः दिग्विजयवर्णने भारतीयतायाः आढ्यं, मेघदूते भारतराष्ट्रस्य भौगोलिकी समृद्धिः, शाकुन्तले प्रकृतिसमादरः इत्यादयः स्मारयन्ति महाकवेः राष्ट्रियभावानां वैपुल्यम्।

रघुवंशे भारतीयभूपतीनां बल–बुद्धि–वैभव प्रभृतिगुणानां साफल्यं परहिताय राष्ट्रसंरक्षणाय च भवति इति महाकविना कालिदासेन प्रतिपादितम्। तद्यथा–

**''सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।**

**आसमुद्रक्षितीशानामानकरथवर्त्मनाम्।।**

**यथाविधिहुताग्नीनां यथा कामार्चितार्थिनाम्।**

**यथापराधदण्डानां यथा काल प्रबोधिनाम्।।**

**त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।**

**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।**

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**

**वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।**

**रघूणामन्वयं वक्ष्ये तनु वाग्विभवोऽपि सन्।**

**तद्गुणैकर्णमागत्य चापलाय प्रचोदितः।।''**[१४]

नद्यः, पर्वताः, सागराः, वनानि च कस्यापि राष्ट्रस्य गौरवभूतानि

---

१३. तदेव– १/५

१४. रघुवंश– १/५–९

उपादानानि भवन्ति। तेषां विशुद्धता भव्यता विशालता सौन्दर्यं च राष्ट्रगौरवं प्रदर्शयन्ति। अतः एतेषां तत्त्वानां संरक्षणाय संवर्धनाय च परमं राष्ट्रीय कर्त्तव्यं भवति। सन्दर्भेऽस्मिन् कुमारसंभवस्य प्रथसर्गस्यारम्भे नगाधिराजस्य हिमालयस्य भव्यं स्वरूपं वर्णितमस्ति। अस्य माहात्म्यं अनेनैव सिद्धयति यत् महाकविः हिमालयस्य वर्णनं मङ्गलाचरणरूपेण कृतवान्।

**''अस्त्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो नाम नागधिराजः।**
**पूर्वापरौ तोयनिधीवगाह्य**
**स्थितः पृथिव्या इव मानदण्डः।।**[१५]

वस्तुतः राष्ट्रस्य केन्द्रबिन्दुः प्रजा एव भवति। अतः जनकल्याणम् एव कस्यापि शासकस्य सर्वप्रमुखं लक्ष्यं भवति यतः राजा राष्ट्रशासको वा प्रजायाः परिपालकः समाराधको वा मन्यते। तथ्यमिदमङ्गीकृत्य महाकविः कालिदासः स्वकीयम् अभिमतम् अभिव्यनक्ति अभिज्ञानशाकुन्तलस्य भरतवाक्ये–

**''प्रवर्वतां प्रकृतिहिताय पार्थिवः**
**सरस्वती श्रुतिमहती महीयताम्।**
**ममापि च क्षपयतु नीललोहितः**
**पुनर्भवं परिगतशक्तिरात्मभूः।।''**[१६]

एवमेव विक्रमोर्वशीये नाटके राष्ट्रचिन्तनं जनकल्याणं वा हृदिनिधाय महाकविना कालिदासेन भरतवाक्ये कामना कृता अस्ति–

**''सर्वस्तरतु दुर्गाणि सर्वोभद्राणि पश्यतु।**
**सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु।।''**[१७]

इत्थं कालिदासस्य रचनासु राष्ट्रियभावना अभिव्यक्ता जाता।

---

१५. कुमारसम्भव– १/१
१६ अभिज्ञानशाकुन्तलम् – ७/३५
१७. विक्रमोर्वशीयम्– ५/२५

राष्ट्रियभावनया सहैव लोककल्याणभावना अपि तस्य कृतिषु अवलोक्यते। एवं श्रीहर्ष—माघ—भास—बाणभट्ट प्रभृतीनां महाकवीनां काव्येषु अपि राष्ट्रचिन्तनस्य वर्णनं बहुत्र प्राप्यते।

आधुनिक संस्कृत कवयः अपि समग्रभारतराष्ट्रमाराधयन्तः दृग्गोचराः भवन्ति। साम्प्रतं ते राष्ट्रभावनां संवहन्तः संवर्धयन्तः काव्यरचनायां प्रवृत्ताः दृश्यन्ते। स्मर्यन्तेऽत्र सादरेण डॉ. रेवाप्रसाद द्विवेदी (स्वातन्त्र्यसम्भवम्) , डॉ. रमाकान्त शुक्लः (भाति मे भारतम्), डॉ. अभिराज राजेन्द्र मिश्रः (वाग्वधूटीकाव्यम्), डॉ. कपिलदेव द्विवेदी (राष्ट्रगीताञ्जलिः), पं. अमीरचन्द्र शास्त्री (नेहरूचरितम्), सत्यव्रतशास्त्री (इन्दिराचरितम्), राधामोहन उपाध्यायः (भारत विजयम्), डॉ. हरिनारायण दीक्षितः (भारतमाता ब्रुते), रामकरण शर्मा, भास्काराचार्य, हर्षदेवमाधवः, श्रीनिवासरथः, डॉ. विन्ध्येश्वरीप्रसाद मिश्रः, डॉ. जगन्नथापाठकः, इत्यादयः अनेके सुरभारती पुत्राः कवयः येषां काव्येषु राष्ट्रियभावनानां, राष्ट्रभक्तेः, सत्याग्रहस्य च परमं हृद्यं रमणीयं चित्रणं संशोभते।

***

# श्रीमद्भगवदगीतायां प्रबन्धसूत्राणि

**डॉ० सरिता शर्मा**

*सहाचार्या, कमलानेहरूमहाविद्यालयः*

*दिल्लीविश्वविद्यालयः, दिल्ली*

## १. भूमिका–

महाभारतस्य भीष्मपर्वणि भगवता वेदव्यासेन समीचीनमेव उक्तमस्ति यद् 'सर्व शास्त्रमयी गीता'। वराहपुराणमध्ये भगवता स्वयमेव कथितमस्ति–

**"गीताश्रयेऽहं तिष्ठामि गीता मे चोत्तमं गृहम्।**
**गीताज्ञानमुपाश्रित्य त्रीँल्लोकान् पालयाम्यहम्।।''**
**गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिः सृता।।**[1]

श्रीमद्भगवदगीतायाः महत्त्वं विज्ञाय इत्यपि ज्ञातव्यं यत् यद्यपि उपदेशोऽयं अर्जुनं प्रत्यासीत् तथापि देशकालनिरपेक्षोस्ति भगवतः वासुदेवस्य वाणी।

## २. शोधविषयस्योपयोगिता, स्थापना, विवेचना पुनरावृत्तिदोष–निवारणञ्च–

कस्मिंश्चिदपि देशे कस्मिंश्चिदपि काले कश्चन अपि जनः यदि आत्मोन्नतिं प्राप्तुमिच्छति तर्हि तेन गीतायाः वचनामृतं सेवितव्यमिति। शोधपत्रेऽस्मिन्वयं प्रबन्धविषये ग्रन्थेऽस्मिन् किं किमुपलभ्यते इति विषयं वक्ष्यामि। प्र उपसर्ग पूर्वकं बन्ध् धातुना निर्मितस्य प्रबन्धपदस्य अर्थः प्रकृष्टं बन्धनम् कथयितुं शक्यते। इयं कीदृशी विप्रतिपत्तिः?

श्रीमद्भगवदगीता तु मोक्षशास्त्रम् अतः बन्धनात् मुक्तिरेवास्य प्रतिपाद्यः। कथं वयं बन्धनस्य प्रकृष्टतामत्र चर्चिष्यामः? यच्छास्त्रं बन्धनमुक्तेर्मार्गम्

---

१. वराहपुराणे समुद्धृतः

दर्शयति कथं तदेव शास्त्रं प्रबन्धमार्गमपि प्रशस्तीकरोति। एषा शङ्का भवितुं शक्नोति अपरेषां मनसि। किन्तु अत्र नास्ति कोऽपि विरोधाभासः। वस्तुतः प्रबन्ध इत्यस्य अभिप्रायः आधुनिककाले विद्यमानः Management इति विषयो वर्तते। सामान्ये लोकजीवने कथं व्यवहारः करणीयः केन प्रकारेण व्यवहारः करणीयः केन प्रकारेण अस्माभिराचरणीयभित्यभिप्रायः। सांसारिकात् बन्धनात् मुक्तिस्तु अस्तिरेव भगवतः वासुदेवस्योपदेशस्य केन्द्रविषयः, किन्तु लोकेऽस्मिन् कथं जीवितव्यम्, कथं विषयैः मुक्तिः भवेत्, कथमस्माकं दिनचर्या भवितव्या, कथमनुशासनं करणीयम्, कथं भवेत् लोकव्यवहारः, कथं देहमिदं पालनीयम्, कथं भवेत् वर्णाश्रमाणामाचरणम् ज्ञानकर्मसाङ्ख्ययोगः किमर्थमनुपालनीयम् प्रभृतीनां विषयाणां ज्ञानेनानुपालनेनैव कोऽपि जनः मोक्षमार्गमनुचरितुं शक्नोति। ज्ञातव्यमत्र यत् मोक्षस्तु ज्ञाननिष्ठया साधयितुं शक्यते किन्तु ज्ञाननिष्ठावाप्तिः कथं भवेत्? कर्मनिष्ठया एव। प्रथमस्तावत् Life management अर्थात् जीवनप्रबन्धः कर्मनिष्ठया तदनु भविष्यति After Life management अर्थात् मोक्षलब्धिः ज्ञाननिष्ठया।

वयं सर्वे जानीमः यत् अस्मदीयाः छात्राः"गीतायाम् आत्मप्रबन्धनमिति" विषयं CBCS शिक्षणप्रणाल्यां पठन्ति एव। किमत्र वयं पुनरुक्तिदोषस्य वाहकाः स्मः? न, नैव। वयं तु सप्तशतपद्येषु अष्टादशाध्यायेषु यत्किञ्चितदपि प्रबन्धनवनीतं भगवता श्रीकृष्णेनोद्घाटितमस्ति तस्यामृतपानस्य, समुत्सुकाः समुपासकाः स्मः।

## ३. विषयस्य समीक्षा–

श्रीमद्भगवद्गीतायाः प्रत्येकमध्यायस्य नामकरणेऽपि प्रबन्धसूत्राणि दृश्यन्ते। अर्जुनविषादयोगनामकः प्रथमाध्यायः। अध्यायेऽस्मिन् कुरुक्षेत्रनामके धर्मक्षेत्रे युयुत्सवाः कौरवाः पाण्डवाश्च सन्ति। भीष्माभिरक्षितं स्वकं बलं दुर्योधनः बहुजानाति। पितामहः अकरोत् शंखनादम्। युद्धस्य सज्जतां दृष्ट्वा सेनयोरुभयोर्मध्ये रथस्थापनार्थमर्जुनः स्वसारथिं श्रीकृष्णं न्यवेदयत्। स्वकीयान् जनान् दृष्ट्वा तस्य मनसि विषादः समागच्छत्। एषा हि स्थितिः कस्यचिदपि जनस्य भवितुं शक्नोति। एकतः धर्मः अपरतश्च स्वजनाः। यदि एतादृशी किंकर्त्तव्यविमूढता नरस्य जीवने जायते तर्हि एतस्याः अपाकरणं

कथं करणीयम्? चित्तः विषादग्रस्तः अस्ति, मनः भ्रमति, त्वक् परिदह्यते, अवस्थातुं न शक्यते, गात्राणि सीदन्ति मुखं परिशुष्यति, शरीरे वेपथुः रोमहर्षश्च जायते, विजयस्य आकाङ्क्षा नास्ति– एते सर्वे विषाद अर्थात् Depression इति मनोरोगस्य लक्षणास्सन्ति। विषादरोगस्य निवारणार्थं भगवता वासुदेवेन सांख्ययोगो नामके द्वितीये अध्याये केचन प्रबन्धसूत्राणि प्रदत्तानि– प्रथमस्तावत्

**१. क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ**[२]

अर्थात् हृदयस्य दुर्बलता चरित्रस्य क्षुद्रता अस्ति। काचिदपि समस्या भवेत् मनुष्यैः दुर्बलता त्यजनीया। यदि हृदयः बलवानस्ति तर्हि शरीरेऽपि अनुगामी इव बलवान् भविष्यति। 'Manage the weakness of your heart is the mantra'.

**भगवान् कथयति–**

**२. "गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः"**[३]

अर्थात् प्रज्ञावन्तः जनाः जीवितानां मृतानां वा विषये शोकं न कुर्वन्ति। आत्मा तु नित्या अस्ति अतः देहान्तप्राप्तिर्विषये धीरः जनः न मुह्यति।

आचार्यः श्रीकृष्णः पुनः शास्ति–

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत।।**
**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते।।**[४]

अहा! अद्भुतमेव। यदि वयं इन्द्रियाणां विषयेषु सुखं दुःखं च न अनुभवं कुर्मः तर्हि कथं अस्माकं हृदयेषु कथं रागः विरागो वा प्रवेष्टुं शक्नोति। कुत्रचिदपि हर्षः, आक्रोशः, विद्वेषः न भवितुमर्हति, न च कश्चन पापाचारी

---

२. श्रीमद्भगवद्गीता २/३

३. तदेव २/११

४. तदेव २/१४–१५

भविष्यति, न च कुत्रचित् पापकर्मसंलग्नाः आततायिनः आतङ्कवादिनः, दस्यवः, चौराः, दुराचारिणः लोके सञ्चरिष्यन्ति। सद्भिः समाजप्रबन्धनस्य सूत्रम् अर्थात् Social Management इत्यस्य कृते तितिक्षा अपरिहार्याऽस्ति। सुखदुःखयोः समत्वबुद्धिरस्ति यस्य स एव जनः धीरः अस्ति। एष एव मोक्षपदाय कल्पते।

४. **तस्माद्युध्यस्व–**श्रीकृष्णः युद्धाय कथयति। एतद्धि क्षत्रियस्य अनुपालनीयः धर्मः।

५. आत्मा न हन्ति, न हन्यते, न जायते, न म्रियते अपितु अयं अजः, नित्यः, शाश्वतः अस्ति। यथा नरः जीर्णानि वासांसि विहाय नवानि गृह्णाति तथैव अयमात्मा जीर्णानि शरीराणि विहाय नवानि गृह्णाति।

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।**

**अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।**
**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः।।**

**अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।**
**तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि।।**[५]

एतानि पद्यानि तु केवलं निदर्शनमात्रमेव। भगवता प्रोक्तं आत्मनः स्वरूपं विज्ञाय कोऽपि जनः शोकात्, दुःखात् मोहात् निष्क्रान्तुं शक्नोति। सर्वे एव जानन्ति यत् द्विवर्षतः एकेन प्रलयङ्करेण कोरोणानामके विषाणुना कथं सकलेऽपि विश्वे भीषणतमः नरसंहारः व्यापादितः। अस्माकं देशेऽपि लक्षाः जनाः कालकवलिताः अभवन्। संस्कृतजगतः नैकाः देदीप्यमानाः नक्षत्रनिभाः आचार्याः, गुरुजनाः, सहकर्मिणः, सहपाठिनः, छात्राः, परिजनाः, कोरोणा कारणतः धरणितलमत्यजन्। भगवतः वासुदेवस्य 'आत्मा अजः अस्ति, नित्यमस्ति' इतिवाक्यसमुच्चयेन निश्प्रचमं अस्मादृशानां हृदयस्य दौर्बल्यं न्यूनीभवति, विषादश्च क्षीणो जायते। Community Management अर्थात् सामुदायिक प्रबन्धनस्याद्वितीयं कार्यं सम्पादयति भगवता प्रोक्तम्

---

५. तदेव २/२३–२४

आत्मनिरुपणम्।

६. युद्धक्षेत्रे समुपस्थितानां सैनिकानां कृते अपि भगवान War management अर्थात् युद्धप्रबन्धनविषये कथयति–'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते।'[६]

**यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।**
**सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्।।**
**अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि।**
**ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि।।**
**हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।**
**तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः।।**[७]

एष उपदेशः समराङ्गेण समुस्थितानां सैनिकानां मनोबलं कथं वर्धिष्यतीति सर्वेऽत्र जानन्ति। अत्र भवतां मनसि अमेरिका–ईराकदेशयोर्मध्ये दीर्घकालिकस्य गल्फ War इति खाडियुद्धस्य स्मृतिरस्ति इति मन्ये। सैनिकानां मनोस्थितिं सुदृढीकर्तुम् अमेरिकादेशेन श्रीमद्भवद्गीतायाः उपदेशस्य प्रयोगं कृतमासीत्। दशाधिकसहस्रतमे वर्षे 'गढवाल रेजिमेन्ट' इत्यस्य सैनिकानामुद्‌बोधनाय काश्मीरप्रान्तस्य अनन्तनागक्षेत्रेऽहमपि आमन्त्रिता आसम्। गीतायाः द्वितीयः अध्यायस्तु सैनिकानां कृते Energy Booster इत्युक्ते ऊर्जासंवर्धकरूपेण कार्यं करोति।

७. एतस्मिन्नेवाध्याये मानवसंसाधनविकासाय प्रबन्धनाय च सूत्राणि उपलभ्यते–

**त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।**
**निर्द्वन्द्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान्।।**[८]

यः जनः द्वन्द्वरहितः अस्ति सः एव आधुनिके जगति प्रबन्धस्य

---

६. तदेव २/३१

७. तदेव २/३२, ३३ तथा ३६

८. तदेव २/४५

सर्वोच्चपदेषु प्रतिष्ठितः भवति।

८. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा सङ्गोऽस्त्वकर्मणि।।[९] पद्यमिदं तु सर्वस्य कृते हितकरं वर्तते। ये जनाः स्वजीवनम् इत्थं जीवन्ति तेषां जीवने नैराश्यम् नागच्छति।

९. योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।। एतत् पद्यं Life Management अर्थात् जीवनप्रबन्ध–नार्थमुपयोगी वर्तते।

१०. स्थितप्रज्ञस्यावधारणा तु सर्वेषां प्रबन्धसूत्राणां मध्ये शृङ्गत्वेन तिष्ठति। यः जनः एनं मार्गमनुचरति तस्य जीवने तु काचिदपि समस्या न भविष्यति–श्रीभगवानुवाच–

**प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।**

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।**

**यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।**
**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।**

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।।**[१०]

११. Crime Management अर्थात् अपराधप्रबन्धनविषयेऽपि सूत्राणि प्राप्यन्ते। मनुष्यस्य मनसि कथं कुतश्च विकाराः समायान्ति यद्येतस्य ज्ञानं भवेत् तथा अपराधनियन्त्रणम् भवितुं शक्नोति। भगवता प्रोक्तम्–

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।।**

---

९. तदेव २/४७

१०. तदेव २/५५–५६

**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**

**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।**[११]

१२. पश्यन्तु समाजप्रबन्धस्य श्रेष्ठजनानामचरणमपि श्रेष्ठः भवितव्यः। यतो हि–

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।**[१२]

१३. समाजप्रबन्धनस्य अन्यत् निदर्शनम्–

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**

**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।।**[१३]

कर्मयोगो नामके तृतीयेऽध्याये भगवता अन्यान्यपि सूत्राणि प्रोक्तानि सन्ति किन्तु विस्तारभयादत्र निदर्शमात्रमेव वर्तते।

१४. ज्ञानकर्मसन्यासयोगनामके चतुर्थेऽध्याये भगवान् समाजप्रबन्धनार्थम्, लोककल्याणाय, धर्मरक्षाणाय, च स्वकीयमवतारविषये कथयन्ति–

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**

**अभ्युत्थानमधर्मस्य तदात्मानम् सृजाम्यहम्।।**

**परित्राणाय साधूनाम् विनाशाय च दुष्कृताम्।**

**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।**[१४]

१५. सामाजिकप्रबन्धनार्थमेव एतस्मिन् देशे वर्णव्यवस्था आसीत्। केषाञ्चिज्जनाः आङ्गलीयकमितिहासं पठित्वा जन्मजातीयां कथ्यन्ते एनां व्यवस्थाम् किन्तु श्रीमद्भवद्गीतायाः चतुर्थेऽध्याये भगवान् स्वयमेव न्यगददैषा व्यवस्था गुणकर्मयोः आश्रित्यैवास्ति–

---

११. तदेव २/६२–६३

१२. तदेव ३/२

१३. तदेव ३/३५

१४. तदेव ३/७–८

**चातुर्वर्ण्यम् मया सृष्टं गुणकर्मविभागशः।**

**तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्।।**[१५]

१६. कर्मसन्यासयोगो नामके पञ्चमेऽध्याये भगवता कर्मयोगिनः कृते बन्धात् मुक्तिः कथितास्ति–

**ज्ञेयः स नित्यसन्यासी यो न द्वेष्टि न काङ्क्षति।**

**निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते।।**[१६]

१७. अस्मिन्नेव अध्याये भगवान् समदर्शित्वस्य महत्त्वं प्रतिपादयति। अत्रभवन्तः सर्वेऽपि जानन्ति यत् समत्वं योग उच्यते। यदि कस्मिंश्चिदपि देशे समत्वस्यावधारणा व्यवहारे प्रचलति चेत्तत्र सुशासनम् सुष्ठु च सामाजिकं प्रबन्धनं भविता। भगवता प्रोक्तमेतत्–

**विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।**

**शुनि चैव श्वपाके च पण्डिता समदर्शिनः।।**[१६]

१८. आत्मसंयमयोगो नामके षष्ठेऽध्यायेऽपि भगवता व्यष्टेः समष्टेश्च प्रबन्धस्य सूत्राणि प्रदत्तानि सन्ति–

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।**

**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।।**[१७]

ध्यानयोगविषयेऽपि परमात्मना प्रोक्तम्–

**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**

**उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये।।**[१८]

---

१५. तदेव ४/१३

१६. तदेव ५/३

१७. तदेव ५/१८

१८. तदेव ६/५

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**

**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।**[१९]

१९. ज्ञानविज्ञानयोगो नामके सप्तमेऽध्याये भगवता श्रीकृष्णेन चतुर्विधानां भक्तानामुल्लेखः कृतोऽस्ति–

**चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।**

**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।**[२०]

२०. अक्षरब्रह्मयोगो नामकेऽध्याये Life Management अर्थात् जीवनप्रबन्धन विषये प्रोक्तमस्ति। मृत्युकाले कस्य चिन्तनं करणीयमित्युक्तं वर्तते–

**अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।**

**यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः।।**[२१]

**यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्।**

**तं तमेवैति कौन्तेय सदा तद्भावभावितः।।**[२२]

२१. राजविद्याराजगुह्ययोगो नामके नवमेऽध्याये जीवनप्रबन्धस्य सूत्रमेकमुवाच भगवान् श्रीकृष्णः–

**मन्मना व मद्भक्तो मद्याजी मां नमस्कुरु।**

**मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः**[२३]

अर्थात् भक्त्या एव मुक्तिमार्गः।

२२. विभूतियोगनामके दशमेऽध्यायेऽपि नैकप्रकारेण भगवद्विभूतीनामुल्लेखः प्राप्यतेऽनेन ज्ञानेन मोक्षकामिनस्यात्मप्रबन्धनं भवितुं शक्नोति।

२३. विश्वरूपदर्शनयोगो नामकैकादशोऽध्याये भक्तजनानां कृते महती ज्ञानसामग्री उपलभ्यते।

---

१९. तदेव ६/१२

२०. तदेव ६/१७

२१. तदेव ७/१६

२२. तदेव ८/५–६

२३. तदेव ९/३४

२४. भक्तियोगो नामके द्वादशेऽध्यायेऽपि व्यष्टेरुत्थानमार्गं वर्णितं वर्तते। आत्मप्रबन्धनदृष्ट्या एतानि पद्यानि समुल्लेखनीयानि–

**अद्वेष्टा सर्वभूतां मैत्रः करुण एव च।**

**निर्गमो निरहङ्कारः समदुःखसुखः क्षमी।।**

**सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।**

**मय्यार्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।।**[२४]

Corporate Life अर्थात् व्यावसायिकजीवनमध्ये एतानि पद्यानि तु बहुमूल्यवन्तः–

**यस्मान्नोद्विजते लोको लोकानोद्विजते च यः।**

**हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।।**

**अनपेक्षः शुचिर्दक्ष उदासीनो गन्तव्ययः।**

**सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः।।**

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।**

**शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः।।**

**समः शत्रौ च मित्रे च तथा मानापमानयोः।**

**शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।।**[२५]

२५. क्षेत्रक्षेत्रज्ञनामके त्रयोदशेऽध्याये सृष्टिप्रक्रिया वर्णितास्ति।

२६. गुणत्रयविभागयोगो नामके चतुर्दशेऽध्याये लोकस्य कृते आत्मप्रबन्धस्य अन्येषां चित्तवृत्तिज्ञानस्य कृते च सूत्राणि सन्ति।

२७. पुरुषोत्तमयोगो नामके पञ्चदशेऽध्यायेऽपि आत्मज्ञानं विवेचितम्।

२८. दैवासुरसंपद्विभागयोगो नामकः षोडशोऽध्यायः आत्मप्रबन्धार्थिनां कृते उपयोगी वर्तते ।

---

२४. तदेव १२/१३–१४

२५. तदेव १२/१५–१८

२९. श्रद्धात्रयविभागयोगो नामके सप्तदशेऽध्याये सांसारिकानां जनानां कृते नैकानि प्रबन्धसूत्राणि सन्ति। श्रद्धायाः महत्त्वमत्र प्रतिपादितम्–

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**

**असदित्युच्यते पार्थ न च पत्प्रेप्य नो इह।।** [२६]

३०. मोक्षसन्यासयोगो नामकोऽष्टादशोऽध्यायस्तु साररूपेण प्रायशः सर्वान् विषयान् प्रस्तौति। आत्मनः प्रबन्धसमुत्सुकानां जनानां कृते अत्र नैकानि सूत्राणि सन्ति येषामत्र विस्तारभयात् वर्णनं न क्रियते।

**४. निष्कर्षः–** श्रीमद्भगवद्गीतायां बहुविधज्ञानमुपलभ्यते। अत्र प्रबंधनविषये नैकानि सूत्राणि सन्ति। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीतायां एतेषु क्षेत्रेषु प्रबंध दृष्ट्या नैकानि सूत्राणि विवेचितानि सन्ति–जीवनप्रबंधनम्, आत्मप्रबंधनम्, विषादप्रबंधनम्, शक्तिप्रबंधनम्, समाजप्रबंधनम्, सामुदायिकप्रबंधनम्, युद्धप्रबंधनम्, मानवसंसाधनप्रबंधनम्, अपराधप्रबंधनम् चेति।

अन्ते च अन्तिमं पद्यं दर्शनीयं यत्र भगवता श्रीकृष्णेन साररूपेण प्रोक्तम्–

**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।**

**तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।।** [२७]

***

---

२६. तदेव १७/२८

२७. तदेव १८/७८

# संस्कृतवाङ्मये वर्णितानि शिक्षासूत्राणि

**डॉ० नरेन्द्रकुमारपाण्डेयः**

*सहायकाचार्यः, संस्कृतविभागः*

*हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः, धर्मशाला*

भारतं यावत्प्राचीनं विशालञ्च, तावदेव तदीयसंस्कृतवाङ्मयोऽपि। तस्मिन् सर्वविधं ज्ञानं विज्ञानञ्च विद्यते। मनुष्यजीवनेन सम्बद्धा विद्या कला वा नास्ति या अत्र उपलब्धा न स्यात्। भौतिकतायाः आध्यात्मिकतायाश्च सामञ्जस्यविधयः तत्र विस्तरेण वर्णिताः। वेदः, उपनिषद्, रामायणं, महाभारतं, पुराणं, मनुस्मृतिः इत्येते धार्मिकग्रन्थाः मानवसंस्कृतेः अमूल्यनिधयः। एषु शिक्षाप्रक्रियायाः उपाङ्गैः सम्बद्धानि कानिचन् शिक्षासूत्राणि चित्वा अत्र प्रस्तूयन्ते। आशास्ति यद् अस्माकं आचार्येभ्यः एतानि उपयोगीनि लाभप्रदानि भविष्यन्ति।

**वेदेषु–**

**तं ब्राह्मण तपसा श्रमेणानयैनं मेखलयासिनामि।**[1]

एतन्नाम– अहं इमं बालकं (शिष्यं) ब्रह्मचर्येण, तपसा, श्रममेखलाबन्धनेन च बध्नामि।

उपर्युक्तं बन्धनत्रयं न केवलं छात्राणां कृते आसीत् अपितु अध्यापकानां कृते अपि अनिवार्यमवगम्यते स्म।

यथा ऋषिरगस्त्यो वदति–

**स नो मेखले मतिमा धेहि मेधामथो नो धेहि तव इन्द्रियं च।**[2]

एतन्नाम तत् प्रतिबद्धं कार्यं अस्मभ्यं सर्वेभ्यः निश्चयबुद्धिं (स्थिरबुद्धिं) दद्यात्। चिन्तनशक्तिं प्रदद्यात्, अस्माकं इन्द्रियशक्तीनाम् अपि विकासं कुर्यात्।

---

१. अथर्ववेदः–६,१३३,३

२. अथर्ववेदः–६,१३३,४

**अधेन्वा चरति मययैष वाचं सुश्रावं अफलामपुष्माम्।**[३]

एतन्नाम येन फलपुष्परहिता नाम क्रियात्मकज्ञानरहिता विद्या श्रुता। सः निर्दुग्धं गां नीत्वा परिभ्रमतीति तदीयस्थितिर्भवति।

**"आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।**

**तं रात्रिस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः।।**[४]

एतन्नाम– आचार्यस्य समीपे नीतं बालकं आचार्यः यथा माता गर्भे बालकं धारयति तथा धारयति। आचार्यः तं बालकं उदरे (समीपस्थे आश्रमे) त्रिरात्रं यावत् स्थापयति (शिक्षयति) पश्चात् देवाः तं द्रष्टुं आगच्छन्ति।

**वयं राष्ट्रे जागृयाम पुरोहिताः।**[५]

एतन्नाम वयं राष्ट्रं जागरयन्तः अग्रणिनः भवेम। राष्ट्रस्य नेतृत्वं कुर्याम।

**मनुर्भव जनया दैव्यं जनम्।**[६]

एतन्नाम– हे प्राणिन्! त्वं मानव भव! पुनः दिव्यजनस्य निर्माणं कुर्याः!

अभिभावकाः अपि बालकं गुरुकुलं नीत्वा वदन्ति यद्–

**अधत्त पितरो गर्भ कुमार पुष्करस्रजम्।**

**यथे ह पुरुषोऽसत्।।**[७]

एतन्नाम– हे गुरुजन! कमलपुष्पमालाधारिणम् इमं बालकं स्वगुरुकुले स्वीक्रियतां! येन सः पुरुषः (मानवगुणयुक्तः) भवेत्।

**''विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**

**अविद्यया मृत्युं तीर्त्वा विद्यामृतमश्नुते।।''**[८]

---

३. ऋग्वेदः–१०,७१,५

४. अथर्ववेदः–११,३,५

५. यजुर्वेदः–६,२३

६. ऋग्वेद–१०,५३,६

७. यजुर्वेदः–२,३३

८. यजुर्वेदः–४०,११

अविद्यया संसारसागरम् उल्लङ्घ्य विद्यया ज्ञानेन अमृतत्वमृतं प्राप्यते। सांसारिकजीवनस्य उत्तरदायित्वानिपूरयितुं शिक्षा, कल्पः, व्याकरणं, छन्दः, ज्योतिषं, निरुक्तम् इत्येषां विषयाणां ज्ञानं प्राप्येत। वेदैः, उपनिषद्भिश्च अक्षरब्रह्मणः ज्ञानं प्राप्येत यन्मोक्षप्राप्तिं करना कारयेत्।

**"बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधाना।**

**यदेषा श्रेष्ठं यदरिभासीत्प्रेणा तदेषां निहितं गुहाविः।।**[९]

एतन्नाम सर्वप्रथमं ईश्वरः ऋषीणां बुद्धौ 'वेदस्य' शब्दान् प्रेरितवान्। 'वेदशब्देन प्रेरयित्वा ऋषयः जगतः पदार्थानां नामकरणं कृतवान्। यस्याः वाण्याः मनुष्येषु प्रेम्णा प्रचारं कृतवन्तः। एषा वाणी श्रेष्ठा निर्दोषंच आसीत्।

**वसोष्पते हि रमय मय्येवास्तु मयिश्रुतम्।**[१०]

हे गुरुवर! एतादृश्या सरसया रुचिकरया पद्धत्या अध्याप्यतां यदहं शृणोमि तन्मयि एव स्यात्।

**सङ्गच्छध्वं संवदध्वं सं वो मानांसि जानताम्।**

**देवभागं यथा पूर्वे सञ्जानानाम् उपासते।।**[११]

एतन्नाम— हे मनुष्य! भवन्तः सर्वे सम्मिल्य गच्छन्तु, सङ्गतिपूर्वकं परस्परं वदन्तु। युष्माकं मनांसि सङ्गतियुक्तिविचारं कुर्युः। यथा तव अग्रजाः उपयुक्तकार्याणि सम्पाद्य स्वभागं (देवत्वं) प्राप्तवन्तः, तथैव भवद्भिः अपि तत् साधनीयम्।

**भरद्धेनूरसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन्।**[१२]

एतन्नाम यथा गौः रसयुक्तं गुणकारि दुग्धं प्रददाति तथैव अध्यापकः निरन्तरम् अध्ययनशीलः तिष्ठति। निद्रां विना शिक्षणप्रक्रियां च पूर्णां कुर्यात् ज्ञानं प्रदद्यात्।

---

९. ऋग्वेदः—१०,७१

१०. अथर्ववेदः, ब्रह्मचर्यसूक्तम्

११. ऋग्वेदः—१०,१६,२

१२. ऋग्वेदः—५,४४,१३

**सा प्रथमा संस्कृतिर्विश्ववारा।**[१३]

एतन्नाम–मानवीयोत्कर्षं प्रापयित्री भारतीयवैदिकसंस्कृतिः विश्वस्य प्रथमा संस्कृतिः।

**उपनिषत्सु**

**आत्मनं रथिनं विद्धि शरीरं रथमेव च।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।**[१४]

एतन्नाम– त्वम् आत्मानं रथिनं जानीहि शरीरं रथं, बुद्धिं सारथिं जानीहि प्रग्रहं मनस्तथा।

**शिष्यते विद्योपादीयतेऽनयेति शिक्षा।**[१५]

एतन्नाम–प्राणी येन साधनेन प्रणाल्या वा ज्ञानोपार्जनं करोति, तन्नाम शिक्षा।

**तन्ह स ऋषिरुवाच भूया एव तपस ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्यथ यथाकामं प्रश्नान्पृच्छत यदि विज्ञासामः सर्व ह वो वक्ष्याम इति।**[१६]

एतन्नाम–त्वं तपसा ब्रह्मचर्येण श्रद्धया च युक्तः एकवर्षम् इतोऽपि निवसतु। पुनः स्वेच्छानुसारं प्रश्नान् करोतु यदि अहम् अज्ञास्यं तर्हि तुभ्यं सर्वं वक्ष्यामि।

**ईशावस्यामिदं सर्वं यत्किञ्चिज्जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथाः मागृधः कस्यस्विद्धनम्।।**[१७]

एतन्नाम– अस्मिन् संसारे यत्किञ्चित् चराचरं वस्तु अस्ति। तस्मिन् ईश्वरस्य वासः विद्यते। त्यागपूर्वकं पदार्थान् भुङ्ताम्। कस्यचिद्धनस्य लोभं न कुरुताम्!

---

१३. यजुर्वेदः–७,१४
१४. कथोपनिषद्, प्रथमाध्यायः, वल्ली–३, श्लोकः–(१–३–३)
१५. तैत्तिरीयोपनिषद्
१६. प्रश्नोपनिषद्
१७. ईशोपनिषद् १/१

**हितोपदेशे**

**सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तम्।**

**अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा।।**[१८]

एतन्नाम— विद्वांसः विद्या (ज्ञानं) सर्वधनेषु उत्तमं (श्रेष्ठा) धनम् इति वदन्ति, यतः चोरैः अपहर्तुम्, मूल्येन क्रेतुत्, अन्येभ्यः प्रदाय (ज्ञानं दत्वाध् पठयित्वा) न्यूनतां प्राप्तुञ्च शक्नोति।

**विद्या ददाति विनयं विनायाद्याति पात्रताम्।**

**पात्रत्वाद्धनमापनोति धनाद्धर्मस्ततः सुखम्।।**[१९]

एतन्नाममनुष्यः विद्याध्ययनेन विनयवान् भवति, विनयवान् सन् सुपात्रः कथ्यते। सांसारिककर्म कुर्वन् मानप्रतिष्ठां सुखं च प्राप्नोति।

**यन्नवे भाजने लग्नः संसारो नान्यथा भवेत्।**

**कथाच्छलेन बालानां नीतिस्तादिह कथ्यते।।**[२०]

एतन्नाम—बालकानां हृदयं मृत्तिकया निर्मितः नवघटः इव निर्मलम्। तत्र विलिखितानि रेखाचिह्वानि घटे भग्ने सत्यपि न अपगच्छन्ति। तन्नामबाल्यकाले दत्ताः शुभसंसाराः जीवनपर्यन्तं तिष्ठन्ति। अतः अहं (विष्णुशर्मा) बालेभ्यः मनोरञ्जकाः नीतियुक्तकथाः श्रावयित्वा उपदेष्टुं प्रयते।

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नाराणाम्।**

**धर्मो हि तेषामधिको विशेषो धर्मेण हीना पशुभिस्समानाः।।**[२१]

एतन्नाम— मनुष्येषु पशुषु च भोजनं, शयनं, भयं, स्त्रीसमागमः एतत्क्रिया चतुष्टयं समानमेव। किन्तु मनुष्येषु अन्यः एकः गुणः अस्ति यः पशुषुनास्ति, धर्मः कर्तव्याकर्तव्ययोः ज्ञानम्। यदि कस्मिंश्चिन्मनुष्ये एषः गुणः नास्ति तर्हि सः साक्षात्पशुभिः समानः।

---

१८. हितोपदेशः, कथामुखम्, श्लोकः—४

१९. हितोपदेशः, कथामुखं, श्लोक—६

२०. हितोपदेशः, कथामुखं, श्लोक—८

२१. हितोपदेशः, कथामुखम्, श्लोकः—२५

**माता वैरी पिता शत्रुः येन बालो न पाठितः।**
**शोभते सभामध्ये हंसमध्ये बको यथा।।**[२२]

एतन्नाम— यौ मातापितरौ स्वबालं नैव पाठयतः तौशत्रू इव। यतः यथा हंसानां मध्ये बकुलः महत्त्वं न प्राप्नोति, तथैव विद्वज्जन सभायां अशिक्षितः जनः आदरं नैव प्राप्नोति।

**अपूर्वकोऽपि कोशोऽयं विद्यते तव भारती।**
**व्ययतो वृद्धिमायाति क्षयमायति सञ्चयात्।।**

एतन्नाम— विद्यायाः (ज्ञानस्य) भण्डारः अपूर्वः— यः व्ययेन वर्धते, सञ्चयेन न्यूनतां याति।

**न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न भारकारी।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्।।**

एतन्नाम—यत् न चौरेण हर्तुं, न राज्ञा हर्तुं, भ्रातृभिः भाजयितुं यन्न शक्यते। न भारकरं विद्यते। यद्व्ययेन सततं वर्धते इत्येतादृशं विद्यारूपं (ज्ञानं) धनंसर्वेषु धनेषु प्रधानं विद्यते।

**मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः।।**[२३]

एतन्नाम—यः परस्त्रियं मातृवत्, परकीयं धनं लोष्ठसदृशं समस्तप्राणिनः आत्मसदृशाश् यः पश्यति, सः विद्वान् (शिक्षितः) अस्ति।

**श्रीमद्भाऽगवद्गीतायाम्—**

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वापरांशान्तिमचिरेणाधि गच्छति।।**[२४]

एतन्नाम— जितेन्द्रियः साधनापारायणः, श्रद्धावान्मनुष्यः ज्ञानं प्राप्नोति। ज्ञानं

---

२२. हितोपदेशः, कथामुखम्—३७

२३. हितोपदेशः, मित्रलाभः—१४

२४. श्रीमद्भागवतगीता, चतुर्थोऽध्यायः, श्लोकः—३६

प्राप्य विना विलम्बं तत्कालमेव भगवत्प्राप्तिरूपां परमां शान्तिं प्राप्नोति।

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**

**उपदेश्यन्ति ते ज्ञानं ज्ञाननस्तत्वदर्शिनः।।**[२५]

एतन्नाम– अतः ये तत्त्वं ज्ञानं जानन्ति तादृशज्ञानिनः सम्यक्तया दण्डवत् प्रणम्य निष्कपटभावेन विहितेन प्रश्नेन तज्ज्ञानं जानीहि! ते मर्मज्ञाः ज्ञानिजनाः तुभ्यं तज्ज्ञानम् उपदेक्ष्यन्ति।

**चरकसंहितायाम्–**

चरकसंहितायां त्रिषु विभिन्नस्थानेषु आचार्यस्य गुणाः, अध्ययनाध्यापनविधिश्च। शिष्याय आवश्यकनियमाः विस्तारेण दत्ताः। ये निम्नप्रकारेण सन्ति–

**आचार्यस्य गुणाः–**

**पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं दक्षिणं शुचिं जितहस्तमुप करणवन्तं, सर्वेन्द्रियोपपन्नं प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृत विद्यमनेह कृतमनसूयकमकोपनं क्लेशक्षमं शिष्यवत्सलमध्यापकं ज्ञापनसमर्थं च इत्येवगुणोऽध्याचार्यः सुक्षेत्रमार्तवो मेघ इव शस्यगुणैः सुशिष्यमाशु वैद्यगुणैः सम्पादयति। तमुपसृत्यारिराधयिषुरुपचरेदग्निवच्च देववच्च राजवच्च पितृवच्च भर्तृवच्च। प्रमतस्तत्स्वत्प्रसादात्कृत्स्नं शास्त्रमधिगम्य शास्त्रस्य दृढतायामभिधान सौष्ठवस्यार्थस्य विज्ञाने वचनशक्तौ च भूयः प्रयतेत् सम्यक्।।**

एतन्नाम– गुरुः सः एव यस्तु समस्तवेदान् सर्वांशकर्म जानीयात्, पावित्र्ययुक्तः, सर्वेन्द्रिय सम्पन्नः स्यात्। यस्य शरीरस्य सम्पूर्णाङ्गानि उत्तमानि स्युः। मनुष्याणां प्रवृत्तिंभेदांञ्च अवगच्छेत्, येन सम्पूर्णशास्त्राणि अधिगतानि स्युः, शास्त्राणां स्मृतिरपि स्यात्, अहंकार रहितः क्रोधः निन्दा इत्यादिभिः दोषैः मुक्तः स्यात्। क्लेशसहिष्णुः स्यात्, शिष्येषु स्नेहं स्थापयेत्। यं विषयम् अध्यापयेत्तस्य उदाहरणादिभिः स्पष्टरूपेण सुबोधकः स्यात्। येन प्रकारेण वर्षर्तौ उत्तमभूमौ

---

२५. श्रीमद्भगवद्गीता, ४/३४

मेघं वृष्ट्वा उत्तमकृषिम् उत्पादयन्ति, तेन प्रकारेण आचार्यः स्वशिष्यान् शीघ्रं गुणैः सम्पन्नान् कुरुते। वैद्याय भवितुकामाय शिष्याय उचितं यत्सः एतादृशगुरुम् उपगत्य तं अग्निः, देवता, राजा, पिता, स्वामी इत्येषां सदृशं ज्ञात्वा अप्रमत्तः सन् तदीय सेवां कुर्यात्। एतादृशगुरोः कृपया सम्पूर्णशास्त्राणि पठित्वा शास्त्रेषु दृढतोत्पादने कथने चतुर्योत्पादने, शास्त्रीयविषयाणां यथोचितं ज्ञानं प्राप्तुं ज्ञातविषयाणां वर्णनाय, उत्तमशक्त्युत्पादनाय चयत्नवान् वर्तेत।

**अध्ययनविधिः—**

**तत्रायमध्ययनविधिः— कल्पः कृतक्षणः प्रातरुत्थायोपैत्युषेवा कृत्वावश्य—कमुपस्पृश्योदकं देवगोब्राह्मणगुरुवृद्धसिद्धाचार्येभ्यो नमस्कृत्य समे शुचौ देशे सुखोपविष्टो मनः पुरः सराभिर्वाग्भिः सूत्रमनुकामन् पुनः पुनरावर्तयेद् बुद्धया सम्यगनुप्रविश्यार्थ तत्त्वं स्वदोषपरिहारार्थ परदोष प्रमाणार्थम्।। एवं मध्यन्दिनेऽपराह्णे रात्रौ च शश्वद परिहाप यन्नध्ययनमभ्य सेत्यध्ययनविधिः।**

एतन्नाम—अध्ययनविधिः पठनक्रमः कथ्यते। पठितुकामः नीरोगी ब्रह्मचारी नियतसमये प्रातःकाले अथसूर्योदयात् चतुर्घटिभ्यः पूर्वम् उत्थाय परमेश्वरं स्मरेत्। मलमूत्रादित्यागोत्तरं स्नानेन पवित्रीभूयदेवता, गौः, ब्राह्मणः, गुरुः, वृद्धः, सिद्धः आचार्यः इत्येतान् प्रणम्यशुद्धपवित्रस्थाने सुखपूर्वकम् उपविश्य शास्त्रेषु मनः निवेशयन्, यानि सूत्राणिपठितवान्तेषां दत्तचित्तेन स्पष्टस्वरेण उच्चारयन्वारं—वारं पठेत्। पुनः समग्रपाठं बुद्धौ प्राविश्यतस्मिन् विषयेये दोषाः अथ अदोषाः तर्कवितर्काः उत्पद्यन्ते, तान्निश्चेतुं मध्याह्ने अथ अपराह्णे या रात्रिसमयेतदानीमेव गुरुसमीपं गत्वा स्वशङ्कानिवृत्तिं कुर्यात्। एवं विधिना नित्यं पठेत्। अयमेव अध्ययनविधिः।

**अध्यापनविधिः—**

**अध्यापन— विधिः—अध्यापने कृतबुद्धिराचार्यः शिष्यमादितः परीक्षेत्। तद्यथा—प्रशान्तमार्य प्रकृति कम क्षुद्र कर्माण मृजुचक्षुर्मुखना सावेशं तनु रक्त विशजिह्वमविकृतदन्तौष्ठम् अमिन्मिणं धृतिमान्मत् अनहं कृतं मेधाविनं**

**वितर्कस्मृति सम्पन्न मुदार सत्त्वं तदिद्य कुल जय वातत्त्वाभिर्नि वेशिनमव्यङ्गमव्या पन्नेन्द्रियं निश्रुतमनुद्दतमव्यसनिनंशील शौचाचारानुग दाक्ष्यप्रादक्षिण्योपपन्नमध्ययनाभिकामयत्यर्थविज्ञाने कर्मदर्शने चानन्य कार्यम—लुब्धमनलसे सर्वभूतहितैषिणमाचार्यसर्वानुषिष्टिप्रति—करमनुरक्तम्। एवं गुणसमुदितमध्याप्यमेवमाहुः। एवं चिर माचार्यस्याध्ययनार्थमुपस्थितमारि राधयिषमनुभाषेत्।**

**एतन्नाम—** पाठयितुकामः वैद्यः सर्वप्रथमं शिष्यं परीक्षयेत्। शिष्यः एतादृशः स्यात् यः शान्तचित्तः श्रेष्ठ स्वभावयुक्तः भवेत्, न निम्नकर्माणि कुर्यात् नैव निम्नाशययुक्तः भवेत्। यस्य नेत्रे, मुखं, नासिका इत्येतानि सुन्दराणि सुपुष्टानि स्युः, यस्य जिह्वा कृशा , रक्ता, सुन्दरी च स्यात् , दन्तपङ्क्ती ओष्ठौ च उत्तमौ स्यातां धारणशक्तिः स्यात्, अहङ्काररहिता, मेधायुक्ता तर्कशक्तिः स्मरणशक्तिः उदार स्वभावश्च भवेत्। तदीयकुले परम्परया विद्यापठनपाठनप्रथा प्रचलिता स्यात्। अथ सोऽपि तां विद्यां पठितुकामः स्यात्। सः विद्यया स्वीयलाभेच्छां कुर्यात्, यस्तु विद्यारूपतत्त्वं ज्ञातुंचित्तं रमयेत्, शरीराङ्गानि यस्य उत्तमानि स्युः, यः सर्वेन्द्रियसम्पन्नः, विनीतः, अभिमानरहितः, दुर्व्यसनरहितः, सुशीलः पावित्र्ययुक्तः, अनुरागी, चतुरः, प्रत्येकं कार्यं बुद्धिमत्तयाकर्तुं क्षमः, पठने दत्तचित्तः, अर्थज्ञाने वैद्यकर्म शिक्षणे दर्शने दत्तचित्तः, गुरोः आज्ञापालकः गुरौ प्रेम भावस्थापकः। अनेन प्रकारेण इत्येभिः गुणैः सम्पन्न शिष्यः पठितुं योग्यः भवति। एभिः सम्पूर्णगुणैः युक्तः शिष्यः बहुकालपर्यन्तं आगताय पठितुकामाय शिष्यायगुरुः विधिवच्छास्त्रम् उपदिशेत्।

**विद्यारम्भः, अध्ययनात्पूर्वतनः उपचारः—**

**उदीच्ययने शुक्लपक्षे प्रशस्तेऽहनि पुष्यहस्त श्रवणाश्वयुजा मन्यतमेन नक्षत्रेण योगमुपगते भगवति शशिनि कल्याणे मुहूर्ते स्नातः कृतोपवासो मुण्डः कषायवस्त्रसंवीतः समिधोऽग्निमाज्यमुपलेपनमुदककुम्भांश्च सुगन्धि हस्तः काल्यदाम हिरण्यहेमरजतमणि मुक्ताविद्धमक्षौमपरिधीं कुशलाज सर्षपाक्ष तांश्च शुक्लांश्च सुमनसो ग्रथिताग्रथितांश्च मेध्यांश्च भक्ष्यान् गन्धांश्च पिष्टापिष्टानादायोपतिष्ठस्वेति। स तथा कुर्यात्।।**

एतान्नम– यदाशिष्येण अध्येतव्यं तथा आचार्यः वदेत् त्वम् उत्तरायणे, शुक्लपक्षे शुभदिनेपुष्यः, हस्तः, श्रवणं, अश्विनी इत्येषु नक्षत्रेषु कस्मिंश्चिदपि नक्षत्रयुक्ते चन्द्रमसि सुमुहूर्तेशुभलग्नेस्नानम् उपवासं च कृत्वा, शिरः मुण्डित्वा, कषायवस्त्राणि धृत्वा, यज्ञस्य समिधा, अग्निः, घृतं, उपलेपनद्रव्यं, जल–घटः, सुगन्धित द्रव्यं, सुकं, माला, नेती, मृगच्छाला, सुवर्णं, रजतं, मणिः, मुक्ता, मूंगा, कौशेयधौतं, कुशाः, सर्षपः, अक्षतः, श्वेतपुष्पं, पुष्पमाला, पवित्र भक्ष्य पदार्थः, काश्मीरजं, चन्दनम् इत्येतान् पिष्टान् उत्तमगन्धान् नीत्वा मम सकाशे आगच्छ। शिष्यः तथैव कुर्यात्!

**तमुपस्थितमाज्ञाय समे शुचौ देशे प्राक्प्रवणे वा चतुष्किष्कुमात्रं चतुरस्रं स्थण्डिलं गोमयोदकेनोपलिप्तं कुशास्तीर्णं सुपरिहितं परिधिभिश्चतुर्दिशं यथोक्त चन्दनोदक कुम्भक्षौमहेमहिरण्य–रजतमणि मुक्ताविद्रुमालं कृतं मेध्य भक्ष्यगन्ध शुक्लपुष्पलाजासर्ष–पाक्षतोपशोभितं कृत्वा तत्र पालाशीभिरै गुदीभिरौदुम्बरीभिर्मधूकी भिर्वा समिद्भिरग्निमुपसमाधाय प्राङ्मुखः शुचिरध्ययनविधि मनुविधाय मधुसर्पिभ्योत्रिस्त्रिर्जुह्यादग्निम्। आशीः संप्रयुक्तै र्मन्त्रै र्ब्रहह्मणमग्निंधन्वन्तरिं प्रजापति–मश्विना विन्द्र मृषींश्च सूत्रकारा नभि मंत्रयमाणः पूर्वस्वाहेति। शिष्यश्चौनमन्वारभेता ह्वत्वाच प्रदक्षिण मग्निमनुपरिक्रामेत् ततोऽनुपरिक्राम्य ब्राह्मणान् स्वस्तिवाचयेत्। भिषजश्चाभिपूजयेत्।।**

**एतन्नाम–** यदा सम्पूर्णवस्तूनि नीत्वा शिष्यः गुरोः समीपे आगच्छेत्, तदा गुरुः तम् आगतं वीक्ष्यपावित्र्ययुक्तायां समभूमौ पूर्वाभिमुखम् उत्तराभिमुखं वाहस्त चतुष्टयपरिमितां आयताकारवेदी निर्मापयेत्, तां गोमयेन जलेन लेपयित्वा उपरिष्टाद् विधिवत्कुशैः आच्छाद्य परितः परिधीन् निर्मीयात्। पुनः शास्त्रोक्तरीत्या चन्दनं, जलकुम्भः, कौशेयवस्त्रं, सुन्दरवस्तु, हिरण्यं, रजतं, मणि, मौक्तिकं, मूंगा इत्येतान् यथाविधं स्थाने विभूषयेत्, पुनः पवित्र भक्ष्य पदार्थाः, कर्पूरं, काश्मीरजं, चन्दनं गंध–द्रव्यं, श्वेतपुष्पं, लाजा (धान्यबीजं), सर्षपः, अक्षतः इत्यादीन् यथाक्रमं स्थापयेत्प्लक्षः, उदुम्बरः, मधूकः इत्याभिः समिधाभिः अग्निं विधिवत् प्रज्वालयेत्। पुनः पूर्वाभिमुखी भूयशिष्याय शुद्धभावेन

अध्ययनविधेः अनुसारम् उपावेश्यमधुना घृतेन च तिसृणाम् आहुतीनाम् अग्नौ हवनं कुर्यात्। ततः वेदोक्तैः आशीर्वाद मन्त्रैः ब्रह्मा, अग्निः, धन्वन्तरिः, प्रजापतिः, अश्विनीकुमारौ, इन्द्रः, ऋषयः सूत्रकाराः इत्येषां आह्वाहनंकुर्वन् पूर्वं स्वाहा उच्चार्य आहुतिंदद्यात्। ततः शिष्योऽपि तेनैव प्रकारेण हवनं कृत्वा अनन्तर अग्नेः प्रदक्षिणां कुर्यात्ब्राह्मणैः स्वस्तिवाचनं कारयेत्वैद्यानां पूजनं कुर्यात्।

**अथैनमग्निसकाशे ब्राह्मणसंकाशे भिषक्सकाशे चानुशिष्यात्। ब्रह्मचारिण श्मश्रुधारिणा सत्यवादिना अमांसादेन मेध्यसेविना निर्मत्सरेण शास्त्रधारिणा भवितव्यम्। न च ते मद्वचनात्किचिंदकार्ये स्यादन्यत्र राजद्विष्टा प्राण हराद्विपुला–दधर्म्यादनर्थसंप्रयुक्ताद्वाप्यर्थात् मदर्पणेन मत्प्रधानेन मदधीनेन मत्प्रियहितानुवर्तिना च शश्वद्भवितव्यम्। पुत्रवद्दा सवदर्थिवच्चोपचरतानु सर्तव्योऽहम् अनुत्सुकेनावहितेनावे द्वयावेक्ष्यकारिणा अनसूयकेनचाभ्यनु ज्ञातेन प्रविचरितव्यम्, अनुज्ञातेन च प्रविचरता।**

**एतन्नाम–** पुनः शिष्यम् अग्नेः समीपे, ब्राह्मणानां समीपे वैद्यानां समीपे उपावेश्य अनेन प्रकारेण शिक्षां दद्यात् यत् हे शिष्य! त्वया ब्रह्मचारिणा सता, श्मश्रूः धृत्वा सत्यवादिना भवितव्यम्। निरामिषभोजिना पवित्रभोजनं करणीयम्, मात्सर्यात् (ईर्यायाः, द्वेषाच्च) रहितेन शास्त्रधारणं करणीयम्। त्वं ममानुज्ञाम् अतिरिच्य किञ्चिदपि कार्यं न कुर्याः। राज्ञः द्वेषं, हिंसाम्, अधर्मम्, अनर्थेन धनप्राप्तिं विहायसम्पूर्णकार्याणि मम आज्ञानुसारं कुर्याः। त्वं मम समक्षं नम्रतापूर्वकं प्रत्येकस्मिन्कार्ये मां प्रधानतया मान्यमानः माधीन्ये प्रियतायां, ममैव हितं कुर्वन्ममानुवर्तीभूय निरन्तरं वर्तेथाः। यथा पितरंसेवते पुत्रः स्वामिनं सेवकः, अर्थेच्छुकः अर्थीपुरुषः धनिकस्य आज्ञांपालयति, तथैव सर्वेषु स्थानेषु त्वया मम अनुसरणं करणीयम्। उत्सुकतारहितः सन्सावधानतया अनन्यमनसा विनीतभावेन प्रत्येकं कार्यंविचार्य ईर्ष्या, अभिमानं, निन्दा इत्यादीन् त्यक्त्वा ममाज्ञया अनुसारं सर्वाणि कार्याणि करणीयानि। ममैव आज्ञाम् अङ्गीकृत्य इतः ततः गन्तव्यम्।

**अध्ययनकालस्य नियमाः–**

**न सतो न गुरून् परिवदेत्। नाशुचिरभिचार कर्मचौत्य पूज्यपूजाध्ययनमभि निवर्तयेत्।**

**न विद्युत् स्वनर्चिवीषु नाभ्युदितासु दिक्षु नाग्निसंपुवे न भूमिकप्पे न महोत्सवे नोल्कापातेन महाग्रहोपगमने न नष्टचन्द्रायां तिथौ न सन्ध्ययोर्न मुखादगुरोर्नविपतितं नातिमात्रंन तान्तंन विस्वरं नानवस्थितपदं नातिद्रुतं न विलम्बितं नातिक्लीबं नात्युच्चौर्नातिनी चौः स्वरैरध्यनमभ्यसेत्। नातिसमयं जघ्यात्। न नियमं भिन्द्यात्।**

एतन्नाम– शिष्यः श्रेष्ठमहात्मनां गुरुजनानां च निन्दनं न कुर्यात्। विना शुद्धिं मन्त्रः, तन्त्रः, देवमन्दिरं, अश्वत्थः इत्येषां पूजनं, पूज्यानां पूजनं, विद्याध्ययनं न कुर्यात्। अकाले विद्युत्पाते, भूकम्पे, महति उत्साहे, उल्कापाते, सौरचान्द्रग्रहणे, अमावास्यायाः, सन्ध्याद्वये, गुरुमुखाद् अतिरिच्य अन्यस्मात्, अत्यन्तं मात्रया, तीक्ष्णस्वरेण, विकृतेन (खराब) स्वरेण, पदानां विच्छेदेन, आधिक्येन शीघ्रतया (त्वरया) महता विलम्बेन, महत्या दुर्बलतया, अत्यन्तं ऊच्चौः स्वरेण, निम्नेन च अध्ययनं न करणीयम्। पठनसमयंव्यर्थतया न नाशनीयम्। पठनस्यनियमाः उल्लङ्घनीयाः।

**विशेषेण उपयोगिनो नियमाः–**

**नाधीरो नात्युच्छ्रित सत्त्वः स्यात्। नाभृत भृत्यो न विश्रब्धास्वजनो नैकः खी। न दुःखशीलाचारोपचारो न सर्वविश्रम्भी। न सर्वाभिशंकी। न सर्वकालविचारी। नकार्यकालमतिपातयेत्। नापरीक्षितम भिनिविशेत्। नेन्द्रिय वशगः स्यात्।**

एतन्नाम– धैर्यरहितेन आधिक्येन सात्त्विकेन न भवितव्यम्। भृत्या (पारिश्रमिकेण) रहितः भृत्यः न स्थापनीयः। सर्वथा विश्वासरहितेन (यः कस्मिंश्चिदपि नैव विश्वसिति) अपि न भवितव्यम्। कुटुम्बं विना एकाकी सुखं न भुञ्जीत अपरेभ्यः दुःखदम् आचरणमपि न कुर्यात्। सर्वेष्वपि न विश्वसेत्। प्रत्येकं मनुष्यः मिथ्याभाषी इत्येवं भ्रममपि न कुर्यात्। सदा चिन्तितोऽपि स्यात्। कार्यस्य समयं व्यर्थतया नष्टं न कुर्यात्। विना ज्ञानं कार्ये न प्रविशेत्। इन्द्रियाणां वशीभूतः न भवेत्।

अतः परमिदं ब्रूयाद्देवताग्निद्विजाति गुरुवृद्धसिद्धाचार्येषु ते सम्यग् वर्तितव्यम्। तेषु ते सम्यग्वर्त्तमानस्यायमग्निः सर्वगन्धरसरत्नबीजानि यथेरितश्च

देवताः शिवाय स्युः अतोऽन्यथा चावर्त्तमानस्थाशिवायेति। एवं बुवति चाचार्ये शिष्यस्तथेति ब्रूयातृ यथोपदेशच कुर्वन्नध्याप्यः अतोऽन्यथातु अनध्याप्यः। अध्याप्यमध्यापयन् हि आचायो यथोक्तैश्रवाध्यापन फलैर्योगमाप्नोति। अन्यै श्रवानुक्तैः श्रेयस्करैर्गुणैः शिष्यमात्मानं च युनक्ति। इति अध्यापन विधिरुक्तः।

एतदनन्तरम् आचार्यः शिष्याय ब्रूतेयद्देवता, अग्निः, ब्राह्मणः, गुरुः, वृद्धजनः, सिद्धः आचार्यः इत्येतैः सह सदैव उत्तम प्रकारेण, विनीतभावेन त्वया व्यवहर्तव्यम्। सर्वैरेभिः सह विनयपूर्वकम् उत्तम व्यवहारेण इमे सर्वे यथा अग्निः सर्वविधो गन्धः, रसः, रत्नादिकं देवतावृद्धः, सिद्धः, आचार्यश्च त्वत्कल्याणं करिष्यन्ति। एतद्विपरीत्य तु अमङ्गलं भविष्यति। शिष्यः एतच्छ्रुत्वा हस्तौ बद्ध्वा कथयेत्— बहु शोभनम्, एवमेव करिष्ये, अथ चयथा गुरुः उपदिष्ट वान्तदनुसारं समस्तकार्याणि कुर्यात्। एतादृशशिष्यः पठितुं योग्यः, तदतिरिच्य अयोग्यः। पठितुं योग्यं शिष्यम् अध्यापयन् आचार्योऽध्यापनस्य समस्तफलानि प्राप्नोति। शिष्येण उपर्युक्तान् गुणान् अतिरिच्य अन्ये ये हितकराः कल्याणकारिणो गुणाः स्युः, तान् गृह्णीयात्। इत्थम् अध्यापनविधि कथितः।

**कालिदासस्य ग्रन्थे—**

**यस्यागमः केवलंजीविकायै, तं ज्ञानपण्यं वणिजं वदन्ति।**[२६]

एतन्नाम शिक्षा इव पवित्रव्यवसाये यस्य आगमनं केवलं जीवकोपार्जनायैव जातम्। एतज्ज्ञानस्य विक्रेतृशिक्षकः न अपितु (वणिक्) व्यापारी एव वक्तुं शक्यते।

**श्रुतेन किं यो न च धर्ममाचरेत्।**
**किमात्मना यो न जितेन्द्रियो भवेत्।।**[२७]

एतन्नाम एतादृशज्ञानेन कः लाभः, यच्छ्रुत्वा जनः धर्मस्य आचरणं न कर्तुं शक्नुयात्। तन्नाम येन कर्तव्यपालनं न कर्तुं शक्येत! तज्जीवनेन कः लाभ, यः जितेन्द्रियो न स्यात्!

२६. कालिदासः

२७. कुमारसम्भवं, पञ्चमसर्गः

**लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत्।**

**प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्।।**[२८]

तन्नाम पञ्चवर्षाणि यावत् बालस्य प्रेम्णा लालनं–पालनं करणीयम्। पञ्चदशे वर्षे लालनम् अकृत्वाबाले महद् अनुशासनं प्रतिष्ठापनीयम्। षोडशे वर्षे आपन्ने बालः मित्रवत् अवगन्तव्यः।

**एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत्।**

**पृथिव्यां नास्ति तद् द्रव्यं यद् दत्वादनृणो भवेत्।।**[२९]

तन्नाम– यो गुरुः एकमप्यक्षरं शिक्षते, तदीयाद् अस्मादृणान्मुक्तये पृथ्व्यां कश्चित् पदार्थः पर्याप्तो नास्ति।

**न जात्या ब्राह्मणश्चात्र क्षत्रियो वैश्य ए वन।**

**न शूद्रो न च वै म्लेच्छो भेदिता गुणकर्मभिः।।**[३०]

एतन्नाम– अस्मिन् संसारे जन्मना तु कश्चिद् ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः म्लेच्छो वा न भवति वस्तुतः गुणकर्मविभेदेनैव जायते।

**विद्याधनं श्रेष्ठतरं तन्मूलमितरद्धनम्**

**दानेन वर्धते नित्यं न भाराय न नीयते।।**[३१]

एतन्नाम– विद्यारूपधनम् अत्यन्तं श्रेष्ठम्। अन्यं धनं विद्ययैव प्राप्यते धन। विद्या तु दानेन वर्धते धनं तु नश्यति। विद्या भारहीना, न केनचिद् अपहर्तुं शक्या।

**योऽधीतविद्यः सकलः स सर्वेषां गुरु र्भवेत्।**

**न च जात्याऽनधीती 'यो गुरुर्भवितुमर्हति।।**[३२]

---

२८. चाणक्यनीतिः, तृतीयोऽध्यायः, अष्टम श्लोकः

२९. चाणक्यनीतिः

३०. शुक्रनीतिः, प्रथमोध्यायः

३१. शुक्रनीतिः, तृतीयोध्यायः, श्लोकौ–१८०, १८१

३२. शुक्रनीतिः, चतुर्थोऽध्यायः

एतन्नाम–येन द्विजेन (ब्राह्मणेन) सम्पूर्ण विद्यानां कलानां च अध्ययनं विहितं सः एव सर्वस्य गुरुः भवितुं योग्यः। विना पठनेन, केवलं जातिमात्रेणगुरुर्न भवति।

**अन्येषुग्रन्थेषु**

**विभिन्न प्रवृत्ति प्रयोजकेष्ट साधनता**

**ज्ञानाख्यशिक्षायाः प्रयत्नः शिक्षणं कथ्यते।**[३३]

एतन्नाम–कस्याञ्चिदपि प्रवृत्तौ प्रयोजकतत्त्वानाम् इष्ट–साधन–ज्ञानम् अथ च प्रयत्नः शिक्षा शिक्षणं वेति उदीर्यते।

**विद्यास्ति ज्ञानविज्ञानदर्शनं संस्क्रियात्मनि।**[३४]

एतन्नाम– ज्ञानेन, विज्ञानेन दर्शनेन च आत्मनि संस्काराणाम् उत्पन्नताविद्या।

**तस्मिन् काले स्थापयेत् तत्पुरस्ताद वस्त्रं शस्त्रं पुस्तकं लेखनीं च।**

**स्वर्णरौप्यं यच्च गृह्णाति बालः तैराजी वैस्तस्य वृत्तिः प्रदिष्टा।।**[३५]

एतन्नाम– बालकः यदा पृथ्व्याम् उपवेष्टुम् आरभते। तदानीं तत्समक्षं वस्त्रं, शस्त्रं, पुस्तकं, लेखनी, स्वर्णं रजतं च स्थापनीयम्। तेषु बालकः यद्वस्तु गृह्णाति, तेनैव तस्य अभिरुचिर्ज्ञातव्या।

**विद्या हवै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।**

**असूयकायानृजवे ऽयतायनमा ब्रूया वीर्यवती तथा स्याम।।**[३६]

एतन्नाम एकधाविद्या ब्राह्मणं (गुरुं) ब्रूते– मां रक्ष! त्वदीयानिधिरहम्। दोषान्वेषिणः, दुष्टस्वभावाः, असंयमिनः, ईर्ष्यालवः इत्येभ्यो मां नैवसमर्पय। येनाहं वीर्यवती स्याम्, यथा कुरु। मां बुद्धिमद्भयो मनुष्येभ्यः प्रदेहि, येनाहं तेजस्विनी अभविष्यम्।

***

३३. आद्यशङ्कराचार्यः

३४. ब्रह्मसमन्वयः, मधुसूदनझाः

३५. मुहूर्तचिन्तामणिः, संस्कारप्रकरणम्

३६. निरुक्तम्– २,२

# अभिज्ञानशाकुन्तले प्रतिपादितं पर्यावरणसंरक्षणचैतन्यम्

**डॉ० पवनकुमारपाण्डेयः**

*सहायकाचार्यः, संस्कृतविभागः*

*नागरिकस्नातकोत्तरमहाविद्यालयः, जंघई, जौनपुरम् (उ०प्र०)*

**प्रस्तावना**

साम्प्रतिके युगे मनुष्याणां सकला भौतिकव्यवहारा विज्ञानमाश्रित्य प्रवर्तन्ते। विज्ञाननिष्पादितं व्यवहारोपयोगिवस्तुजातमुपलभ्यापि सन्तोषविहीना भूमिवासिनः सततं नवानवानुपभोग्यपदार्थानुत्पादयितुं प्रयतन्ते। सर्वत्र चर्चा प्रचलति यद्विज्ञानमाश्रित्यानुसन्धाय च जगद्विकसति किन्तु ऐकाङ्गिकेयं विकासप्रक्रिया वस्तुतो विनाशोन्मुखी प्रतिभाति। अद्य अनवरतम् अनेकवैज्ञानिकोपायानवलम्ब्य भोग्यपदार्थोत्पादनपृथुलां केवलां भौतिकीं समृद्धिं भजमानो लोकोऽकल्पितपूर्वाभिरनेकाभिस्तादृशीभिः जटिलसमस्याभिः ग्रस्तो वर्तते यासां निवारणाय यदि सद्यः प्रयासा न क्रियन्ते तदा सर्वोऽप्ययं विकासो विनाशमेवोपजनयिष्यति। समस्यावासु भूवलये जीवानां जीवनमेव संशये निपातयन्ती, सार्वभौमा पर्यावरणप्रदूषणात्मिका काच्चिज्जटिला समस्या जागर्ति। अस्याः समाधाने वैज्ञानिकाः शासकाः अन्ये च जागरूकाः जनाः सन्नद्धतामुपयान्ति, विधीयन्ते चानेके विज्ञानसम्मता उपायाः किन्तु नाद्यावधिरुपायः कोऽपि तादृशः कल्पितो यमवलम्ब्य पर्यावरणक्षरणनिवारणे, संजातक्षतिपूरणे, संरक्षणे च साफल्यं लभ्येत्।

**प्रमुखशब्दाः—** कविकुलगुरुः, कालिदासः, अभिज्ञानशाकुन्तलम्, पर्यावरणम्, आश्रमः, निसर्गकन्या, शकुन्तला, प्रकृतिः, कुरबकः, परहितम्।

परि आ इत्युपसर्गद्वयपूर्वकात् वृधातोर्निष्पन्नः पर्यावरणशब्दः भूमण्डले जीवगतिश्च विद्यमानं तत् समस्तं पदार्थजातमभिदधाति येनावृतं यदुपकरणञ्च भुवि जीवनं सम्भवति। भूम्यादीनि पञ्चमहाभूतानि, वृक्षवनस्पतयः सर्वे चराचरजीवा अन्ये च भुवि विद्यमानाः पदार्थाः पर्यावरणं संरचयन्ति परस्परसापेक्षतया च स्वस्वदायित्वं निर्वहन्ति। साम्प्रतं प्रकृतिनियन्त्रितेयं पर्यावरणव्यवस्था क्षीयते। विज्ञानोत्पादिता

यन्त्रविशेषास्तैरुत्पादितानि उपभोगवस्तूनि, आयुधानि, यन्त्रोत्सृष्टानि प्रदूषितरसायनानि, प्राकृतिकसंसाधनानामविचारितोपयोगः वनस्पतिच्छेदनं खनिजेन्धनस्य चात्यधिकोपयोगः पर्यावरणविनाशे हेतुतामुपयान्ति।

अद्य पर्यावरणप्रदूषणं समग्रस्यापि विश्वस्य जाज्वल्यमाना समस्या वर्तते। साम्प्रतं न केवलमस्माकमियं वसुन्धरा प्रदूषणेनातिक्रान्ता अपितु जलम्, वायुः आकाशादयोऽपि प्रदूषणाधिक्येन पीडितास्सन्ति। प्रदूषणेनानेन भूमण्डले समेषां जीवजन्तूनां जीवनं संकटापन्नं सञ्जातमस्ति। मानवजनसंख्यायाम् आशातीता वृद्धिः तीव्र–औद्योगीकरणं वनसम्पदायाः क्षतिः, अनियोजितं नगरीकरणं, वैज्ञानिकी प्रगतिः प्रौद्योगिकी प्रगतिश्च सन्ति पर्यावरणप्रदूषणस्य प्रधानानि कारणानि।

औद्योगिकक्रान्तिकारणात् बह्वयः पर्यावरणीयसमस्याः समुत्पन्नास्सन्ति। मोटरवाहनेभ्यः उद्योगेभ्यश्च निःसरन् धूमः, विषाक्तवायुः गैसीयद्रव्यञ्च वातावरणं प्रदूषयन् ओजोन–आवरणस्य क्षरणे प्रमुखं कारणम् अस्ति। ओजोन–आवरणे सूर्यरश्मीनां घातकप्रभावेण असाध्यरोगाः, वायुप्रदूषणकारणात् श्वाससम्बन्धिरोगाश्च वर्द्धमानाः सन्ति। प्रकृतेः अनुशासने विकृतौ जाते ऋतुषु अवाञ्छितं परिवर्तनमपि दृश्यते। पृथिव्याः तापः अनुदिनं वर्द्धते येन न केवलं मानवजीवनम् अपितु सम्पूर्णजीवजगतः अस्तित्वं संकटापन्नमस्ति। प्रदूषणात् प्रकृतेः मनोहराणि दृश्यानि अपि विकृतानि। स्वार्थसाधने संलग्ना मानवाः प्रकृतिमनुदिनं दूषयन्ति एव। प्रकृतेः मानवस्य च सहजः सम्बन्धो विकृतः। अस्याः विकृते कारणादेव प्राकृतिकविपत्तयः आपतन्ति कतिपयवर्षपूर्वमागतम् उत्तराखण्डराज्यस्य जलप्रलयं यस्मिन् श्रीकेदारेश्वरज्योतिर्लिङ्गधामनि सहस्राधिकाः जनाः हताः, प्रकृतेः प्रकोपादेवोत्पन्नम् आसीदिति वदन्ति वैज्ञानिकाः।

अस्माकं भारतीयानां पर्यावरणप्रदूषणनिवारणे सविशेषा भूमिका भवितुमर्हति। भारतीया हि संस्कृतिः सभ्यता जीवनपद्धतिश्च सर्वथा पर्यावरणस्यानुकूलतामाकलय्य विस्तृतिमुपयातासीत्, अतोऽस्माकं वेदवेदाङ्ग– शास्त्रपुराणकाव्येषु प्रतिपादितान् सामाजिक– राजनैतिक विचारान्, लौकिकाध्यात्मिकसिद्धान्तान्, मानवीयलोकव्यवहारान् बाह्याभ्यन्तरधार्मिकाचारांश्च समीक्ष्य पर्यावरणसंरक्षणोद्योगः सफलः

भवितुमर्हति। शोधपत्रेऽस्मिन् कविकुलगुरोः महाकवेः कालिदासस्य अभिज्ञानशाकुन्तलं नाटकमनुशील्य तस्य पर्यावरणसंरक्षणवादिताम् उद्घाटयिष्यते।

अस्माकं पर्यावरणे यदि कुत्रापि अशान्तिः विद्यते नर्हि न कल्याणाय अपितु विनाशाय एव। अतः द्युलोके, अन्तरिक्षे, पृथिव्याम् अप्सु ओषधिषु वनस्पतिषु सर्वत्र शान्तिस्थापनाय यजुर्वेदे ऋषयः स्तुवन्ति–

**ऊँ द्यौः शान्तिरन्तरिक्षं शान्तिः। पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः। सर्वं शान्तिः। शान्तिरेव शान्तिः। सा मा शान्तिरेधि।**[१]

अथर्ववेदे तु पृथिवी मातृरूपेण उल्लिखिता विद्यते। जन्मनः पश्चात् जीवाः धरायाः क्रोडे एव क्रीडन्ति। बहुविधैः आघातैः पीड्यमानापीयम् अस्मान् पालयति। अतः अस्माभिः इयं वसुन्धरा सर्वथा सर्वदा च रक्षणीया। ऋषिः कथयति–**माता भूमिः पुत्रोऽहं पृथिव्याः।**[२]

एतत् बहुधा श्रुतमस्माभिः–

**जननी जन्मभूमिश्च स्वर्गादपि गरीयसि।**

स्नानार्थं पानार्थं च स्वच्छं जलं सुलभं भवतु। जलं रोगशमने भयनिवारणे च साहाय्यं करोतु। तथाहि यजुर्वेदे उक्तम्–

**शन्नो देवीरभिष्ट्य आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः।**[३]

पुराणानामनुशीलनेन ज्ञायते यत् तदानीं वनानां संरक्षणं क्रियते स्म। वनेषु एवं महर्षयः वसन्ति स्म। तत्रैव विशिष्टानि आयोजनानि भवन्ति स्म। स्कन्दपुराणस्य रेवाखण्डे निरूपितमस्ति यत् सर्वहितकामनया मुनयः नैमिषारण्ये गोष्ठीं कृतवन्तः।[४] इत्थं संस्कृतवाङ्मये पर्यावरणविषयकं चिन्तनं प्रभूतं लभ्यते।

---

१. यजुर्वेदसंहिता, ३६/१७

२. अथर्ववेदः, १२/१/१२

३. रुद्राष्टाध्यायी – शान्त्यध्यायः

४. स्कन्दपुराणस्य रेवाखण्डे

अधीतवेदवेदाङ्गादिसकलसंस्कृतवाङ्मयः, पर्यटिताशेषभूमण्डलः, आलोकिताखिलप्राकृतिकक्रियाकौतुकः, विदितसमस्तचराचरजीवव्यवहारः, दृष्टिगोचरीकृतसरित्समुद्रशैलविपिनोद्यानपादपलतालङ्कृतवसुमतीसौन्दर्यः कविकुलशिरोमणिः कालिदासः सम्पूर्णां पर्यावरणप्रक्रियां सम्यगवगच्छति स्म। सः पर्यावरणमहत्त्वप्रतिपादने तद्रक्षणप्रवृत्तिसंवर्धने च स्वकीये विश्वविश्रुते अभिज्ञानशाकुंतलनामधेये नाटके यथावसरं सर्वजनहृद्यामुपदेशपरम्परां प्रस्तौति। स पञ्चमहाभूतानां देवरूपतां प्रतिष्ठाप्य तेषां महत्त्वमुपयोगितां च व्याख्याय संरक्षणमपि निश्चिनोति अभिज्ञानशाकुन्तलस्य नान्दीपद्ये। तत्र महाकविः कथयति यत् जल–वह्नि–वायु–यजमान–चन्द्र–सूर्य–आकाश–पृथिवीरूपया च युक्तोऽष्टमूर्त्या सर्वप्रसिद्धः प्रत्यक्षम् अनुभूयमान–माहात्म्यातिशयो भगवान् सदाशिवः सर्वेभ्यो भद्रं वितरतु–

**या सृष्टिः स्रष्टुराद्यावहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वं।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतुवस्ताभिरष्टाभिरीशः।।**[5]

अत्र महाकविः कालिदासः परमेश्वरस्याष्टमूर्तित्वं व्यवस्थाप्य जनान् तं प्रति प्रणतिप्रवणान् विदधाति, उन्मीलयति च कामपि पञ्चमहाभूतरक्षणात्मिकां दृष्टिम्।

महाकविकालिदासस्य प्रकृतेः सर्वेषु उपादानेषु मानवसंरक्षणस्य तत्त्वानि निहितानि। प्रकृतेः सर्वकल्याणरूपं यज्ञं प्रतिदिनमायोज्यत एव। यजमानरूपेण मनुष्यः यज्ञस्य वितानं वितनोतु प्रकृतेः संरक्षणं च कुर्यात् इति प्रेरयति इयं नान्दी। इयं यज्ञप्रक्रिया द्विविधं कार्यं करोति। स्थूलरूपेण आहुतिद्रव्याणां धूमाः पर्यावरणं शुद्धयन्ति। अनेकैः प्रयोगैः वैज्ञानिकाः स्वीकुर्वन्ति यत् यज्ञेन सम्पूर्णं वायुमण्डलं पवित्रीक्रियते। सूक्ष्मरूपेण यज्ञस्य भावना मानवं प्रकृतिं प्रति संवेदनशीलं करोति यया भावनया पर्यावरणस्य संरक्षणं भवति। अपि च यज्ञाहुतिप्रदानेन सह क्रियामाणेन मन्त्रोच्चारणेन

५. अभिज्ञानशाकुन्तलम् – १/१

वायुमण्डले प्रसृताभिः स्वरलहरीभिः अनेकरोगाणां चिकित्सापि संभवा। इयमाहुतिः अयं समर्पणभावश्च मानवस्य प्रकृतेश्च सहजसम्बन्धानां व्याख्यानं करोति।

शाकुन्तले नान्द्यन्ते सूत्रधारः ग्रीष्मर्त्तोः स्वाभाविकं वर्णनं करोति–

**सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः।**

**प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः।।**[६]

नट्याः गीतं दिवसस्य लुब्धत्वमिंगति। दुष्यन्तस्य बाणाद् भीतस्य तीव्रगत्या धावतः मृगस्य स्वाभाविकचेष्टानामपि वर्णनं सूक्ष्मरूपेण अभिज्ञानशाकुन्तले कृतमस्ति महाकविना। प्रकृतेरस्या निर्दोषस्य प्राणिनः हिंसा न कर्त्तव्यमित्यस्य स्पष्टादेशः वैखानसस्य शब्देषु **'आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।'**[७]

यद्यपि मृगया नृपाणां प्रियं व्यसनमासीत् परन्तु तदानीम् आश्रमवासिषु मृगेषु हिंसा न प्रयोज्या इत्यादेशस्य पालनं राज्ञा कर्त्तव्यमासीत्। तपोवनानि भारतीयसंस्कृतेरविभाज्यान्यङ्गानि सन्ति। अनेन कविना आश्रमस्य वर्णनमिदं क्रियते–वृक्षाणामधः शुककोटराग्रभागप्रच्युतनीवारा अवलोक्यन्ते क्वचित् इङ्गुदीफलभेदका अतएव विशेषेण स्निग्धाः तैलाक्ताः पाषाणाः दृश्यन्ते। मृगशावकाः स्वमातरं परित्यज्य ऋषीणाम् ऋषिपत्नीनाञ्च उत्सङ्गे विश्रामं लभन्ते। तेषां कुशाग्रछिन्नानां मुखानां पीडां ऋषिजनाः इङ्गुदीतैललेपेन दूरीकुर्वन्ति। आश्रमस्य कुटजानामङ्गणेषु नवमल्लिकालतानां केसरवृक्षाणाञ्च पंक्तयः सन्ति येषु भ्रमराः भ्रमन्ति। एतेषां सुन्दराणां तपोवनानां रक्षणं दुष्यन्तस्य कर्त्तव्यकर्म इति कथितमनेकशः यथा– **''राजरक्षितव्यानि तपोवनानि नाम''**[८] **'आश्रमपीडा यथा न भवति तथा प्रयतिष्यामहे।'**[९] कालिदासस्य पर्यावरणविषयकचिन्तने पर्यावरणस्य रक्षाकार्यं न केवलं सामान्यजनैरपितु नृपैरपि कर्तव्यमासीत्। नवमालिकाकुसुमपेलवा शकुन्तला

---

६. तदेव, १/१३

७. अभिज्ञानशाकुन्तलम्, पृ० ३४, सम्पादक– डॉ. निरुपण विद्यालंकार

८. तदेव, पृ० ६८

९. तदेव, पृ० ६९

न केवलं तातनियोगेन अपितु सोदरस्नेहभावेन वृक्षाणां सिञ्चनं करोति।[१०]

शकुन्तलायाः रूपवर्णनेऽपि प्रकृतेः विविधान्यङ्गानि प्रयुक्तानि—

**सरसिजमनुविद्धं शैवलेनापि रम्यं**
**मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।**
**इयमधिकमनोज्ञा वल्कलेनापि तन्वी,**
**किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।**[११]

नाटकस्यास्य द्वितीयेऽङ्के मृगयाशीलस्य दुष्यन्तस्य मृगयायाः विस्तृतवर्णनप्रसङ्गे वने निवसतां पशूनां स्वाभाविक्यः चेष्टाः उपवर्णिताः सन्ति। तद्यथा—

**गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं**
**छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।**
**विश्रब्धं क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले।**
**विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः।**[१२]

तपोवनस्याश्रमस्य वा जीवने बाधमानानां राक्षसानां विषये श्रुत्वा दुष्यन्तः तपोवनस्य रक्षायाः भारं स्वयमोवोद्वहति। तपोवनेषु निर्भयता प्रसारिता भवेद् अभयं च स्याद् एषः कर्त्तव्यबोधोऽस्ति दुष्यन्तस्य मनसि। कथितञ्च **'कर्तव्यपालने दीक्षिताः खलु पौरवाः।'**[१३] प्रकृत्याः सौन्दर्यं मानव—मनसि कलायाः बीजं वपति येन मनुष्यः आनन्दं लभते। शकुन्तलाया अपूर्वं लावण्यमस्मिनङ्के नूतनानि उपमानानि लभते सा तु अनाघ्रातपुष्पमिव, नखैरलूनं पल्लवमिव, अक्षतमणिरिव, अनुपभुक्तरसं नवीनं मधु इव, पुण्यानां सम्पूर्णं फलमिव चास्ति।[१४]

---

१०. तदेव, पृ० ५१
११. तदेव, १/२०
१२. तदेव, २/६
१३. तदेव, २/१६
१४. तदेव, २/१०

तृतीयेऽङ्के कामज्वरपीडिता शकुन्तला पुष्पशय्यामधिशेते मृणालैकवलयं धारयति। प्रेमविह्वला सा कमलपत्रे स्वनखैः मदनलेखं लिखति स्वप्रियतमाय, तत् सुमनोगोपितं प्रियंवदा तं प्रापयति। तयोः स्नेहभावोऽपि प्रकृतेरुपमानैरभिव्यक्तोऽस्ति। कालिदासस्य नायिकायाः शकुन्तलायाः मनसि प्रकृतेः प्रतिकणं प्रति प्रेमासीत्।

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के महर्षिः कण्वः कथयति–अहो तपोवनवृक्षाः येयं भवद् भगिनी शकुन्तला युष्मासु स्नेहाधिक्यात् युस्मभ्यं जलदानात्पूर्वं जलपानं न करोति स्म। पुष्पपल्लवालङ्कारप्रियापि युस्मासु स्नेहातिरेकात् एकमपि पल्लवं न त्रोटयति स्म। प्रत्यहं च पयोदानावसरे निरीक्षमाणायाः यस्याः युस्माकं प्रथमपुष्पोदये महानुत्सवो भवति स्म। सेयं युष्माकं मम च लालनीया वत्सा शकुन्तला पत्युर्गेहं गच्छति। अतः सर्वैर्युष्माभिः सम्भूय पतिगृहप्रायणानुगुणं शुभाशंसनपूर्वकम् अनुगमनं क्रियताम्–

**पातुं न प्रथमं व्यवस्यति जलं युष्माष्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तलापतिगृहं सर्वैरनुज्ञायताम्।।**[१५]

प्रकृतिं प्रति स्नेहस्य पराकाष्ठेयमस्य स्नेहस्य प्रतिदानमपि प्रकृतिः मुक्तहस्तेन करोति।

प्रकृतिप्रेमाभिनिवेशिनी शकुन्तला यदा पतिगृहं गन्तुं सज्जीभवति तदा केनचित्तरुणा तस्याः हेतोश्चन्द्रश्वेतं माङ्गलिकं क्षौमयुगलं प्रदत्तम्। अन्येन तरूणा पादानुरञ्जनोचितोऽलक्तकद्रवस्मर्पितः, वनदेवताभिश्च स्वकीयैः पल्ल्वानुकारिभिः करैराभरणानि प्रदत्तानि–

**क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं**
**निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।**
**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै–**

---

१५. तदेव, ४/६

**र्दत्तान्यभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः।।**[१६]

इयं 'वनस्पतिसेवा' शकुन्तलया प्रकृतेः सेवाविनिमयरूपेण एव लब्धा। यतो हि शकुन्तला स्वयं जीविता जागरिता प्रकृतिरेवासीत्। प्रकृतेरुपादानानां प्रति तस्याः प्रेमभावना अप्रतिमा।

प्रकृतिः मानवस्य सुखावसरे न केवलं प्रसन्ना भवति अपितु दुःखावसरे वेदनामप्युनभवति। एतस्मादेव कारणात् सम्पूर्णं तपोवनं तस्याः वियोगजनितदुःखेन दुःखितं भवति। पतिगृहं गच्छन्तीं शकुन्तलामवलोक्य मृग्यः स्वमुखस्थानार्धचर्वितान् कुशग्रासानुद्गिरन्ति, मयूराश्च नृत्यं त्यजन्ति, लताः जीर्णपत्राणि निपात्य अश्रूणि मुञ्चन्तीव—

**उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना मयूराः।**

**अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः।।**[१७]

वियोगावसरे शकुन्तलापि गर्भिणीमृगवध्वै चिन्ताकुला, अन्यत्र च तस्याः कृतक—पुत्रो मृगः तस्याः निवसने सज्जते।

प्रकृते रम्यतायाः प्रभावो मनुष्यस्य प्रकृतावपि भवति। पञ्चमेऽङ्के वैतालिकस्य एकं गीतं वृक्षस्य विशेषतामुद्घोषयति यत् पादपः स्वशिरसा दुःसहमातपं सहते परं शीतलच्छायादानेन आत्माश्रितानां जनानामातपजन्यं परितापं निवारयति। एवं प्रकृतिः मनुष्यं परहितं सम्पादयितुं शिक्षयति—

**स्वसुखनिरभिलाषः खिद्यते लोकहेतोः**

**प्रतिदिनमथवा ते वृत्तिरेवंविधैव।**

**अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं**

**शमयति परितापं छायया संश्रितानाम्।।**[१८]

अभिज्ञानशाकुन्तलस्य षष्ठाङ्के धीवरमाध्यमेन शकुन्तलाया स्मृतिचिह्नं मुद्रिकां प्राप्य राज्ञा दुष्यन्तेन वसन्तोत्सवः प्रतिषिद्धः। राज्ञः मनोभावमनुसरन्तः प्रजाजनाः मदनोत्सवं नारभन्ते। वासन्तिकैः तरुभिरपि देवस्य शासनं

---

१६. तदेव, ४/५

१७. तदेव, ४/१२

१८. तदेव, ५/७

प्रमाणीकृतम्। एवं रसालकलिका परागं न धत्ते कुरबक–कुसुममपि कोरकरूपेणावस्थितं तिष्ठति। पुंस्कोकिलस्य कूजनं तस्य कण्ठेऽवरुद्धम् किं बहुना कामदेवोऽपि स्वकीयं शरं निषङ्गे निक्षिपति। इदं सर्वं न केवलं दुष्यन्तस्य प्रतापमात्रेण नास्ति परं मानवस्य प्रकृतेश्च सुखदुःखयोः सहिभागितया सम्भवति। यतो हि प्रकृतिं विना मानवोपूर्ण एव। अतः दुष्यन्तस्य चित्रं शकुन्तलायाः अभिरूपस्य प्रदेशस्य चित्रणेन विना अपूर्णमेव। राजा स्वमित्रं विदूषकं कथयति यत्–

चित्रेऽस्मिन् मालिनीनदी आलेख्यास्ति यस्याः बालुकामयपुलिनप्रदेशेषु हंसद्वन्द्वानि उपविष्टानि सन्ति, उभयतश्च हिमालयस्य ते पवित्राः प्रत्यन्तपर्वता अपि मया चित्रितव्याः यत्र उपविष्टाः सन्ति हरिणाः। एवञ्चाहं शाखासक्तवल्कलस्य वृक्षस्याधः कृष्णमृगस्य विषाणे स्वकीयं वामनेत्रं घर्षयन्तीं मृगीमपि आलेखितुमिच्छामि–

**कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी**
**पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।**
**शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः**
**शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्।**[१९]

नाटकस्य सप्तमेऽङ्के वायो मार्गेण स्वर्गात् प्रत्यागच्छन् राजा दुष्यन्तः भगवतः मारीचस्य पर्णकुटीं हेमकूटपर्वते स्थितान् मन्दारवृक्षान् कल्पवृक्षांश्च, अशोक–वृक्षावलीः स्वर्णकमलयुक्तानि सरांसि दृष्ट्वा कथयति– **'स्वर्गादधिकतरं निर्वृतिस्थानम्।' 'अमृतह्रदयमिवावगाढोऽस्मि।'**[२०]

प्रकृतेः सौन्दर्यं मनुष्याय अत्यन्तमानन्दप्रदम्। तत् सौन्दर्यं विकार्यं मनुष्यः विषमेव लभते सम्प्रति। प्रकृतेः पुत्र्याः शकुन्तलायाः पुत्रो भरतः अत्र सिंहशावकेन सह क्रीडितुम् इच्छति। **'जृम्भस्व सिंह, दन्तास्ते गणयिष्ये।'** सिंहशावकाः तापसीभ्यः अपत्यसमाना आसन् तदा तैस्ह क्रीडने सर्वदमनस्य कीदृक् भयम्? प्रकृतिं प्रति अभिव्यक्तस्य प्रेम्णः विनिमये प्रेम एव लभ्यत, प्रकृतिं

१९. तदेव, ६/१७

२०. अभिज्ञानशाकुन्तलस्य सप्तमेऽङ्के, पृ० ४६६

प्रति अभिव्यक्ता द्वेषभावना मानवस्य अनिष्टमेव करोति।

पर्यावरणसंरक्षणे संतुलने च सामान्यजनैः सह राज्ञः सहयोगोऽपि वाञ्छनीयः। यदा राजा यज्ञेन इन्द्रं प्रीणाति तदा इन्द्रोऽपि काले वृष्टिं यच्छति प्रभूतजलवर्षणेन च भूलोकं पुष्णाति। अपि च महाकविः कालिदासः अस्य नाटकस्य भरतवाक्यस्य प्रथमे चरणे– **'प्रवर्ततां प्रकृतिहिताय पार्थिवः' इति कथयित्वा राजानं प्रेरयति प्रकृतिसंरक्षणाय।**[२१] राजा 'पृथिवी–पतिः' अत एव पृथिव्याः रक्षणं तस्य परमं कर्तव्यम्। पृथिव्याः प्राकृतिकपर्यावरणस्य तत्रस्थानां जनानांश्च रक्षाभारं नृपस्योपरि भवति। 'प्रकृतिहिताय' इति समस्तपदेन महाकविना प्रकृतिहितकरणाय प्रेरणा प्रदत्ताऽस्ति। प्रकृतिशब्देन प्रजाः पर्यावरणञ्चोभेऽभिधीयेते। राजा प्रजायाः हितं कर्तुं प्रवृत्तिमान् भवतु न त्वात्मतुष्टये। यदा राजा पर्यावरणस्य रक्षायै प्रयत्नशीलो भवति तर्हि जना अपि तमनुसरन्ति तस्यादेशानां पालनं च कुर्वन्ति।

अनया अनुपमया स्नेहभावनया एव प्रकृते संरक्षणं भवति। दौर्भाग्यात् स्नेहस्य अयमुदात्तभावो अद्यत्वे विलुप्तोऽस्ति। अतएव पर्यावरणप्रदूषणस्य समस्या भयावहा सञ्जाता। महानगरेषु विकसितायां कृत्रिम–जीवन–पद्धत्यां प्रकृतिप्रेम्णः न किमपि स्थानम्। यान्त्रिकजीवनेन मनुष्योऽपि यर्न्तवत् सञ्जातः। तस्य संवेदनशीलता तु प्रायेण विलुप्ता। अद्यत्वे अस्माकं पृथिवी प्रदूषणभाराक्रान्ता। लोकतन्त्रस्य प्रतिनिधिभूतैः जनैस्सह सामान्यजना अपि अस्माकं पर्यावरणस्य रक्षायै सततं चिन्तयेयुरित्यत्यस्माकं विनिवेदनम्।

**उपसंहारः–** इत्थमभिज्ञानशाकुन्तले प्रकृतिः कदापि मानवजीवनस्य प्रतिकूलं नाचरति। मानवस्य प्रकृतेश्च पूर्णसामञ्जस्यमेवात्र दृश्यते। एकेन विना अन्यस्य कल्पना अपि न सम्भवा। प्रकृतिरत्र प्रियसहचरीव मानवस्य सुखे विहसति दुःखे च रोदिति। प्रकृतेः दूरं गत्वा मनुष्यः स्वजीवनस्यानन्दक्षणान् नाशयति। प्रकृतिमानवयोः सम्बन्धस्य तथा पुनरुज्जीवनं भवेद् यथाभिज्ञानशाकुन्तले वर्णितमस्तीति साम्प्रतिकयुगस्य महती आवश्यकता वर्तते।

***

२१. तत्रैव, ७/३५, पृ० ५२३

# घोषणा–पत्र

‘अजस्रा’ नामक समाचारपत्र के सम्बन्ध में समाचारपत्र– रजिस्ट्रीकरण (केन्द्रीय) नियमावली, १९५६ के नियम ८ (१) के अधीन प्रकाशितव्य स्वामित्व–सम्बन्धी तथा अन्य ब्योरे।

**प्रारूप चार**

**१–प्रकाशन का स्थान–** अखिल भारतीय संस्कृत–परिषद्, ’देववाणी–भवनम्,’ अलीगञ्ज, लखनऊ–२२६ ०२४

**२–प्रकाशन की कालिकता–** त्रैमासिक (मकर, मेष तथा कर्क, तुला की सङ्क्रान्तियों को)

**३–मुद्रक का–** (१) नाम–श्री मनीष मेहता
(२) राष्ट्रिकता–भारतीय
(३) पता–प्नार आफसेट, १७, अशोक मार्ग, हजरतगंज लखनऊ–२२६ ०१८

**४–प्रकाशक का** (१) नाम–प्रो० प्रयाग नारायण मिश्र
(२) राष्ट्रिकता–भारतीय
(३) पता–अखिल भारतीय संस्कृत–परिषद्, ’देववाणी–भवनम्,’ लखनऊ–२२६ ०२४

**५–सम्पादक का** (१) नाम–प्रो० प्रयाग नारायण मिश्र
(२) राष्ट्रिकता–भारतीय
(३) पता–अखिल भारतीय संस्कृत–परिषद्, ’देववाणी–भवनम्,’ लखनऊ–२२६ ०२४

**६–स्वामी का नाम और पता–** अखिल भारतीय संस्कृत–परिषद्, ’देववाणी–भवनम्,’ लखनऊ–२२६ ०२४

मैं, प्रो० प्रयाग नारायण मिश्र, एतद्द्वारा घोषित करता हूँ कि ऊपर दिये हुये ब्योरे मेरे पूर्णतम ज्ञान और विश्वास के अनुसार सत्य हैं।

(ह.) प्रो० प्रयाग नारायण मिश्र
प्रकाशक (अखिल भारतीय संस्कृत–परिषद्,
लखनऊ की ओर से)

ISSN : 2278-3741

पञ्ची. सङ्ख्या आर. एन. २६२३२/७७

अङ्कौ: ३ – ४

वर्षः – ४६

दिव्या गीर्वाणभारती

अखिल भारतीय संस्कृत-परिषद्, लखनऊ